वद्रेतो अह्रयं नो अस्तु ॥ आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ॥ अ
हेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥ एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ॥ न वायन्ति सुभ्वो
देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ॥ प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृ
ञ्चन्तो अश्व्या मघानि ॥ नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ॥ धत्तं रत्नानि जरतं च सूरीन् ॥ १३ ॥ आ शुभ्रा
यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ॥ हव्यानि च प्रतिभृता वीतं नः ॥
नानि श्रुतं नः ॥ प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे ॥ तिरो अर्यो हवनानि श्रुतं नः ॥ प्र वां रथो मनोजवा इयर्ति तिरो रजां
स्यश्विना शतोतिः ॥ अस्मभ्यं सूर्यावसू इयानः ॥ अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ॥ आ वल्गू विप्रो ववृती
त हव्यैः ॥ चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ॥ यो वामोमानं दधते प्रियः सन् ॥ १४ ॥ उत त्यद्वां जुरते अश्विना भू
च्च्यवानाय प्रतीत्यं हविर्दे ॥ अधि यद्वर्प इतऊति धत्थः ॥ उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ॥ निरीं पर्षदरा
वा यो युवाकुः ॥ वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ॥ यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः
॥ एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ॥ इषा तं वर्धदघ्न्या पयोभिर्यूयं० ॥ १५ ॥ आ वां रथो रोदसी बद्बधानो
हिरण्ययो वृषभिर्यात्वश्वैः ॥ घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ स पप्रथानो अभि पञ्च भूमा त्रिवन्धु
रो मनसा यातु युक्तः ॥ विशो येन गच्छथो देवयन्तीः कुत्रा चिद्याममश्विना दधाना ॥ स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुम
न्तं पिबाथः ॥ वि वां रथो वध्वा यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम् ॥ युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ॥
यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥ यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ॥ तेन नः शं यो
रुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातम् ॥ पुरुत्रा हि वां मतिभिर्हवन्ते मा वाम
न्ये नि यमन्देवयन्तः ॥ युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः ॥ पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्
ता ॥ नू मे० ॥ धत्तं० ॥ १६ ॥ आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्याम् ॥ अश्वो न वाजी शुनपृष्ठो अस्थादा यत्से
दथुर्ध्रुवसे न योनिम् ॥ सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ॥ यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सु

युजा युजानः॥ यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु॥ नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता॥
चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणां॥ पुरूणि रत्ना दधतौ न्यस्मे अनु पूर्वाणि चख्यथुर्युगानि॥ शुश्रुवां
सा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणां॥ प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा॥ यो वां यज्ञो ना
सत्या हविष्मान्कृतब्रह्मा समर्यो भवाति॥ उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्यां॥ इयं मनीषा इयमश्वि
ना गीरिमां सुवृक्तिं वृषणा जुषेथां॥ इमा ब्रह्माणि युवयून्यग्मन्यू॰॥ २.७॥ अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररु
षाय पन्थां॥ अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतं॥ उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता॥
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः॥ आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु॥ स्यूमगभस्ति
मृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथां॥ यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्रयामा॥ आ न एना नासत्यो
प यातमभि यद्वां विश्वप्स्न्यो जिगाति॥ युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वं॥ निरंहसस्तमसः स्पर्तमत्रिं नि जा
हुषं शिथिरे धातमन्तः॥ इयं॰ मनीषा॰॥ २.८॥ आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातं॥ अभि वां विश्वा नियुतः
सचन्ते स्पार्हया श्रिया तन्वा शुभाना॥ आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन॥ युवोर्हि नः सख्या पित्र्याणि समा
नो बन्धुरुत तस्य वित्तं॥ उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः॥ आविवासन्रोदसी धिष्ण्येमे
अच्छा विप्रो नासत्या विवक्ति॥ वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते॥ ऊर्ध्वं भानुं सविता देवो अश्रे
द्बृहदग्नयः समिधा जरन्ते॥ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्॥ आ विश्वतः पाञ्चजन्येन राया यू
यू॰॥ २.९॥ अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः॥ पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः॥
न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च॥ अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान्॥ अहे
म यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथां॥ श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः॥ उप त्या वह्नी
गमतो विशं नो रक्षोहणा सम्भृता वीळुपाणी॥ समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन॥ आपु॰॥ आश्वि॰
॥ ३.०॥ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना॥ अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः॥ युवं चित्रं ददथुर्भो
जनं नरा चोदेथां सूनृतावते॥ अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु॥ आ यातमुप भूषतं मध्वः पिबतमश्वि

ना॥ दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतं॥ अश्वासो ये वामुप दाशुषो गृहं युवां दीयन्ति बिभ्रतः॥ मक्षूयुभिर्नरा हयेभिरश्वि
ना देवा यातमस्मयू॥ अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः॥ ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या॥ प्र ये ययुरवृका
सो रथा इव नृपातारो जनानां॥ उत स्वेन शवसा शूशुवुर्नर उत क्षियन्ति सुक्षितिं॥ ३.१॥ व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना
महिमानमागात्॥ अप द्रुहस्तम आवरजुष्टमङ्गिरस्तमा पथ्या अजीगः॥ महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि॥ चित्रं
रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युं॥ एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः॥ जनयन्तो दैव्यानि व्रतान्यापृणन्तो
अन्तरिक्षा व्यस्थुः॥ एषा स्या युजाना पराकात्पञ्च क्षितीः परि सद्यो जिगाति॥ अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी
॥ वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनां॥ ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना॥ प्रति द्युतानामरु
षासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः॥ याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय॥ सत्या सत्येभिर्महती महद्भिर्देवी
देवेभिर्यजता यजत्रैः॥ रुजद्दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त॥ नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे
॥ मा नो बर्हिः पुरुषता निदे कर्यू॰॥ ३.२॥ उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्॥ क्रत्वा देवानामजनिष्ट
चक्षुराविरकर्भुवनं विश्वमुषाः॥ प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः॥ अभूदु केतुरुषसः पुरस्तात्प्रतीच्या
गादधि हर्म्येभ्यः॥ तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य॥ यतः परि जार इवाचरन्त्युषो ददृक्षे न पुनर्यतीव॥ त इद्दे
वानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः॥ गूळ्हं ज्योतिः पितरो अन्वविन्दन्सत्यमन्त्रा अजनयन्नुषासं॥ समान ऊर्वे अधि सं
गतासः सं जानते न यतन्ते मिथस्ते॥ ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः॥ प्रति त्वा स्तोमैरीळते वसिष्ठा
उषर्बुधः सुभगे तुष्टुवांसः॥ गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व॥ एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः॥ दीर्घश्रुतं रयिमस्मे दधाना
यू॰॥ ३.३॥ उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै॥ अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि॥ विश्वं प्र
तीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत्॥ हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि॥ देवानां चक्षुः सुभगा वहन्ती
श्वेतं नयन्ती सुदृशीकमश्वं॥ उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता॥ अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं
कृधी नः॥ यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि॥ अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः॥ इषं च नो दधती
विश्ववारे गोमदश्वावद्रथवच्च राधः॥ यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः॥ सास्मासु धा रयिमृष्वं बृहन्तं यू॰॥ ३.४॥
प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते॥ उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि॥ प्रति षीमग्निर्ज
रते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः॥ उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी॥ एता उ त्याः प्रत्यदृश्रन्पुरस्ता

ऋं०पं०
५८

ज्योतिर्यच्छन्तीरुषसो विभातीः॥ अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम्॥ अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं वि
भातीम्॥ आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति॥ प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च॥ तिल्विला
यध्वमुषसो विभातीर्यू॰॥ २५॥ व्युषा आवः पथ्या जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती॥ सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्यो रो
दसी चक्षसावः॥ व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते॥ सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू॥ अभूदु
षा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि॥ वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि॥ तावदुषो राधो अस्मभ्यं रास्व
यावत्स्तोतृभ्यो अरदो गृणाना॥ यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः॥ देवंदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ई
रयन्ती॥ व्युच्छन्ती नः सनये धियो धा यूयं पा॰॥ २६॥ प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन्॥ विवर्तयन्ती रजसी
समन्ते आविष्कृण्वती भुवनानि विश्वा॥ एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि॥ अग्र एति युवतिरह्रयाणा प्रा
चिकितत्सूर्यं यज्ञमग्निम्॥ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः॥ घृतं दुहाना विश्वतः प्रपीता यूयं पा॰॥ २७॥
इति पंचमाष्टके पंचमोध्यायः॥ ॥ ॐ॥ प्रत्यु अदर्श्यायत्युच्छन्ती दुहिता दिवः॥ अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणो
ति सूनरी॥ उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत्॥ तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि॥ प्रति त्वा दुहितर्दिव उ
षो जीरा अभुत्स्महि॥ या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः॥ उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे॥ त
स्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः॥ तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम्॥ यत्ते दिवो दुहितर्मर्तभोजनं तद्रा
स्व भुनजामहै॥ श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः॥ चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः॥
॥१॥ इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम्॥ दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः
॥ सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू॥ विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः
॥ अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम्॥ इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः॥ युवामि
द्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः॥ ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे॥ इन्द्रावरुणा राम
यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना॥ क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते॥ २॥ ५८
महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम्॥ अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भू
यसः॥ न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन॥ यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परि

ह्वृतिः॥ अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः॥ युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम्॥ अ
स्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा॥ यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु॥ अस्मे इ
न्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः॥ अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥ ३॥
युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः॥ दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम्॥
यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम्॥ यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम्॥ सं
भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत्॥ अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम्॥ इ
न्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम्॥ ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः॥ इ
न्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः॥ युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि॥ ४॥ युवां ह
वन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये॥ यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह॥ दश रा
जानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः॥ सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु॥ दा
शराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम्॥ श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः
॥ वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा॥ हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छ
तं॥ अस्मे॰॥ अनु॰॥ ५॥ आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः॥ प्र वां घृताची बाह्वोर्दधाना परि
त्मना विषुरूपा जिगाति॥ युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः॥ परि नो हेळो वरुणस्य वृज्या उ
रुं न इन्द्रः कृणवदु लोकम्॥ कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता॥ उपो रयिर्देवजूतो न एतु प्र णः स्पा
र्हाभिरूतिभिस्तिरेतम्॥ अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम्॥ प्र य आदित्यो अनृता मिनात्यमिता शू
रो दयते वसूनि॥ इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना॥ सुरत्नासो देववीतिं गमेम यूयं पा॰॥ ८॥ पुनीषे
वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत्॥ घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके॥ स्प
र्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति॥ युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः॥ आपश्चिद्धि

B5
1915

ऋ०सं० ८
१०

यशसः सदःसु देवीरिंद्रं वरुणं देवता धुः॥ कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हंति॥ स सुक्रतुर्ऋतचिदस्तु होता य
आदित्य शवसा वां नमस्वान्॥ आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान्॥ इयं०॥ व० ॥ ७ ॥ धीरा त्वस्य महिना जनूं
षि वि यस्तस्तंभ रोदसी चिदुर्वी॥ प्र नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम॥ उत स्वया तन्वा३ सं वदे तत्कदा न्वंतर्वरुणे भुव
नि॥ किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभिख्यं॥ पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं॥ समानमिन्मे क
वयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते॥ किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं॥ प्र तन्मे वोचो दूळभ स्वधावोव त्वा
नेना नमसा तुर इयां॥ अव द्रुग्धानि पित्र्या सृजा नोव या वयं चकृमा तनूभिः॥ अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठं॥ न स
स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः॥ अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता॥ अरं दासो न मी
ळ्हुषे कराण्यहं देवाय भूर्णयेनागाः॥ अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति॥ अयं सु तुभ्यं वरुण स्वधावो हृदि स्तो
म उपश्रितश्चिदस्तु॥ शं नः क्षेमे शमु योगे नो अस्तु यूयं०॥ ८ ॥ रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनां॥ सर्गो न सृष्टो
अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः॥ आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान्॥ अंतर्मही बृहती रोदसीमे
विश्वा ते धाम वरुण प्रियाणि॥ परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यंति रोदसी सुमेके॥ ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इष
यंत मन्म॥ उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति॥ विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन्॥ तिस्रो
द्यावो निहिता अंतरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः॥ गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंखं हिरण्ययं शुभे कं॥ अव सिंधुं वरुणो
द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान्॥ गंभीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा॥ यो मृळयाति चक्रुषे चिदागो
वयं स्याम वरुणे अनागाः॥ अनु व्रतान्यदितेर्ऋधंतो यूयं०॥ ९ ॥ प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व॥ य ईमर्वांचं
करते यजत्रं सहस्रामघं वृषणं बृहंतं॥ अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि॥ स्वर्यदश्मन्नधिपा उ अंधोभि मा वपु
र्दृशये निनीयात्॥ आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यं॥ अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कं॥ वसिष्ठं
ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः॥ स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः॥ क्व त्यानि नौ सख्या ब
भूवुः सचावहे यदवृकं पुरा चित्॥ बृहंतं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते॥ य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि
कृणवत्सखा ते॥ मा त एनस्वंतो यक्षिन्भुजेम यंधि ष्मा विप्रः स्तुवते वरूथं॥ ध्रुवासु त्वासु क्षितिषु क्षियंतो व्यस्मत्पाशं वरुणो मुमो
चत्॥ अवो वन्वाना अदितेरुपस्थाद्यूयं०॥ १० ॥ मो षु वरुण मृन्मयं गृहं राजन्नहं गमं॥ मृळा सुक्षत्र मृळय॥ यदेमि प्रस्फुरन्निव

राम
१७

दृतिर्न ध्मातो अद्रिवः॥ मृळा०॥ क्रत्वः समह दीनता प्रतीपं जगमा शुचे॥ मृळा०॥ अपां मध्ये तस्थिवांसं तृष्णाविदज्जरिता
रं॥ मृळा०॥ यत्किं चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्या३श्चरामसि॥ अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो दे
व रीरिषः॥ ११ ॥ प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमंतः सुतासः॥ वह वायो नियुतो याह्यच्छा पिबा सुतस्यांध
सो मदाय॥ ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो॥ कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते
वाज्यस्य॥ राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवं॥ अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं नि
रेके॥ उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः॥ गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रु
रापः॥ ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहंति॥ इंद्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचंते॥
ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः॥ इंद्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः॥
अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः॥ वाजयंतः स्ववसे हुवेम यूयं०॥ १२ ॥ कुविदंग नमसा
ये वृधासः पुरा देवा अनवद्यास आसन्॥ ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण॥ उशंता दूता न दभाय गो
पा मासश्च पाथः शरदश्च पूर्वीः॥ इंद्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यं॥ पीवोअन्नाँ रयिवृधः
सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः॥ ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः॥ यावत्तरस्त
न्वो यावदोजो यावन्नरश्चक्षसा दीध्यानाः॥ शुचिं सोमं शुचिपा पातमस्मे इंद्रवायू सदतं बर्हिरेदं॥ नियुवा
ना नियुतः स्पार्हवीरा इंद्रवायू सरथं यातमर्वाक्॥ इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे॥ या वां शतं नियुतो याः
सहस्रमिंद्रवायू विश्ववाराः सचंते॥ आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः॥ अर्वं०॥ व० ॥ १३ ॥ आ वायो
भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार॥ उपो ते अंधो मद्यमयामि यस्य देव दधिषे पूर्वपेयं॥ प्र सोता जीरो अध्वरे
ष्वस्थात्सोममिंद्राय वायवे पिबध्यै॥ प्र यद्वां मध्वो अग्रियं भरंत्यध्वर्यवो देवयंतः शचीभिः॥ प्र याभिर्यासि दाश्वांसमच्छा नि
युद्भिर्वायविष्टये दुरोणे॥ नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः॥ ये वायव इंद्रमादनास आदेवासो नितोश
नासो अर्यः॥ घ्नंतो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान्॥ आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरु
प याहि यज्ञं॥ वायो अस्मिन्सवने मादयस्व यूयं०॥ १४ ॥ शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां॥ उभा हि वां

37
1915

[illegible]

राम
१८

[illegible]

39
19.15

सं॰ पं॰ ८
१९

[illegible]

राम॰
१९

[illegible]

41
1915

सं०१०७
२०

मुं ॥ [illegible] ॥ [illegible] अभि [illegible] ॥ पृथिवीनः
पार्थिवा [illegible] ॥ इंद्र [illegible] ॥ [illegible]
[illegible] ॥ २ ॥ इनिमंडलं
[illegible] ॥ इंद्र [illegible]
[illegible] ॥ अस्माकं
[illegible]
[illegible] ॥ १० ॥ [illegible]
[illegible] ॥ [illegible] ॥ [illegible] तेमनः ॥
[illegible] पुरंदरः ॥ याभिः [illegible]
[illegible]

रामू
२०

[illegible] सोमपीतये
[illegible]
[illegible]

43
1915

[illegible]

राम

21

[illegible]

45
1915

सं०पं० ७
२२

वृ सुमन्मे ॥ परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ॥ अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥ स्थूरं रा
धः शताश्वं कुरंगस्य दिविष्टिषु ॥ राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥ धीभिः सातानि काण्वस्य वाजिनः प्रियमे
धैरभिद्युभिः ॥ षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥ वृक्षाश्चिन्मे अभिपित्वे अरारणुः ॥ गां भजन्त मेहनाश्वं
भजन्त मेहना ॥ २२ ॥ इति पंचमस्य सप्तमोऽध्यायः ॥ ॥ ॐ दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् ॥ वि भानुं
विश्वधातनत् ॥ नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा ॥ सचेथे अश्विनोषसं ॥ युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्ष
त ॥ वाचं दूतो यथोहिषे ॥ पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू ॥ स्तुषे कण्वासो अश्विना ॥ मंहिष्ठा वाजसातमेषयन्ता
शुभस्पती ॥ गन्तारा दाशुषो गृहं ॥ १ ॥ ता सुदेवाय दाशुषे सुमेधामवितारिणीं ॥ घृतैर्गव्यूतिमुक्षतं ॥ आ नः स्तोममु
प द्रवत् तूयं श्येनेभिराशुभिः ॥ यातमश्वेभिरश्विना ॥ येभिस्तिस्रः परावतो दिवो विश्वानि रोचना ॥ त्रीँरक्तून्परिदी
यथः ॥ उत नो गोमतीरिष उत सातीरहर्विदा ॥ वि पथः सातये सितं ॥ आ नो गोमन्तमश्विना सुवीरं सुरथं रयिं ॥ वोळ्हमश्वा
वतीरिषः ॥ २ ॥ वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी ॥ पिबतं सोम्यं मधु ॥ अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः
छर्दिर्यन्तमदाभ्यं ॥ नि षु ब्रह्म जनानां याविष्टं तूयमा गतं ॥ मो ष्वन्याँ उपारतं ॥ अस्य पिबतमश्विना युवं मदस्य
चारुणः ॥ मध्वो रातस्य धिष्ण्या ॥ अस्मे आ वहतं रयिं शतवन्तं सहस्रिणं ॥ पुरुक्षुं विश्वधायसं ॥ ३ ॥ पुरुत्रा चिद्धि
वां नरा विह्वयन्ते मनीषिणः ॥ वाघद्भिरश्विना गतं ॥ जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः ॥ युवां हवन्ते अश्विना ॥
अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः ॥ युवाभ्यां भूत्वश्विना ॥ यो ह वां मधुनो दृतिराहितो रथचर्षणे ॥ ततः पि सं
बतमश्विना ॥ तेन नो वाजिनीवसू पश्वे तोकाय शं गवे ॥ वहतं पीवरीरिषः ॥ ४ ॥ उत नो दिव्या इष उत सिन्धूँरहर्विदा ॥
अप द्वारेव वर्षथः ॥ कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा ॥ यद्वां रथो विभिष्पतात् ॥ युवं कण्वाय नासत्या ऋपि
रिप्ताय हर्म्ये ॥ शश्वदूतीर्दशस्यथः ॥ ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः ॥ यद्वां वृषण्वसू हुवे ॥ यथा चि राम्
त्कण्वमावतं प्रियमेधमुपस्तुतं ॥ अत्रिं शिञ्जारमश्विना ॥ ५ ॥ यथोत कृत्व्ये धनेंशुं गोष्वगस्त्यं ॥ यथा वाजेषु सोभरिं ॥ ए २२
तावद्वां वृषण्वसू अतो वा भूयो अश्विना ॥ गृणन्तः सुम्नमीमहे ॥ रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना ॥ आ हि स्थाथो
दिविस्पृशं ॥ हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः ॥ उभा चक्रा हिरण्यया ॥ तेन नो वाजिनीवसू परावतश्चिदा गतं ॥

उपेमां सुष्टुतिं मम ॥ ६ ॥ आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना ॥ इषो दासीरमर्त्या ॥ आ नो द्युम्नैरा श्रवोभिरा राया या 47 / 1915
तमश्विना ॥ पुरुश्चन्द्रा नासत्या ॥ एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः ॥ अच्छा स्वध्वरं जनं ॥ रथं वामनुगायसं य इ
षा वर्तते सह ॥ न चक्रमभि बाधते ॥ हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः ॥ धीजवना नासत्या ॥ ७ ॥ युवं मृगं जागृवां
सं स्वदथो वा वृषण्वसू ॥ ता नः पृङ्क्तमिषा रयिं ॥ ता मे अश्विना सनीनां विद्यातं नवानां ॥ यथा चिच्चैद्यः कशुः शतमुष्ट्रा
नां ददत्सहस्रा दश गोनां ॥ यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ॥ अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो ज
नाः ॥ माकिरेना पथा गाद्येनेमे यन्ति चेदयः ॥ अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥ ८ ॥ महाँ इन्द्रो य ओजसा प
र्जन्यो वृष्टिमाँ इव ॥ स्तोमैर्वत्सस्य वावृधे ॥ प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ॥ विप्रा ऋतस्य वाहसा ॥ कण्वा
इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनं ॥ जामि ब्रुवत आयुधं ॥ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ॥ समुद्रायेव सि
न्धवः ॥ ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ॥ इन्द्रश्चर्मेव रोदसी ॥ ९ ॥ वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्व
णा ॥ शिरो बिभेद वृष्णिना ॥ इमा अभि प्र णोनुमो विपामग्रेषु धीतयः ॥ अग्नेः शोचिर्न दिद्युतः ॥ गुहा सतीरुप
त्मना प्र यच्छोचन्त धीतयः ॥ कण्वा ऋतस्य धारया ॥ प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनं ॥ प्र ब्रह्म पूर्वचित्तये ॥
अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ ॥ अहं सूर्य इवाजनि ॥ १० ॥ अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् ॥ येनेन्द्रः शुष्ममिद्दधे ॥
ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः ॥ ममेद्वर्धस्व सुष्टुतः ॥ यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् ॥ अपः समुद्रमैरयत् ॥ नि शुष्ण
इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि ॥ वृषा ह्युग्र शृण्विषे ॥ न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणं ॥ न विव्यचन्त भूमयः ॥ ११ ॥ यस्त इन्द्र
महीरपः स्तभूयमान आशयत् ॥ नि तं पद्यासु शिश्नथः ॥ य इमे रोदसी मही समीची समजग्रभीत् ॥ तमोभिरिन्द्र तं गुहः ॥ य इन्द्र यत
यस्त्वा भृगवो ये च तुष्टुवुः ॥ ममेदुग्र श्रुधी हवं ॥ इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरं ॥ एनामृतस्य पिप्युषीः ॥ या इन्द्र प्रस्वस्त्वासा
गर्भमचक्रिरन् ॥ परि धर्मेव सूर्यं ॥ १२ ॥ त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः ॥ त्वां सुतास इन्दवः ॥ तवेदिन्द्र प्रणीतिषूत प्र
शस्तिरद्रिवः ॥ यज्ञो वितन्तसाय्यः ॥ आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीं ॥ उत प्रजां सुवीर्यं ॥ उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा ॥
अग्रे विक्षु प्रदीदयत् ॥ अभि व्रजं न तत्निषे सूर उपाकचक्षसं ॥ यदिन्द्र मृळयासि नः ॥ १३ ॥ यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः
॥ महाँ अपार ओजसा ॥ तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये ॥ उरुज्रयसमिन्दुभिः ॥ उपह्वरे गिरीणां संगथे च नदीनां ॥ धिया वि

मं॰पं॰८

२२

धियो अजायत॥ अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति॥ यतो विपान एजति॥ आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरं॥ परो यदिध्यते दिवा॥१४॥ कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यं॥ उतो शविष्ठ वृष्ण्यं॥ इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव॥ उत प्र वर्धया मतिं॥ उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः॥ विप्रा अतक्ष्म जीवसे॥ अभि कण्वा अनूषतापो न प्रवता यतीः॥ इन्द्रं वनन्वती मतिः॥ इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः॥ अनुत्तमन्युमजरं॥१५ आ नो याहि परावतो हरिभ्यां हर्यताभ्यां॥ इममिन्द्र सुतं पिब॥ त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः॥ हवन्ते वाजसातये॥ अनु त्वा रोदसी उभे चक्रं न वर्त्येतशं॥ अनु सुवानास इन्दवः॥ मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति॥ मत्स्वा विवस्वतो मती॥ वावृधान उप द्यवि वृषा वज्र्यरोरवीत्॥ वृत्रहा सोमपातमः॥१६॥ ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा॥ इन्द्र चोष्कूयसे वसु॥ अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः॥ शतं वहन्तु हरयः॥ इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीं॥ कण्वा उक्थेन वावृधुः॥ इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः॥ इन्द्रं सनिष्युरूतये॥ अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी॥ सोमपेयाय वक्षतः॥ शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे॥ राधांसि याद्वानां॥ त्रीणि शतान्यर्वतां सहस्रा दश गोनां॥ ददुष्पज्राय साम्ने॥ उदानट् ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत्॥ श्रवसा याद्वं जनं॥१७॥ प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्॥ वि पर्वतेषु राजथ॥ यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वं॥ नि पर्वता अहासत॥ उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः॥ धुक्षन्त पिप्युषीमिषं॥ वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्॥ यद्यामं यान्ति वायुभिः॥ नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे॥ महे शुष्माय येमिरे॥१८॥ युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे॥ युष्मान्प्रयत्यध्वरे॥ उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते॥ वाश्रा अधि ष्णुना दिवः॥ सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे॥ ते भानुभिर्वि तस्थिरे॥ इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः॥ इमं मे वनता हवं॥ त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु॥ उत्सं कवन्धमुद्रिणं॥१९ मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे॥ आ तू न उप गन्तन॥ यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे॥ उत प्रचेतसो मदे॥ आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसं॥ इयर्ता मरुतो दिवः॥ अधीव यद्गिरीणां यामं शुभ्रा अचिध्वं॥ सुवानैर्मन्दध्व इन्दुभिः॥ एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः॥ अदाभ्यस्य मन्मभिः॥२० ये द्रप्सा इव रोदसी धमन्त्यनु वृष्टिभिः॥ उत्सं दुहन्तो अक्षितं॥ उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः॥ उत्स्तोमैः पृश्निमातरः॥ येनाव तुर्वशं यदुं येन कण्वं धनस्पृतं॥ राये सु तस्य धीमहि॥ इमा उ वः सुदानवो घृतं न पिप्युषीरिषः॥ वर्धान्काण्वस्य मन्मभिः॥ क्व नूनं सुदानवो मदथा वृक्तबर्हिषः॥ ब्रह्मा को वः सपर्यति २१॥

हेरंब

२३

नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः॥ शर्धाँ ऋतस्य जिन्वथ॥ समु त्ये महतीरपः सं क्षोणी समु सूर्यं॥ सं वज्रं पर्वशो दधुः॥ वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः॥ चक्राणा वृष्णि पौंस्यं॥ अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुं॥ अन्विन्द्रं वृत्रतूर्ये॥ विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः॥ शुभ्रा व्यञ्जत श्रिये २२॥ उशना यत्परावत उक्ष्णो रन्ध्रमयातन॥ द्यौर्न चक्रदद्भिया॥ आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः॥ देवास उप गन्तन॥ यदेषां पृषती रथे प्रष्टिर्वहति रोहितः॥ यान्ति शुभ्रा रिणन्नपः॥ सुषोमे शर्यणावत्यार्जीके पस्त्यावति॥ ययुर्निचक्रया नरः॥ कदा गच्छाथ मरुत इत्था विप्रं हवमानं॥ मार्डीकेभिर्नाधमानं॥२३ कद्ध नूनं कधप्रियो यदिन्द्रमजहातन॥ को वः सखित्व ओहते॥ सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः॥ स्तुषे हिरण्यवाशीभिः॥ ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय॥ ववृत्यां चित्रवाजान्॥ गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः॥ पर्वताश्चिन्नि येमिरे॥ आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः॥ धातारः स्तुवते वयः॥ अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा॥ ते भानुभिर्वि तस्थिरे॥ २४ ॥ आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवं॥ दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु॥ आ नूनं यातमश्विना रथेन सूर्यत्वचा॥ भुजी हिरण्यपेशसा कवी गम्भीरचेतसा॥ आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः॥ पिबाथो अश्विना मधु कण्वानां सवने सुतं॥ आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया॥ पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु॥ आ नो यातमुपश्रुत्यश्विना सोमपीतये॥ स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा॥२५ ॥ यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा॥ आ यातमश्विना गतमुपेमां सुष्टुतिं मम॥ दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा॥ धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता॥ किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना॥ पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत्॥ आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना॥ अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा॥ आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू॥ विश्वान्यश्विना युवं प्र धीतान्यगच्छतं॥२६ ॥ अतः सहस्रनिर्णिजा रथेना यातमश्विना॥ वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः॥ पुरुमन्द्रा पुरूवसू मनोतरा रयीणां॥ स्तोमं मे अश्विनाविममभि वह्नी अनूषातां॥ आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया॥ कृतं न ऋत्वियावतो मा नो रीरधतं निदे॥ यन्नासत्या परावति यद्वा स्थो अध्यम्बरे॥ अतः स०॥ यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत्॥ तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतं॥२७ प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवं॥ यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती॥ आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा॥ कृतं नः सुश्रियो नरेमा दातमभिष्टये॥ आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत॥ राजन्तावध्वराणामश्विना यामहूतिषु॥ आ नो गन्तं मयोभुवाश्विना शम्भुवा युवं॥ यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत्॥ याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजं॥ याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा॥ २८ ॥ याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने॥ ताभिः ष्वस्माँ अश्विना प्रावतं वाजसातये॥ प्र वां स्तोमाः

4.1
1915

पं॰ ४॰८
२४

सुवृक्तयो गिरो वर्धंत्वश्विना॥ पुरुत्रा वृत्रहंतमा ता नो भूतं पुरुस्पृहा॥ त्रीणि पदान्यश्विनोराविः सांति गुहा परः॥ कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि॥२९॥ आ नूनमश्विना युवं वत्सस्य गंतमवसे॥ प्रास्मै यच्छतमवृकं पृथु छर्दिर्युयुतं या अरातयः॥ यदंतरिक्षे यद्दिवि यत्पंच मानुषाँ अनु॥ नृम्णं तद्धत्तमश्विना॥ ये वां दंसांस्यश्विना विप्रासः परिमामृशुः॥ एवेत्काण्वस्य बोधतं॥ अयं वां घर्मो अश्विना स्तोमेन परिषिच्यते॥ अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः॥ यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतं॥ तेन माविष्टमश्विना॥३०॥ यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः॥ अयं वां वत्सो मतिभिर्न विंधते हविष्मंतं हि गच्छथः॥ आ नूनमश्विनोरृषिः स्तोमं चिकेत वामया॥ आ सोमं मधुमत्तमं घर्मं सिंचादथर्वणि॥ आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना॥ आ वां स्तोमा इमे मम नभो न चुच्यवीरत॥ यदद्य वां नासत्योक्थैराचुच्युवीमहि॥ यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतं॥ यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव॥ पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथां॥३१॥ यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा॥ वर्तिस्तोकाय तनयाय यातं॥ यदिंद्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा॥ यदादित्येभिरृभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः॥ यदद्याश्विनावहं हुवेय वाजसातये॥ यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः॥ आ नूनं यातमश्विनेमा हव्यानि वां हिता॥ इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ॥ यन्नासत्या पराके अर्वाके अस्ति भेषजं॥ तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतं ३२॥ अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः॥ व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः॥ प्र बोधयोषो अश्विना प्र देवि सूनृते महि॥ प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत्॥ यदुषो यासि भानुना सं सूर्येण रोचसे॥ आ हायमश्विनो रथो वर्तिर्याति नृपाय्यं॥ यदापीतासो अंशवो गावो न दुह्र ऊधभिः॥ यद्वा वाणीरनूषत प्र देवयंतो अश्विना॥ प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे॥ प्र दक्षाय प्रचेतसा॥ यन्नूनं धीभिरश्विना पितुर्योना निषीदथः॥ यद्वा सुम्नेभिरुक्थ्या॥३३॥ यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः॥ यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना॥ यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतं॥ बृहस्पतिं विश्वान्देवाँ अहं हुव इंद्राविष्णू अश्विनावाशुहेषसा॥ त्या न्वश्विना हुवे सुदंससा गृभे कृता॥ ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यं॥ ययोरधि प्र यज्ञा असूरे संति सूरयः॥ ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु॥ यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू॥ यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतं॥ यदंतरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु॥ यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना॥३४॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥ त्वमसि प्रशस्यो विदथेषु सहंत्य॥ अग्ने रथीरध्वराणां॥ स त्वमस्मदप द्विषो युयोधि जातवेदः॥ अदेवीरग्ने अरातीः॥ अंति चित्संतमह यज्ञं मर्तस्य रिपोः॥ नोप वेषि जातवेदः॥ मर्ता अमर्त्यस्य ते भूरि नाम मनामहे॥ विप्रासो जातवेदसः॥३५॥ विप्रं विप्रासोऽवसे देवं मर्तास ऊतये॥ अग्निं गीर्भिर्हवामहे॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्॥ अग्ने त्वांकामया गिरा॥ पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः॥ समत्सु त्वा हवामहे॥ समत्स्वग्निमवसे वाजयंतो हवामहे॥ वाजेषु चित्रराधसं॥ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि॥ स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व॥३६॥ इति पंचमाष्टके अष्टमोध्यायः॥ ८ ॥८॥

हेरंब
२४

57
1915

अथ पंचाष्टकभाष्य प्रारंभः ५१७५

वे॰ भा॰ पं॰
१

श्रीगणेशाय नमः॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥१॥ अथ पंचमाष्टके प्र
थमोऽध्याय आरंभः॥ षष्ठमंडले षष्ठानुवाके चतुर्दश सूक्तानि तत्र सूक्तेन रेसेकादशर्चं प्रथमं सूक्तं मंडलद्रष्टा बार्हस्पत्योभा
रद्वाजः ऋषिः त्रिष्टुप् छंदः अश्विनौ देवता १ सुषेव्यं रति दिवः द्युलोकस्य नराः नेतारौ अस्य भुवनस्य प्रसंतापसनवंतोई श्व
रौ अश्विना अश्विनौ सुष्टपे स्तोमैः स्तोतुं अर्कैः मंत्र साध्यैः शस्त्रैः जरमाणः स्तुतिं कुर्वन् हुवे आह्वयामि कीदृशौ यायोः सद्यः सद्य
एव उस्राश्च तूर्णांपिपारकोऽश्रुषि अश्रुषो निशायाः समाप्तौ अपः पृथिव्याः अंतात् पर्यंतान् उरुउरूणि बहूनि सिरूपस्थावरकाणि त
मांसि अपरिपरितः युयूषतः पृथक् कुरुतः २ ता यज्ञमिति तौ प्रसिद्धौ अश्विनौ यज्ञं अस्मदीयं यागं आचक्राणा आभि
चक्राणौ शुचिभिः निर्मलैः भानुभिः स्वीयैः तेजोभिः रथस्य स्वकीयस्य भानुं दीप्तिं रुरुचुः रोचयतेऽपि च पुरूणि बहूनि वरांसि ते
जांसि अमिता अपरिमितानि मिमाना निर्मिमाणौ अपः उदकस्य धन्वानि मरुप्रदेशान् अजान् स्वकीयान् अश्वान् अतियाथः
अतिक्रमयथः ३ ता ह त्यदिति तौ ह खलु उग्रौ उग्रौ अश्विनौ युवां अरथ्यं असमर्थं यत्र वर्तिः यजमानस्य स्यत् तद्गृहं
स समर्द्धं पितुं गच्छथः किंच द्रुतौ द्रुतौ धियः स्तोत्रं प्रहितैः एषणैः कामैः मनोजवेभिः मनोवेगैः स्वीयैः अश्वैः शश्वत्
सर्वदा ऊहथुः स्वर्गं प्रापयथः मर्त्यस्य मनुष्यस्य दाश्वषो यजमानस्य व्यथिः हिंसकः परिहायथः परिहारयनार्थं दीधि निद्रायेयु
नास्त्यां किंयते ४ तावुष्ठसइति तौ अश्विनौ युयुतानः सधीरयेषुप्रमाणां नाश्वोश्वसंशीघ्रं उद्गमनं इषं पुष्टिं अंगिरसं
चवरं तावह तौ भुज्युं स्तोनवनरस्य जरमाणस्य स्तुतिं कुर्वतः मन्मनामननीयं स्तोत्रं उपभूषतः उपगच्छतः किंच युवानानियत
क्षौ तौ क्षिमारेवानामाक्ष्ता अक्रूरं अट्ठिं पाषियः प्रतः पुराणः अपिः यजतु यजतु ५ तावल्मद्इति पायौ शंसते शस्त्रैः स्तुतिं
कुर्वते अनायथं पवित्रां अनिशायेन स्तुतस्य आपवितारौ अश्विनौ स्तुतिभिः स्तवते चचित्रराती चित्रदानौ बभूवतुः तौ तौ वन्नू
दस्रौ पुरुधा बहुधा अनिशयेन वसुकर्मणी प्रता पुराणौ दस्रा अश्विनौ नभ्यासा नव नरेण च वसा स्तुत्या आविवासे परिचरामि १
॥दत्सिपंचमस्य प्रथमे प्रथमो वर्गः १ ता भुज्युमिति तौ अश्विनौ युवां तु यसमस्तुं भुज्युं समुद्रमध्ये मग्नतावंभुज्युं अंतारक्षं तौ

53/1915

अरेणुभिः रेणुरहितैः रजोभिः मार्गैः योजनेभिः रथेषु योक्तृभिः पततिभिः पतनवद्भिः विभिः अश्वैः अर्णसः जलस्य उपस्थात् योनेः
समुद्रात् अश्वा निरूहथुः निरगमयतं ७ विजयुषेति हे रथ्या रथिनौ अश्विनौ जयुषा जयशालिना रथेन अद्रिं मार्गे स्थितं पर्व
तं विद्यातं विबाधेथां वृषणा कामानां वर्षितारौ वध्रिमत्याः पुत्रार्थिन्याः हवं आह्वानं अशृणुतं दशस्यंतौ अस्यै कामान्प्रय
च्छंतौ शयवे शयुनामकाय धेनुं अपिन्वतं प्रसवा पिप्युषः क्षरिण्याः पयसा पूरयतं ८ य द्वेति हे रोदसी द्यावापृथिव्यौ हे आदित्याः हे वसवः हे रुद्रियासः रुद्रपुत्राः मरुतः मर्त्यत्रा मर्त्येषु अश्वि
नौः परिवारके पुरिशानां प्रदिवः पुरातनं यत् हेलः क्रोधः सुमा महान् अस्तितत् हेलः तपुः तापकं रक्षोयुजे रक्षोभिर्युक्ता
य रक्षसां स्वामिने अघं अहंतत् दधातकुरुत उत पुरणः ९ य ईं राजानाविति यः नरः रजसः समस्तस्य लोकस्य ईं एनौ राजानौ
अश्विनौ ऋतुथा स्वकाले विदधत् परिचरन् तं मित्रो वरुणश्च चिकेतत् जानीयात् किंचायं परिचारकः गंभीराय महत्
स्वाय रक्षसे राक्षसाय हेतिं आयुधं अस्यत् अस्यति क्षिपति द्रुघाय अभिद्रोहशीलकाय आनवाय मनुष्य संबंधिने पञ्च सेविन
वनाथैव निमस्यति १० अंतरैश्चक्रैरिति हे अश्विनौ अंतरैः अतिकष्टैः चक्रैः युक्तेन द्युमता दीप्तिमता न्ववता नेत्रा सारथिना
युक्तेन रथेन वर्तिः अस्माकं गृहं तनयाय तनयं दातुं आयातं अपि च मनुष्येन तिरोहितेन त्यजसा क्रोधेन मर्त्यस्य मनुष्य
स्य वनुष्यतां बाधमानानां शीर्षाणि शीर्षाणि भित्रां सि अपिवत्कंछिन्नतं ११ आ परमाभिरिति हे अश्विनौ परमाभिः उत्कृष्टाभिः
उत अपि च मध्यमाभिः अनुत्कृष्टाभिः अवमाभिः निकृष्टाभिश्च नियुद्भिः वाहैः अर्वाक् अस्मदभिमुखं आयातं दृढस्य चित् द
ढापिधानस्य अपि गोमतः गोयुक्तस्य व्रजस्य दुरः द्वाराणि विवर्तं विवृणुतं किंच गृणते स्तुवते मह्यं चित्ररातीचित्रदानौ भवतं
इति पंचमस्य प्रथमे द्वितीयो वर्गः २ कस्त्येकादशर्चं द्वितीयं सूक्तं भरद्वाजः ऋषिः त्रिष्टुप् छंदः आ वां रथमिति एकपदा वि
राट् अश्विनौ देवता १ कस्त्यावल्मइति कः ऋत्विक् तौ वल्गूरुचिरौ पुरुहूता बहुभिराहूतौ त्यौ तौ अश्विनौ नमस्वान् हविषा
युक्तः स्तोमः पंचदशादि स्तोमः अद्य दूतो न प्रहितो दूत इव अविदत् विंदेत् यः स्तोमः अर्वाक् अस्मदभिमुखं नासत्याऽश्वि

[library stamp]

वे·भा·पं·

२

नौ आ च वर्तयतं हे अश्विनौ युवां अस्य स्तोतुः मन्मन् स्तोत्रे प्रेष्ठा हि प्रियतमौ हि अ सथः भवथः २ अरं मे गंतमिति हे अश्वि नौ युवां मे मदीयाय अस्मै हवनाय आह्वानाय अरं पर्याप्तं गंतं गच्छतं गृणाना स्तूयमानौ अंधः सोमं पिबाथः पिबतं रिषः हिं सकस्य बाधः यत् वर्तिः तद्गृहं परियाथः परितो गच्छथः यत् वर्तिः अस्मद्गृहं परः विप्रकृष्टः न तु तुर्यात् न हिं स्यात् अंत रः संनिकृष्टः पिन तु तुर्यात् तथा तथा परि यातं कुरुथः ३ अकारि वामिति वां युवयोः अर्थे अंधसः सोमस्य वरीमन् वि स्तीर्णे प्रियवादीयतृकृत्स्नं अस्तित तरकादि कृतं सुप्रायणतमं सुष्ठु गंतव्यं बर्हिः अस्तारि स्तीर्णं उत्तानहस्तः कृतांजलिः युव युः वां नमस्यमानः होता यं बदस्तौति वां युवां नक्षंत व्याप्नुवंतः अद्रयः ग्रावाणः आंजन् सोमरसं समंतात् व्यक्तीकृतवं तः ४ ऊर्ध्वो वामिति अग्निः वां युवयोः प्रियार्थं ऊर्ध्वः अस्थात् उदतिष्ठत् अध्वरेषु यज्ञेषु प्रैति आहवनीयं गच्छति राति धृ नं हविः मूर्धिनी प्रगामिनी घृताची घृते ना नम्र कि न होताउराणः उरु कुर्वाणः प्रयतमनाः के प्रेषेण उद्युक्तमनाः भवति यः होता नासत्या अश्विनौ हवीमन् आह्वाने अयु क्त योजयति ५ अधिश्रिय इति हे पुरुभुजा हे महत्पुर्ण भुजौ अश्विनौ यु वयोः शातोलिं वदु ह्यत्का कं रथं सूर्यस्य दुहिता सूर्या श्रियेषियोर्थं आ पितस्थौ अध्यतिष्ठत् अपि च यज्ञियानां देवानां अत्र जनिमन् अस्मिन् जन्मनि प्रादुर्भवि माया भिः प्रज्ञाभिः मायिना प्रज्ञावंतौ नरा ने आरीन् नृन् त्वं तौ प्रकृतं प्रकर्षेण भव तं इति पंचमस्य प्रथमेन तीयो वर्गः ३ युवं श्रीभिरिति हे अश्विनौ युवं युवां दर्शताभिः दर्शनीयाभिः आभिः श्रीमतां परिष्कृत मनाभिः श्रीभिः कल्याणीभिः सूर्यायाः युवयोः पत्न्याः सुजेषा मनार्थं पुष्टिं पूर्तिं ऊहथुः प्रापयथः किंच वां युवां वयः अश्वाः वपु षे वो र्थि प्रानुपतन् अक वैन अनुपतन् अपि च हे विष्ण्या स्तुत्यौ अश्विनौ वां युवां सुष्टुताः वाणीकृपाणां स्तुतिः न सचत व्या प्नोति ७ आ वां वय इति हे नासत्या अश्विनौ वां युवां वयः गंतारः वहिष्ठाः वोढृतमाः अश्वासः अश्वाः प्रयः सोमरूपमन्नं अ भि आ वहंतु प्रापयंतु वां युवयोः मनोजवाः मनोवेगो रथः पृक्षः संपर्चनीयाः इषिधः एषणीयाः भूरीः बह्वीः इषः अन्नानि सो मा नः प्रति अन्नं असाभि विसृष्टः ८ पुरु हि वामिति हे पुरुभुजा अपूर्ण भुजौ वां युवयोः देष्णं दानव्यं पुरु बहु हि भवति अतः का

२

रणान्नं असन्न स्यांपेतु प्रीणयित्री असंक्रामति अन्यत्र असंक्रमणं इषमन्नं चापि च तं प्रयच्छतं किं च वां सूतः स्तोतारः संति मा मपि तायावश्विनौ सु स्तुतिः शोभना स्तुतिश्च स्तोम युव तिरसाः सोमरसाश्च संति ये रसाः वां युवयोः राति दानं अनु उदिष्ट असन् देवयजनं प्राप्ताः अपूरणः ९ उत म ऋज्रे इति उत अपि च पुरयस्य पुरयनामकस्य स्वभूते ऋज्रे ऋजुगम ने रघ्वी क्षिप्रगामिन्यौ वडवे मे अश्विनोः स्तुतिं कुर्वंतः ममाभूतां कमी ह्वरा ह्नि विद्यमानाः शतं गावः ममाभुवन् पेरुके रा ह्नि विद्यमाना निपकापच्च नि अन्नानि मम असन् शांडश्च राजा हिरणिनः हिरण्यवतः स्म द्दिष्टान् प्रशस्त दर्शनान् दश सुशस्या कान्यूचशासः अनुगुणान् अपि च शत्रूणा मनि माबुका न्ननृकथान् दर्शनीयान् पुरुषान् अश्विनोः स्तोत्रेभ्यः दात् ददातु १० सं वां शतेति हे नासत्या अश्विनौ वां युवयोः गिरः स्तोत्रे अश्वानां शता सहस्रा शतानि सहस्राणि पुरुपंथाना म दा संदात् संददाति हे वीर अश्विनौ गिर्वणो युवयोः स्तोत्रे भरद्वाजाय मह्यं तु क्षिप्रं भगात् ददातु किंच हे पुरुदंससा बहुक र्माणौ अश्विनौ युवयोः स्तुत्या राक्षसा नरक्षांसि हता हतानि सन्तु ११ आ वां सुम्न इति हे अश्विनौ वरिमन् विस्तृते सुम्ने वां युवा भ्यां दत्ते सुखे वहं पुत्र सूरिभिः विद्वद्भिः सह आ समंतात् स्यां भवेयं इति पंचमस्य प्रथमे चतुर्थो वर्गः ४ उदु श्रिय इति षड्चं नतीयं सूक्तं भरद्वाज ऋषि त्रिष्टुप् छंदः उषाः देवता १ उद श्रिय इति रोचमाना दीप्यमानाः रुशंतः शुक्लवर्णाः उषसः श्रिये भगमनः शोभायै अपां ऊर्मयो न उदक संबंधिनः तरंगा इव उदस्थुः उत्तिष्ठंति अनंतरं एक वचनिगमः उषाः विश्वावि श्वानि सुजनानि सुपथा सुमार्गाणि कृगानि सुखेन गम्यानि कृणोति करोति अपि च मघोनी धनवती उषाः वस्वी प्रशस्ता दक्षिणा समर्धयित्री चाभूत् अपूरणः २ भद्रा ददृक्ष इति हे उषः देवि भद्रा कल्याणी ददृक्षे दृश्यते उर्विया विस्तीर्णा च विभा सि ते तव शोचिः शोचिषः दीप्यमानाः भानवः रश्मयः द्यां अंतरिक्षं उत्पतन् उत्पतंति किंच उषः देवि महोभिः तेजोभिः शुंभ माना रोचमाना दीप्यमाना वक्षः त्वदीयं रूपं आविष्कृणुषे प्रकटीकरोषि ३ वहंति सीमिति अरुणासः रोहितवर्णाः रुशंतः

55/1911

वे॰ भा॰ पं॰

२

शोष्यमाना गावः रश्मयः रूपमगां उर्विया उर्वी विस्तीर्णं प्रियानां प्रथमानां सीं एनां उषो देवतां शूरः अस्तेव वीरः क्षेप्ता इव तमः
अपेअते अपगमयति वोळ्हा सेनायाः आजौ आजिरिव गामी शत्रून् निवर्तमांसि बाधते ४ सुगोत नइति हे उषो देवि पर्व
तेषु उत दुर्गेषु अपि अवातेनगमनसाधनरहिते देशे सुपथा सुपथानि सुमार्गाणि सुगानि सुखेन गम्यानि तेन च भवंति हे स्वभा
नो स्वभासा दीप्त्या उषः अपि अंतरिक्षं तरसि च पृथु पामस्य पृथुर पेक्षे वेदनीयिपे दिवो दुहितः अंतरिक्षस्य तेउषः देवि सात्वं दूपथ
यो एषणीयं रयिं धनं नः अस्मभ्यं आवह ५ सावहेत्युक्ताभिरिति हे उषः सात्वं वरं धनं अस्मभ्यं आवह या त्वं अवाता अप्रतिग
ताजीपंची निंसुतुवृत्तमिः अनु दूक्षिः सोत्रभ्यः वरंवहसि किंच हे दिवो दुहितः अंतरिक्षसुतेया त्वं देवी द्योतमाना पूर्वहूतौ
प्रथमाह्वाने प्रातरनुवाके मंहनापूजनीया वहसि सा त्वं दर्शाता दर्शनीया भव ६ उत्तेवयश्चिदिति हे उषो देवि तेतव व्युष्टौ सत्यां
वयश्चित् पक्षिणो वसतेः निवासस्थानात् उदपप्तन् उत्पतंति येपितु नरः हविषां संभक्तारः नरः तेपि वासतेः किं च हे
उषो देवि त्वं अमासमीपे क्षये वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय मनुष्याय भूरि प्रभूतं वामं धनं वहसि इति पंचमस्य प्रथमे पंचमो व
र्गः ५ एषास्यतिषळृचं चतुर्थं सूक्तं भरद्वाज ऋषिः त्रिष्टुप् छंदः उषो देवता १ एषास्यानइति एषा स्या सा दिवोजाः दिवो
जाता अजनत्दुहिता दिवः सुर्याविपादः अस्मदर्थं उच्छंती तमांसि वर्जयंती क्षितीः प्रजाः मानुषीः अजीगः उद्गिरति प्रकाश
यति या रुशता दीप्यमानेन भानुना अप्रथुः कारा भाभ्यां सुयाभ्यां सुराविषु अक्तून् नरस्याद् दिते जांसि तमस्ति तमांसि वर्ति
रः तिरस्कुर्वंती अद्यापि अदर्शन २ विअयस्तुरिति वयं हरयाः कांतिर्याः ताः उषसः तत्तदानी प्रातःकाले बृहतः बृहणत्री
क्षस्य पृष्ठसंच अयं पुष्टं धमयंती संपादयंत्यः अरुणप्सुभिः अरुणवर्णयुक्तैः अश्वैः वियंतुः विस्तीर्णं यांति चित्रं यथा भवति
तथा भांति बर्हणाया रात्रेः तमांसि बाधंते सम्यगपनयंति च ३ भवेवाजमिति हे उषसः दाशुषे हवींषि प्रदात्रे मर्त्याय श्रवः
कीर्ति वाजं वलं दूषमअंश अंरक्षं च वहंती वहतो यूयं मघोनी अनवत्सः पत्समानाः गृह्णत्यः जपा पिवपते परिचरते म
रत्वाय प्रयुष्णो माहिसहितं अवः अन्नं रत्नं धनं च गिधातमितरांधते ४ इदाहिवइतिहे उषसः इदा हि इदानीमेव वः

युष्माकं विधते परिचरते दातुं रत्नं धनमस्ति इदाहि इदानीमेव वीराय प्रेरयित्रे हविषः दाशुषे यजमानाय दातुं वः रत्नमस्ति
इदाहि इदानीमेव विप्राय प्राज्ञाय जरित्रे दातुं वः रत्नमस्ति यत् यस्मिन् विप्रे उक्थानि स्तोत्राणि विदंते भावते मत्स ईशाय
प्रजमानाय पत्नरत्नं निर्वहय पुराचित् स्मपुरा पि रत्नं प्रयंदत्त ५ इदाहितइति हे उषः अद्रिसानः आदत्तमानः तेतव
प्रशास्त इदाहि सद्य एव गवां गोत्रा संघान् अंगिरसो गृणंति उत्सृजंति अर्केण अर्चनीयेन ब्रह्मणा स्तोत्रेण विबिभि
दुः तमांसि विदारयंति नृणां अंगिरसां देवहूतिः देवविषया स्तुतिः सत्या अभवत् भवतु ६ उच्छादिवइति दिवो दुहितः
उषः प्रत्नवत् पुरातनेभ्यः इव नः अस्मदर्थं उच्छ तमांसि वर्जय हे मघोनि धनवति उषः भरद्वाजवत् विधते परिचरते अन्यः
भरद्वाजः गृणते स्तुतिं कुर्वते मह्यं सुवीरं सुष्ठुपुत्रादियुक्तं रयिं धनं रिरीहि देहि किंच नः अस्मभ्यं उरुगायं बहुभिर्गीत
मं श्रवोऽन्नं अधिधेहि अधिकं प्रयच्छ॥ इति पंचमस्य प्रथमे षष्ठो वर्गः॥ वपुर्न्विति एकादशर्चं पंचमं सूक्तं भारद्वाज
ऋषिः त्रिष्टुप् छंदः मरुतो देवता १ वपुर्नुतदिति तत् प्रसिद्धं समानं एकरूपं मरुतः सर्वदा समानरूपाः नाम स्थिराणा
मपि नाम कंपयितृप्राणिपतत्समानं सर्वदा गच्छ इपुः मरुतां चिकितुषे स्तोत्रे नु क्षिप्रं अस्तु प्रादुर्भवतु चित् पूरकं किंचिद्रू
पं मर्त्येषु मनुष्यलोके अन्यत् ओषधिवनस्पत्यादिकं दोहसे कामान् दोग्धुं पीपाय आप्याययति किंच मरुतामेव निर्देशात्
पृश्निः अंतरिक्षं सकृत् संवत्सरस्य वर्षासु शुक्रं शुक्लवर्णं ऊधः उदकं दुदुहे क्षरति २ ये अग्नयइति ये मरुतः इधानाः अ
ग्नयो न समिध्यमाना अग्नय इव शुभ्राः शुचयः दीप्यंते यत् ये मरुतः द्विः द्विर्गुणा त्रिः त्रिगुणं च वावृधंत इच्छानुरूपं वर्धंते एषाम
रुतां रथाः अरेणवः रेणुरहिताः हिरण्ययासः हिरण्यपालंकाराश्च भवंति ते मी मरुतः नृम्णैः धनैः पौंस्येभिः बलैश्च साकं
सार्धं भुवन् प्रादुर्भवंति ७ रुद्रस्यइतिमीढुषः सेक्तुः रुद्रस्य पुत्राः ये मरुतः संति दाधृविः धरित्री पृश्निः अंतरिक्षं यांश्च
मरुतो नु भरध्यै भर्तुं क्षमा भवति विदे हि सर्वज्ञाने हि महः महतां एषां माता सा पृश्निः मही मरुतां किंच सा पृश्निः सु भ्वे स
म्यक् भवनाय गर्भं उदकं आधात् आदधाति इत्तु पूरणः ४ नयइंगतइति ये प्रसिद्धाः जनुषः जनानां स्तोतॄन् प्रति अया

57/1915

यमन साधनेन हर्षतेन गच्छंति अंतः संतः सर्वेषां हृदि वर्तमानाः एव अवद्यानि पापानि पुनानाः शोधयंतः यत् यदा स्तुवयः दी
प्यमानाः मरुतः ओषम् अस्तु ओषं कामम् अनु निर्दुहे भिन्नां दुहंति उदकं तथा अग्नि यादी सा अस्तु अस्तु गताः तत्वं आलीयं शरी
रं प्रकाशयंतः उक्षमाणाः भूमिं सिंचंतो भवंति ९ मखून यवेति ये युमूरुतः घृष्णु घर्षकं मारुतं नाम मरुत्संज्ञकं श
र्धं आदधानाः उच्चारयंतः अया उपगच्छंतः क्षोभाराः भवतः पंथेहसे कामान् दोग्धुं क्षमा भवंति इति संप्रत्ययेषु ये सो
नाः लीनाः क्षीर भनाप हर्तारिः अयासः गंतारो भवंति भुक्ताम् हस्ते मस्तु काम भवंति उग्रा अत् क्रुद्धान् स दानुः शोभन हविर्दा
नो यजमान अवयासन् अपगत क्रोधान् करोति इति सप्रसर्पेत्वत् चित् पूरणौ ॥ इति पंचमस्य प्रथमे सप्तमो वर्गः ॥७ तद्दु
याद् इति हे मरुतः उग्राः श्रमसा बलेन वेगेन युक्ताः घृष्णुषेणाः धर्षक सेनाः क्रमेके स्वरूपे उभे रोदसी द्यावापृथिव्यौ युजंतयो
अवंति वश आप्याय्यानि पयंति अध स्म अपि अग्रे एषु मरुत्सु रोदसी रुद्रस्य पत्नी माध्यमिका वाक् स्वशोचिः स्वदीप्तिः वर्तते
अमवत् रोकः दीप्ति याचनः यस्मात् स्थाने तिष्ठति इत् पूरणः ७ अनेनो वद् इति हे मरुतः वः युष्माकं संबंधि यामो रथः अ
निभः पापरहितं यद् यामः वलि तयाः अस्कभायत् भर्व स्तुकि च यं यामं अरमीः असारथिः अपि स्तोता अजति प्रेरयति सरथः अन
वश्मिः अभ्ववाहे वर्तमानवसः पथ्यवन रहितः अनभीशुः पाशरहितो अपि रजस्तूः उदकस्य प्रेरकः साधन् स्तोतृणां का
मान् साधयन् रोदसी द्यावापृथिव्यौ पथ्याः पथः अंतरिक्षमार्गानित्यानि वि विधं याति ८ नास्य वर्तेति हे मरुतः वो
अवतां संग्रामेषु अथ वर्तमानस्य स्वजनस्य वर्तमानं प्रेरको नास्ति अस्यतरुता सुहिसि ताच नास्ति अध अपि च लोके पुत्रे त
नये पाने धने वागोषु वा अप्सु मानित स्तले पुत्रं अवथ सः पार्थ संग्रामे घोः दीप्तस्यायः शत्रोः ब्र अंग वांसं चंदनादाय थि
ला भवति ९ प्रचित्रमिति हे अग्ने यूण्णे शर्धाय कुर्वते तुरायत्वरितायस्वतवसे सह तवसेस्य मारुताय मरुतां गणाय चि ४
त्रं दर्शनीयं अर्कं अन्नं च नरध्वं सत्वम् आप्नुताः क्षितिजः ओजसवैर्यूयं अप्रसरत येमरुतः सहांसि शत्रूणां बलानि सहसा
बलेन सहंते अभिभवंति मत्वमेन्यामहस्ती येभ्यः मरुद्भ्यो भयात् पृथिवी रजति कंपते १० विपीमंतइति मरुतः अध्वर

स्य वपनश्च स्य वर्द्दिवतं वचोतमानाः तेषु ग्रमवसः क्षिप्रगमनाः अग्नेर्जुह्वो न रश्मयः इव त्विषीमंतः दीप्तिमंतः अर्चत्रयः अर्चनी
याः धुनयोः स्वपलास्य कंपयंतः इव वीराः भ्राजजन्मानः दीप्तशरीराः अधृष्टाः परैरनभिभूताश्च भवंति ११ तं वृधंतमिति तं प्र
सिद्धं वर्धंतं वर्धमानं भ्राजदृष्टिं भ्राजमाना युधं रुद्रस्य सूनुं पुत्रं मारुतं मरुतां गणं हवसा स्तोत्रेण आ विवासे परिचरामि किं
च दिवः शर्धाय शुचयः निर्मलाः मनीषाः स्तुतयः उग्राः उद्गूर्णाः शर्धाय मारुताय बलाय अपः आपूक्षंतः गिरयो न मेघा इव अस्पृध
न् अस्पर्धंत ॥ इति पंचमस्य प्रथमे अष्टमो वर्गः ॥ विश्वेषां वइत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रिष्टुप् छंदः मित्रावरुणौ दे
वता १ विश्वेषां वइति विश्वेषां सतां मध्ये ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणा मित्रावरुणौ वः वां गीर्भिः स्तुतिभिः वावृधध्यै वर्ध
यितुं प्रवच्मः स्तौमि यौ द्वौ सहितौ असमौ अप्रतिमौ यमिश्चायतौ तमौ सेः आत्मीयैर्बाहुभिः रश्मिवरश्मिनेव जनान्
संयमतुः संगच्छतः २ इयं मद्वामिति हे मित्रावरुणौ वां युवां मम मदयं मनीषा स्तुतिः प्रस्तृणीते प्रच्छादयति हे प्रियाप्रियौ यु
वां नमसा अन्नेन हविषा सहोप गच्छति च युवयोः वर्हिः यज्ञं अच्छ अभिगच्छति च हे मित्रावरुणौ नः अस्मभ्यं अधृष्टं अभिभूतं छर्दि
र्गृहं यं तं प्रयच्छतं हे सुदानू शोभनदानौ वां युवयोः संबंधियुवाभ्यां देयं यद्गृहं वरूथ्यं शीतवाततपानां वारयितृ भवति ३ आया
तमिति हे मित्रावरुणा मित्रावरुणौ स्तु शस्ति शोभनत्वं सत्वं नमसा अन्नेन हविषा हूयमानाः स्तूयमानाः स्तूयमानौ प्रिया विश्वस्य प्रियौ उ
पायातं उपागच्छतं यौ महित्वा महत्वेन युक्तौ युवां क्षधायतः अन्नं आलनः इच्छतः जनान् असः स्थः कर्मण्यधिकृतः ॥ पुरुषः अप
सव कर्मणि वर्तिसं यमाथः संयच्छथः ४ अश्वा न येति यायौ अश्वान् अश्वौ इव वाजिना वाजिनौ बलिनौ पूतदक्षं पूतस्तोत्रौ ऋता स
त्यौ च यत् योगर्भं गर्भभूतौ अदितिः देवी भरध्यै बभार कि यायौ जायमानौ च महिमहतौ महां तामहतरौ प्रभूतौ मित्रावरुणौ म
र्त्याय मर्त्याय रिपवे हिंसकाय घोरा घोरौ घातकौ निरोधः निदधार अदितिः स्वोदरे ५ विश्वेयद्वामिति विश्वे सर्वे देवासः देवाः सजोषाः
परस्परं प्रीतियुक्ताः यत् यौ वां युवां मंहना महत्वेन मंदमानाः स्तुवंतः क्षत्रं बलं अदधुः धत्तवंतः किं च यत् यौ युवां उर्वीः विस्तीर्णे
रोदसी विन्नथ द्यावापृथिव्यौ परिभूथ भवथः तयोः युवयोः अदब्धासः अहिंसिताः अमूराः अमूढाः स्पशः रश्मयश्च संति ॥ ॥

59/1915

वे·भा·५·
५

इति पंचमस्य प्रथमे नवमो वर्गः॥ ७ ता हि क्षत्रमिति ता तौ मित्रावरुणौ युवां अनुघून् दिवसे दिवसे क्षत्रं बलं धारयेथे हि यो॥
अंतरिक्षस्य सानुं समुच्छ्रितप्रदेशं मेघं सूर्यं इव येन दृढीकुरुतं उपमा दिवः उपमीयतः इति उपमातृत्वाणास्माय यथा वसं धारयति
तद्वत् इत्यर्थः दृढ इः युवाभ्यां दृढीकृतम् मेघः नक्षत्रः अंतरिक्षं आ युवाभ्यां उमा पिब विश्वदेवः सूर्यः इमं द्यां दिवं च आपो मधु
ओषस्य धारिका अग्निना हविषा आप्यायितः सन् आ अ मानआनमोति युवाभ्यां दृढीकृतम् एव ७ ता विग्धेथे इति ता तौ मित्रावरुणौ
युवां प्रियमेधा यजमानं पैविनं धारयथः जठरं उदरं पृणध्वै सोमेन पूरयितुं यत् यदा सप्तनयः सह प्रियमाणाः ऋत्विजः सप
यज्ञ सदनं आपृणंति आपूरयति विश्वजिन्वा विश्वजिन्वानौ यत्न यदा पथी अलं भवद्भ्यां प्रहितं तदा युवतयः नद्यः नमष्ठ्यं तेरज
सानाभिः यंते अवा ता अनुकम्पा विसरंते विप्रत्तिं धारयंति ८ ता जिह्वयेति ता तौ मित्रावरुणौ युवां — — प्रज्ञः जिह्वया वा
सदं सर्वदा इदं अलं आयाचंति मन्त्रध्वा वां युवयोः अरतिः अभिगंता ऋतेयज्ञे सत्यः मायार हितः अमृतं आभवति इ ध्यतान्नौ
नमस्य अपेक्षितप्रसादं बलं वां युवयोः अस्ति किं च युवं युवां वां शुषि यजमानस्य अंहः पापं विचायिष्ट विनाशयतमित्यर्थः
॥९ प्र यद्वामिति हे मित्रावरुणा या वां युवयोः प्रिया प्रियाणि धाम धामानि कर्माणि युवधिता युवाभ्यां विहितानि यत्न ये स्फूर्त्तस्य
धिमानाः प्रमिनंति हिंसंति ये च देवासः देवाः ओहसाव दत्त साधनेन स्तोत्रेण न युज्यते मर्ताः मनुष्याश्च ओहसा न युज्यंते ते ये च अप्यः
कर्म इंनः अयज्ञसाचः न यज्ञयुक्ताः ये पाकमति कुर्वंतः इत्यर्थः ये च न पुत्राः पृणंतीति पुत्राः नपुत्राः अपृणंतः इत्यर्थः तान् सर्वान्
विनाशयतमित्यनुषज्यते १० वि यद्वाचमिति यदा कीस्तासः मेधाविनः उद्गातारः वाचं स्तुतिं विभरंते प्रयुञ्जते धारयंति तदा केचित् ५
दक्षाः मनागाः अनुष्ठानेन कर्मतः निविदः शंसंति आत् तथा सति वां युवाभ्यां सत्यानि उक्थानि शस्त्राणि वयं ब्रवाम महि
साम हसे न देवाः अन्ये देवैः सह मकिः यतनः न गच्छः ११ अवोरित्थेति हे मित्रावरुणौ अवोः अवनौ वां युवयोः अपि
इळा अभिगमनं तादृशः यत्र यद्युवां अभिगमनेषु सोमयुक्तयोः युवयोः संबंधि युवाभ्यां दीयतं दूरात् अस्मयोः अविच्छिन्नमभव
तिद् इत्थास प्रमे चकदा मित्रावरुणयो रभिगमनमिसन्नाह यत्र यदा गावः स्तुतयः अनुस्फुरान् अनुस्फुरेयुः यत्न यदा चक्र

जुष्यं क्र जुगाभिनं स्तुशावणां धर्ष कं वृषणं कामानां वर्षितारं सोमं रणे रमणे यज्ञे युनजन्त्र यजमानायुं जुषः॥ इति पंचमस्य
प्रथमे दशमो वर्गः॥ ऋष्टी वामिति सेकादशर्चं सप्तमं सूक्तं भरद्वाज ऋषिस्त्रिष्टुप् छंदः इंद्रावरुणौ देवता १ ऋष्टी वामिति महो
महनीयौ हे इंद्रावरुणौ वां युवयो रथे ऋष्टी क्षिप्रः यज्ञः सोमः सजोषाः ऋत्विग्भिः सहितः आ अयं आसमंतात् उद्यतः प्रस्त
तः यः सोमः मधुर अन्तमनो दिवः ऋक् बर्हिषः स्तीर्णबर्हिषो यजमानस्य इषे अन्नाय महि महते सुम्नाय सुखाय च यज्ञे य स्तु
आववर्तत् आवर्तयति २ ता हि श्रेष्ठेति इंद्रावरुणौ ता तौ प्रसिद्धौ युवां श्रेष्ठा श्रेष्ठौ देवता तादेवजातौ यज्ञे तु आधनानां धेर
बो हि भूतं भवतं किं च ता तौ इषु वां सूराणां मध्ये वा विष्ठा अतिशयेन बलवंतौ भूतं किं च मघोनां दानवतां मध्ये मंहिष्ठा दातृतमौ
तु विग्रूपम बहुबलौ ऋतेन सत्यमेव वृत्रतु राजाऋणां हिंसकौ सर्वसेना कृत्स्न सेनौ च भूतमिति ३ ता गृणीहीति हे भरद्वाज
नमस्यभिः स्तवैः पूर्षेः बहुभिः सुम्नेभिः सुखैश्च सर्वैः चकानाः स्तोतौ ता तौ इंद्रावरुणा० णौ गृणीहि स्तुहि अन्यः तयोरन्यः इंद्रः
वृत्रं वृत्रनामकमसुरं वज्रेण हंति अन्यो वरुणः विप्रः प्राज्ञः वृजनेषु स्तोतॄणां उपद्रवेषु रक्षितुं शवसा बलेन शिक्षति संगच्छ
ति ४ ग्नाश्च यदिति नरां मनुष्याणां मध्ये ग्नाः स्त्रियश्च नरश्च पुरुषाश्च विश्वे सर्वे देवा सो देवाः स्वगूर्त्ताः स्वयमुद्यताः यत्
यदा वावृधंत स्तुतिभिः वर्धयंते तदा हे इंद्रावरुणा० णौ महित्वा महत्वेन युक्तौ एभ्यः स्तोतृभ्यः प्रभूतं प्रभवंतं हे द्यौश्च पृथिवि
च द्यावापृथिवी उभे उर्वी विस्तीर्णे युवां एभिः प्रभूतमित्यनुषंगः ५ स इत्सुदानुरिति हे इंद्रा इंद्री वरुणवरुणौ इतरेतरयो
गः द्वन्द्व यत्र हि वचन प्रयोगः वां युवाभ्यां यः यजमानः ऋतं आत्मनेव दाशाति हवींषि ददाति स इत् स एव सुदानुः शोभनदानो भ
वति रेववान् धनवांश्च ऋतावा यज्ञवांश्च भवति किं च सदा स्तान् दानवान् द्विषः इषुः इषा अन्नेन जयलब्धेन सहतरेत् प्राप्येत
आ पचर यिं धनं रयिवतः धनवतो जनान् पुत्रांश्च वंसत् संभजते॥ इति पंचमस्य प्रथमे एकादशो वर्गः॥ यं युवमिति देवादेवौ
स्तयमानौ हे इंद्रावरुणौ युवं युवां दाश्वध्वराय स्ततह विश्वायव सुमंतं धनानुबंधिनं पुरुक्षुं वहन्नं यं यादृशं रयिं धनं धत्थः प्रयच्छ
थः यो वा विचय नृषां हिंसकानां अशस्तीः अकीर्तिः शत्रुकृतानि अयशांसि इत्यर्थः प्रमनक्ति प्ररुजति स तादृशः रयिः अस्मे अस्मा

61/1915

ऋ·भा·पं
६

स्यात् स्यात् ७ उत नः सुत्रात्र इति उतापि च हे इंद्रावरुणा हे इंद्रावरुणौ सूरिभ्यः स्तोतृभ्यः नः अस्मभ्यं सुत्रात्रः सुरक्षः देव
गोपाः देवा गोपा पितारो यस्य स तथाविधः रयिः धनं स्यात् भवात् किंच येषामस्माकं शुष्मः बलं पृतनासु युद्धेषु साह्वान् शत्रूणा
मभिभविता नानयुदिः हिंसकस्य सद्युम्नायशांसि सद्य एव प्रतिरते सम्यक् तिरस्कुर्यात् ८ नू न इंद्रावरुणेति हे इंद्रावरुणा
गृणाना स्तूयमानौ युवां नः अस्मभ्यं सोमवसाय सुम्नवसौमाय सोम्नवसं तस्मै रयिं धनं सुक्षितिं प्रंपृक्तं प्रयच्छतं किंच देवा हे
देवौ महिनस्य महतः युवयोः शर्द्धः बलं दुःखाद् संगृणंतः स्तुवंतः वयं दुरिता दुरितानि नावा आपो उदकानीव तरेम ९ प्र सं
म्राजे इति हे स्तोतः सम्राजे आत्मना राजमानाय महते परिवृढाय देवाय धीनमानाय वरुणाय प्रियं मनोहरं सप्रथः सर्व
तः प्रथुमन्म स्तोत्रं भुजस्य प्रार्चाभिवार्च अयं यः सोऽयं वरुणः महिना महिम्ना युक्तः महिव्रतः महाकर्मा क्रत्वा प्रज्ञया च युक्तः
अजरो न जरारहितमग्निमुक्तः विश्वानिभाभानि पृथिव्योद्यो विभादीप्त्या विभाति विभासयति १० इंद्रावरुणेति इंद्रावरुणा हे इंद्रा
वरुणौ सुतपौ सुतस्य सोमस्य पातारौ युवां मधुमत्तरं सुतं अभिषुतं इमं सोमं पिबतं किंच धृतव्रता हि धृतकर्माणौ युवोः यु
वयोः रथः अध्वरं उप देववीतये देवानां पानार्थं पीतये युवयोः पि सोमपानार्थं स्वसरं मार्गं प्रति उपयाति ११ इंद्रावरु
णेति इंद्रावरुणा हे इंद्रावरुणौ वृषणा कामानां वर्षितारौ युवां मधुमत्तमस्य अतिशयेन रसवंतं वृष्णः वर्षितारं सोमस्य सा
मं आत्मना युवयोः अर्थं इदं अंधः सोमरूपमन्नं अस्मे अस्माभिः परिषिक्तं पात्रेषु अंतः आसद्य उपविश्य अस्मि
न् बर्हिषि यज्ञे मादयेथां सोमपानेन तृप्येथां ॥ इति पंचमस्य प्रथमे द्वादशो वर्गः १२ सं वां कर्मणेत्यष्टमं सूक्तं भरद्वाज
ऋषिः त्रिष्टुप् छंदः इंद्राविष्णू देवता १ सं वां कर्मणेति हे इंद्राविष्णू वां युवां कर्मणा स्तोत्रेण इषा हविषा च संहिनोमि सम्यक् प्रेर
यामि अपसः अस्य यज्ञस्य पारे समाप्तौ यज्ञं संजुषेथां किंच अरिष्टैः अनुपद्रवैः पथिभिः मार्गैः नः अस्मान् पारयंता पारं तौ ६
युवां द्रविणं धनं च अस्मभ्यं धत्तं २ या विश्वासामिति या यौ विश्वासां सर्वासां मतीनां स्तुतीनां जनि
तारा जनयितारौ कलशा कलशौ सोमधाना सोमस्य निधानभूतौ इव स्यातां प्रसक्तः स्तुतिः हे इंद्राविष्णू वां युवां शस्यमानाः उक्था

63
1915

र्यमाणाः शास्त्ररूपाः गिरः वाचः प्रावंतु प्राप्नुवंतु अर्कैः स्तोतृभिः गीयमानाः स्तोमासः स्तोमाः स्तोत्राणि च प्रावंतु प्राप्नुवंतु ३
इंद्राविष्णू मदपती इति हे इंद्राविष्णू मदानां सोमानां मदपती स्वामिनौ द्रविणो द्रविणानि धनानि दधाना ददानौ युवां सोमं
मति आपातं मतीनां स्तोतॄणां स्तोमासः स्तोत्राणि उक्थैः शस्त्रैः सार्धं शस्यमानासः उच्चार्यमाणाः वां युवां अक्तुभिः तेजोभिः स
मं अंतु समर्धयंतु ४ आ वामश्वास इति हे इंद्राविष्णू वां युवां अभिमातिषाहः हिंसकानां अभिभवितारः सधमादः सहमाद्य
तः अश्वासः अश्वाः आ वहंतु मतीनां स्तोतॄणां विश्वा विश्वानि सर्वाणि हवना हवनानि स्तोत्राणि जुषेथां सेवेथां तदर्थं मे मदी
यानि ब्रह्माणि स्तोत्राणि गिरः शास्त्ररूपाः वाचश्च उपशृणुतं ५ इंद्राविष्णू इति हे इंद्राविष्णू वां युवयोः तत्कर्म पनयाय्यं स्तुत्यं
किं तत् सोमस्य मदे सति यत् उरु विस्तीर्णं चक्रमाथे यत्र अंतरिक्षं वरीयः उरुतरं अकृणुतं अकुरुतं यत् अपि च रजांसि सर्वा
न् लोकान् नः अस्माकं जीवसे धनाय अप्रथतं अप्रथयतं ६ इंद्राविष्णू हविषेति घृतासुती घृतान्नौ इंद्राविष्णू युवां
हविषा सोमेन वावृधाना वर्धमानौ अग्रा द्वाना सोमाग्रस्य शुक्रस्य पातारौ नमसा नमस्कारेण रातहव्या दत्तहविष्कौ यज
मानौ अस्मे अस्मभ्यं द्रविणं धनं धत्तं प्रयच्छतं किंच युवां समुद्रः उदधिरिव स्थः भवथः यतः सोमधानः कलशो भवथः ७
इंद्राविष्णू पिबतमिति हे दस्मा दर्शनीयौ इंद्राविष्णू मध्वः मधुरस्य मधुरं अस्य सोमस्य इमं सोमं सपिबतं जठरं पृणेथां पू
रयेथां वां युवां मदिराणि मदकराणि अंधांसि सोमात्मकानि अन्नानि आ अग्मन् अभिगच्छंतु मे मदीयानि ब्रह्माणि स्तोत्रा
णि हवं मदीयमाह्वानं च उपश्रृणुतं ८ उभा जिग्यथुरिति हे इंद्राविष्णू उभा उभौ युवां जिग्यथुः शत्रून् न पराजयेथे न पुनः
कदाचन पराजयेथे एनोः एनयोः युवयोर्मध्ये कतरश्चन एकोपि न पराजिग्ये न पराजितः हे विष्णो इंद्रः त्वं च युवां यत् यद्वस्तु
अपस्पृधेथां असुरैः सह स्पर्धेथां त्रेधा लोकवेदवागात्मना त्रिधा स्थितं सहस्रं अमितं च वितदैरयेथां व्यक्रमेथामित्यर्थः ॥
इति पंचमस्य प्रथमे त्रयोदशो वर्गः ॥ घृतवती भुवनानामिति षड्चं नवमं सूक्तं भरद्वाजः ऋषिः जगती छंदः द्यावापृथि
व्यौ देवता १ प्रथमा घृतवतीइति द्यावापृथिवी हे द्यावापृथिव्यौ युवां घृतवती दीप्तिमत्यौ भवतः इति शेषः भुवनानाम्

नानां अभिश्रिया अभिश्रयणीयेन भवनः उर्वी विस्तीर्णे पृथ्वी प्रथिते मधुदुघे उदकस्य दोग्ध्र्यौ सुपेशसा सुरूपे वरुणस्य ध
र्मणा धारकेण विष्कभिते एषकुमारिते अजरे जीर्णे भूरिरेतसा बहुरेतस्के भवतः २ असश्चन्ती इति असश्चन्ती असज्ज
माने परस्परं भूरिधारे बहुधारे पयस्वती उदकवत्यौ घृतं वसाने शुचिव्रते शुचिकर्मणी सुकृते शोभनकारिणे घृतं उदकं दुहाते द्यावापृथिव्यौ प्रश
स्यकर्मभिः हे रोदसी द्यावापृथिव्यौ अस्य भुवनस्य भूतजातस्य राजन्ती ईशाने युवां अस्मे अस्मासु सुरेतः प्रजननसमर्थं वी
र्यं सिंचतं यन्मनुर्हितं मनुष्येभ्यो हितं ३ यो वामृजवे इति धिषणे सर्वस्य भुवनस्य धारके महती रोदसी द्यावापृथिव्यौ वां
युवाभ्यां यः मर्तः मर्त्यः ऋजवे ऋजुक्रमणाय युवयोः ॥ सुखगमनाय ददाश हवींषि ददाति स मर्तः साधति कामान् साधयति किं
च प्रजाभिः धर्मणो धारकैः प्रजापते प्रजायते प्रजावान्भवति धर्मणः कर्मणः परि उपरि युवोः युवयोः सिक्ता सिक्तानि रेतांसि विषु
रूपाणि नानावर्णानि सव्रता समानकर्माणि जायन्ते ४ घृतेनेति द्यावापृथिवी द्यावापृथिव्यौ घृतेन उदकेन अभी
वृते अभिवृते भवतः घृतश्रिया उदकं आश्रयन्त्यौ घृतपृचा घृतसंपृक्ते घृतावृधा घृतं वर्धयन्त्यौ उर्वी विस्तीर्णे पृथ्वी प्रथि
ते भवतः होत्रवूर्ये यज्ञे पुरोहिते पुरस्कृते भवतः विप्राः मेधाविनः स्तोतारः ते द्यावापृथिव्यौ एव ईळते यज्ञा
य सुम्नं सुखं ईळते याचन्ते सुम्ने सति यागाः प्रवर्तन्ते ५ मधु न इति मधुश्चुता उदकस्राविण्यौ पृथिव्यौ मधुदुघे उदकदोग्ध्र्यौ मधुव्रते
उदकार्थकर्मणी देवता देवते अस्मे अस्मासु यज्ञं द्रविणं धनं च महि महत् श्रवः यशः वाजं अन्नं सुवीर्यं सुवीरत्वं च दधाने
दधानौ द्यावापृथिवी मीमिक्षतां मधुना सिंचतां ६ ऊर्जं न इति पिता पिता माता माता
पृथिवी नः ऊर्जं अन्नं पिन्वतां विश्वविदा सुकृते संरराणे सरूपमम
विश्वसंभुवा सर्वस्य भाविनी रोदसी द्यावापृथिव्यौ अस्मासु समित् संपश्यन् रयिं धनं समिन्वतां
॥ इति पंचमस्य पंचमे चतुर्दशो वर्गः ॥ उदु ष्य देव इति षडृचं सूक्तं भरद्वाज ऋषिः आद्यास्तिस्रः जगत्यः त्रि
ष्टुभः त्रिष्टुभः सविता देवता १ उदु ष्य देव इति देवः द्योतमानः सुक्रतुः सुकर्मा सः सविता हिरण्यया हिरण्मयौ आत्मीयौ ७

65
1915

बाहू सवनाय दानाय उद्यंस्त उद्यच्छति किं च मखः महनीयः युवा नित्यतरुणः सुदक्षः सुप्रज्ञः रजसः लोकस्य उदकस्य विधर्म
णि विधारके स्थितः घृतेन उदकेन पूर्णौ पाणी अभिप्रुष्णुते अभिप्रेरयति उ पूरणः २ देवस्य वयमिति तस्य देवस्य सवितुः स
वीमनि प्रसवे अनुज्ञाने श्रेष्ठे अतिशयेन प्रशस्ते वसुनः धनस्य दावने दाने वयं स्याम समर्थाः स्याम यस्त्वं विश्वस्य सर्व
स्य द्विपदः निवेशने स्थितौ प्रसवे च स्वतंत्रोसि पशूनां मनुष्याणां चतुष्पदः निवेशने प्रसवे च स्वतंत्रोसि ३ अदब्धेभिरि
ति हे सवितः अदब्धेभिः अहिंसितैः पायुभिः तेजोभिः रक्षणसाधनविशेषैः शिवेभिः सुखकरैः नः अस्माकं गयं गृहं अद्य परिपा
हि रक्ष हिरण्यजिह्वः हिरण्मयी यस्य जिह्वा सः सविता सुवितायनव्यसे नवतराय धनाय अस्मान् रक्ष पालय च नः अस्माकं अघशं
सः शत्रुः मा किः ईशत मा ईशत ४ उदु ष्य देव इति देवः द्योतमानः दमूनाः दममनाः हिरण्यपाणिः अयोहनुः हिरण्यहनुः य
जतः यष्टव्यः मंद्रजिह्वः मोदमानवाक्यः सः सविता प्रतिदोषं प्रतिरात्रिः अवसाने उदस्थात् उत्थितः तुयः दाशुषे यजमा
नाय प्रसवं परि भवत्तं वामं वननीयं संभजनीयं अन्नं आसुवाति प्रेरयति उ पूरणः ५ उदू अयानिति सविता उपवक्ता इव अ
स्माकं अधिवक्ता इव हिरण्यया हिरण्मयौ सुमती काशीमनायवी बाहू उदयान् उद्यच्छतु यो यः पृथिव्याः पृथिवीपर्यन्तान् दि
वः अंतरिक्षस्य रोकांसि प्रदेशान् अरुहत् रोहति पतयन् किंचित् यत्किंचित् अभ्वं महत् सर्वं च आतं तिरोहितं अ
रीरमत् रमयति च ६ वाममद्येति हे सवितः अद्य वामं धनं अद्य सावीः असुवः श्वः वामं आसुव उ किं बहुना दिवेदिवे
प्रतिदिनं वामं असुवः हे देव हि यस्मात् क्षयस्य निवासस्य भूरेः प्रभूतस्य वामस्य दाता असि अतो वयं अया अनया धिया वा
मभाजः धनवंतः स्याम भूयास्म ॥ इति पंचमस्य प्रथमे पंचदशो वर्गः ॥ इंद्रासोमा महीति पंचर्चं एकादशं सूक्तं भरद्वाज ऋषिः
त्रिष्टुप् छंदः इंद्रासोमौ देवता १ इंद्रासोमेति हे इंद्रासोमौ वां युवयोः तन्महित्वं महत्त्वं महि महत् किं तद् युवं युवां महानि महा
न्ति प्रथमानि मुख्यानि भूतानि चक्रथुः अकार्ष्टं किं च युवं युवां सूर्यं विविदथुः अलभेथां युवं युवां स्वः उदकं च विविदथुः अपि
च विश्वा विश्वानि तमांसि निदश्च निदितॄन् असुरान् अहतं अहिंसतं २ इंद्रासोमेति हे इंद्रासोमा॰ मोषासं वासयथः

वे·भा·पं· ८

विवासयथः किं च सूर्यं ज्योतिषा तेजसा सह उन्नयथः अभिवर्धयथः दिवं स्कंभनेन स्तंभनेन हेतुना अंतरिक्षेण मध्यस्थापितेन उ
पस्कंभथुः अस्तंभयतं मातरं विश्वस्य मातृभूतां पृथिवीं अप्रथतं व्यप्रथयतं २ इंद्रासोमाविति हे इंद्रासोमौ अहिं जगत् आ
वृत्य वर्तमानं अपः मेघस्थाः उदकधाराः परिष्ठाः परितः स्थितं वृत्रं अहतं हथः हतवंतौ द्यौः युवां अन्वमन्यत किं च नदीनां अ
र्णांसि उदकानि प्रैरयतं सृष्टवंतौ समुद्राणि बहूनि उदकस्थानानि आपप्रथुः पूरयतं च ४ इंद्रासोमेति हे इंद्रासो
मौ आमासु अपक्वासु गवां वक्षणासु ... अंतः पक्वं पयो निदधथुः किं च चित्रासु नानावर्णासु आसु जगतीषु
गोषु अंतः असिनं ... शुक्लवर्णं पयः अधत्तं यथा पृश्निभ्यः स्वयं न क्षरति तथा धारितवंतौ इत्य
र्थः इत्यर्थः ५ इंद्रासोमेति हे इंद्रासोमौ युवं युवां तरुत्रं तारकं अपत्यसाचं संतानयुक्तं श्रुत्यं श्रवणीयं रयिं धनं
अस्मभ्यं प्रयच्छथः किं च हे उग्रा उद्गूर्णौ इंद्रासोमौ युवं युवां नर्यं नृभ्यो हितं पृतनासहं शत्रुसेन्याभिभावकं शु
ष्मं बलं नृभ्यः मनुष्येभ्यः संविव्यथुः सम्यक् तनुतं ॥ इति पंचमस्य प्रथमे षोडशो वर्गः ॥ यो अद्रिभिदिति त्र्यृचं द्वादशं सूक्तं
भारद्वाजस्य ऋषिः त्रिष्टुप् छंदः बृहस्पतिर्देवता १ यो अद्रिभिदिति यः बृहस्पतिः अद्रिभित् पणिभिः परिरक्षितानां शिलोच्चया
नां भेत्ता प्रथमजाः प्रथमजातः प्रथमं जातः ऋतावा सत्यवान् आंगिरसः पश्चात् जातः हविष्मान् यज्ञभागवान्
द्विबर्हज्मा द्वयोः ... भ्राजत्सत्त्वः ... वर्तमानः नः अस्माकं पिता पालयिता भवति स वृष
भः वृषभः वर्षकः रोदसी द्यावापृथिव्यौ आ रोरवीति अभिगर्जति २ जनायेति जनाय यः बृहस्पतिः देवहूतौ
यज्ञे ... लोकं ... वृत्राणि आवरकाणि तमांसि घ्नन्
... अमित्रान् ... पुरः ... वृत्राणि ... ३ बृहस्पतिरिति
देवः धीमान् एकः ... बृहस्पतिः ... गोमतः गोसहितान् व्रजान् ... समजयत्
किं च बृहस्पतिः अप्रतीतः केनाप्यप्रतिगतः अपः सिषासन् ... स्वर्गस्य अमित्रं असुरं अर्कैः अर्चनसाधनैः

अर्कैः हंति ॥ इति पंचमस्य प्रथमे सप्तदशो वर्गः ॥ सोमारुद्रेति चतुर्ऋचं त्रयोदशं सूक्तं भरद्वाज ऋषिः त्रिष्टुप् छंदः सोमारु
द्रौ देवता १ सोमारुद्रेति हे सोमारुद्रा सोमारुद्रौ असुर्यं असुरसंबंधि बलं अस्मासु धारयेथां किं च दमेदमे सर्वेषु अस्म
द्गृहेषु इष्टयः यज्ञाः वां अरं पर्याप्तं प्राप्नुवंतु प्रकर्षेण व्याप्नुवंतु अपि च युवां सप्त रत्ना सप्त रत्नानि दधाना धारयंतौ नः अ
स्मभ्यं धनानि सुखकराणि ... तं भवतं द्विपदे अस्मदीयपुत्रादये चतुष्पदे पश्वादये च शं भवतं २ सोमारुद्रेति हे सोमारुद्रौ
नः अस्माकं गयं गृहं या अमीवा पापः रोगः आविवेश तां विषूचीं विषक् सर्वतो गच्छंतीं तां अमीवां विबृहतं वियोजयतं अपि
च निर्ऋतिं अनर्थं पराचैः पराक् यथा भवति तथा आरे दूरे बाधेथां निवारयतं अस्मे अस्माकं भद्रा भद्राणि सौश्र
वसानि अन्नानि यशांसि च संतु भवंतु ३ सोमारुद्राविति हे सोमारुद्रौ युवं युवां अस्मे अस्माकं तनूषु अंगेषु एतानि
प्रसिद्धानि विश्वा सर्वाणि भेषजानि धत्तं धारयतं किं च नः अस्माकं तनूषु अंगेषु एतानि प्रसिद्धानि अस्माभिः कृतं ब
द्धं च यदेनः पापमस्ति तत्पापं अवस्यतं शिथिलयतं अस्मत्तो मुंचतं च ४ तिग्मायुधाविति हे सोमारुद्रौ तिग्मायुधौ ती
क्ष्णायुधौ तिग्महेती तीक्ष्णशरीरौ सुशेवौ शोभनसुखप्रदौ सुमनस्यमाना सुमनस्यमानौ शोभनं मनः स्तोत्रमिच्छंतौ
संतौ युवां इह अस्मिन् कर्मणि नः अस्मान् सु मृळतं सुखयतं नः अस्मान् वरुणस्य पाशात् प्रमुंचतं नः अस्मान् गोपाय
तं आपत्तेः रक्षतं च ॥ इति प्रथमस्य पंचमे अष्टादशो वर्गः ॥ जीमूतस्येति एकोनविंशर्चं चतुर्दशं सूक्तं भारद्वाजः पायु
ऋषिः रथा ... ब्राह्मणास इति षष्ठी दशम्यो जगत्यौ अंत्या पोलस्यो अरण्य इति अनुष्टुप् ऋजीते आजंघंति आलाक्ता
अवसृष्टा इति तिस्रः पंचानुष्टुभः पद्मत्वाणा इति पंक्तिः शिष्टास्त्रिष्टुभः आद्यायाः वर्मदेवता द्वितीयस्याः धनुः तृतीयायाः
ज्यायाः चतुर्थ्याः आर्त्न्योः पंचम्याः इषुधिः षष्ठ्याः पूर्वार्धे सारथिः ॥ उत्तरार्धे रश्मयः सप्तम्या अश्वाः अष्टम्या रथः नवम्या रथ
गोपाः दशम्याः ब्राह्मणपितरः सोम्यद्यावापृथिवीपूषणलिंगोक्तदेवताः एकादशीद्वादश्योः इषुः त्रयोदश्याः प्रतोदः च

67/1913

पुर्दस्यांहसस्पाः पंचदशांपोऽग्नोः इषुः सप्तदश्यायुधरूमिः अष्टादशवनस्पतिः आदितिः अष्टादशः कवचसोमवरुणाः अंत्यायाः
देवाः अग्नोश्च १ जीमूतस्येवेति समरं संग्रामाणां उपस्थे उपस्थाने सति यद्यदा अयं राजा वर्मी कवचधारी सन् याति तदा जीमूतस्येव
अस्य प्रतीकं रूपं भवति अविद्धयानया तन्वा शरीरेण जय त्वं स त्वा वर्मणो महिमा पिपर्तु पालयतु २ धन्वनागा इति धन्वना चापेन गाः शत्रूणां जयेम धन्वनाजिं
संग्रामं च जयेम धन्वना तीव्राः उद्धताः समदः अस्मदमदयंतीः शत्रुसेनाश्च जयेम धनुः शत्रोः अपकामं कामस्यापायं
करोति किं बहुना धनुषा सर्वाः प्रदिशः सर्वा दिशः सर्वान् शत्रून् जयेम ३ वक्ष्यंतीवेदिति इयं ज्या समने संग्रा
मे पारयंती अपि सखायं प्रियं प्रियकरं वाक्यं वक्ष्यंतीव कर्णं धनुषो राज्ञः कर्णप्रदेशं
आगनीगंति आगच्छति धनुः ज्या तथा योषा नारी स्वामिनं पतिं परिष्वजाना इषुं परिष्वजमाना शिंजे शब्दायते ४ ते आ
चरंती इति ते धनुः कोटी समने संग्रामे समनेव योषा पतिं समीपं गच्छतीव आ चरंती उभे अर्त्नी उपस्थे उपस्था
ने माता पुत्रं यथा तथा शत्रून् विध्यतां राजानं धारयेतां किंच इमे धनुः कोटी संविदाने संजानाने अमित्रान् शत्रून्
विष्फुरंती विध्यतां ५ बह्वीनां पितेति इषुधिः बह्वीनां इषूणां पिता पालयिता अस्य इषुधेः
पुत्राः बहवः इषुधेः पुत्रा इषवः चिश्चाकृणोति समना अवगत्य चिश्चा इति शब्दं करोति किंच इषुधिः पृष्ठे निनद्धः प्रसूतः सर्वाः पृतनाः संकाः अयति॥ इति पंचमस्य प्रथमे एकोनत्रिंशो वर्गः॥ ॥
रथेति ष्ठन्निति॥ रथे तिष्ठन् सारथिः कुशलः पुरः पुरस्तात्
...

अश्वाः ७ तीव्रान् घोषानिति अश्वाः वृषपाणयः पांसूनां वर्षकखुराः रथेभिः रथैः सह जयंतः वेगमाचरंतः तीव्रा
न् घोषान् शब्दान् कृण्वते किंच अनपव्ययंतः अपलायमानाः अमित्रान् हिंसकान् शत्रून् प्रपदैः पादाग्रैः अव
क्रामंतः क्षिणंति हिंसंति ८ रथवाहनमिति अस्य राज्ञः रथवाहनं शत्रून् जित्वा रथेनोह्यमानं धनं हविर्भवति नामेति
संभावनायां रथेस्य राज्ञः आयुधं धनुः शरादिकं वर्म कवचं च निहितं भवति तत्र तं रथं सुखं विश्वाहा सर्वदा सुमनस्य
मानाः सुमनसो भवंतो वयं उपसदेम उपगच्छेम ९ स्वादुषंसद इति रथगोपस्तुतिः पितरः रथस्य
पालयितारः स्वादुषंसदः शत्रूणां अन्नमवसादयंतः वयोधाः अन्नस्य दातारः कृच्छ्रेश्रितः आपदि श्रयंतः शक्तीवंतः आयुध
विशेषवंतः गभीराः अगाधाः चित्रसेनाः दर्शनीयसेनाः इषुबलाः बाणबलाः अमृध्राः हिंसितुं अशक्याः सतोवीराः प्रसव
राः उरवः महांतः व्रातसाहाः संघानां अभिभवितारः भवंतीति १० ब्राह्मणास इति ब्राह्मणासः ब्राह्मणाः पितरः ऋता
वृधः सत्यस्य वर्धयितारः सोम्यासः सोमार्हाः न अस्मान् रक्षार्क्षत किंच अनेहसा अपापे द्यावापृथिवी द्यावापृथिव्यौ नः
अस्माकं शिवे सुखकृतौ भवतां पूषा देवः नः अस्मान् दुरितात् दुष्कृतात् पातु रक्षतु नः अस्माकं अघशंसः पापशंसः शत्रु
र्माकिरीशत मा ईष्ट॥ इति पंचमस्य प्रथमे त्रिंशो वर्गः॥ सुपर्णं वस्त इति सुपर्णं शोभनं बाणपक्षं वस्ते इयं इषुः धारयति
अस्याः इषोः मृगः मृगशृंगं दंतो भवति इषवः काश्चित् दंतमुखाः भवंति हि किंच गोभिः गोविकारैः स्नायुभिः सन्नद्धा
सम्यक् बद्धा प्रसूता प्रेरिता सती पतति यत्र युद्धे नरः संचरंति विचरंति च तत्र अस्मभ्यं इषवः शराः शर्म सुखं
यंसन् प्रयच्छंतु ११ ऋजीते इति हे ऋजीते ऋजुगामिनि इषो नः अस्मान् परि वृंग्धि परितो वर्जय नः अस्माकं तनूः श
रीरं अश्मा भवतु अश्मवत् दृढा भवतु किंच नः अस्मभ्यं सोमः अधि ब्रवीतु पक्षपातेन ब्रवीतु अदितिः शर्म सुखं यच्छतु
१३ आ जंघंतीति अश्वाजनि अश्वानां ताडनिके कशे या प्रचेतसः प्रकृष्टज्ञानाः सारथयः एषां अश्वानां सानु सानूनि सक्थी
नि आ जंघंति आघ्नंति जघनान् जघनानि उप जिघ्नते उप जिघ्नंति सा त्वं समत्सु संग्रामेषु अश्वान् चोदय प्रेरय १४

69
1915

ऋ॰भा॰पं॰ ३०

आहितवेति हजयः हन्तसमीपेवर्तमानः प्रविष्टस्थितः सन् आयाहि तिं प्याहेतुकां हिंसां परिबाधमानः निवारयन् भो गोः धारति आहितेव सपर्दं वनाहुं पाको हूंपर्ये तिपारेबेछ्यति किंच विश्वाविश्वानिव सुनानि ग्राना निविहान् जानन् पुमानपुरुरुनारणाक्षिपुमां संघषितं विश्वतः सर्वतः परिपातुरक्षतु १५ आलोकायेति यादृशुः आलोका आलेन विषाणा आरुरु कशी कहितनीरस्तोजपोकिं वयस्याः दृष्टोः पुसं जयोमयं भवति पुअग्न्यरे तसेपऽअग्नौरेनोमस्याः सापजं तस्य रिनाः तसेपऽर्मस्यकार्यगतथिराटकांउस्य पऽअग्न्यवानू वरुतू वरुसे तस्येदूश्रेदेयेदूरंनमः क्रियते ॥ इतिपंचमस्य प्र थमस्यैकविंशो वर्गः २१ अवस्पृ इति ब्रह्मसंहितेमंत्रेण नीवणिकोराखेहिंसाकुशलेदूषोत्र्वं अवस्पृष्टा सितापरा पर्यं तपरामरूदू नींहि यान्गच्छ अभिमान् हिंसकान् प्रपद्य स्वप्राप्तुहि च अमीषां अभित्राणां मध्येकं चनकं चिदपि मा उकि ं नः अवतिरमानुरू १७ मन वाणा इति परमुद्दे कुमाराः विशिष्टा इवपुंउतावृ ववाणाः संपतं तितत्रनः असम्यं अस्तु रक्षणकिं शर्म सुस्तं विश्वा सर्वं यथगुवाहि [illegible] १८ मर्माणित इति हे राजन् त्वदीयानि मर्माणि पितुस्ता नि पुपिरः सर्वा विषति नानि मर्माणि वर्मणा कवचेन [illegible] राजा सां जनुमन्यताइना अंतरं अमृतेन त्वा छा आहेतु किं च वरुणो पिते तुभ्यं उरो वरीयः उरु [illegible] वरुणोनु करोतु जयं तंत्वा वां देवाः सर्वे जनुमदं तु अनुरूप्यं तु १९ यो नः स्व इति यः नः चातिः ञरणः अरममाणः यत्र्वाति ष्ठः [illegible] नः दूरे स्थितः नः अस्मान् जिघांसति हंतुमिच्छति नं देवाः सर्वे हिवाः धूर्वंतु हिंसंतु ब्रह्मसमंचः ममअंतरं शरणो निवारकं वर्म विद्यते ॥ इति पंचमस्य प्रथमे द्वाविंशो वर्गः ॥ ॥इति षष्ठे मंडले पंचदशोनुवाकः ॥ ॥इति समाप्तो मंडलः ॥ ॥सप्तमे मंडले षडनुवाकाः ॥ तत्र प्रथमेनुवाके सप्तदश सूक्तानि तत्र अग्निं नर इति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठ ऋषिः आदितोऽष्टादश विराजः श्येका एकादशः वा त्रिष्टुभः सि द्धा अग्निर्देवता ॥ १ अग्निं नर इति नरः ऋत्विजः मया स्तं प्रकर्षेण स्तंभं दूरेदृशं दूरेपश्यमानं गृहपतिं रक्षणापालकं जतुनः अग्निं ईळत ॥ १ अग्निमर इति ... अंगुलिभिः अनयंत २ तमग्निमस्त इति यः अग्निः दम स्युं गमनं ... विद्यमानं अग्निं ...

३०

71/1915

भि यते हव्यः प्रपनीयः हविर्भिः समर्धनीयः नित्यः अजस्र आसवनं व्रतंस प्रतिष्ठसंस प्रतिहरनि मधिंकं तस्मिन् सर्वस्मा दपि लक्षणीः अवसिर सेणा यववसवः आसकाः ये विरिष्टा अस्तेरहे स्वप्वन् न्यषदुः ३ प्रेद्धो अग्न इति हे पविष्ठ युवतम अग्ने प्रेद्धः प्रकर्षेण समिद्धः त्वं अजस्रया सरणशील या सम्यग् आलयानः अस्मदर्थं पुरः पुरस्तात् आहवनीयायतने दिदीहि दी प्यस्व त्वां शश्वंतः बहवः वाजाः अन्नानि उपितु पयंति उपगच्छंति ४ प्र ते अग्नय इति अग्निभ्यः लौकिकेभ्यः अग्निभ्यः वरं अ मत्ततम् सुमंतः दीप्तिमंतः सुवीरासः कल्याणपुत्रपौत्रयुक्ताः ते अग्नयः प्र शोशुचंत प्रकर्षेण नितरां दीप्यंते यत्रयेषु अग्निषु आसीनाः सुजातासः नरः यजमानाः समासते सहासते ५ दा नो अग्न इति हे सहस्य अभिभवकुशल अग्ने सुवीरं शोभनपुत्रो पेतं स्वपत्यं शासं यया पोषेण प्रजा संस्थं रयिं धनं धिया सोमेन अस्मिन् यं दाः देहि यं रयिं यातुमावा मृतिसायुतः न नर निनाधते ॥ ॥इति पंचमस्य प्रथमे त्रयोविंशो वर्गः ॥ उप यमेतीति सः दक्षं सुबलं यं अग्निं हविष्मती हविषा युक्ता घृताची घृतं यंवती पुत्रनावाजुहूः युवति अग्निना नित्यं युक्ता दोषा वस्तोः रात्रौ अहनि च उपैति उपगच्छति अस्य स्वान्स्व कीया अरमतिः दीप्तिः वसयुः स्तो स्तुणां धनमिच्छंती उपैति ७ विश्वा अग्ने इति हे अग्ने विश्वा विश्वान् अरातीः शत्रून् तपोभिः तेजोभिः अप दह ये भिः ये तपोभिः अरूथं परुष शब्द कारिणं राक्षसं अदहः दहसि किंच अमीवां रोगं निस्वरं स्व नायमं यथा भवति तथा प्रचातय प्रकर्षेण नाशय ८ आ यस्ते अग्न इति हे वसिष्ठ श्रेष्ठ शुक्र शुद्ध दीदिवः दीप्त पावक शोधक अग्ने ते तव अनीकं तेजः यः आदधते समेधयति तस्य च नः अस्माकं उपो पि भव एभि तव यैः स्तोत्रैः इह अस्मिन् यज्ञे स्याः भव ९ वि ये ते अग्न इति हे अग्ने ते तव अनीकं तेजः पित्र्यासः पितृहिताः मर्ताः मनुष्याः नरः कर्मणां नेतारः यजमानाः पुरुत्रा बहु षु देशेषु विभेजिरे विभजंते आदधुरिति यावत् तेषामिव नः अस्माकं उतो अपि च एभिः स्तोत्रैः सह सुमनाः अनुग्राहकमनाः सन् इह भव इह भव स्याः भव १० इमे नर इति ये मनुष्याः मे मदीयाः प्रशस्तां प्रकृष्टां धियं कर्म पनयं तं स्तुवंति त इमे नरः मनुष्याः वृत्रहत्येषु संग्रामेषु शूराः अदेवीः आसुरीः विश्वाः सर्वाः मायाः अभि सं तु अभिभवंति ॥ ॥इतिपंचमस्य प्रथमे च

वे·भा·पं·
३३

तुर्विंशो वर्गः ११ मावस्ते अग्न इति हे अग्ने स्थूलेषु आहिरहितेषु गृहे मा निषदाम नित्यवसाममन्दणां अन्येषां च गृहे मा निषदाम दु
र्गृहे ग्नो हितं जपे अर्वीषसः अपुत्राः अवीरताजवीरतया शुभ्रकाम्नसंतः यातां परिचरंतः प्र आवसथे वृद्धयः स्मगृहेषु नित्य
साम १२ यमश्वीति नामिति यं यज्ञं यज्ञस्य अश्वी अश्ववान् अग्निः नित्यसं उपयाति तं प्रजावंतं प्रत्सादि साहितं स्वपत्यं वी
जन संतानी पितं स्व जन्मना जीर स्थिरश्चेण सापुत्रेण पारे धामं वर्धमानं क्षयं गृहं नः अस्मभ्यं हे अग्ने देहि तिष्ठेत्ः १३ पा
हिनो अग्ने इति हे अग्ने नः अस्मान् अजुष्टात् अप्रीतिविषयात् रक्षसः राक्षसात् पाहि रक्ष किंच अररुषोः अदातुः अघयोः
पापमिच्छतः धूर्तेः हिंसकात् पाहि अपि च तस्मात् पायु आसहाय भूतेन पृतनायून् पृतनाकामान् अभिष्यां अभिभवेयं।
१४ सेदग्निरिति सइत् स एवाग्निः आहवनीयादिः अस्मदीयः अन्यान्यान् इतरान् अन्यदीयान् अ. ग्नीन् अति भवतु य
त्र यस्मिन् अग्नौ वाजी अन्नवान् वीडुपाणिः दृढहस्तः सहस्रपाथाः बहुधनः तनयः अस्मत्पुत्रः अक्षरा अक्षरेण क्षयरहि
तं स्तोत्रेण सचते समवैति सम्यक् परिचरति १५ सेदग्नि यो वनुष्यतः इति यः अग्निः वनुष्यतः हिंसकान् उरुष्यात् अधिकात् अंहसः पाप
त् त्रायति पाति अक्षंतं रक्षति ये स्त्र जातासः स्त्रजन्मान एव वीराः स्तोतारः समिद्धारं प्रबोधकं अग्निं परिचरंति स इत् स एवा
ग्निः॥ इति पंचमस्य प्रथमे पंचविंशो वर्गः १६ अयं सो अग्निरिति यमग्निं ईशानः ऐश्वर्यमिच्छन् हविष्मान् यजमानः स
मिद्धिं समृद्धं दीपनीयं या अनेषु हिंसारहितेषु यज्ञेषु होता देवानां आह्वाता पर्येति परिगच्छति सः अयमग्निः पुरुत्राच
तु स्तुरे दीपु आहुतः आहुतिभिः अभिहुतः १७ त्वे अग्न इति हे अग्ने त्वे त्वयि ईशानासः धनानामीश्वराः संतः नित्यानि त्यानि
आनि भाराणि उभ्राजसीं वहन्त हि नु शीतं शास्वं च कृण्वंतः कुर्वंतः प्रियेपि यज्ञेषु रि बहूनि आहवनानि दर्वीषि आजुहुयुः
न आहुवाम १८ इमो अग्न इति हे अग्ने त्वं अजस्रः अनवरतः सन् इमा इमानि वीततमानि अतिशयेन कांतानि हव्या हव्या
नि देवेषु ताति देवानां समूहं अभिवक्षि वह हे अजगृह वनः अस्मदीयानि सुरभीणि शोभनानि ईरएतानि हव्यानि देवाः प्रतिय
तु प्र लेक कामयंतां १९ मा नो अग्न इति हे अग्ने नः अस्मान् अवीरते अपुत्रतायै मापरादाः मा देहि दुर्वाससे दुष्टवस्त्रि ३३

73
1915

य च नो मापरादाः अस्यै अमतये अभिरूपेन अस्मान् मापरादाः क्षुधे अन्नाभावेन अस्मान् मापरादाः हे ऋतावः सत्यव
न् अग्ने रक्षसे च किंच मापरादाः दमे गृहे नः अस्मान् मा जुहुर्थाः मा हिंसीः वने चास्मान् मा जुहुर्थाः २० नू मे ब्रह्माणीति
हे अग्ने त्वं मे मम अर्यः ब्रह्माणि अन्नानि नु क्षिप्रं उ कथा घितकर्षण शोधितानि कुरु किंच हे देव अग्ने मघवद्भ्यः हविष्मद्भ्यः अ
स्मभ्यं सुषूदः अन्नानि प्रयच्छते त्वदीयार्थं राती दानेउभयासः स्तोत्रिणः शास्त्रिणश्च स्तुवंतः यजमानश्च वयं आस्याम अस
र्थं भवेमनः अस्मान् यूयं सस्वरिचाराः सर्वे स्वस्तिभिः मंगलैः सदा नः पात रक्षत॥ इति पंचमस्य प्रथमे षड्विंशो वर्गः॥ २१ त्व
मग्ने सुहव इति हे सहसः सूनो बलस्य स्त त अग्ने सुहवः स्वाह्वानः रण्वसंहक् रमणीयसंदर्शनः स्वं स्व दीनी शोभनदीप्या वि
दाहि दीप्यस्व किंच तनये ति से औरसे पुत्रे त्वं सचासहाय भूतः माधक् मा अभिधाक्षीः अपि च अस्मात् पृथक् भूतः वीरः
पुत्रः नर्यः नरहितः मा विदासीत् माप क्षीयतां २२ मा नो अग्न इति हे अग्ने सचासहाय भूतः त्वं देवेद्धेषु ऋत्विग्भिः सामि
द्धेषु एषु दुर्भर्तेषु भरणायनः अस्मान् मा प्रवीचः न प्रहिणु किंच सहसः सूनो बलस्य पुत्र अग्ने देवस्य ते तव दुर्मतयः भि
प्रहर्षुद्यपः भ्रमांत चित्तमारपि अस्मान् मान्क्षोनमा अभ्याभुवंतु २३ स मर्तो अग्न इति स्वनीक स्वनीक हे अग्ने अमर्त्य
देवतात्मनि त्वयि हव्यं हविः य आजुहोति स मर्तः मनुष्यः रेवान् धनवान् भवति यं मर्त्यं सूरिः प्राज्ञः अर्थः धनादिकामः पृ
छमानः अस्मेउद्यारः कास्तेइति पृच्छति अभिगच्छति स एव मनुष्यः देवता देवताभ्यः वसवति धनपोषं दधाति २४ महो नो
अग्न इति हे अग्ने नः अस्मदीयस्य महः महतः स्तवितस्य कल्याणस्य कर्मणः विद्वान् अस्मदीयं कल्याणं कर्म जानन् इत्यर्थः त्वं स
रिभ्यः स्तोतृभ्यः अस्मभ्यं हंतं महांतं रयिं धनं आवह हे सहसावन् बलवन् अग्ने येन धनेन वयं स्तोतारः अविक्षितासः अ
विक्षीणाः आयुषा पूर्णायुषः सुवीराः कल्याणपुत्रपौत्राश्च संतः मदेम हृष्येम २५ नू मे ब्रह्माणीति हे अग्ने त्वं मे मदर्थं ब्रह्माणि
अन्नानि नु क्षिप्रं उ कथा घृतकर्षण शोधितानि कुरु किंच हे देव अग्ने मघवद्भ्यः हविष्मद्भ्यः स्मभ्यं सुषूदः अन्नानि प्रयच्छते त्वद
यार्था राती दाने उभयासः स्तोत्रिणः शास्त्रिणश्च स्तुवंतो यजमानश्च वयं आस्याम अस्यर्थं भवेमनः अस्मान् यूयं स्वस्तिभिः

वेभा॰पं॰ ३२

ताभ्य सर्वे स्वस्तिभिः मंगलैः सदा नः पालयत॥ ॥इति पंचमस्य प्रथमे सप्तविंशो वर्गः॥ ॥इति ऋग्भाष्ये पंचमाष्टके प्र
थमोऽध्यायः॥ ॥जुषस्वेत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः आप्रियो देवताः प्रत्यृचं देवताः सो विज्ञाविदं आ
प्रीसूक्तं १ जुषस्वेति हे अग्ने नः अस्माकं समिधं अद्य जुषस्व सेवस्व यजतं यजनीयं प्रशस्तं धूमं ऋण्वन् प्रेरयन् च
उत् असंगं योगं दीप्यस्व च दिवि अंतरिक्षं संभवं सानु समुच्छ्रितं स्तूपैः रश्मिभिः उपस्पृश अपि च सूर्यस्य रश्मिभिः स
ह नः संगच्छस्व २ नराशंसस्येति ये देवाः ऋक्कमवः ऋप्रज्ञाः शुचयः दीप्तिमंतः धियंधाः कर्मणां धारयितारः उभयानि
हवींषि सोमं चाज्यं चाभ्यानि देवाः स्वदंति भक्षयंति तेषां एषां मध्ये यज्ञैः हविर्भिः यजतस्य यजनीयस्य नराशंस
स्य नरैः शंसनीयस्य अग्नि विशेषस्य महिमानं महत्त्वं उपस्तोषाम वयं उपस्तुमः ३ ईळेन्यं वइति हे अध्वर्यवः वो यूयं इ
ळेन्यं स्तुत्यं असुरं बलवंतं सुदक्षं शोभनबलं अंतर्मध्ये दूतं देवानां हविर्वहनार्थं चरंतं सर्वदा
मनुष्वत् मनुना समिद्धं अग्निं अध्वराय यज्ञाय सदमित् सदा एव संमहेम संपूजयत ४ सपर्यव इति सपर्य
वः परिचरंतः अभिगमनाः अग्निं अभिगच्छंतः जानुकं नरमाणाः पादैः भरंत बर्हिः नमसा हविषा सह अग्नेः प्रस्तरं जति प्रभरंति
हे अध्वर्यवः घृतप्रुषं घृतसंसिक्तं पृषत् वद्धं स्रुग्भिः युक्तं बर्हिः हविषा सह आयुक्षाणो यजध्वं अग्निं परिचर
त ५ स्वाध्यो वि दुर इति स्वाध्यः सुकर्माणः देवयंतः देवकामाः यजमानाः रथयुः रथकामास्य देवतादेवतानां यज्ञे दुरः द्वा
राः पूर्वे वि श्रयंते अपि च यज्ञे सुमातरा गावो
वत्सं इव अग्निं तरंते अधुवीम ययालयः श्रेयाणि उदकेन मरुतः समं अनु अध्वर्यवः आज्येन समंजंति॥ ॥इति पंचमस्य
द्वितीये प्रथमो वर्गः॥ ॥६॥ उत योषणे इति उत अपि च योषणे दिव्ये दिवि भवे मही महत्यौ बर्हिषदा बर्हिषि सादयंत्यौ
पुरुहूते बहुभिः आहूते सुभगे धनवत्यौ यजत्रे यजनीये उषासानक्ता अहोरात्रे सुदुघे इव धेनू अस्मान्
कामानां दोग्ध्र्यौ अत्र आसीदतां ७ विप्रा यज्ञेष्विति हे आह्वनारौ विप्रा मेधाविनौ आ नः यज्ञ स्वातव्यौ मानुषेषु जातवेदः ३२

75/1915

त्रियमाणेषु यज्ञेषु यागकर्मणां कर्तारौ वां युवां यजध्यै यष्टुं मन्ये स्तोमिः किंबहुविधेषु हवनेषु स्तोत्रेषु सत्सु नः अस्माकं अध्व
रं यज्ञं ऊर्ध्वं देवाभिमुखं कुरुतं च अपि च नानीयुवां देवेषु विद्यमानानि वायणि धनानि वनथः संभजथः मनानि अस्म
भ्यं संप्रयच्छथः इत्यर्थः ८ आ भारती इति भारती भरतस्यादित्यस्य पत्नी भारती भिः सजोषाः सहिता इळा मनुष्येभिः
मनुष्यलोकवर्तिभिः देवैः सार्धं अग्निः आगच्छतु सरस्वती सारस्वतेभिः सारस्वतैः मध्यमस्थानैः देवैः सार्धं अर्वाक् अस्मदभि
मुखं आगच्छतु आगत्य तिस्रो देवीः देव्यः बर्हिः इदं आसदंतु आसीदंतु ९ तन्नस्तुरीपमिति देव द्योतमान त्वष्टः रराणः र
ममाणस्त्वं नः अस्माकं तुरीयं त्वरितं माघुवन्न पोषयित्नु पोषकरं तत् वरेतः विस्यस्व विशेषेण अवसानं प्रापय विमोचयेत्य
र्थः यतः तेनसः कर्मण्यः कर्मकुशलः सुदक्षः सुबलः युक्तग्रावा सोमस्य देवकामः वीरः पुत्रः जायते १० वनस्पतेवेति हे
वनस्पते देवदेवान् पाथः स्व उपरोक्षः अग्निर्वनस्पतिः शमिता शामित्ररूपः स्वदयाति हविः स्वदयाति प्रेरयतु सेत् स एव वन
स्पतिः हविः देवानाम् ... सत्यतरोपि सन्त्यजाति यजनेषु देवानां जनिमानि जननानि यथा स्वयंवेद तथा ११ आय
त्यग्न इति हे अग्ने समिधानः अर्वाक् अस्मदभिमुखः सन् इंद्रेण तुरेभिः त्वरितैः देवैश्च सरथं समानं रथं यथा वेभिति
तथा आयाहि आगच्छ नः अस्माकं बर्हिः अध्यास्तां अदितिश्च सुपुत्राः कल्याणपुत्रा स्वाहा देवाश्च सर्वे अमृताः संतः मादयं
तामिति॥ ॥इति पंचमस्य द्वितीये द्वितीयो वर्गः॥ ॥अग्निं वो देवमिति दशर्चं तृतीयं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः अ
ग्निर्देवता १ अग्निं वो देवमिति हे देवाः यूयं देवं यातमानं अग्निं अन्यैः अग्निभिः सजोषाः सजोषसं सहितं यजिष्ठं य
ष्टृतमं अपि अध्वरे यज्ञे दूतं कृणुध्वं कुरुत यः अग्निः देवो पि सन् मर्त्येषु निध्रुविः नितरां ध्रुवस्तिष्ठति कृतावा यज्ञवान् तपु
र्मूर्धा तापकतेजाः घृतान्नः पावकः शोधकः भवति २ प्रोथदश्व इति यवसे घासे अविष्यन् भक्षयन् प्रोथत् शब्दं कु
र्वन् अश्वान् अश्व इव महतः संवरणात् निरोधात् द्रावरूपो वि यदा व्यस्थान् सततेषु वृक्षेषु वितिष्ठति आत् तदा अस्याग्ने
र्वातः चार्चिः अनुवाति वाति प्रसृतः अध अनंतरं हे अग्ने ते तव व्रजनं वर्त्म कृष्णं अस्ति भवति स्म पूरणः ३ उद्यस्य

वे॰भा॰पं॰
३३

इति हे अग्ने नवजातस्य नवप्रादुर्भवस्य वृष्णो वर्षितुः यस्य ते तव अजराः जरारहिताः ज्वालाः इध्यानाः उच्चरंति उद्गच्छंति
यस्य अरुषः आरोचमानो धूमः द्यां अच्छ दिवमभि एति हे अग्ने त्वं दूतः सन् देवान् समीयसे हि सं प्राप्नोषि ॥४॥ वियस्य
ते इति हे अग्ने यस्य शवरूपस्य ते नवया अजः तेभः पृथिव्यां प्रस्मान् प्रसितिं यत्र विश्रयति यत् अन्नानि काष्ठा वी
नि अग्नेः दंष्ट्रैः आस्याभिः इव स्पर्धः समवत् सः सीदति पाशेनेव सृष्टा उद्युक्ता सेनेव ते तव प्रसितिः ज्वाला एति गच्छति दृस्मा
द्रु दर्शनीय अग्ने संयवं स्यत्र जिह्वा ज्वालया विविनक्ति काष्ठादीनि भक्षयसि ५ तमिद्दोषेति यविष्ठं युवतमं अतिथि
अतिथिवत् पूज्यं तमित् तमेवाग्निं दोषा दोषायां रात्रौ उषसि दिवसेपि तमेव अस्य अग्नेर्योनौ स्थाने आयतने नि शिश्रा
शाः हीपयन्तः नरः मनुष्याः अस्तं अवधनिवत् अर्यं तत्परिचरति आहुतस्य वृष्णः कामानां वर्षितुः अग्नेः तस्य शोचिः ज्वाला
नाः दीपयन्तः नरः मनुष्याः ... ॥ ॥इति पंचमस्य द्वितीयो वर्गः॥ ॥६ सुसंदृक्ते इति स्वनीक हे स्वनीक सुतेजस्क अग्ने त्वं यत् रुक्मो न सूर्य इव
दीदायदीप्यते॥ ॥इति पंचमस्य द्वितीयो वर्गः॥ सुसंदृक्ते सुसंदृशीं प्रव त्तिकियते तवप्रस्तुष्मः तेजोवल
नकि अंतिके विशेषसे विशेषेण दीप्यसे तहाते नव प्रतीकं रूपं सुसंदृक् सुसंदर्शनं प्रव त्ति कियते तव प्रस्तुष्मः तेजोबलं
दिवः अंतरिक्षात् तन्यतुः नवानि दिवस्पतानि अंगन्तर्दर्शनीयः स्तोनस्तूर्यदुरवभातु सदीप्ति सनि चक्षि प्रदर्शयासि
७ यथावइति हे अग्ने अग्नेयेनः तुभ्यं स्वाहा स्वादुतं हविः किं च यथा यथ इंद्रामिः गोभिः गोविकारैः क्षीरादिभिः घृतवद्भिः
घृतसहितैः हव्यैः पुरोडाशादिभिः अपार दाशोमपरिचरेम तथा नृमणिभिः प्रसिद्धैः अमितैः अपरिमितैः महोभिः ते
जोभिः शतं परिमिताभिः आयसीभिः हिरण्मयीभिः पूर्भिः नगरीभिः नः अस्मान् निपाहि नितरां रक्ष ८ यावाते संती
हि सहसः सूनो बलस्य पुत्र जातवेदः आनपत्ये अपि दाशुषे दातुः यजमानेभ्यः दत्तवतः ते तव या वाः याश्च ज्वालाः सं
ति अध यः रक्षोभिः अप्रधर्षिताः गीर्भिर्वा गीर्भिर्वतीः पुत्रवतीः प्रजाः पुरूण्याः रक्षताभिः रुग्भूतु
भिः नः अस्मान् स्तवन्मघवानं स्तरीस् हविषाम् गेरकान् अरिस्तः स्तोतॄन्मा निपाहि नितरां रक्ष ९ निर्यत्पूते

३३

77
1915

वे निपक्षयराश्चुचिः अग्निः स्वमात्तयाधानयानपाकणाक्रपयादीस्तारोचमानः पूतेवस्वधितिः तीक्ष्णकृतास्वधितिः
रिव निर्गात् काष्ठात निर्गच्छति तदानीं देवयज्या यजयति यः अग्निः उशीभ्यः कमनीयः सुक्रतुः सुकर्मा पावकः शोधकश्च
मार्गाः जरूषाः अजनिष्ट आजायत सदेवयज्याय भवतीति १० एतानो अग्न इति हे अग्ने एतानि परिदृश्यमानानि
सौभगा सौभगानि शोभना नि धनानि नः अस्मभ्यं दिदीहि दीपय अपि अपि च क्रतुं कर्म ज्ञानं कत्तरिंवा सुचेतसं शोभन
प्रज्ञान युक्तं वनेम संभजेमहि विश्वा विश्वानि धनानि स्तोतृभ्यः उद्गातृभ्यः गृणते शंसते च संतु यूयं त्वत्परिवाराश्च सर्वे यू
यं नः अस्मान् स्वस्तिभिः सदा सर्वदा पात रक्षत॥ ॥इति पंचमस्य द्वितीयो च तृतीयो वर्गः॥ ॥प्र वः शुक्रायेति दशर्चं चतु
र्थं सूक्तं वसिष्ठः ऋषिः त्रिष्टुप्छंदः अग्निर्देवता १ प्र वः शुक्रायेति हविषां वोढारः वः यूयं शुक्राय शुभ्राय भानवे दीप्ताय अग्न
ये सुपूतं सुशुद्धं हव्यं मतिं च स्तुतिं प्रभरध्वं यः अग्निः दैव्यानि मानुषा मानुषाणि विश्वानि जन्मानि जातानि अंतः अंतरा विश्व
नाप्रज्ञानेन मार्गेण वा जिगाति गच्छति २ सगृत्सो अग्निरिति सनितः स एव गृत्सः मेधावी अग्निः तरुणः तारको अस्तु अभ
वति यतो यत्तः पदामातुः अरण्याः पविष्ठः युवतमः सन् अजनिष्ट यः अग्निः शुचिदन् दीप्तज्वालः वनावनानि संयुवते आ
त्मना संयोजयति किं च पुरु बहुलं चित्रिनूहरी अपि अन्ना अन्नानि सद्य इत् सद्य एव समिदत्ति सम्यक् भक्षयति ३ अस्य देव
स्येति अस्य देवस्याग्नेः अनीकं मुखं संसदि अग्ने ... तं अग्निं मर्तासः मनुष्याः जगृभ्रे परिगृह्णंति यः अग्निः पौरुषे
यां पौरुषैः क्रियमाणां गृभं गृभीतां स्तुतिं बोधनि वेदने सः अग्निः आयवे मनुष्यार्थं दुरोकं सपत्नैः दुःसेवं यथा भवति तथा शुश्रु
क दीप्यते ४ अयं कविरिति कविः क्रांतदर्शनः प्रचेताः प्रकाशकः अमृतः मरणधर्मरहितः अयं अग्निः अकविषु अक्रांत दृक्षु
मर्तेषु मरणधर्मकेषु नि धायि निहितः प्रत्यक्षः हे सहस्वः बलवन् अग्ने ते त्वयि सदा वयं सुमनसः सुमनसः स्याम सत्वं अ
त्र अभिख्याभिः नः अस्मान् मा जुहुरः मा हिंसीः ५ आ यो योनिमिति यः अग्निः देवकृतं देवैः कल्पितं यानिं स्थानं आससाद

अआसते विश्वे देवाः स्वामंकृष्ण्यंति अग्नेरिष्वतआहस्मियस्मात् कारणात् अग्निः ऋताभद्राया अमृतान्न देवान् अत्तारं
न् विभूपायसंविभजात् एं ओषधीः ओषधयः वनिन्भ्यहस्तान्कगर्भसंतं बिभर्ति हि भिभ्यबिभर्ति॥ ॥इतिपंचमस्याष्टमो
वर्गः ८ इस्रोत्योर्विदिति अमृतस्य अमृतं अमृतंइह कं बगृहे अभिकंयसानोः दातुंअग्निः ईश्रोइष्टेहि स्कवीर्यस्य
जनवाजीकं रायः धनंसस्तुं दयोर्देवे घ्रमत्तः सहस्रावन्न् हे बलवन् अपिताः वायवनिष्ठाः अवीराः पुत्रादिरहिताः मापरि
नहामामापर्युपविशाम अस्मदः रूपरहि ताम्नसं तोमापरिषदाम अतुषःपरिचरणोहीनाः मापारिषदाम ७ परिषद्यमिति
अरणस्य अरणस्य रिक्थः धनं परिषद्यं पार्श्वस्थं भवति हि अनोनित्यस्य अतुनर्देयस्य रायः धनस्य पात्यः स्याम हे अग्ने अ
भ्य आनंअजीवर्तरीपः अपत्यं नालिनभवति अपेतास्य अविदुषः पथो मागन्निष्युत्रोत्पादनप्रमुखान् माविदुषः दुष्वेव
सेनाविदुषः मरिषणायर्वस्यान्मविउक्तएवार्थोभिप्रपंचते अन्योदर्यः स्कठोव स्कस्तनमोपिदय भाय भ्रमेत्य हणायम
नसामंतवाउ मनसावि मंतव्योन भवति हि अथाविनूजिवसः अन्योदर्यःओकइत् संस्थानमेव पुनरेति प्रा प्नोतिअतो
वाजीजयावाह् जसीवाह् वाकूणामनि न् भवितात्मनः नवजातःपुत्रः नः अस्मान् आएतुआगच्छतु २ तमग्नइति हे सहस्
वन् बलवन् अग्ने तं वयुवनः हिंसकान् शोरुस्माभिपाहित्रिसुतस्मिन् अवद्यान् पापान्नः अस्मान्निपाहिस्मांत्वांअस्मन्वत
नदीयं पायः अगं इषिः समभ्येतु सम्यक्प्राप्नोतु अपिच अस्मान् स्पृहयाय्यः सहस्री सहस्रसंख्याकः रयिः संजग्मतु १०
रवानड्तिहेअग्ने एनाएतानिदोनपानिस्रोतनानिऋः अवकं यंदिदिहिदीपयअपिअपिच्छक्तुं कर्मसुवेनसंयोभनप्रज्ञा
नशुकंवनोभसंगर अभाहि विभाविभा सिधनानिस्तोत्रभ्यः उग्रक्षयः गृणतेश्चसनेवसंतु पूर्णंतु परिचाराभ्य सर्वेपूरुपंनः अस्मा ३४
नूत्ताविनिः हीभिः सदासर्वदा पाता रक्षत॥ ॥इतिपंचमस्याष्टमोवर्गः॥ ॥वायव्येनवसंहतिमवर्णपंचमंसूक्तंवासिष्ठः अ
ग्निः ऋषिष्टुप्छंदः वैश्वानरोग्निर्देवता १ वायपहूतिहे स्तोतारः नवसेमहरायदिवःअंतरिक्षस्यपृथिव्याम् अरतिंयगंत्रे अग्नि
र्विश्वान्नसंहितकामप्राप्तिकालेतिचेदं यः वैश्वानरः विश्वनरहितः अग्निः विश्वेषां सर्वेषां अमृतानां देवानां उपरक्षिप

79
1915

त्वामेषयज्ञोआमरबाहुः घृतुदेः देवेः सहितः सम्बवारचे २ पृष्ठोदिवीति सिंधूनां स्यंदनशीलानां क्षितयानां अपां नेता वृषभः
वर्षणस्वर्गोनापद्य अग्निः दिविअंतरिक्षेरयथिमां मघा पिच्छपापि सः वैश्वानरः अग्निः वरेण श्रेष्ठेन हविषा ते असावावृधानः
वर्धमानः सक्रतुषाभिराः मनुष्यपज्ञाः अग्निप्रतिविभाति ३ त्वद्भियाविश इति हे वैश्वानराग्ने त्वत्तः भियाभीत्या असि
क्री अस्मिकवर्णाः राअस्यः विशः प्रजाः असमनाः परस्परं असमवेताः भोजनानि धनानि जहतीः त्यजंत्यः आपन् आगच्छन्
करायन् यद्यपूरवेराश्रोशोशुचानः दीप्यमानः पुरः नस्य वाराणां पुरः दरयन् दारयन् अदीदेः अज्वलः ४ तवत्रिधाविति हे वैश्वा
नराग्ने नयनं तदतलीलिकरं कर्म त्रिधातु अंतरिक्षं पृथिवी चउतद्यौः इतित्रयोलोकाः सचंत सेवंते अपिच त्वं अजस्रेण शोचिषा
निःसिनमकाशेनशोशुचानः दीप्यमानः भासादीस्या रोदसी द्यावापृथिव्यौ आततंथ विस्तारयसि ५ त्वामग्नेहरितइति हे
अग्नेकृष्टीनां प्रजानां पतिं स्वामिनं रयीणां धनानां रथ्यं नेतारं उषसां अन्हां महांत केतुं प्रज्ञापकं वैश्वानरं विश्वनरहितं त्वां
हरितः अश्वाः वावशानाः कामयमानाः सचंते सेवंते तथा गिरः स्तुतयः निरूपाः वाचः धुनयः पापं धुन्वानाः घृताचीः घृतमंचत्यः
हविषासहितास्तुवसर्पः सचंते॥ ॥इतिपंचमस्याष्टमोवर्गः॥ ६ त्वे असुर्यमिति हे मित्रमहः मित्राणां पूजयितः अग्ने त्वे
त्वयि वसवः वासकाः देवाः असुर्यं बलं संन्यृण्वन् संगमयन् ते क्रतुं तस्मात् शीलिकरं कर्म जुषंत सेवंत हि किं च त्वं आर्याय कर्मवते ज
नाय उरु ज्योतिः अधिकं तेजः जनयन् दस्यून् कर्महीनान् ओकसः स्थानात् आजः निरगमयः ७ सजायमानइति हे वैश्वा
नरस सः अग्निः परमे व्योमन् व्योम्न जायमानः सूर्यरूपेण प्रादुर्भवन् वायुर्नयथा वायुः हि देवस्य ग्रहेषु प्रथमं सो
मं पिबति न यायाथ सोमं सद्यः परियासि परि पिबसि किं च हे जातवेदः जातधन पिता भुवनाभुवनानि उदकानि जनयन् अ
पसाय जपत्स्व तालन्तीवाय अनाय दशास्यम् कामान् यच्छन् अपि क्रन्न विपुदाल्मना अपिक्रंदसि ८ तामग्ने अस्मेइति हे
जातवेदः जातप्रज्ञ वैश्वानर अग्ने तां निपिण्य धवसां कृष्टि धृ मतां दीप्तिम तीं अस्मे अस्मभ्यं आ इरय अस्मे रयस्व येन पाहृणाराध
धनं पिन्वसि पालयसि अपिच हे विश्ववार विश्वैः वरणीय अग्ने पृथुवि स्तीर्णं श्रवः यशः दाश्वुषे मर्त्याय यजमानाय पिन्वसि ९

न्वी जनयति हे अग्ने मघवानः हविष्मन्तः नः अस्मभ्यं पुरुक्षुं बहुलं तं प्रसिद्धं रयिं पिंक संभजनीयं वाजं बलं च नियुवस्व नि
त्यं रामि मघवत्स्विवहे वैश्वानर अग्ने त्वं रुद्रेभिः रुद्रैः वसुभिश्च देवैः सजोषाः सहितश्च सन् नः अस्मभ्यं महि महत् शर्म सुखं
यच्छ प्रयच्छ॥ ॥इति पंचमस्य द्वितीये अष्टमो वर्गः॥ ॥प्र सम्राज इति सप्तर्चं षष्ठं सूक्तं वसिष्ठः ऋषिः त्रिष्टुप् छंदः वैश्वानरो दे
वता १ प्र सम्राज इति सम्राजं राजानं वैश्वानरं सम्राजः सर्वस्येश्वरस्य असुरस्य बलवतः पुंसः वीरस्य कृष्टीनां
प्रजानां जनयितुः तस्य तवसः बलवतः इंद्रस्येव नृतस्य वैश्वानरस्य प्रशस्तिं स्तुतिं कृतानि कर्माणि च प्र विवक्मि प्रब्र
वीमि २ कविं केतुमिति कविं धासिं केतुं च प्रज्ञापकं धासिं अद्रेः धर्तारं भानुं भासकं शं सुखकरं रोदस्योः द्यावापृथि
व्योः राजानं वैश्वानरं अग्निं हिंवंति गिरः प्राणयंति वा अहं च पुरंदरस्य शत्रुपुरं दारयितुः अग्नेः पूर्व्याणि पुरा
तनानि महानि महांति कर्माणि गीर्भिः आ विवासे परिचरामि ३ न्यक्रतूनिति अक्रतून् अयज्ञान् ग्रथिनः जल्पका
न् मृध्रवाचः हिंसितवचः अश्रद्धान् पणीन् अवृधान् अयज्ञान् यज्ञादि अवर्धयतः अयज्ञान् स्तुतिभिः अग्निं अवर्ध
यतः अयज्ञान् यज्ञहीनान् तान् दस्यून् प्र विवाय ययाक बहुतरान् अग्निः अपमन्यन् निर्विवापनि नयन् तरां गमयेत् पूर्वः पुरान
नः अग्निः अपराय प्रकृतान् अयज्वनः यागान् हविर्यश्चकार ४ यो अपाचीन इति नः तमः नेतः तमः यः अपाचीने अप
काशमाने तमसि निमग्नाः प्रजाः मदंतीः ककथती शाचीभिः ताभ्यो हताभिः प्रज्ञाभिः प्राचीः प्रगामिनीश्चकार तं वस्वः धन
स्येशानं जनानां अमदं गृणन्नूनं युद्धं च मां अस्मद्यंतनम गिर्गणीषे सौमि ५ यो देह्य इति यः अग्निः देह्यः देहेः उप
चितानि आकरोः विषः वधर्धीः वधि अनमयन् शीनाः अकरोत्त यस्य जयपतीः अर्यः सर्यः पति पसीता जाः अर्यपत्यः ताः
उषसः चकार स सम्रट् नहुषः अग्निः विशः प्रजाः सहोभिः बलैः निरुध्य नहुषः शत्रोर्वा कितवः करप्रदाश्चक्रे ६ यस्य शर्मन्नि
ति विश्वे सर्वे जनाः सोमपाः शर्मन् शुभाः सुखे स्तिनितं यस्य वैश्वानरस्य सक्याः शिक्षमाणाः सार्यसुमासाः एवैः कर्मभिः
उपनस्तु उपाति छेसवैश्वानरः अग्निः सर्वः समुपिवी मातापित्रोः रोदस्योः द्यावापृथिव्योः वरं उत्कृष्टं उपस्थं मध्यं अंतरि

३५

81
1915

क्षं आससाद आगच्छतु आपृणः ७ आदेव इति वैश्वानरः अग्निः देवः द्योतमानः सुध्या सुध्यानि अंतरिक्षाणि वसूनि आ
आददे कालिनमांसि सूर्यस्य उदिताउदितौउदये सति आददे समुद्रात् अंतरिक्षात् नमांसि आददे अवरात् पृथिव्याः नमां
सि आददे समुद्रात् परस्मात् दिवो पितमांसि आददे॥ ॥इति पंचमस्य द्वितीये नवमो वर्गः॥ प्र वो देवमिति सप्तर्चं सप्तमं
सूक्तं वसिष्ठः ऋषिः त्रिष्टुप् छंदः अग्निर्देवता १ प्र वो देवमिति हे अग्ने वः त्वां देवं द्योतमानं सहसानं राक्षसान् अभिगवतं
अग्निं अयसमे तारं जंभनं जनमानि पुवाजिनं बलवंतं नमोभिः स्तुतिभिः प्रहिणे वितृप्रहिणोमि वहे अग्ने त्वं विद्वान् जा
नन् नः अस्माकं अध्वरस्य यज्ञस्य दूतो भव परो धः तनो आलमास्य मेध देवेषु मितहुः दग्धद्रुमो ग्निरिव विविदेप्र
ज्ञापने २ आ याहि अग्न इति हे अग्ने त्वं मंद्रः मदयिता देवानां सख्यं देवैः सह सख्यमित्यर्थः जुषाणः सेवमानः पृथिव्याः सानु
समुच्छ्रितं तृणगुल्मादिकं सुभिः दहकैः तेजोभिः नदपुत्रवाद्यायमानः जंभेभिः दंष्ट्राभिः ज्वालाभिरित्यर्थः विश्वं विश्वानि व
नानि इध्यक्ष कामयमानो दहन् रुयाः पथ्याः अनुसमार्गे आयाहि आ इति पुनर्वचनमादरार्थं ३ प्राचीनो यज्ञ इति अय
यज्ञः प्राचीनः सम्यगनुष्ठितः स्यर्थः बर्हिः बर्हिश्च स्तृणितं स्तानिहितं ईळितः स्तुतो ग्निः प्रीणीतेत् प्रसन्नः भवति होतान्हो
तावाविश्ववारे विश्वैः वरणीयिमानरा द्यावापृथिव्यो इरायां आहुवानः भवति कदायतः यदाय विष्टहे युवतमा पेतं सुशेवः
सुसुखः जहिरे आपसे ४ सद्यो अध्वर इति क्षितसः विविक्त प्रज्ञाः मातृषासः मनुष्याः अध्वरे यज्ञे रथिरं रथिनं नेतारम
ग्निं सद्यो जनं तत्र जनयंति यः त्वां हर्विह इति सोयमग्निः विश्पतिः विशांपतिः मंद्रः मदयिता मधुवचाः मादयितव्य स्तः ऋ
तावा यज्ञवान् विशां मनुष्याणां दुरोणे गृहे आधायि आहितः ५ असादि वृत इति वृतः होतृत्वेन वन्हिः हविषां वोढा अस्य
रिहकः विषमां विश्वस्य धारकोग्निः अजगन्वा नृपक्क लोकाद्वागतः नृषदने होतुः स्थाने असादि उपविष्टः यमग्निं द्यौश्च पृथिवी
च उभे धारयानवर्धयतः यं च विश्ववारं विश्वैः वरणीयं होतारं मनुष्यः आयजति ६ एते द्युम्नेभिरिति एते मदीयाः पुरुषाः
द्युम्नेभिः रत्नैः विश्वं याप्य वर्गआ आनिरंत वर्धयंति के येनर्याः मनुष्या मंत्रं स्तोत्रं अरंपर्याप्तं अतक्षन् समस्कुर्वन् वास मुच्चये

वे·भा·पं·
३५

विश्वविदो जनाः श्रीयमाणाः अजिरं तृष्यं यान्ति महीयाः येवाक्‌ तस्यास्य स्वस्वस्य इमम् थिं आदीधयत्‌ आदीपयम्‌ ७ नू
त्वामिति हे सहस्रः सूनो अग्ने नु क्षिप्रं उग्रा आदि वसिष्ठाः पूर्यं वस्त्र रात्रीं त्वामित्ता अस्मदीयेभ्यः स्तोतृभ्यः मघवद्भ्यः हविष्मद्भ्य इष
अन्नं नु क्षिप्रं आनड्‌ व्याप्नुयु यूयं स्वस्तिभिः राज्ञा सर्वदा अस्मान्‌ सदा स्वस्तिभिः पात इत्येवं ईमहे याचामहे॥ ॥इति पंच
मस्य द्वितीये दशमो वर्गः॥ ॥इन्धे राजेति सप्तर्चं अष्टमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप्‌ छंदः अग्निर्देवता १ इन्धे राजेति अर्यः
ईश्वरः राजा राजमानः अग्निः नमोभिः स्तुतिभिः सं इन्धे समिध्यते यस्याग्नेः प्रतीकं रूपं घृतेन आहुतं भवति यं च नरः
अस्मदीयाः सबाधः सान्त्विताः हव्येभिः हविर्भिः ईळते स्तुवन्ति सः अग्निः उषसां अग्रे आ अशोचि आदीप्यते २ अयमुष्य
सु महानिति सः अयं होता देवानां आह्वाता मंद्रः मदयिता महान्‌ अग्निः मनुष्यः मनुष्यस्य स महान्‌ अवेदि महत्ते
न प्रज्ञायते अपि च सोयं भाः दीप्तीः प्रकः विकरोति अंतरिक्षे उ किं च सोयं कृष्णापविः कृष्णमार्गोग्निः पृथिव्यां सस्थानः स
अग्मानः समु ओषधीभिः वव से वर्धते ३ कयान इति हे अग्ने त्वं कया स्वधया हविषा नः अस्माकं स्तुतिं स्तुतिं विवसः व्या
नु येका सु कां च सर्वा स्वस्मानः स्तूयमानः त्वं ऋणवः प्राप्नुयाः हे सुहवः शोभनदानियं यं कदा हुतस्य शत्रुभिः दुर्हि सकाश
साक्षी अस्मभ्यां सरायः धन सपत्नयः अभिनी भवितवं ताः सं प्रकारः ध्वकरामवेम ४ प्रयायमग्निरिति अयं प्रसि
द्धोग्निः भरतस्य यजमानस्य मम प्रजावन्तं प्रभि भवति अपवालि कदाय भरत स्त्रीयेनि सर्पद्भवन्‌ बृहद्भिः बृहद्भ्रः समानः दिवो
न ते प्रकाशते किं च सः अग्निः पृतनासु संग्रामेषु पुरुं पुरुनामकं सत्करं अतिरस्थौ अतिक्रम्य सोयं द्युतानः दीप्यमानः
दैव्येभिः देवानां अतिथिवत्‌ पूज्यः समृद्धो भवेत ५ असन्नित्यहानि हे अग्ने इत्थेते आहवनानि हवींषि प्रहरित्वह्नि
असन्निवत्‌ भवंत्वेव संच विश्वेभिः विश्वैः अनीकैः तेजोभिः स्वाहि अनीकैः सह सुमनाः प्रीतः स च हे अग्ने स्तनः पितृ स्तोत्रं प्र
प्रमुखे सु गातु कमाप्नोतु प्राडुत्वं वायोः ज्ञातनः स्तूयमान स्तनूपं सममेव तन्वं अनु वर्धस्व वर्धय॥ ६ इदं वचनमित्यालसाः
गवां शतानि त्यत्तमनसं सहस्त्रं गवां सहस्त्रेण च संयुताः द्विवर्हाः द्वाभ्यां विद्याकर्मभ्यां द्वयात्मवसिष्ठ द्वयोरुभयोः पृथ्वी लो

83
1915

कयोः इदं वचः इदं स्तोत्रं अजयं तं जनितारं तं जनमत्‌ किं नत्‌ यद्वचः प्रनत्‌ शीति म व्ययश्च स्व रसि सर्व अमीवचातनं रो
गाणां विनाशकं रक्षोहा रक्षसां हन्तृ च स्तोतृभ्यः आपृथिनं द्विधेनु आदिकायाति प्रांक्ष स्वदं भवाति भवेत्‌ ७ नू त्वामग्न इति स
हसः सूनो बल स्य पुत्र हे अग्ने वसिष्ठा यं च सः प्रांड्‌ रातं त्वा अस्मदीयेभ्यः स्तोतृभ्यः मघवद्भ्यः हविष्मद्भ्यश्च इषं अन्नं नु क्षिप्रं
आनड्‌ व्याप्नुयः यूयं सदा स्वस्तिभिः सर्वदा अस्मान्‌ सदा स्वस्तिभिः पात इत्येव ईमहे॥ ॥इति पंचमस्य द्वितीये एकादशो वर्गः॥ ॥
अबोधि जार इति षडृचं नवमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप्‌ छंदः अग्निर्देवता १ अबोधि जार इति जारः सर्वेषां प्राणिनां जरयि
ता होता देवानां आह्वातानां मंद्रः मादयिता कवितमः प्रज्ञतमः पावकः शोधकः अग्निः उषसां उपस्थात्‌ मध्ये अबोधि अबुध्यत्‌
किं च उभयस्यादि परः चतुष्पदः द्विपदश्च अस्य अंतः प्राणिनः केतुं प्रज्ञानं दधाति विदधाति देवेषु च हव्यादीनि दधाति सुकृतः
यजमाने द्रविणं धनं दधाति २ स सुक्रतुरिति सः अग्निः सुक्रतुः वेति कर्मा विवशियः अग्निः पणीनां असुराणां दुरो द्वाराणि ग
वां निधानानि वि वृण्वत्‌ पुरुक्षोभ संवत्सु क्षीरं अर्कं अर्चनीयं गवां संघं ओस्मदर्थे पुनानः शोधयन्‌ हरति सर्वः होता देवानामा
ह्वाता मंद्रः मादयिता दमूनाः दांतमनाः राम्याणां रात्रीणां विवां अनात्मां च तमः अपकारं तिरस्कुर्वन्‌ ददृशे दृश्यते च ३ अमू २
रः कविरिति यः अग्निः अमूरः अमूढः कविः प्राज्ञः अदितिः अदीनः विवस्वान्‌ दीप्तिमान्‌ सुसंसत्‌ शोभनसदनः मित्रः त्राता
अतिथिः अतिथिवत्‌ पूज्यः शिवः शिवकरः अग्नेः चित्रभानुः चित्रदीप्तिः उषसां अग्रेषु स्वेभाति सोयं अपां गर्भः सन्‌ प्रस्वः
आयमानाः ओषधीः आविवेश ४ ईळेन्यो वइति हे अग्ने व त्वं मनुष मनुष्यस्य युगेषु यागकाले ईळेन्यः स्तुत्यः परोक्षः यः अ
ग्निः जातवेदाः जातधनः समनगाः युद्धेषु गंतासन्‌ अभुवन्‌ दीप्यते सुसंदृश्यः सुसंदर्शनेन भानुना तेजसा विभाति च तम
ग्निं समिधानं समिध्यमानं गावः स्तनयः प्रतिबुधं प्रतिबोधयंति ५ अग्ने याहीति हे अग्ने दूत्यं दूतस्य कर्म हि विवहनादि
याहि देवान्‌ अच्छ अभिगच्छ गणेन संघेन सह मरुता च स्तुवत अस्मान्‌ विश्वान्‌ सर्वान्‌ अस्मदीयांश्च नव स्तोतृन्‌ मा रिष
ण्यः मा हिंसीः सरस्वतीं मरुतः अश्विना अश्विनौ अपश्च तान्‌ देवान्‌ रत्नधेयाय अस्मभ्यं रत्नदानाय यक्षि च ६ त्वामग्न इति

वे·भा·पं·
३७

हे अग्ने त्वां वसिष्ठकृषिः समिधानो भवति त्वं च मरुत्पंपरूपं पाविष्ठं रत्नोगणे हत्वा हिरण्ये धनवत्ये यजमानाय पुरंधिं बहुधि
यं हे यगणं यत्तियज्ञ किं च हे जातवेदः अग्ने पुरुणीथा पुरुनीथेन बहुना स्तोत्रेण अस्मद्देवान् स्तुहि यूयं पात स्वस्तिभिः सदा
नः॥ ॥इति पंचमस्य द्वितीये द्वादशो वर्गः॥ ॥उषो न जार इति पंचर्चं दशमं सूक्तं वसिष्ठकृषिः त्रिष्टुप् छंदः अग्निर्देवता १ उषो
न जार इति अग्निः उषो न जारः उषसो जारः सूर्यः न इव पृथु विस्तीर्णं पाजः तेजः अश्रेत् आश्रयति किं च दविद्युतत् दीद्यत् शोशुचा
नः द्योतमानो दीप्यमानः अत्यंतं दीप्यमानः वृषा कामानां वर्षिता हरिः हविषां प्रेरकः शुचिः शुद्धः अग्निः धियः कर्माणि हिन्वानः प्रे
रयन् भासा दीप्त्या आ भाति प्रकाशते अपि च उशतीः कामयमानाः अजीगः आगरयति तमसा तिरोहिताः प्रजाः उद्गिरति
॥ २ स्वर्ण वस्तोरिति हे वः अग्निः वस्तोः अहनि उषसामये स्वर्णः आदित्य इव अरोचि विरोच्यते उशिजो मन्म स्तिजः यज्ञं तन्वानाः
विस्तारयंतः मन्म मननीयं स्तोत्रं अग्निः देव आ वि विद्वान् जन्मानि जानाति विद्वान् दूतः देवानां देवयावा देवान् प्र
ति गच्छन् वनिष्ठः दातृतमो भवति दूतकर्म वनिष्ठः भवति ३ अच्छा गिर इति मतयः स्तोतारः देवयन्तीः देवान् इच्छन्त्यः द्र
विणं धनं भिक्षमाणाः याचमानाः गिरः आपः सुसंदृशं शोभनसंदर्शनं सुप्रतीकं सुरूपं स्वञ्चं सुगमनं तं हव्यवाहं हव्यानां वो
ढारं मानुषाणां अरतिं स्वामिनं अग्निं अच्छ अभियंति गच्छन्ति ४ इंद्रं नो अग्ने इति हे अग्ने वसुभिः देवैः सजोषाः संगतस्त्वं नः
अस्मदर्थं इंद्रं आवह रुद्रेभिः रुद्रैः देवैः संगतः बृहंतं रुद्रं च आवह आदित्येभिः आदित्यैः देवैः संगतः विश्वजन्यां विश्वजनहि
तां अदितिं आवह ऋक्वभिः स्तोतृभिः अंगिरोभिः देवैः संगतः विश्ववारं विश्वैः संभजनीयं बृहस्पतिं आवह ५ मंद्रं होतारमिति
उशिजः कामयमानाः विशः मनुष्याः मंद्रं स्तुत्यं होतारं आह्वातारं यविष्ठं युवतमं अग्निं अध्वरेषु यागेषु ईळते स्तुवंति हि यस्मा
त् कारणात् सोऽग्निः क्षपावान् रात्रिमान् रयीणां धनानां अतन्द्रो दूतः यजथाय यजमानानां देवान् यष्टुं
अभवत् तं ईळते इत्यर्थः॥ ॥इति पंचमस्य द्वितीये त्रयोदशो वर्गः॥ ॥महाँ असीति पंचर्चं एकादशं सू
क्तं वसिष्ठकृषिः त्रिष्टुप् छंदः अग्निर्देवता १ महाँ असीति हे अग्ने त्वं अध्वरस्य प्रकेतः प्रज्ञापकः सन् महान् असि त्वदृते त्वया वि

85/1915

ना अमृताः देवाः न मादयन्ते न माद्यंति विश्वेभिः विश्वैः देवैः सरथं यथा भवति तथा आयाहि इह स्तीर्णे बर्हिषि प्रथमः मुख्यः
होता आह्वाता सन् निषद निषीद २ त्वामीळत इति हे अग्ने अजिरं गमनशीलं त्वां मानुषासः मनुष्याः हविष्मन्तः यजमानाः स
दमित् सदैव दूत्याय दूतकर्मणे हविर्वहनाय ईळते यस्य हविष्मतः बर्हिः बर्हिषि देवैः सार्धं आसदः त्वं आसीदसि अ
स्मै हविष्मते अहानि सुदिनानि शोभनानि दिनानि भवंति ३ त्रिश्चिदक्तोरिति हे अग्ने त्वे त्वयि अंतर्मध्ये अक्तोः अन्हः त्रि
श्चित् त्रिवारं त्रिषु सवनेषु वसूनि दाशुषे हविर्दात्रे मर्त्याय तदर्थमित्यर्थः प्रचिकितुः प्रवेदयंति ऋत्विजः मनुष्वत् मनुष्य
स्य मनोः समं इह अग्ने देवान् यक्षि दूतः देवान् याक्षि यजनः अस्माकं अभिशस्तिपावा अभिशंसकात् शत्रोः रक्षिता भव ४
अग्निरीश इति बृहतः महतः अध्वरस्य यज्ञस्य अग्निः ईशे ईष्टे विश्वस्य सर्वस्य कृतस्य संस्कृतस्य हविषः अग्निरेवेष्टे हि यस्मात् अ
स्याग्नेः क्रतुं कर्म वसवः देवाः जुषन्त सेवन्ते अथापि देवाः अग्निं हव्यवाहं हव्यानां वोढारं दधिरे चक्रिरे इत्यर्थः ५ आग्ने वहेति
हे अग्ने हविरद्याय हविषां भक्षणाय देवान् आवह किं च इह अस्मिन् यज्ञे इंद्रज्येष्ठासः इंद्रप्रमुखाः मादयंतां इमं यज्ञं यष्टव्यं स
दिवि दिविषु देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य द्वितीये चतुर्दशो वर्गः॥ ॥अगन्मेति त्र्यृचं द्वादशं सू
क्तं वसिष्ठकृषिः त्रिष्टुप् छंदः अग्निर्देवता १ अगन्म महेति यः अग्निः स्वे दुरोणे स्वस्थाने आहवनीये समिद्धः काष्ठैः समिद्धः स
न् दीदाय दीप्यते तमग्निं यविष्ठं युवतमं उर्वी विस्तीर्णे रोदसी द्यावापृथिव्योः अंतर्मध्ये अंतरिक्षे चित्रभानुं चित्रज्वालं स्वाहुतं सु
ष्ठु आहुतिभिः हुतं संतं विश्वतः सर्वतः प्रत्यंचं प्रतिगच्छन्तमग्निं मह्ना महता नमसा नमस्कारेण अगन्म वयं उपगच्छाम २ मन्हा वि
श्वानि यः अग्निः मन्हा महत्त्वेन विश्वा विश्वानि दुरितानि साह्वान् अभिभवन् जातवेदाः जातधनः दमे यज्ञगृहे स्तवे अस्माभिः स्तू
यते सः अग्निः नः अस्मान् दुरितात् पापात् अवद्यात् निंदितात् कर्मणः रक्षिषत् रक्षतु अस्मान् गृणतः स्तुवतोऽपि रक्षिषत् उत ना
अपि च सः अग्निः मघोनः हविष्मतः नः रक्षिषत् आपूरणः ३ त्वं वरुण इति हे अग्ने त्वं वरुणोऽसि उत अपि च त्वं मित्रोऽसि त्वां वसिष्ठाः म
तिभिः स्तुतिभिः वर्धयंति त्वे त्वयि विद्यमानानि वसु वसूनि सुषणनानि सुसंभजनानि संतु यूयं पात स्वस्तिभिः॥ ॥इति पं
चमस्य द्वितीये पंचदशो वर्गः॥ ॥प्राग्नय इति त्र्यृचं त्रयोदशं सूक्तं वसिष्ठकृषिः त्रिष्टुप् छंदः वैश्वानरोऽग्निर्देवता १ प्राग्नय इ

३७

न हे सखायः विश्वश्रुषे विश्वं यो दीयमानं श्रोतुमिच्छति तस्मै कर्मणां यो धाता तस्मै असकृद्धो अस्कृराणां यो हन्ता तस्मै अग्नये मन्मन
नीयं स्तोमं पुरीणां ज्योतिष्मतां आगमनीनां अभिमतीनां कामानां पतये दातये वैश्वानराय अग्नये बर्हिषि यज्ञे हविर्न हविरिव स्तुतिं प्रीणा
नः प्रियमाणं जरे जरयामि २ सम यो शोचिषे ति हे अग्ने त्वं शोचिषा दीप्त्या शोशुचानः दीप्यमानः आयमानः जायमान एव रोदसी
द्यावापृथिव्यौ आपृणाः आपूरय अग्ने जातवेदः आ तमसि अर्भाणां यष्टाभिः अग्ने त्वं देवान् महित्वा महत्त्वेन अभिशस्तेः अभिशंसक
त् शत्रोः अमुंचः अमोचयः ३ आतोपर इति हे अग्ने मर्त्यो हि अग्ने आतः स्वयमेवाजातः संदृश्यः सामीप्ये आपार
शोगं नाम पश्वादीनामपि यथा गर्भोपि अकः पश्वादीनामपि त्वमसि रक्षसा शुभना शुभना नि यस्त्वः रक्षार्थं परमसि त्वा ब्रह्मणे अत्य
श्रावं तवयं गातुं मधुं वृक्षाम वेदिकं सयूपं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य द्वितीये षोडशो वर्गः॥ ॥समिधा जातवे
दस इति षड्नवं चतुर्दशं सूक्तं वासिष्ठ ऋषिः आद्या बृहती द्वितीया तृतीये त्रिष्टुभौ अग्निर्देवता १ समिधा जातवेदसइति जात
वेदसे जातप्रज्ञाय अग्नये अग्निं समिधा वयं वासिष्ठाः दाशेम परिचरेम देवाय देवं स्तुत्यमग्निं देवहूतिभिः देवस्तुतिभिः दाशे
म शुक्रशोचिषं शुभ्रदीप्तिमग्निं मलिनं हविषा नः वयं हविर्भिः दाशेम २ वयं ते अग्न इति हे अग्ने ते तां समिधा वयं सि
ष्ठाः विधेम परिचरेम वयम् अस्य च आपो व यं स्तुतीभिः जनयामस्य दाशेम तां परिचरेम अध्वरस्य यज्ञस्य हे होतः अग्ने
भद्रे ना शोचिषा सामे गृह यो नि कृष्याप आ लरे वधोन्नमानान्तेषां वयं हविषा दाशेम ३ आनो देवेभिरि ति हे अग्ने
नः अस्माकं देवहूतिं जोषं देवेभिः देवैः सार्धं यज्ञं लिंहविः शुभ्राणः सेवमानस्त्वं उप आयाहि देवाय योन मानाय पुष्यं वयं
सातानः परिचरंतः स्यामभवेम यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य द्वितीये सप्तदशो वर्गः॥ ॥उपसद्यायेति पंच
दशर्चं पंचदशं सूक्तं वासिष्ठ ऋषिः गायत्री छंदः अग्निर्देवता १ उपसद्याय हे अध्वर्यवः उपसद्याय उपसदनीयाय मील्हु
षे कामानां वर्षित्रे अस्ये अस्मै असमै यन्तुं संहास्मि जुहुतन यः अग्निः नः नेदिष्ठं आसन्नतमं आप्यं भवति आसन्न
तमो बंधुः भवति सर्वं २ यः पंचेति यः अग्निः कविः प्राज्ञः गृहपतिः गृहाणां पालः पिता युवा नित्यतरुणः सन् पंच चर्षणीः पं

87
1915

च जनान् मनुष्यान् अभि अभिमुखं दमे दमे गृहे गृहे निषसाद निषादति ३ सनो देनेति सः अग्निः नः अस्माकं वेदः ध
नं आ भातं अंतिके मध्यं विश्वतः सर्वतः बाधकान्नरक्षतु उ तापि च अस्मान् वासिष्ठान् अंहसः पापात् पातु रक्षतु ४ नवन्नु स्तो
ममिति त्विः यु श्येनाय श्येनाय श्येन सदृशाय श्रुतिप्रगंत्रे अग्नये यस्मै नवं न्नु तनं स्तोमं जीजनं जनया मि सो अग्निः नः
अस्मभ्यं कुवित् बहु वस्वः वसु धनं वनात् दहातु इत्यर्थः ५ स्पार्हा यस्येति अग्ने पुरस्तात् भागे शोचतः दीप्यमानस्य यस्या
ग्नेः श्रियः दीप्तयः वीरवतः पुत्रवतः रयिः धनं यथा न हव्य हवीषि पुंस्पार्हाः स्पृहणीयाः भवंति तस्मै नवं स्तोमं जीजनं इत्यनुषंगः
॥ ॥इति पंचमस्य द्वितीये अष्टादशो वर्गः॥ ६॥ सेमां वेत्विति यजिष्ठः यजनीयतमः हव्यवाहनः हवींषि वोढा सः अग्निः
इमां वषट्कृतिं अस्माभिः दीयमानामाहुतिं वेतु कामयतां नः अस्माकं गिरः स्तुतीश्च जुषत सेवतां ७ नितान्नस्येति नक्ष्यउ
पगंतव्य विवस्वते निवायते दद्यतो मानआहुतयजमानैः अभिहुत हे अग्ने द्युमंतं दीप्तिमंतं सुवीरं कल्याणस्तोत्रकं त्वां
वयं निधीमहि निहितवंतः ८ क्षपउस्र इति हे अग्ने त्वं क्षपः रात्रिः उस्रः अह्नानि च सर्वदा इति यावत् दीदिहि दीप्य स्वदीप्य
मानेन त्वया वयं वासिष्ठाः स्वग्नयः शोभमानाग्नयो भवाम अस्मयुः अस्मान् कामयमानः त्वं सुवीरः स्तोत्रको भव ९ उपत्वा
सातय इति हे अग्ने त्वां नरः नेतारः यजमानाः विप्रासः विप्राः धीतिभिः कर्मभिः सातये धनाय उपयंति उपगच्छंति सहस्त्रि
णा सहस्र संख्याकाः अक्षराक्षरपरहिताः स्तुतिरूपाः अस्मदीया वाक् त्वां उपयाति च १० अग्नी रक्षांसीति शुक्रशोचिः शुभ्र
ज्वालः अमर्त्यः मरणरहितः शुचिः शुद्धः पावकः शोधकः ईड्यः स्तुत्यः सो अग्निः रक्षांसि राक्षसान् सेधति बाधतां॥ ॥इति पंचमस्य
द्वितीये एकोनविंशो वर्गः॥ ११॥ सनो राधांसीति हे सहसो बलस्य पुत्र अग्ने सः प्रसिद्धः त्वं ईशानः सर्वस्य जगतः ईश्वरः सन्
नः अस्मभ्यं राधांसि धनानि आ भर आहर भगश्च भगदेवोपि वार्यं धनं दातु अस्मभ्यं ददातु १२ त्वमग्ने वीरवदिति हे अग्ने त्वं
वीरवत् पुत्रयुक्तं यशः उप मं यश्च अन्नं देही तिष्ठाः देवश्च सविता देवोपि वार्यं वरणीयं धनं दाति ददाति ददातु भगः दितिश्च ददा
तु १३ अग्ने रक्षाणि हे अग्ने त्वं नः अस्मान् अंहसः पापात् रक्ष पाहि अपि च हे देव अग्ने अजरः जरारहितः त्वं तपिष्ठैः हिंसन् शत्रून्

न्‌ प्रति अस्मत्प्रतिकूलान्‌ तपिष्ठैः अतिशयेन तापकैः तेजोभिः दह भस्मीकुरु १४ अधा मही न इति अध अधुना हे अ
ग्ने अनाधृष्टः अप्रतिधर्षणीयः त्वं नः अस्माकं नृपीतये नृणां रक्षणार्थं मही महती आयसी अयसा निर्मिता शतभुजिः अयं
तविस्तृता शतगुणा पूः पुरी भव १५ त्वं नः पाहीति हे अदाभ्य अहिंस्य दोषावस्तः रात्रेः अच्छादयितः तमसो वारयितः इत्यर्थः॥
अपि त्वं नः अस्मान्‌ अंहसः पापात्‌ अघायतः पापमिच्छतः शत्रोश्च दिवा नक्तं अहनि रात्रौ च सर्वदा पाहि रक्ष॥ ॥इति पंच
मस्य द्वितीये विंशो वर्गः॥ ॥एना व इति द्वादशर्चं षोडशं सूक्तं वसिष्ठः ऋषिः अयुजो बृहत्यः युजः सतोबृहत्यः अग्निर्देवता
१ एना व इति ऊर्जो बलस्य नपातं सूनुं प्रियं अस्माकं प्रियं चेतिष्ठं अतिशयेन ज्ञातारं अरतिं गंतारं स्वध्वरं सुयज्ञं विश्व
स्य सर्वस्य यजमानस्य दूतं अमृतं नित्यं अग्निं एना एनेन नमसा स्तोत्रेण वः युष्मदर्थं आहुवे आह्वयामि २ स यो जत इति
सः अग्निः अरुषा आरोचमानौ विश्वभोजसा विश्वस्य पालयितारौ अश्वौ यौ अंतरथे युनक्ति किंच स अग्निः दुद्रवत्‌ आनेतुं
देवान्‌ प्रति गच्छतु द्रवतु स्वाहुतः सुष्ठु आहुतः सुब्रह्मा सुस्तुतिः यज्ञः यष्टव्यः सुशमी सुकर्मा च भवति तमिमं देवं द्योतमानं
वसूनां वासकानां जनानां वसिष्ठानां राधः हविः अभिगच्छतीति शेषः ३ उदस्य शोचिरिति मीढुषः कामानां वर्षितुः आ
जुह्वानस्य अभिहूयमानस्याग्नेः शोचिः तेजः उत्‌ अस्थात्‌ उत्तिष्ठति अरुषासः आरोचमानाः दिविस्पृशः धूमासः धूमा
श्च उदस्थुः तमिमम्‌ अग्निं नरः ऋत्विजः समिंधते सम्यक्‌ दीपयंति ४ तं त्वा दूतमिति हे सहसः सूनो अग्ने यशस्तमं अतिशये
न यशस्विनं तं प्रसिद्धं त्वा त्वां दूतं कृण्महे कुर्मः स त्वं देवान्‌ वीतये हविषां भक्षणाय आवह किंच यत्‌ यदा त्वा त्वां ईमहे याचामहे
तत्‌ तदेव विश्वा विश्वानि मर्तभोजनानि मनुष्याणां भोग्यानि धनानि रास्व अस्मभ्यं धेहि ५ त्वमग्ने गृहपतिरिति
हे विश्ववार विश्वैः वरणीयाग्ने त्वं नः अस्माकं अध्वरे यागे गृहपतिः असि यजमानोऽसि त्वं होता देवानामाह्वाता त्वमेव पोता
सि प्रचेताः प्रकृष्टमतिः त्वं वार्यं वरणीयं हविः यक्षि यज वेषि च कामयस्व ६ कृधि रत्नमिति हे सुक्रतो शोभनकर्मन्‌ अ
ग्ने यजमानाय सुन्वते रत्नं धनं कृधि कुरु हे होः सर्वेः हविष्मतः धाता रत्नस्य दाता असि नः अस्माकं ऋते यज्ञे विश्वं सर्वं ऋत्वि ४२

69
1915

जं आशिशीहि तीक्ष्णीकुरु किंच यः सुशंसः सुस्तुतिः अस्मत्पुत्रः दक्षेन वर्धते तं वर्धय च पूरणः॥ ॥इति पंचमस्य द्वितीये ए
कविंशो वर्गः॥७॥ त्वे अग्न इति हे अग्ने स्वाहुत यजमानैः सुष्ठु आहुत त्वे त्वयि सूरयः प्रेरकाः प्रियासः प्रियाः संतु भवंतु किंच
ये मघवानः धनवंतः यंतारः प्रदातारः जनानां अस्मदीयानां ऊर्वं समूहान्‌ गोनां गवां च दयंत प्रयच्छंति ते च त्वा प्रिया
स्संतु क्षितिपूरणान्वयः ८ येषामिळेति येषां तु दुरोणे गृहे घृतहस्ता घृतेनाभिधारितान्नस्यर्थः इळा मंत्ररूपा हविर्लक्षणा देवी
प्राता पूर्णा आनिषीदति आसीदति आपूरणः तान्‌ हविष्मतो यजमानान्‌ हे सहस्य बलायाहितात्मे द्रुहः द्रोग्धुः निदः निं
दकाच्च शंसनीयः त्रायस्व नः अस्मभ्यं दीर्घश्रुत्‌ दीर्घकालं श्रोतव्यं शर्म सुखं यच्छ देहि ९ स मंद्रया चेति हे अग्ने मंद्रया मादयित्र्या
देवानां आसा आस्यस्थानीयया जिह्वया ज्वालया वह्निः हविषां वोढा विदुष्टरः सः प्रसिद्धस्त्वं मघवद्भ्यो हविष्मद्भ्यः नः अस्मभ्यं
रयिं धनं आवह चन्द्रं त्यं दातिं दानं आनां दातारं यजमानं सद्यश्च कर्मस्तु प्रेरयस्व १० ये राधांसीति हे यविष्ठ युवतमाग्ने त्वयेयज
मानाः महः महतः कर्मणश्च ये सः यशसः पशुसत्कामाः ते नः राधांसि साधकानि अश्व्या अश्वात्मकानि मघानि धनानि
ददति तान्‌ हासः अंहसः पापात्‌ पर्तृभिः रक्षासाधनैः शतैः शतं अपरिमिताभिः पूर्भिः नगरीभिश्चापि पाहि पालय ११
देवो व इति द्रविणोदाः धनानां दाता देवः अग्निर्वः युष्मदीयां हविषा आसिचं आसिक्तां पूर्णां स्रुचं विवष्टि कामयते अतउत्सि
वध्वं वा सोमेन पात्रं पृणध्वं वा समुच्चये अग्नये सोमं यच्छते त्यर्थः आत्‌ इत्‌ अनंतरमेव देवः अग्निर्वः युष्मान्‌ ओहते व
हति १२ तं होतारमिति देवाः अध्वरस्य प्रकृष्टमतिं तं अध्वरस्य यज्ञस्य वह्निं वोढारं होतारं च कृण्वत अकुर्वन्‌ किमर्थं स च
अग्निः विधते परिचरते सुवीर्यं हविषां प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति ददातु इत्यर्थः॥ ॥
पंचमस्य द्वितीये द्वाविंशो वर्गः॥ ॥अग्ने भव सुषमिधेति सप्तर्चं सप्तदशं सूक्तं द्विपदा त्रिष्टुभः वसिष्ठः ऋषिः अग्निर्देवता १
अग्ने भवेति हे अग्ने सुषमिधा शोभनया समिधा समिद्धः सम्यक्‌ दीप्तो भव उत अपि च बर्हिः उर्विया विस्तृणीतां विस्ती
र्णं उपस्तृणीतां अध्वर्युः २ उत द्वार इति उत अपि च उशतीः देवान्‌ कामयमानाः द्वारः यज्ञगृहस्य विश्रयंतां उत अपि च उशतः य

वे·भा·पं·
२०

संकाममयमाना नु देवान् इह यक्षि आवह ३ अग्ने विहीति हे जातवेदः जातधनाग्ने वीहि देवान् अभिगच्छ हविषा देवान्
यक्षि च अध्वरा अध्वरान् यज्ञो नमय यज्ञं शंस्य कृधि कुरु ४ स्वध्वरा करतीति जातवेदाः जातधनोग्निः अमृतान् मरणरहि
तान् देवान् अध्वरान् शोभनयज्ञान् करति करोतु यक्षत् हविषा यजतु अपि च स्तोत्रैः प्रीणयतु च ५ वंस्वा विश्वेति हे प्र
चेतः प्रकृष्टमते अग्ने विश्वा विश्वानि वार्याणि वरणीयानि धनानि वंस्व अस्मभ्यं देहि नः अस्माकं आशिषः सत्या यथा
र्था भवंतु ६ त्वामु ते दधिरे इति हे अग्ने ऊर्जो नपातं बलस्य पुत्रं त्वां सुतामे यज्ञे देवासः देवाः हव्यवाहं हविषां वोढारं आद
धिरे अकुर्वन् इत्यर्थः ७ ते ते देवायेति हे अग्ने देवाय ते तुभ्यं दाशसि दाश्वांसः वयं दाश्वांसः हवींषि ददतः स्याम भवेम अ
ग्नेः महः महान् यद्यपि उपगम्यमानः नः अस्माकं अरत्नानि रमणीयानि धनानि विदेवि भवत॥ ॥इति पंचमस्य द्वि
तीयपंचविंशोवर्गः॥ ॥इति सप्तमे मंडले प्रथमोनुवाकः॥ द्वितीये नुवाके षोडश सूक्तानि तत्र त्वे ह यत्पितर इति पंचविंशर्चं प्र
थमं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप् छंदः इंद्रो देवता द्वाविंश्यादिभिश्चतसृभिः सुदासनाम्नो राज्ञः दानं स्तूयते अतस्तास्तद्देव
ताकाः १ त्वे ह यत्पितर इति हे इंद्र त्वे ह त्वयैव नः अस्माकं पितरश्चित् पितरोपि जरितारः स्तोतारः सन्तः यत्तस्मात्कारणात्
विश्वा विश्वानि वामानि वामानि वननीयानि धनानि असन्वन् अलभन्त त्वाहि यमापि धनकामांस्तास्त्वं नः ततुर्णं हि यस्मात्त्वां
रत्नानि विभाव सुदुघाः धेनवः सुदुहाः संति ते अपि अश्वाः संति त्वं वसुधनं देवयते देवं कामयते अस्मभ्यमानाय च निष्ठः दा
नं नमो भव सि अवपूरणः २ राजेव हीति हे इंद्र त्वं जनिभिः जायाभिः राजेव क्षेति निवसति सहस्रैर्धनैः वसति हि पूरण
यितः वहे मघवन्निंद्र विप्रः विद्वान् कविः धनप्रदः सन् गिरः स्तोत्राणि अस्मान् पिशा हिरण्या हिरण्यादिभिः अश्वैः गोभिः अभिता
भितः स्तवान्नः अस्माकं अस्मान् राया धनेन संस्कुरु ३ इमा उत्वेति हे इंद्र त्वां इमाः यशो वर्तमानाः पस्पृधाना
सः स्पर्धमानाः मंद्राः मदयमानाः देवयंती देवं कामयमाना इमाः गिरः स्तुतयः उपस्थुः उपतिष्ठंति जनस्ते रायः धनस्य पथ्या
स्रुतिः अर्वाचीना अस्मदभिमुखी स्तुत गच्छतु हे इंद्र यश्चनेत्सु मतौ सुष्टु स्तवीवर्तमानाः त्वां मन्त्रः शर्मणि सुखे स्याम भूयास्म ४ २०

91
1915

धेनुं न त्वेति हे इंद्र स्तूयत सेवसे सक्तं गवि गोष्ठे वर्तमानां धेनुं न धेनुमिव स्तवेहि वि कृषि च इत्यः हे वर्तमानं त्वां दुदुक्षन् कामान् दोग्धु
मिच्छन् वसिष्ठः ब्रह्माणि स्तोत्राणि उपसस्रजे उपसृजति मे मम विश्वे सर्वे जनाः त्वामित् त्वामेव गोपतिं गवां
स्वामिनं आहुः जनाः अपि च इंद्रः नः अस्माकं सुमतिं सुष्टुमतिं अच्छ अभि इंद्रः आगंतु आगच्छतु ५ अर्णांसि चिदिति नद्यः स्त
वः इंद्रः अर्णांसि उदकानि प्रथानाचित प्रथमान्यपि सुदासे राज्ञे गाधानि तलस्पर्शानि सुपाराः सुपाराणि पारयितुं योग्या
नि अकृणोत् अकरोत् अपि च शर्यं तं उत्साहमानं शिम्युं बाधमानं शापं विश्वरूपो द्रवमाणनो शिशापं अशस्तीः अभिश
स्तीः स्थातुः वयस्य स्तोतुः सिंधूनां नदीनां अकृणोत् अकरोत्॥ ॥इति पंचमस्य द्वितीयचतुर्विंशोवर्गः॥ ६ ॥पुरोळा इदिति
पशुः यज्ञकुशलः पुरोळाः पुरोगामिनां इव पूरणः तुर्वशो नाम राजा आसीत् स तुर्वशः रायेधनप्राप्तये इंद्रस्य सखायं सुदासं
जगाम मत्स्यासः इव आत्मनि हिताः मत्स्या इव निशिताः नियंचिताः अपि भृगवः द्रुह्यवश्च योधाश्च सुदासः तुर्वशस्य च श्रु
ष्टिं आशु प्राप्तिं चक्रुः विषूचीः विष्वग्गंतव्याः अर्यामध्ये सखायं सुदासस्येंद्रः सखायं सुदासं अतरत् अतारयत् तुर्वशं चावधी
त् इत्यर्थः ७ आपक्वासइति पक्वासः पक्वाः हविषां पाचकाः भलानसः भद्रमुखाः अलिनासः अलिनाः तपोभिः प्रवृद्धाः
इत्यर्थः विषाणिनः कृपनार्थं कृष्णा विषाणहस्ताः दीक्षिताः इत्यर्थः शिवासः शिवाः सर्वस्य लोकस्य त्रिवकराः आभन्नेन अभि
ष्टु वंति ननिंद्र यः इंद्रः सधमाः सोमपानेन संहमायतीति सधमादः सधमाद एव सधमाः आर्यस्य कर्मशीलस्य गव्या गोसं
घान् ततः पश्यः हिंसकेभ्यः आनयत् अजगन् अजगत् स यं वगो संधान् लेभे युधा युद्धेन हन् शत्रून् जघान चेति शेषः ८
दुराध्यो अदितिमिति दुराध्यः दुष्टाभिसंधयः अचेतसः मंदमतयः सुदासः शत्रवः अदितिं अदीनां परुष्णीं नदीं स्रवयंतः वि
भिन्नपरुष्णाः कूलं अदमकुर्वन् सः सुदासः मन्त्रा इंद्रप्रसादलब्धेन महिम्ना पृथिवीं अविव्यक् तदेव व्याप्नोति न पुनः उदकेन
बाध्यते ततः सुदासः शत्रुः चायमानः चयमानस्य पुत्रः कविः कविर्नाम पशुः यागे संज्ञप्तः पशुरिवाशयत् अशेत सु
दासानिहतः इत्यर्थः ९ ईयुरर्थमिति अयं इंद्रः परुष्ण्या विष्ठितानि पर्वाणि संदधेत ततः परुष्ण्याः आपः यथापूर्वं अर्थमितु गंत

अमेव प्रवणं देशं पालयन् ईयुः आयपांचकुः अर्थं अगं नध्यं परुष्ण्याः पार्श्वयोः स्थितं निम्नदेशं प्रतिपरुष्णीं नियुः आश्व
मनसः अपराद्धाः सुदासस्य अश्वाः पिजामिनि मतिप्राप्त अमेव अगामन् इन्द्रः सुदासे रात्रिं मानुषे लोके वधिवाप जन्मकान्
अमित्रान् सुदासः स्थपत्त्वसंयुक्ता अश्ववन्तु भवमानानयत् १० ईयुर्गाव इति पदाइंद्रः सुदासोरणार्थं मागच्छतित्तदा
एमिनिप्रेषितासः एष्यामानानिनरां प्रहिताः चिनासः संहताः पृश्निगावः पृश्निवर्णाः अश्वाः येषां ते पृश्निगावः मरुतः यथा
अजंइंद्रं सस स सपंक वामि नियपा पूर्वं समपः कुतः गंसमयमन्तिक म्यमित्रं इंद्रं यवसात्यवसं निमितात् अगोपाः गोपा
रहिता गावः गोपालगाम इव अगमन् अभिसमन्तुर्न्तपुः रममाणाः नियुतो मरुतां अश्वाः कश्चिदं शीघ्रप्रासिचकुः॥ ॥
इति पंचमस्य द्वितीये पंचविंशो वर्गः॥ ॥एकं च य इति सुदासः राजा अश्रवस्या यशासः इच्छया परुष्ण्याः पार्श्वस्थयोः वैक
र्णयोः जनपदयोः स्थितमानाम् एकं च विंशतिं च जनान् तस्थस्तुः आत्मना अहम् सराजाद्यस्मिनर्न्यनीपः अध्वर्युरिव सयथा
सद्मन् यज्ञगृहे बर्हिः यस्मिन् युद्धे ब्युदस्य इंद्र इंद्रः मरुतां सर्गं प्रसवं अकृणोत् सुदासः सहायार्थं अकरोत् ११ अध श्रुत
मिति अध अनन्तरं श्रुतमपवाक्यः इंद्रः कवषं शूरं तं तथा वृद्धं अनु आसु पूर्वेण अपसु उदके नि वृणक्तिनिमज्जयदित्यर्थः अ
यावति अथ सखेसेवायन्तः सखायः तां जनान् अस्कम त्वे स खायस्त्यायश्वसेपानाः सख्यं लेभिरे इति शेषः १२
वि सद्य इति एवा कवचानि अंगिरा विश्वानि दृंहितानि दृढानि दुर्गाणि पुरः नगरीः ओजसा तान्सप्त प्राकारांश्च
इंद्रः सहसा बलेन सद्यः एव विदर्दः विदारयामास अपि च आनवस्य आनोः संबंधिनः बलस्य गयं गृहं त सुदासे तृत्सुनामक
स्य राज्ञे विभक् अभजत् अरात् इत्यर्थः हे इंद्रं त्वं लक्षं तो वयं विदथेषु देवयुद्धे वाचं बाधवाचं पूरुं मनुष्यं जेष्म जयेम १४
नि गव्यव इति गव्यवः गोकामाः अनवः अनोः संबंधिनः द्रुह्यवः द्रुह्योः संबंधिनश्च वीरासः वीराः षष्टिः त्रीणि शतानि सहस्रा
णीत्यर्थः षट् सहस्रा सहस्राणि षष्टिश्च अधिक षट् अधिकाः षट् च वीरा पञ्चसहस्रं पमा यसुदासे नि सुषुपुः नितरां घोरं ते नि
हताः इत्यर्थः तान्येतानि विश्वानि विश्वानि कृतानि कार्याणि इंद्रस्य इंद्रस्य वीर्याणि वीर्याणि इति १५ इंद्रेणैत इति कश्चित् इं

93
1915

द्रेण रक्षिताः अपि अन्य दतेनैव बाधं ते एतेन तृत्सवः दुर्मित्रासः दुष्टमित्राः प्रकलविदः अजानंतः इंद्रेण वेविषाणाः युद्धा
र्थं संगताः सन्तः पलायनार्थं उद्युक्ताः नीचीः नीचाः अपो न आप इव अधवन् अधावन् ते मिमानाः सुदासा बाध्यमानाः विश्वा
नि भोजनानि भोजनानि भोग्यानि धनानि सुदासे राज्ञे अदुः॥ ॥इति पंचमस्य द्वितीये षड्विंशो वर्गः॥ १६॥ अर्धं वीरस्येति इंद्रः
अभिक्षां अहमिमं निगृह्णामित्यर्थः वीरस्य वीर्ययुक्तस्य सुदासः अर्द्धं हिंसकं अन्तिं इंद्र इंद्रं अगणयन्तं श्रतमांश्च तस्य क्षीरादेः
शकिपः पातारं सार्थं तं उत्साहमानं परान् अरं दृकि वमन्युम्यः मन्युकर्तुः मन्युं क्रोधं भिमाय व बाधे अयसुदासः शत्रुः पयोमा
र्गनिपत्यमानः गच्छन् वर्तनिं पलायनमार्गं प्रणेनाप॥ १७ आध्रेण चिदिति इंद्रः तत् तदा आध्रेण चित् दरिद्रेणापि सुदास
एकं मुख्यं दान कर्म च चकार यामास सिंहं त्यचित् सिंहमेव पेसेन छागेन जघान पातयामास वेश्या वेश्याः स्तुती तया
स्रक्तीः यूपादीन् अस्कन्न् अव अवश्चत् अवकाशान् तानि एतानि त्रीणि कर्माणि असंभावितानीति नाशांकनीयं इंद्रस्य म
हिम्नाधिक्यात् विश्वा विश्वानि भोजना भोजनानि भोग्यानि धनानि सुदासे राज्ञे प्रायच्छत् अदात् १८ शश्वन्तो हीति हे इं
द्र ते तव शत्रवः शश्वन्तः बहवः रारधुः वशमीयुः चित् अपि च शर्धतः उत्साहमानस्य भेदस्य भेदनाम सुदासः शत्रुः कश्चि
त् तस्य गयं वशीकुरं विहलमत्स्तवनः स्तोत्र स्तवनः मतयः प्रतियः एनः पापं कृणोति करोति तस्मिन् भेदे तिग्मं निशितं प्रेर
यन्तं घोत्यारं वज्रं नि जहि नितरां प्रहर १९ आवदिंद्रमिति अत्रास्मिन् सर्वनाता सवेता नो युद्धे यः इंद्रः भेदं भेदनामकं
सुदासः शत्रुं प्रमुषायत अवधीत् तमिंद्रं यमुना नदी अतोषयत् तन्नीरवासी जनः सर्वोपि अतोषयत् इत्यर्थः तृत्सवः तृ
त्साः पुरुषाश्च आवन् अतोषयन् किंच अजासः अजाः जनपदाः शिग्रवः जनपदाः यक्षवश्च जनपदाः अश्वानि अश्व
संबंधीनि शीर्षाणि शिरांसि युद्धे हतानां अश्वानां शिरांसीत्यर्थः बलिं उपहारं तस्मै इंद्राय ट्रोडिमं जगुः जहुः २० नत इंद्रेति
हे इंद्र ते तव पूर्वाः पुरातनाः सुमतयः शोभनमतयः रायः धनानि चतुषसो न उषसः इव न संचक्षे संख्यातुं न शक्याः नत्
नाः नूतनाः सुमतयः रायश्च न संचक्षे किं च त्वं मान्यमानं मन्यमानस्य पुत्रकं देवकं देवकनामानं शत्रुं जघथ अवधीः त्वं

[illegible] ॥इति पंचमस्याष्टमे ...ऽष्टाविंशो वर्गः॥ २८॥ [illegible] २२ [illegible]

95
1915

हस्य हर्तासि भवति विशेषः हेइंद्र सः त्वं स्वक्षितराय अतिशयेन सोमाभिषवं कुर्वते अनायवेदः धनं प्रयंता प्रदातासि २ त्वंह
त्यादिति हेइंद्र हतं स्वस्तु सत्यदात्ता वाससरेण शुश्रूषमाण उपचरत्समर्थयुद्धे कुत्सं आवः अरक्षः कदायत्यदा आर्जुनेया
य अर्जुन्याः पुत्राय अस्मै कुत्साय शिक्षन् धनं प्रयच्छन् दासं दासनामकं असुरं शुष्णं च कुयवं च न्यरंधयः नितरां वशमा
नयः ३ त्वं धृष्णो इति हे धृष्णो शत्रूणां धर्षक इंद्र त्वं धृषता धर्षकेण वज्रेण नमेन वीतहव्यं दत्तहविष्कं सुदासं राजानं वि
श्वाभिः सर्वाभिः ऊतिभिः रक्षाभिः प्रावः प्रकर्षेण अरक्षः किं च त्वं हत्येषु युद्धेषु क्षेत्रासः सतो क्षेत्रस्य सातौ क्षेत्रभूमेर्भजने
निमित्ते पौरुकुत्सिं पुरुकुत्सस्यापत्यं त्रसदस्युं पूरुं च प्रावः ४ त्वं नृभिः नृमण इति हे नृमणः नृभिः स्तोतृभिः मननीय स्तोतव्ये
द्र त्वं देववीतौ यज्ञे क्रियमाणे सति नृभिः मरुद्भिः सह भूरीणि बहूनि वृत्राणि शत्रून् हंसि मारितवानसि किं च हे हर्यश्वेंद्र
त्वं दस्यून्परं चुमुरिं च धुनिं च ... सुहंतुना वज्रेण नितरां अस्वापयः मा
रितवानसि ५ तव च्यौत्नानीति हे वज्रहस्त तव च्यौत्नानि बलानि तानि ... पुरः सद्यः
युगपदेव विदारितवानसि विशेषः तदा निवेशने निवेशनार्थं ... पुरं आविवेषीः ... च अहन् उत
पिब्रुं नमुचिं अहन्॥ ॥इति पंचमस्याष्टमे एकोनत्रिंशो वर्गः॥ ॥सना ता त इति हे इंद्र तेन वरातहव्याय ... हव्याय दा
शुषे यजमानाय ... सना ता तानि भोजना भोज्यानि धनानि सनातनानि भोजनानि ... हे पुरुशाक बहुक
र्मन् इंद्र वृष्णे कामानां वर्षित्रे तुभ्यं तानि तु ... वृष्णा वृषणो हरी अश्वौ युनज्मि ... अस्मदी
यानि ... वाजं बलिनं ... ७ मा ते अस्यामिति हे सहसावन् बलवन् हरिवः हरिवन्निंद्र ते तव अस्यां स्तोत्रेणास्मा
भिः क्रियमाणायां परिष्टौ अन्वेषणायां पराद: पराय अघाय अहं तव ... अस्मान् ... अवधैः वरू
थैः रक्षणैः त्रायस्व पाहि तव ... प्रियासः प्रियाः स्याम भवेयाम ॥८ प्रियास इदिति हे मघवन् धनवन् इं
द्र ते तव अभिष्टौ अन्वेषणे नरः ... प्रियासः ... शरणे इत् गृहे इंद्र वमा देम किंच अतिथि

मायय्य जघान पिपात्मगत्करीति अपि च स्मः सखीय हसेदिवो हासायवा अस्मदीयाय राज्ञे यं संशं सनीयं सुखं करिष्यन् कुर्वन्
सुदासे रायां सं दिनाद्विरवं आहं तं गमं शिशिया हि इत्यर्थः ९ सद्य इत्यामा हे मघवन् धनवान् इंद्र नमनवसु अघ अ
मि होम निविष्टे पेमत उक्तनाहसाः उक्थानां शंसिनामः उक्थ्या उक्थानि राज्ञा आपि सद्यमिवत् सद्य एव शंसा निकिंभूते नवहव्ये
मि: अभिः पत्नीभ्यः जयसा नसा मंद्रतिसौपि अश्या नस्तानाम्निवेशे पयाहाय पकृत् इत्यर्थ ॥ नान् अस्मान् तस्मै युज्याय
सख्याय सख्यम नूवर्ण मितुं स्तवीयपरिगृहण १० एते स्तोमा नरामिति हे नृतम मे म नृतमेंद्र तुभ्यं न रानृणां स्ते स्तो
माः संघाः सघानि मंहनीयानि हवींषि इदं नः इदं तः अस्मदीयः अस्मदभिसुख्याः जनवं नितिशेषः तेषां नृणां वृत्र ह
सि संग्रामेषु वः कस्मात् अहतः यवससाधनस्य अविता रक्षिता च भवः ११ नू इंद्र शूरेति हे शूर इंद्र नु अद्य स्तव
मानः स्तूयमानः अस्य ऊर्ध्वतः अस्मत्स्तोत्रेण प्रेरितः तन्वा शरीरेण ऊर्जा साराः बलेन वावृधस्व अपि च नः अस्मभ्यं वाजान् अ
न्नान् उपमिमीहि प्रयच्छेत्यर्थः अस्माकं मध्ये अपि मिमीहि यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य द्वितीये त्रिंशो
वर्गः ॥ ॥इति पंचमाष्टके द्वितीयोऽध्यायः ॥ २ ॥उग्रो जज्ञ इति दशर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप् छंदः इंद्रो देवता
॥१॥उग्रो जज्ञ इति ॥ स्वधावान् बलवान् उग्रः ओजस्वी इंद्रः वीर्याय वीर्यं कर्तुं जज्ञे प्रादुर्भवति नर्यः नरहितः सन् यत्कर्म क रि
ष्यन् भवति न दपः कर्म चकिः कर्तैव किं च पत्नं यह्वः महान् युवा नित्य तरुणः सन् अवोभिः रक्षणैः सार्धं जग्मिः गंता मह
तः महतो महतो एनसः पापात् नः अस्माकं त्राता रक्षिता भवतीति २ हंता वृत्रमिति इंद्रः वृत्रं वावृधानः वर्धमानः सन् वृत्र
मसुरं हंता भवति वीरः शूरः अविता रक्षिता स्तोतारं ऊती ऊत्या सार्वत्रिकः अपावृतः दासेराज्ञे लोकं अनपदं
कर्तारं अहवे यः पूरयाः सुदासे पुण्यं यजमानाय च यकृतः वसु दाता भवति यो जनाः २ युध्मो अन
र्वा इति युध्मः योद्धा अनर्वा अप्रतिगतः संख्ये युद्धेषु सम्यक् पुरुकृत् सहसा बहुकर्मा भगवान् ऊर्जाः शूरः जनुषा जन्मना च
वनस्तेयः समाभिदृवद्वशूनां मति पुनर्भिसावाल्पा सः यवं बलवतां स्तोत्रवाः स्रवलः ई अयमिंद्रः पृतनाः शत्रु

णां सेनाः आसे विक्षिपति अथ अमित्रं शत्रुयंतं श्रावं आधारं तं विश्वं सर्वं जघान हंति ४ उभे चिदिति हे तुविष्मः बहुधने
इंद्र महिमान्विते न त्वाविषीभिः बलैश्च उभे चित् उभे अपि रोदसी द्यावापृथिव्यौ आ प्राप्य आपूरितवानसि परोक्षः हरिवान्
अश्ववान् इंद्रः वज्रम् निमिमिक्षन् शत्रुषु पातयन् महेषु यज्ञेषु अंधसा सोमेन समुवोच संसे व्यते वा पूरणः ५ वृषा ज
जानेति वृषा सेक्ता पिता कश्यपः वृषणं कामानां वर्षितारं इंद्रं रणाय युद्धार्थं जजान उत्पादितवान् नर्यं नरहितं तमुत
मेवेंद्रं नारी माता अदितिरपि सूनुं पुत्रं अजीजनत् पिबयः इंद्रः नृभ्यः नृणां सेनानीः सेनानां नेता सन् प्रासि प्रभवसि स
इंद्रः इनः सर्वस्य जगतः ईश्वरो भवसि सत्वा नृणां सात्वकः गवेषणः गवामन्वेष्टा च धृष्णुः शत्रूणां कर्षकश्च भवति
तिशेषः ॥ ॥इति पंचमस्य तृतीये प्रथमो वर्गः ॥ ॥नू चित्स इति यः जनः अस्य इंद्रस्य घोरं शत्रूणां बाधकं मनः यज्ञैः आवि
वासात् परिचरति स जनः नूचित् नैव रेषते स्व नानृतम भ्य स्यति न रेषत् नैव हिंसीयते अपि च यो जनः दुवांसि परिचरण
साधनानि स्तोत्रशस्त्राणि इंद्रे देवतें तस्मै जनाय ऋतपाः यज्ञपालक ऋतजाः यज्ञे जातश्च स इंद्रः राये धनाय क्षयत् नि
वसति भवेदित्यर्थः ७ यदिंद्र पूर्व इति हे विश्ववाय नीयेंद्र यत् धनं पूर्वः पिता अपराय पुत्राय आशिषन् प्रयच्छन् भवति तिशे
षः यथा देहि यं धनं ज्यायान् श्रेष्ठः कनीयसः अपत्य प्राप्नुयान् यथा पिधनं पितुः लब्धा पुत्रः अमृत इत् अमृत एव स
न् पितृद्रव्यं विनाय दूरं पर्यासीत आसीत तथा धनं वा त्वं रयिं धनं नः अस्मभ्यं आभर आहर ८ यस्त इंद्रेति हे इंद्र
ते तुभ्यं प्रियः सखा जनः ददाशत् हवींषि दद्यात् हे अद्रिवः वज्रिवन् इंद्र स त्वा ते नव निरेके दाने असत् स्यात् वयं च वासि
ष्ठाः अत्र नः अहिंसन्तः तव अस्यां सुमतौ अनुग्रहबुद्धौ वर्तमानाश्च निष्ठाः स्तनिमत्तराः नृपीतौ नृणां रक्षके वरूथे गृहे
स्याम च सेम ९ एष स्तोम इति हे मघवन् धनवन्निंद्र ते तुभ्यं वृषा सेक्ता एष स्तोमः सोमः स्तूयमानः अचिक्रदत् क्रंदति उतो
पि च स्तोमाः स्तोतारः विप्राः अरितारं स्तोतारं मां रायः धनस्य कामः अभिलाषः आजग
म आगतः अतस्त्वं सुवः धनं नः अस्मभ्यं अगच्छ प्रशाकः भव इहि १० स न इंद्रेति हे इंद्र स त्वं तव तया इषे तया दत्त मन्नं

वे॰भा॰पं॰
२४

गोमंतं नः अस्मान् धाः धारय पिब मघवानः हविष्मंतः मनाखयमेव सुनंति हविः। पिवांस्र तिसिरयंति तान् पित्वया तायेइषेधाः
अपि च वस्वी सु अत्यंत प्रशस्ता सुस्कृता सु ते तव जरित्रे स्तोत्रे मत्यं शक्तिः सामर्थ्यमस्तु यूयं पात स्वस्तिभिः सदा नः॥ इति पंच
मस्य तृतीये द्वितीयो वर्गः॥ ॥असावि देवमिति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप्छंदः इंद्रो देवता १ असावि देवमि
ति देवं दीप्तं गोऋजीकं गोभिः संस्कृतं गव्येन मिश्रितमिति यावत् अंधः सोमरूपमन्नं असावि अभिषुतं इंद्र अयमिंद्रः अस्मिन् अ
भिषुते सोमरूपे अंधसि जनुषा स्वभावत एव मन्युवीर्य नितरां संगतो भवति प्रत्यक्षः हे हर्यश्व इंद्र त्वा त्वां यज्ञैः स्तोत्रैः बो
धामसि बोधयामः अंधसः सोमस्य मदेषु नः अस्माकं स्तोमं स्तोत्रं बोध बुध्यस्व २ प्रयंति यज्ञमिति यज्ञं प्रयंति नियच्छार
वाहिम्नाविपर्यंति स्वणंति विदथेषु यज्ञे सोममादः ग्रावाणः दुध्रवाचः दुर्धरवाचो भवंति अपि च यज्ञासोयशास्विनः दूरेउप
ब्दः दूरे उपब्दिः शब्दो येषां ते न्यावः न्यनि त्यनि ऋत्विजः सवने इति न्यावः वृषणः गर्भात् गृहात् गृहः मध्यमग्रावस्त
स्मात् च आ चार्यभिप्रियंते अभिषवः बलायां निगृह्यंते उपूरणः ३ त्वमिंद्र स्रवितवा इति हे इंद्र त्वं अहिना वृत्रेण परि
ष्ठिताः आक्रांताः पूर्वीः बह्वीः अपः उदकानि स्रवितवे स्रवितुं कः अकर्षीः धेनाः न दश्च त्वनतनः होताः रथ्योः रथिन इ
व वावर्कृ निर्गच्छंति विश्वा विश्वानि कृत्रिमाणि भुवनानि च भीषा त्वत्तो भीत्या रेजंते कंपते ४ भीमो विविषेति इंद्रः नर्या
णि अपांसि कर्माणि विद्वान् जानन् आयुधेभिः आयुधैः भीमो भयंकरः सन् एषां एतान् करान् विवेष व्याप्तवान् पुरश्च
तेषां विदृधान् अकंपयत् अपि च वर्हणा वर्हणः दृष्यन् महिना महिम्ना युक्तः वज्रहस्तः सन् तान् वि जघान ५ न यातव इति
हे इंद्र यातवः राक्षसाः नः अस्मान् न जूजुवुः नहिंसुः अपि च हे विश्व विष्ठ बलवन्तं इंद्र वंदना वंदनानि रक्षांसि वेद्याभिर्वे
द्याभ्यः प्रजाभ्यः न अस्मान् न जूजुवुः न स्पृशन्तु किं च अर्यः स्वामी स इंद्रः विषुणस्य विषमस्य जंतोः प्राणिनः शासने
शर्द्धतु उत्सहत्व अपि च शिश्नदेवाः शिश्नेन दीव्यंत इति शिश्नदेवाः अब्रह्मचर्याः इत्यर्थः नः अस्माकं ऋतं यज्ञं मा अपियुः
मा अपि गमन्॥ ॥इति पंचमस्य तृतीये तृतीयो वर्गः॥ ॥अभि क्रत्वेति हे इंद्र त्वं क्रत्वा कर्मणा ज्मन् पृथिव्यां वर्तमानान् अभि

२४
जंतूनभिभू

97/1911

गमि नासि न जगदपि च ते तव महिमानं रजांसि लोकाः न विव्यक्तुः न व्याप्नुवन् इत्यर्थः स्वेनाहि आत्मीयेन च शवसा बले
न स्वयं अपयं वृत्रं जघंथ हतवान् न त्वा शत्रुः अंतं विविदत् न लब्धवान् ७ देवाश्चिदिति ते पूर्वे देवाश्चित् असु
राः अपि असुर्याय बलाय च ते त्वा मनु अनुमंस्त हिंसाय वृत्राहत्याय च त्वं मघवा अहिंसितस्य मिश्रितानि समिरे निर्मितवान् अपरो
क्षः इंद्रः वाजं अन्नं विपत्यम धनानि सनानि ददाति भक्तेभ्यः प्र यच्छति अपि च इंद्रं त्वा अस्य बलस्य साती लाभार्थं जोहुवंति तस्त
वामि स्तोतारः ८ कीरिश्चिद्धीति हे इंद्र ईशानं त्वां कीरिः स्तोता च वसिष्ठः अवसे रक्षणाय जुहाव हि स्तौति हि चित् पूरणः अ
पि च हे शानमूते ब्रहुर्बृहते इंद्र अस्माकं मघवन् प्रसृतस्य सोमस्य धनस्य अवः रक्षणं प्रथय बलं विधत्स्व अपि च त्वं अभिहिंसि
कस्य त्वा वनः सशरद्धस्य वरुत्रा वारयिता असि ९ सखाय स्त इति हे इंद्र ते तव नमोवृधासः नमसा स्तुत्या वर्धयंतो व
यं विप्रासः वसिष्ठाः सखायः स्याम भवेम महिना महिम्ना नरुत् अत्तं तारके द्रुतेन च अवसार क्षणेन सर्मीके संग्रामे अ
भः अभीतिं अभिगमनं वनुष्यां हिंसकानां शवांसि बलानि च वन्वंतु स्तोतारो हि संत्तु स्य पूरणः १० स न इंद्रेति हे इंद्र स त्वं
त्वयताय त्वद्दत्तायै इषे अन्नाय गोकुरू अस्मान् धाः धारय च मघवानः हविष्मंतः मना स्वयमेव जुनंति हविः पित्वांसि निप्रर
यंति तान् पित्वयताय इषे धाः अपि च वस्वी सु अत्यंत प्रशस्ता सुस्कृता सु ते तव जरित्रे स्तोत्रे मत्यं शक्तिः सामर्थ्यमस्तु
यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य तृतीये चतुर्थो वर्गः॥ ॥पिबा सोममिति नवर्चं पंचमं सूक्तं वसिष्ठः ऋषिः
आदितो द्वौ विराजः नवमी त्रिष्टुप् इंद्रो देवता १ पिबा सोममिति हे इंद्र सोमं पिब सः सोमः त्वा त्वां मंदतु मादयतु हे हर्यश्व
ते त्वरयं सोतुः अभिषवकर्तुः बाहुभ्यां अवनिराहिणा अश्व इव संयतः सुष्ठु परिगृहीतः अद्रिः ग्रावा यं सोमं सुषाव २
यस्ते मद इति हे हर्यश्व इंद्र ते तव यः युज्यो युज्यः चारुः समीचीनः मदः मदकरः सोमः अस्ति वृत्राणि येन त्वं पाप्ते न सोमेन
वृत्राणि पापानि हंसि हे प्रभवसो प्रभूतधन इंद्र स सोमः त्वा ममत्तु मादयतु ३ बोधा सु मे इति हे मघवन् धनवन् इंद्र ते तव
प्रशस्तिं ऋग्रूपां याः वाचं वसिष्ठो अर्चति वदति ताः इमाः वसिष्ठस्य संबंधिनीः वाचं स्वा बोध सुष्ठु अभियुध्यस्व किं च

इमा इमानि ब्रह्म ब्रह्माणि स्तोत्राणि सधमादे यज्ञे शुषस्व सेवस्व ४ श्रुधी हवमिति हे इंद्र विपिपानस्य विपानवतः मम
अद्रेः ग्राव्णः हवं आह्वानं श्रुधि शृणु विप्रस्य सवासि स्वर्चतः स्तुवतः मनीषां स्तुतिं बोध बुध्यस्व च इमानि क्रियमाणा
नि दुवांसि परिचरणानि अंतमा अंतिकतमानि कृष्व कुरुष्व ५ न ते गिर इति हे इंद्र तुर
स्य तूर्णस्य अभि हिंसकस्य तेन वाण्याः स्तवनाः अस्य धैर्यस्य सहः बलं असुर्यं बलं विद्वान् जानन्न अहं नापि मृष्ये न मार्जयामि न परित्य
जामि सर्वाः सु स्तुतिः मम नाम्ना कीर्तयन्नापि मृष्ये किं तु स्वयशः असाधारणं यशः तेन तव नाम स्तोत्रं सदैव विवक्मि ब्रवीमि॥
॥इति पंचमस्य तृतीये पंचमो वर्गः॥ ६ भूरि हि त इति हे मघवन् तेन तव सवना सवनानि सोमाभिषवणानि भूरि भूरीणि
मानुषेषु अस्मास्वर्तते इति शेषः मनीषी स्तोता सामिनः त्वामेव भूरि हवते नितरां आह्वयति ततः अस्मत् अस्मत्तः आरे दू
रे मा कृथाः आलानमाकृथाः हि पूरणः ७ तुभ्येदिमेति हे शूर तुभ्येत् तुभ्यमेवेमानि विश्वा विश्वानि सवना
सोमाभिषवणानि मधुमंति धनदानि शेषः तुभ्यं वर्धनानि ब्रह्माणि स्तोत्राणि कृणोमि करोमि त्वमेवनृभिः यज्ञा
नां नेतृभिः विश्वासर्वप्रकारैः हव्यः ह्वातव्यः असि ८ नू चिन्नु त इति हे दस्म दर्शनीय इंद्र मन्यमानस्य ते तव महिमानं नु
क्षिप्रं न वितू उत्तमदाः कोपि बलं न आप्नुवंति हेउत हे इंद्र तेन वराधः धनं नाप्नुवंति वीर्यं नाप्नुवंति ९ ये च पूर्व इति
ये च पूर्वे प्राचीनाः ऋषयः ये च नूत्ना नूतनाः विप्राः मेधाविनः ऋषयः ब्रह्माणि स्तोत्राणि अजनयंत ते युष्मे अस्मे अस्मासु
अपि हे इंद्र तेन पसस्यानि सख्यानि शिवानि भद्राणि संतु यूयं पात स्वस्तिभिः सदा नः॥ इति पंचमस्य तृतीये षष्ठो वर्गः॥ ॥
उदु ब्रह्माणीति षडृचं पंचदशं सूक्तं वसिष्ठः ऋषिः त्रिष्टुप् छंदः इंद्रो देवता १ उदु ब्रह्माणीति श्रवस्या अन्नेच्छया ब्रह्माणि स्तो
त्राणि हे इंद्र यज्ञे देवस्य सर्व कृणुपहानि शेषः उपूरणः हे वसिष्ठ समर्यति समर्ये यज्ञे इंद्रं महय स्तोत्रेण हविषा च पूजय अपि च यः
इंद्रः विश्वानि सर्वाणि शवसा बलेन आततान आ ततान स इंद्रः मे उपगमनवतः मे ममवचांसि स्तुतिरूपाणि वाक्यानि
उपश्रोता भवतु २ अयामि घोष इति यदयसस्य शुरुधः ओषध्यः हे इंद्र अंतवर्धं तेन दाहे इंद्र त्वदर्थं वसिष्ठानां देवे

२५

जामिः देवानां बंधुः घोषः स्तुतिरूपः घोषः यामि अकारि अपि च अन्येषु मध्ये केनापि स्वमायुः स्वजीवितं शायति न तत्र न
कि चिकितेन ग्रायते यः आयुः क्षीयते तानि तानि सर्वाण्येव अंहांसि पापानि अस्मान् अतिपर्षि अतिपारय ३ युजे रथमिति
गवेषणं गवां प्रापकं इंद्र स्वरथं हरिभ्यां इंद्र वाहाभ्यां युजे स्तोत्रैः अहं युनज्मि ब्रह्माणि स्तोत्राणि जुजुषाणं परिवारैः सेव्य
मानं इंद्र उपासर्तु उपागच्छतु स इंद्रः महिता महिम्ना रोदसी द्यावापृथिव्यौ विबाधिष्ट अपि च इंद्रः वृत्राणि शत्रू
न् अप्रति इंद्र अप्रति अप्रतिगतवान् ४ आपश्चित्पिप्युरिति हे इंद्र त्वया सादात् आपश्चित् आपः स्तर्यो न गावः स्तर्यो वशा
गावः इव पिप्युः वर्धंते अपस्तताः गावः मांसप्रमाणं वि हि ते तव अरिमारः स्तोतारः छंदः मुरकं नक्षन् आप्नुवन् अपि च
त्वं नः अस्माकं नियुत्वान् अश्वैः संयुतः सन् वायुर्न वायुरिव अस्थाहि त्वं धीभिः प्रजाभिः वाजान् अन्नानि विदयसे स्तोत्र
न्यः प्रयच्छसि ५ ते त्वा मद इति हे इंद्र त्वा त्वां ते मदाः मदकराः सोमाः मादयंतु अपि च जरित्रे स्तोत्रेषु क्षिप्रं बलवंतं तु
विराधसं बहुधनं पुत्रं प्रयच्छ नीतिशेष हे शूर त्वं देवत्रा देवेषु एक एव मर्तान् मनुष्यान् दयसे हि दयां करोषि खलु अस्मि
न् सवने मादयस्व ६ एवेदिंद्रमिति वसिष्ठासः वसिष्ठाः वज्रबाहुं वर्षणं कामानां वर्षितारं इंद्रं एवेत्तु केन प्रका
रेणैव अर्कैः अर्चनीयैः स्तोत्रैः अभ्यर्चंति अभिपूजयंति स्तुतः स इंद्रः नः अस्माकं वीरवत् पुत्रादियुक्तं गोमत् गोयुक्तं च ध
नं दधातु ददातु यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य तृतीये सप्तमो वर्गः॥ ॥योनिष्ट इंद्रेति षडृचं षोडशं सूक्तं व
सिष्ठ ऋषिः त्रिष्टुप् छंदः इंद्रो देवता १ योनिष्ट इति हे इंद्र ते तव सदने सदनार्थं योनिः स्थानं अकारि हे पुरुहूत इंद्र नृभिः मरु
द्भिः सार्धं तं यानि यथा येनापि प्रकारेण आ प्र याहि नः अस्माकं वृधे वर्धनाय अविता रक्षकः असः स्याः तथा च वसूनि ददः
अस्मभ्यं देहि सोमैः अस्मदीयैः ममदः मादयस्व २ गृभीतं त इति हे इंद्र द्विबर्हाः द्विबर्हसः द्वयोः स्थानयोः परिवृढस्य ते
तव मनः गृभीतं अस्माभिः परिगृहीतं सोमः श्व सुतः अभिषुतः मधूनि च पारिषिक्तानि पात्रेषु परिषिक्तानि विसृष्टधेना विसृ
ष्ट जिह्वा मध्यमस्वरेणोच्चार्यमाणा स्तुतिः स्तुतिः समाप्तिः इयं मनीषा स्तुतिः इंद्र जोहुवती दृशी आह्वयती अरते संप्रि

99
1915

वे·भा·पं·
२६

मेव ३ आनो दिव इति हे ऋजीषिन् इंद्र नः अस्माकं इदं बर्हिः इदं यज्ञं सोमपेयाय दिवः स्वर्गात् आयाहि आगच्छ पृथिव्याः
अंतरिक्षाद्वा आयाहि अपि च नय संस्पृष्टं मध्वं वसमहसि मुखं ता तां आंगूषं स्तोत्रं अच्छ अभिमदाय मदार्थं हरयः अश्वाः
वहंतु ४ आनो विश्वाभिरिति हे हर्यश्व हरिनामकाश्वस्वामिन् विप्रवीतमन्तहमोइंद्र विश्वाभिः सर्वाभिः ऊतिभिः रक्षाभिः
सजोषाः संगतः स्वर्चिरभिः शूरैः मरुद्भिः सहचरीषु अनूयात्वं ग्रहा शूहिं सत्वं अस्मे अस्मभ्यं वृषणं कामानां वर्षितारं
तु पं बलवंतं तुमं दधत् प्रयच्छन् प्रस्तोत्रैः सुपाषः सेवमानः नः अस्मान् आयाहि ५ एष स्तोम इति महे महते उग्रा
य ओजस्विने वाहे विश्वस्य वोढ्रे इंद्राय भूरिव रथस्य अस्तोन अत्य इव वाजयन् कर्म कुर्वन् एषः स्तोमः अधायि धापि
तसमर्यः हे इंद्र एषं स्तोतमानं स्वर्गं अमृतां अमिता तां अयमर्कः स्तोता वसूनां वसूनि धनानि इंद्र देया च नेसत्तं अस्मासु धां
दिवीव द्योतमाने स्वर्गे अमूलमिव श्रीमत्तं श्रवणीयं अन्नं अभिधाः अभिधेहि ६ एवान इति हे इंद्र नः अस्मान् एव एवं
यस्मिन्वरे तोयेन धनेन पूर्धि पूरय तितनवमहि महतीं सुमतिं अनुग्रहबुद्धिं वे विदाम अशंसमेमहि मघवद्भ्यः हविष्मद्भ्यः अ
स्मभ्यं सुवीरां शोभनपुत्रादियुतां इषं अन्नं पिप्य प्रयच्छ यूयं पात स्वस्तिभिः सदा नः॥ ॥ इति पंचमस्य तृतीये अष्टमो
वर्गः॥ ॥आ ते मह इंद्रेति षड्ऋचं अष्टमं सूक्तं वासिष्ठस्यार्षं त्रैष्टुभं इंद्रो देवता १ आ ते मह इति हे उग्र इंद्र यत् यदा
म समन्यव मन्योपनुः अभिमानोपासांता मन्यव सेनाः समरंत सुधं नतहनर्यस्य स्मरहितस्य महतः ते नव बाहोः स्थि
तारिषु महद्धायपं ऊतिः अभिअस्मद्रक्षार्थे अपतानि आपतत् नवविषय कुविषक्कं तमनस्वमाविवारित् अस्मासु
पतित भवतु २ नि दुर्ग इंद्रेति हे इंद्र दुर्गे पुरे येम तरिः मर्ताः अभि अभिमुखाः संतः नः अस्मान् अमंति अभिभवंति तान्
अभि शत्रून् अभि ... अपि च अभिमितो अस्मान् निरिति तुइच्छनः नरस्य नेशंसं आशंसनं आरे दूरे कृणुहि कु
रु अपि च नः अस्मभ्यं वसूनां धनानां संभरणं समूहं आभर आहर ३ शतं ते शिप्रिन्निति हे शिप्रिन् ऊतयः इंद्र ते त्वदी
याः शतं सहस्रम् ... अस्मास्यमसाधनमात्सुधं च अपि च अस्मे अपि अस्माकं सुमतिरिति मदर्नरं त्वं च धेहि ४ २६

161
1915

स्मा यतो द्वेष इति हे इंद्र स्वावतः त्वत्सदृशस्य कृते कर्मणि अस्मिन् वाजिहिवे शूर इंद्र अभिभुः विश्वस्य रक्षितुः स्वावतः त्वत्सदृ
शास्य रातो दामेच अमृतीतिशेषः हेन विपादनश्चलक्तुउग्रओ जस्विन् इंद्र विश्वेतु हि विश्वान्येव अहानि ओकः अस्माकं स्था
नं कृणु कुरु हे हरिवः हरिवद्भिः हन्नमघः अस्मान् न हिस्याः ५ कुत्सा एत इति ए ते वयं वसिष्ठाः हर्यश्वाय इंद्राय शूषसु
खकरं स्तोमं कुत्साः कुर्वाणाः इंद्रस्य भक्तं देवैः प्रेरितं सहः बलं इयानाः याचमानाः तरुथाः दुर्गाणि तीर्णाः संतः वाजं बलं
सनुयाम लभेमहि अपि च इंद्र रत्र शत्रूनुत सुहनाहंतुमशक्यानि सखा सवशकृषिकुरु ६ एवान इंद्रेति हे इं
द्र नः अस्मान् एवं वार्यस्य वरणीयेन धनेन पूर्धि पूरयतेनवमसि महतीं सुमतिं अनुग्रहबुद्धिं वे विदाम अशंसमेमहि म
घवद्भ्यः हविष्मद्भ्यः अस्मभ्यं सुवीरां शोभनपुत्रादि संयुतां इषं अन्नं पिप्य प्रयच्छ यूयं पात स्वस्तिभिः सदा नः॥ ॥
इति पंचमस्य तृतीये नवमो वर्गः॥ ॥न सोम इंद्रेति पंचर्चं नवमं सूक्तं वासिष्ठस्यार्षं त्रिष्टुप् छंदः इंद्रो देवता १ न सोम
इंद्रेति मघवानं धनवंतं इंद्रं अस्कृतः अनभिषुतः सोमा न ममाद न तर्पयति सुतासः अभिषुताः अपि सोमाः अब्रह्मा
णः स्तोत्ररहिताः अमृन्मदुः अतएव विप्रा पिस वनेषु पावमानैः स्तोत्रैः कृता एव सोमा हूयंते अपिच नः अस्मदीयं यत् उक्थं
इंद्रः शु श्रोषत् संवनत् यथा चक्रवर्त्तराजेवआदरेण शृणवत् शृणुयात् तथान्वीयः नवतरं उक्थं शस्त्रं न स्मै इंद्राय जन
यिषाम स्तर्पः २ उक्थ उक्थ इति यदा यस्मात् उक्थे उक्थे शस्त्रे शस्त्रे क्रियमाणे सोमः मघवानमिंद्रं ममाद मादयति नी
थे नीथे स्तोत्रे स्तोत्रे क्रियमाणे सुतासः अभिषुताः सोमाः मादयंति ते एनं इंद्रं सबाधः परस्परं मीलिताः समानदक्षाः स
मानोत्साहाः ऋजिशः पुत्राः पितरं नापि नरमिव अवसे रक्षणाय वहंते शाक्रेः स्तोत्रैः स्तुवंति ३ चकारेति वेधसः
स्तोत्रणां विधातारः सुतेषु सोमेषु अभिषुतेषु यानि कर्माणि स्तुवंति ता नि एतत्र वधादीनि कर्माणि इंद्रः पूर्व स्मिन् काले चकार
नूनं संप्रति अन्या अन्यानि कर्माणि कृणवत् करोतु अपि च सः इंद्रः सर्वाः पुरः शत्रुनगरीः समानः समहत्तिः एकः असह
यः पतिः जनीरिव जायाइव स्त्रनिमांम्नेसम्यक् शोधयेत् ४ एवा तमाहुरिति यस्येंद्रस्य मियः परस्परं तुरः बाधनाः पू

कीः व अवः कुतयः रसाः संमितं एवएवं उक्त गुणमाकुः पूर्वैकः यथ उत नायिष अयापिसः इंद्रः एकः मुख्यः मघानां धनानांवि
भ क्ता शतात् इतिवंचिआपदः नारवि नैमिन्त्यं अस्यते तस्वत्र प्रसादात् अस्मे अस्मान् प्रियाणि भद्राणि कल्याणानि सम्ब
नसेषवां ५ एवा वसिष्ठ इति वसिष्ठः न नरः आजांतयरत्नयिकथींगां मगानां रूपसंकामानां वर्षितारं इंद्रं एवा एवं पूर्वो
क्त प्रकारेण मृणातीज्ञातानि प्रसवाः सुते अभिषुतेसोमेहे इंद्र नः अस्मभ्यं सहस्त्रिणः सहस्रसंख्याकान्वाजान् अन्नानि
उपयाहि सुपते यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य तृतीये दशमो वर्गः॥ ॥इंद्रं नर इति पंचर्चं दशमं सू
क्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः इंद्रो देवता १ इंद्रं नरः नेतारो यजमानाः युद्धसरणे मिमिताः ताः प्रसिद्धाः धियः कर्माणि युनज
ते प्रत्ययं नेतरा वीर्येनातः यस्मिंदं नेमधिताति माधितौ संग्रामे हवंते व्हयंति सत्वं शूरः न्तृणां नरणां संभक्ता दातोबलस्य
बलं च काम कामयमानः सन् अस्माकं गोमति गोयुक्ते व्रजे गोष्ठे गोशं आभज संरक्ष २ यइंद्र शुष्म इति हे पुरुहूत
इंद्र तेतव यः शुष्मः बलमस्तितं शुष्मं स स्तोतृभ्यः स्तोत्र तथापः सोमाः शिक्षं देहि आविष्कृत्य नद्इंद्र हि यस्मात् त्वत्सोरक्षनि
तु बांधुराणिपितारेयशोक महतां संदधे नाः बिविक शक्ताः सत्वप रिवृतैनिरोहितं राधो धनं अपावृधि अस्मभ्यं अपवृणु
संप्रलर्ये ३ इंद्रोराजेति सइंद्रः जगतः जंगमस्यच्यावदेशः क्षोरा आ ईश्वरो भवति चर्षणीनां मनुष्याणां वाराः जास बानि आघ्
नानितानिबहुमा वीनि पुरुरूपं वहुनस्मजिनस्यापिराजा भवति ततो दाशुषे यजमानाय वसु निधनानि ददाति सः इंद्रः अस्मामिः
उपजन्यः वित्तः उपततं मपवसम् सा धनं अस्मकं अस्माकं मिधुसंबोधने प्रेरयतु ४ नू चिन्न इति मघवा धनवान् दानः दक्ष
नः सइंद्रः नः अस्माकं सदृतौसवृ तांमरुद्भिः सह आहाने नवा अंजवांतः अस्मभ्यं ऊतीऊ तैः रक्षाभिः मिनानि प्रभेवानिषम
गेभयद्गुप्त यस्मिंद्रस्यपच्यआसपूर्णा आसिनाना अपि साधारणं नस्य आघानं स्तोतृभ्यः स्तोत्रभ्यः नय्यः वामं वननीयं धनं पो
षाय ददाति ५ नू इंद्र राय इति हे इंद्र नः अस्मभ्यं रायेधनाय सेधं ऐन्द्रं आगच्छ आगत्य गोमत् गोयुक्तं अश्वावत्
अश्वयुक्तं च पथवत् यथापुक्तं वारिवो धनं संदधिहि वयं तेनधमनः मघायमंहनीयाय स्तक्वस्याय आवह स्वाम आवर्तयाम २७

यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य तृतीये एकादशो वर्गः॥ ॥ब्रह्माण इंद्रेति पंचर्चं एकादशं सूक्तं वसिष्ठ
ऋषिः त्रिष्टुप् छंदः इंद्रो देवता १ ब्रह्माण इंद्रेति हे इंद्र त्वं विद्वान् जानन् नः अस्माकं ब्रह्म स्तोत्रं उपयाहि ते तव हरयः अश्वा
श्च अर्वाचं अस्मदभिमुखं युक्ताः संतु हे विश्वमिन्व विश्वप्रीणयितः इंद्र त्वां विश्वे सर्वे मर्ताः मनुष्याः चित् चिदिमसुधापि वि
हवंते पृथक् हवंते तथापि अस्माकं नितृ अस्माकमेव हवं शृणुहि २ हवं त इंद्रेति हे शवसिन् बलवन् इंद्र यत् यदा ऋषी
णां ब्रह्म स्तोत्रं पासि रक्षसि तदा तेतव महिमा हवं हवः स्तोतारं आनट् व्याप्नोतु उग्र ओजस्विन् इद्यत् यदा हस्ते वज्रं आ
दधिं च धारयसि तदा कृत्वा त्रावृधादिना कर्मणा घोरः सन् अपाढः शत्रुभिः अनभिभूतः जनिष्ठाः अजनिष्ठाः अभवः
३ तव प्रणीतीति हे इंद्र यत् यः त्वं तव प्रणीती प्रणीत्या प्रणयनेन जोहुवानान् तुभ्यं स्तुवतः नॄन् रोदसी द्यावापृथिव्यौ सं
नित्य संगमयसि दिवि पृथिव्यां च स्तोतॄन् प्रतिष्ठापयसीत्यर्थः स त्वं महे महते क्षत्राय धनाय शवसे बलाय च यजमाने
भ्यो मरुद्भ्यं बलं च ददातु इत्यर्थः अत्र जज्ञिषे हि इत्वर्थपत्नः एवं अतः कारणात् अतुजिं अदातारं अयजमानं तुजिः दा
तापभूमान् अविशिश्नथितहिंसय ४ एभिर्न इंद्रेति हे इंद्र दुर्मित्रासः दुष्टमित्रभूताः बाधकाः क्षितयः जनाः पर्वते अ
भिगच्छंतितेभ्योधनं आक्षिपन्तः अस्मभ्यं एभिः सावित्रैः अहभिः अहोभिः दश्च सदेहि किंच अनेनाः एवसां निहंतामायीप्र
ज्ञावान् वरुणः यत् अनृतं नः अस्माकं प्रतिचष्टे अभिपश्यति तत् अनृतं हे इंद्र त्वत्प्रसादात् द्वितः द्विधा अव सात् अवस्य
तु विमोचयतु हिपूरणः ५ वोचेमेदिंद्र इति यतयः इंद्रः महः महतः राधसः संराधकस्य रायो धनस्य नः अस्मभ्यं ददत् प्रयच्छ
तु यस्मै इंद्र अर्वतः स्तुवतः ब्रह्म कर्माणि क्रियमाणं ब्रह्मस्तोत्रं आविषः अतिशयेन रक्षिता भवति तमेनं मघवानं इंद्रं वोचेम तु
स्तवं मथ यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य तृतीये द्वादशो वर्गः॥ ॥अयं सोम इंद्रेति पंचर्चं द्वादशं सूक्तं व
सिष्ठ ऋषिः त्रिष्टुप् छंदः इंद्रो देवता १ अयं सोम इति हे इंद्र तुभ्यं त्वदर्थं अयं एष सोमः सुन्वे अभिषुतो भवतु हे हरिवः
हरिवन् इंद्र तदीकाः तत् सेवनीयाय स्यामाः तदाकाः सं तुष्टिं प्र आप्रयाहि सुषुतस्य सम्यगभिषुतस्य चारोः शोभन

103
1915

स्यास्य सोमस्य सोमं तृप्तिपर्यंतं पिब च अपि च हे मघवन् इंद्र दयानः उपगम्यमानः त्वं मघानि धनानि ददः अस्मभ्यं देहि॥
२ ब्रह्मन्वीरेति हे ब्रह्मन् परिवृढ वीर इंद्र ब्रह्मकृतिं क्रियमाणं स्तोत्रं जुषाणः सेवमानः अर्वाचीनः अस्मदभिमुखः सन्
हरिभिः अश्वैः तूयं क्षिप्रं याहि आगच्छ अस्मिन् उ अस्मिन्नेव सवने यज्ञे सु सुष्ठु मादयस्व सवनः अस्माकीयाः इमाः इमानि ब्रह्माणि स्तो
त्राणि च उपशृणु उपशृणु ३ का ते अस्तीति हे इंद्र ते तव मघवन् सूक्तैः अस्माभिः क्रियमाणैः स्तोत्रैः अरंकृतिः अलंकृतिः का
स्ति कदा इमां सवनानि हे मघवन् ते तव कदा स्तवं कदा स्तवं दाशेम धीभिः सुसाहयेम साध्याः साकायन येव विश्वा मतीः सर्वाः
कृतीः आननमेक रां मि अन्यजनः कार्यान्हे इंद्र इमे मदीयानि इमा इमानि हवा हवानि स्तोत्राणि शृणवत् शृणु ४ उतो घान
इति उ तो अपि च पूरणः हे मघवन् येषां पूर्वेषां ऋषीणां कृतीः श्रणोः ते पूर्वे ऋषयः पुरुष्याः इत् पुरुषे भ्यो हिताः एव आ
सन् अथ अतो हं तासां ओह वीभिः श्रृणोषि अपि च हे इंद्र त्वं नः अस्माकं पितेव जनक इव प्रमतिः बंधुरसि ५ बोधेमं
इति नियतयः इंद्र महः महतः राधसः संराधकस्य रायः धनस्य धनं नः अस्मभ्यं ददत् प्रयच्छतु यश्च इंद्रः अर्वाचीनः स्तव
तः ब्रह्मकृतिं क्रियमाणं ब्रह्म स्तोत्रं अविष्ट अतिशयेन रक्षिता भवति तमिमं मघवानं इंद्रं बोधि मन्त्र स्तवैर्मे यूयं पात स्व
स्तिभिः सदा नः॥ ॥इति पंचमस्य त्रयोदशो वर्गः॥ ॥आ नो देवेति पंचर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रिष्टुभं
इंद्र देवता १ आ नो देवेति हे देव द्योतमान शुष्मिन् बलवन् इंद्र नः अस्मान् शवसा बलेन सार्धं आयाहि अस्य अस्म
दीयस्य रायः धनस्य दः वृद्धिताय भव हे नृपते स्कृष्णे महे महते नृम्णाय बलाय च भव हे मह महिमन् हे त्रात
नृणां हि सकाश इन्द्रस्य वीर्याय च भव २ हवंत उ त्वेति हे इंद्र हवं ह्वानं त्वां ता विवाचि विविधावाचो यस्मिन्नसा
हु जनेति शूराः नरः अंगेषु तनूषु सूर्यस्य साती संभजने सरति गच्छतीति आयुः अन्नस्य वीविषतः
तव त्वं प्रायं हंत हर्षयतः विश्वेषु सर्वेषु जनेषु त्वं उत्तमः सेनाः असि अपि च वृत्राणि शत्रून् सुहं तु नाम व
अरणं अस्माकं वशी कुरु ३ अहा यदिंद्रेति हे इंद्र यत् यदा अस्मा अहानि सुदिनानि शुक्राणि पत्य

105
1915

याथ मत्सः संग्रामेषु केतुं प्रज्ञानं उपमं भवसि अग्निः होतारं यथा अस्करः बलवान् होता देवानां आह्वाता अग्निः सुभगाय अ
स्माकं धनग्राह्ययेदेवान् कृशानः हव्यं अग्निः अस्मिन्यज्ञे नि षीदत् न्यसीदत् ४ वयं ते त इति हे देव हे इंद्र ते तव वयं वसिष्ठाः
स्तोतारः यजमानाः मदीय पुत्र पौत्रादयः मघानि मंहनीयानि हवींषि ददतः प्रयच्छन्तः स्तवनं स्तवाना ते पितरः अस्मदीयाः तेभ्यः श
र्मा यच्छ यद्वा स्तोतॄणां उपमं श्रेष्ठं वरूथं गृहं यच्छ प्रयच्छतु अपि च ते उभे स्वाभुवः सुसदृशाः संतः जरणां जरां अश्नुवंत प्रा
प्नुवंतु ५ बोधेमेदिंद्र भिति यत् यः इंद्रः महः महतः राधसः संराधकस्य रायः धनस्य धनं नः अस्मभ्यं ददत् प्रयच्छतु यश्च इंद्रः
अर्वाचीनः स्तवतः ब्रह्मकृतिं क्रियमाणं ब्रह्म स्तोत्रं अविष्ट अतिशयेन रक्षिता भवति तमिमं मघवानं इंद्रं बोधेमं त्वं स्तवैर्मे यूयं
पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य चतुर्दशो वर्गः॥ ॥प्र व इंद्रायेति द्वादशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं
द्वाभ्यां आदितः पिपीलिकमध्या गायत्र्यः इंद्र देवता १ प्र व इंद्रायेति हे सखायः वः यूयं हर्यश्वाय सोमपाव्ने सोमानां पात्रे इं
द्राय मादनं मदकरं स्तोत्रं प्रगायत २ शंसेदुक्थमिति उ नापि च हे स्तोतः सुदानवे शोभनदानाय सत्यराधसे सत्यधनाय इंद्रा
य उक्थं स्तोत्रं यथा नरः अन्ये स्तोतारः द्युक्षं दीप्तिसाधनं स्तोत्रं चक्रुः तथा त्वमपि इंद्राय उच्चारय इत् पूरणः वयं च कृण्मस्तो
त्रं करवाम ३ त्वं न इंद्रेति हे इंद्र त्वं नः अस्माकं वाजयुः अन्नकामः भव हे शतक्रतो इंद्र त्वं नः अस्माकं गव्युः गोकामो भव हे वसो
वासयितः इंद्र त्वं हिरण्ययुः हिरण्यकामोऽपि भव ४ वयमिंद्रेति हे वृषन् कामानां वर्षितः इंद्र त्वा यवः त्वत्कामाः वयं वसिष्ठाः त्वा
मभि प्रणोनुमः प्रकर्षेण स्तुमः हे वसो वासयितः इंद्र अस्य इंद्रस्य नः अस्मदीयं स्तोत्रं तु हि प्रविद्धि अवधारय ५ मा नो निद
इति हे इंद्र अर्यः स्वामी त्वं नः परुषवाक्याय निदे निंदित्रे अराव्णे अदात्रे नः अस्मान् मा रंधीः वशं मा कर्षीः अपि च
स्वयमिम क्रतुः मदीयं स्तोत्र लक्षणं कर्म गच्छति निशाय ६ त्वं वर्मेति हे वृत्रहन् शत्रूणां हिंसक इंद्र त्वं वर्म अस्माकं कवचमसि स
प्रथः सर्वतः पृथुः अग्निः पुरोयोधा पुरो योद्धा वासि त्वया युजा सहायेन प्रति ब्रुवे शत्रून् प्रति अभीमि प्रति हन्मीत्यर्थः॥
॥इति पंचमस्य पंचदशो वर्गः॥ ॥७॥ महाँ उतासीति उ नापि च हे इंद्र त्वं महान् असि हे इंद्र यस्य ते तव सहः बलं स्वधा

मरी अस्मत्सोरेहरसोवावापपितु अनुमन्यन्ते अनुमन्येते ८ तं वामस्व नीइति हे इंद्र तं उक्त गुणविशिष्टं त्वा त्वां सयावरी
स्वपा सगं बाहुभिः ते जोभिः न समाना अभुघु वतीम रुत्व नीम स्वनः स्तोतारः न इतीवाणीस्तुतिः परि भुवत् परि भवतु परि
गृह्णातीत्यर्थः ९ ऊर्ध्वा सइति हे इंद्र उपर्य्य विभु स्तोकः समीपस्थितं स्वंदर्शनीयं त्वां अनुउद्दिश्य ऊर्ध्वा सिः ऊर्ध्वाः इंद्रवः
अस्मदीयाः सोमाः प्रभवन् सवंति कृष्ट्य प्रजाश्च त्वं त्वं नमंत स्तुवि सोमाः सदयं मे वजापं तेप्रजाश्चत्वामेव प्रणमंती
ति इंद्र स्तुतिः १० प्रवोमहद्दति हे मदीयाः पुरुषाः वः यूयं महिरय महतां धनानां वर्धयित्रे महेमहते इंद्राय प्रभरध्वं
सोमान् प्रणयत स्वेत्स प्रकृष्टमतये इंद्राय सुमतिं स्तुतिं च कृणुध्वं प्रकुरुत प्र त्यक्षः हे इंद्र चर्षणिप्राः कामैः प्रजानां
पूरयिता त्वं पूर्वः हविष्यं पूरयिता विश्वाः प्रजाः प्रवर अभिगच्छ ११ उरुव्यचसइति उरुव्यचसे प्रभूतव्याप्तये महिने महते
महिम्ने इंद्राय सुवृक्तिं स्तुतिं वचसा अप्रदध्वं विप्राः मार्गाः जनयंत जनयंति तिन स्येंद्रस्य व्रतानि रक्षणादीनि कर्माणि धीराः
प्राज्ञाः हवा अपि न मिनंति न हिंसंति १२ इंद्रं वाणीरिति सम्राजम् सर्वतः जगतः ईश्वरं अनुत्तमन्यु अनुत्तः आबाधितः
मन्युः क्रोधो यस्य सः तमेवं इंद्रं वाणीः स्तुतयः सह अनेकेषां जनानां अभिगमयितुं दधिरे प्रत्योहनीदेस्तोतः समापिहर्यश्वाय इंद्राय
इंद्र स्तोतु मित्यर्थः आपीन् अहं समं वर्धयातु स्तोहर्य॥ ॥इति पंचमस्य तृतीये षोडशो वर्गः॥ ॥मोषुत्वेति सप्तविंशत्यृच
म्प्रमं सूक्तं वसिष्ठ ऋषिः इंद्र कतुं नहीति प्रगाथस्यर्च वसिष्ठस्य पुत्रः शक्तिः वसिष्ठो वा प्रगाथं अयुजो बृहत्यः
ग मोषु वा सुहितेवा पातात् इंद्रो देवता १ मोषु त्वेति हे इंद्र त्वा त्वा वाघतश्चनयजमानाः अपि अस्मत् अस्मत्तः आरे दूरे मो निरी
रमन् मा निरीरमंतु आरात्तात् चित् दूरेऽपि वर्तमानाः अस्मदीयं सधमादं यज्ञं आगहि आगच्छ इह वा अत्रापि वा सन्
विद्यमानः ह्त्तस्तु सपत् अस्मदीयं स्तोमं उपश्रुधि २ इमेहि तइति हे इंद्र ते तव सुते अभिषुते सोमे इमे ब्रह्मकृतः स्तो
त्रकृतः मक्षीन मधुनि मक्षाः मक्षिकाः इव आसते उपविशंति परोक्षः वस्वयवो धनकामाः जरितारः स्तोतारः कामं
हि इंद्र इंद्र रथेन पादं रथे पादमिव आदधुः समर्पयं ति हि पूरणः ३ रायस्काम इति रायस्कामः धनकामोहं वज्रहस्तं व्रा

107
1915

नदानं वज्रहस्तं इंद्रं पुत्रोन पुत्रमिव पितरं हुवे आह्वयामि ४ इमइंद्रायेति हे वज्रहस्तेंद्र दध्याशिरः दधिमिश्रणाः इमेसो
मासः सोमाः इंद्राय तुभ्यं स्वतिरे अभिषुत वंतः तान् सोमान् मदाय मदार्थं पीतये पानाय जोकः यज्ञसदनं आअभिहरिभ्यां
अश्वाभ्यां आयाहि आगच्छ ५ श्रवच्छुत्कर्ण इति श्रुत्कर्णं श्रावणरूपकर्णः इंद्रः वसूनां वसूनि ईयते याच्यते नः अस्म
दीयाः गिरः याचा वाचनानि स्वनयानि न चित् नैवमृत्युस्थि वु निष्कलानि करोतु इत्यर्थः अपिच इंद्रः सद्यश्चित् सद्यः ए
व यां आमंतरमेव सहस्राणि शता शतानि च ददत् प्रयच्छत् दित्संतं दातुमिच्छंतं तमिंद्रं न किः रामिन्ना हिंसात् कश्चिदपि न वा
रयेदित्यर्थः॥ ॥इति पंचमस्य तृतीये सप्तदशो वर्गः॥ ॥सवीर इति हे ख वज्रहस्त इंद्र ते सद्रथेयः पुमान् गभीरा गभीराणि स
वनानि सोमान् स्तनोति आधावति वसांस्तति मिरुपधावति स सवीरः इंद्रेण हेतुना अप्रतिष्कुतः केनापि अप्रतिगतः भवेत्
नृभिः परिवारकैः श्रभुमेव उपगम्यते च ७ भवावरूथमिति हे मघवन् इंद्र मघोना हविष्मतां वरूथं उपद्रवाणां वारकं वर्मभ
व यतयः संवार्धतः उत्सहमानान् शत्रून् समं आ सिसंप्रेरयेः अपिच ताहतस्य शत्रोर्वेदनं धनं विभजेम हि विशेषेण ल
भेमहि किं वद्धनाशः दुर्नशः नाशयितुमशक्यस्तं गयं गृहं आभर अस्मभ्यमाहर ८ सुनोतासोमपाव्न इति हे मदीयाः पु
रुषाः वज्रिणे सोमपाव्ने सोमस्य पात्रे इंद्राय सोमं सुनोत अभिषुत अवसे इंद्रं तर्पयितुं पंक्तीः पंक्तव्यान् पुरोळाशादीन् पच
त च कृणुध्वमित् इंद्र प्रियकरणि कर्माणि च कुरुत एव इंद्रो हि मयः सुखं पृणन्नित् यजमानाय प्रयच्छन्नेव पृणते हवींषि निश्चयेन
माधन्ते ति हे मदीयाः जनाः सोमिनः सोमवंतो यागान् मा स्रेधत माहिंसिष्ट रक्षत यागादिकं कर्तुं उत्सहध्वं च महे महते आ
तुजे शत्रूणां अभिहिंसकाय इंद्राय राय धनलाभार्थं कृणुध्वं कर्माणि कुरुत तरणि इत्त कर्मसु त्वरितः एव जयति शत्रून् क्षे
ति गृहे निवसति च पुष्यति प्रजया पशुभिश्च पुष्टो भवति कवत्नवे कुत्सित क्रियायै देवासः देवाः न भवंति निश्चयेन १० नकिः
सुदासइति स्वदासः शोभनदानस्य यजमानस्य रथं न किः परि आसक्तश्चिन्न पर्यस्यति निरीरमत् नरमयति वास्मानं न क
श्चिदपगमयत इत्यर्थः अपिच यस्य इंद्रः अविता रक्षिता यस्य च मरुतः अवितारः स गोमति गोयुक्ते व्रजे गोष्ठे गमत् गच्छे

वे·भा·पं·
३०

त्व॥ ॥इति पंचमस्य तृतीये अष्टादशो वर्गः॥ ॥गमद्वाजमिति हे इंद्र त्वं यस्य मर्त्यस्य अविता रक्षिता भुवः भवेः समर्थः वा
जयन् स्तोतॄणामं पितं कुर्वन् वाजं अन्नं गमत् गच्छतु अपि च हे शूर स्मत्कं वसिष्ठानां रथानां अविता रक्षिता बोधि भव अस्मा
कं नृणां पुत्रादीनां च अविता भव १२ उदिन्न्वस्येति अस्येंद्रस्य अंशाय ते सोमस्य अंशाय इंद्रसोमस्य भागः अतिरिच्यते अन्ये
भ्यो ऽपि देवेभ्यः इंद्रस्यातिरिक्तमपि सर्वेषु समानमस्ति जिग्युषः जितवतः धनं न धनमिव दक्ष इत्तु पूरणाः अपि च यः हरिवान्
इंद्रः सोममियजमानेष्टं बलं रक्षाति तं रिपः रिपवः नृः दभंति नाहिंसंति १३ मंत्रमखर्वमिति हे जनाः अखर्वं अनल्पं सु
धितं सुष्ठु निहितं रूपेण संशीर्णं रूपं मंत्रं स्तोत्रं यज्ञियेषु यजनीयेषु मध्ये इंद्राय आदधात विधत्त यः जनः कर्मणा स्तु
त्यादिरूपेण इंद्रस्य चित्तं भुवत् भवेत् तं जनं इंद्रं पूर्वीः बह्वीः प्रसितयः बंधनानि च नेति समुदायः नेस्यपैवर्ते तेन तरंति
आनुषंगिक १४ कस्तमिंद्रेति हे इंद्र त्वावतः यो भवेत् त्वावसुं त्वं वसुः व्यापको यस्य तं जनं कः मर्त्यः अदधर्षति आधर्ष
येत् हे मघवन् इंद्र ते तव श्रद्धया अद्य त्वाकृत्वा सन् वाजी हविष्मान् भवेत् पार्थे दिविसो ऽहे ऽहनि सवाजं अन्नं सि
षासति सषते १५ मघोनस्येति हे इंद्र मघोनः धनवन्तः तेसदर्थं इत्यर्थः प्रिया प्रियाणि वसुवसू नियेजनाः ददति प्रयच्छां
तान् जनान् ग्रहस्वेषु संग्रामेषु चोदय प्रेरय हे हर्यश्व तव प्रणीती प्रणीत्या प्रणयनेनास्माकं सूरिभिः स्तोतृभिः पुत्रादिभिः सा
र्धं विश्वानि दुरिता दुरितानि तरेम॥ ॥इति पंचमस्य तृतीये एकोनविंशो वर्गः॥ ॥तवेदिंद्रेति हे इंद्र अवमं पुत्रसी
मादिकं वसु धनं तवेत् तवैव त्वं तव मध्यमं वसु रजतहिरण्यादिकं पुष्यसि विश्वस्य सर्वस्य परमस्य उत्तमस्य रत्नादेः
वसुनः राजसि ईशिषे सत्रा सत्यमेव कोपि त्वा गोषु निमित्तेषु नकिः कृण्वते कोपि निवारयति १७ त्वं विश्वस्येति हे इंद्र
त्वं विश्वस्य सर्वस्य जगतः धनदः धनप्रदाता सन् श्रुतः प्रसिद्धो ऽसि यद्यदिंद्र यत्ते आजयः युद्धानि भवंति तेषां भिधनदाः ऋ
तो ऽसि हे पुरुहूत इंद्र विश्वः सर्वो ऽप्ययं पार्थिवः जनः नवमानः इत्यर्थः॥ अवस्युः रक्षामिच्छन् नाम अन्नं भिक्षते याचते त्वा
मेवाभिधेयः १८ यदिंद्रेति हे इंद्र यावतः यावतः धनस्य त्वं ईशिषे एतावतः एतावतः धनस्य अहं ईशीय ईश्वरो भवेयं हे
(109/1915)

रदावसो रदतिरदातिवस्तनी तिरदवसुः ततो ऽहं अस्मदीयं स्तोतारं इद्दिधिषेय धनप्रदानेन धारयेयमेव पापत्वाय न
रासीयन रयो १९ शिक्षेयमिदिति कुहचिद्विधेयत्र क्वापि विद्यमानाय महयते पूजयते जनाय दिवे दिवे प्रति दिनं रायः
धनानि शिक्षेयमित् ददामेव आपूरणः एवं इंद्र सवाक्यं कृत्वा संतुष्टः ऋषिः वदति हे मघवन् त्वत् त्वतः अन्यत् अस्माकं
आप्यं ज्ञातेयं नत्वा स्ति वस्वः प्रशस्यः पिताचपालयिता च त्वत् अन्यः नास्तीत्यर्थः २० तरणिरिदिति तरणिरित् स्तुत्यादिकर्मणि त्व
रितएव पुमान् पुरंध्या महत्या धिया बुआ सहायभूतया वाजं अन्नं शिवासति संभजते पुरुहूतं इंद्रं वः तां गिरा स्तुत्या अ
हं आनमे नेमिं वृक्षस्यवलयं सुद्रुः शोभनदारु तष्टेव यथा वर्द्धकिः दारुनेमिं अनामयते नद्वदित्यर्थः॥ ॥इति पंचमस्य
तृतीये विंशो वर्गः॥ ॥नदुष्टुतीति मर्त्यः मनुष्यः दुष्टुती दुष्टुत्या च रूधनं नाविंदते स्त्रेधं तं हिंसंतं इंद्रविषयस्तुत्यादि
कर्माणि अकुर्वतं इत्यर्थः रयिः धनं नक्वनशत् व्याप्नोति हे मघवन् इंद्र त्वया यापायेदिविसो ऽसे दिवसे मावते मत्सदृशाय दे
यं दात्रं अंधपर्ड नमास्ति तत् तुभ्यं तत्नः स्तुवाकि रितु स्तुकर्मैषु विंदत्ते २२ अभित्वेति हे शूर इंद्र अस्य जगतः जंगमस्य ई
शानं ईश्वरं तस्थुषः स्थावरस्य ईशानं स्वर्दृशं सर्वद्रष्टारं त्वा त्वां अदुग्धा इव धेनवः यथा दुग्धा धेनवः क्षीरपूर्णाधस्त्वेन व
र्तंते तद्वत् सोमपूर्णचमसेन वर्तमानाः वयं अभिनोनुमः भृशं अभिष्टुमः २३ नत्वावानिति हे मघवन् इंद्र दिव्यः दि
विभवः त्वावान् त्वत्सदृशः अन्यो न जायते पार्थिवः पृथिव्यां भवो ऽपि त्वावान् अन्यो न जायते दिव्यः दिविभवः पार्थिवो वा भ
वो ऽपि त्वावान् अन्यो न जातः न च जनिष्यते अश्वायंतः अश्वान् इच्छंतः वाजिनः अन्नमिच्छंतः गव्यंतः गां इच्छंतः वयं त्वा
त्वां हवामहे ह्वयामः २४ अभीषत इति हे ज्यायः ज्यायन् इंद्र कनीयसः सतः मम तत् प्रसिद्धं धनं अभ्याभर हे मघव
न् इंद्र त्वं सनात् चिरादेव पुरूवसुः हि बहुधनो ऽसि भरे भरे संग्रामे संग्रामे हव्यः ह्वातव्यश्चासि २५ पराणुद
स्वेति हे मघवन् इंद्र परापराचीनान् अमित्रान् शत्रून् नुदस्व प्रेरय नः अस्मभ्यं च सुवेदा सुलभानि कृधि कुरु महा
धने संग्रामे वाजे अन्ने सखीनां स्तोतृणां अस्माकं च वसिष्ठानां अविता रक्षिता बोधि भव वृधः वर्धयिता च भव २६

इंद्र कृणुमिति हे इंद्र नः अस्मभ्यं क्रतुं कर्म आभर आहर आपि च यथा पिता पुत्रेभ्यः धनं प्रयच्छति तथा नः अस्मभ्यं शिक्ष धनं
देहि हे पुरुहूत इंद्र अस्मिन् यामनि यज्ञे जीवाः वयं ज्योतिः सूर्यम् अशीमहि प्रतिदिनं प्राप्नुयाम २७ मनो अज्ञातइति हे इंद्र अ
ज्ञाताः अज्ञातगमनाः वृजनाः हिंसकाः दुराध्यः दुष्टचित्ताः नः अस्मान् मा अव क्रमुः मा आक्रमुः अशिवासः अशिवाः दुराचाराः मा
भवतु हे शूर त्वया वयं वयं प्रवतः प्रवणकाः संतः शश्वतीः बह्वीः अतितराम् असि अतितराम ॥ ॥इतिपंचमस्यतृतीयेएक
विंशोवर्गः॥ ॥श्वित्यंच इति चतुर्दशर्चं षोडशं सूक्तं आनितः नवानां वसिष्ठः ऋषिः वसिष्ठपुत्रो देवता दशम्यादीनां वसि
ष्ठपुत्राः ऋषयः वसिष्ठो देवता त्रिष्टुप् छंदः श्वित्यंचो मेति श्वित्यंचः श्वेतवर्णाः धियंजिन्वासः कर्मणां पूरयितारः दक्षिणतस्क
पर्दाः दक्षिणतः शिरसो भागे कपर्दाः चूडा येषां ते दक्षिणतस्कपर्दाः मां मा अभि प्रमंदुः विद्यावलेनाभिप्रहर्षयन्त् यतो मां अ
भिप्रमंदुः अतः बर्हिषः यज्ञात् उत्तिष्ठन् अहं नृन् यज्ञस्य नेतॄन् पोचे ब्रवीमि मे मम नः दूरात् वसिष्ठाः वसिष्ठस्य मम पु
त्राः अवितवे मंतुं नाहीति शेषः २ दूरादिंद्रमिति य वसिष्ठस्य पुत्राः सुदासं राजानं अयाजयंत तदेव पाशद्युम्नस्यापि
राजा सोमान् यष्टुं उद्यमं चकार तदानेन वसिष्ठपुत्राः पाशद्युम्नं तिरस्कृत्य तदीये यागे सोमं पिबंतमिंद्रं मंत्रबलेन तस्मात् आदि
य सुदासो यज्ञे आपयामासुः तदेतत् दृष्टां तं कीर्तयत् वसिष्ठः स्वसुतान् अनेन मंत्रेण स्तौति वेशंतं चमसे स्थितं सोमं पा
तं पिबंतं उत इंद्रं सुतेन सुदासीय यज्ञे अभि सुतेन सोमेन हेतुना तिरः पाशद्युम्नं तिरस्कृत्य दूरात् आनयत वसिष्ठाः मंत्रब
लेन आनीतवंतः इंद्रं अपि च वाय तस्य वयतः पुत्रस्य पाशद्युम्नस्य पाशद्युम्नं अतिक्रम्य सुदासीय यज्ञे अभिषुतात् सोमात् इतो
वसिष्ठपुत्राः अवृणीत ३ एवेन्नुकमिति एवेत् यथा पाशद्युम्नस्य संबंधिनि सोमयागे चमसस्थं सोमं पिबंतमपि
इंद्रं वसिष्ठैः ऋक्सामाभ्यां एवेत् मे पासिं सुन्वतो रजिर्वसिष्ठैः कं सुखेन ततार तीर्णः आसीत् नु भयपूरणे एवेत् एवमेव भेदं च
हि नाम कं दाशराज्ञे इति वसिष्ठैः देवकं अपानं मृतवन्तः एवेन्नु एवमेव हे वसिष्ठाः वः युष्मदीयेन ब्रह्मणा स्तोत्रेण दाशरा
ज्ञे दशभिः राजभिः सह युद्धे प्रवर्तमाने सुदासं राजानं इंद्रः अप्रावत् प्रारक्षत् ४ जुष्टी नर इति हे नरः वः युष्मदीये ३१

न ब्रह्मणा स्तोत्रेण पितॄणां जुष्ट्या प्रीत्या भवति अहं वसिष्ठः प्रीतो भवामीत्यर्थः अथेदानीं समाप्त मंगं तनुम् उद्यतो ऽहं अक्षं र
थस्य पथं अव्ययं शृलयामी त्यर्थः पूर्वं न किल रथायन वसिष्ठाः भवथ हे वसिष्ठाः यत् यस्मात् शाक्वरीषु ऋक्षु बृहता घोषे
न रवेण साम्ना इंद्र इण शुष्मं बलं अदधात् अधारयत ५ उद्यामिवेति तृष्णजः जाततृष्णाः इत्यासः तत्सुभिः राजभिर्वृताः
नाथितासः वृष्टिं याचमानाः वसिष्ठाः द्यामिव आदित्यमिव इंद्रं दशराज्ञे दशानां राज्ञां संग्रामे उदः दीधयुः उददीधयन् स्तव
नीव वसिष्ठस्य स्तोतं इंद्रः अशृणोत् अशृणुयात् उरुं विस्तीर्णं लोकं तृत्सुभ्यः सुदासाय अकृणोत् उ अददात् चेत्यर्थः॥ ॥इतिपं
चमस्यतृतीये द्वाविंशो वर्गः॥ ॥दंडा इवेति गोअजनासः गवां प्रेरकाः दंडा इव यथा दंडाः परिच्छिन्नाः यत्रोपदिष्टाः भवंति तद्व
त् भरताः तत्सुनामका राजानः ताइति नामांतरेण उपादानं शत्रुभिः परिच्छिन्नाः एव आसन् अर्भकासः अर्भकाः अल्पाश्चास
न् आदित्य परिच्छिन्नत्वात् अंतरमेव तेषां तत्सूनां वसिष्ठः पुरएता पुरोहितो ऽभवत् च तृत्सूनां विशः प्रजाः अप्रथंत अव
र्धंत ६ त्रयः कृण्वंतीति भुवनेषु पृथिव्यंतरिक्षद्युषु त्रयः अग्निवायुसूर्याः यथाक्रमेण रेतः विश्वस्य धारकं उदकं कृण्वंति
कुर्वंति तिस्रः प्रजाः आर्याः ज्योतिरग्राः आदित्यप्रमुखाः आर्याः श्रेष्ठाः तिस्रः प्रजाः भवंति ते च त्रयः अग्निवायुसूर्याः घर्मासः दीप्य
मानाः उषसं सचंते समवयंति ह तानित् सर्वानित् सर्वान् एव वसिष्ठाः अनुविदुः अभिजानंति तेषां रहस्यविज्ञानात् इयम
पि वसिष्ठानामेव स्तुतिः ८ सूर्यस्येवेति हे वसिष्ठाः एषां वः युष्माकं स्तोमो पि वातस्येव प्रजवः यथा वातस्य प्रवेगः अन्येन
अन्वेतुं न शक्यते तद्वत् अन्येन अन्वेतवे अन्वेतुं न शक्यः किं च युष्माकं वक्षथः तेजः सूर्यस्येव सूर्यज्योतिरिव तथा युष्माकं
महिमा समुद्रस्येव गंभीरः गंभीरः इव ९ तइन्निण्यमिति तइत् त एव वसिष्ठाः निण्यं तिरोहितं हृदः ज्ञानैः सहस्रवल्शं सह
स्रशाखं संसारं हृदयस्य प्रकेतैः प्रज्ञानैः अभि संचरति एवं साक्षात् यम अभि चरंतः ते वसिष्ठाः यमेन कारणात्मना सर्वं
नियंत्रा ततं विस्तृतं परिधिं वस्त्रं जन्मादिप्रवाहः तं वयंतः अप्सरसः जननी तेन उपसेदुः वसिष्ठाः इति बहुवचनं पूजार्थं व
सिष्ठः पूर्वं प्रजापतेः उत्पन्नं दृष्ट्वा अप्सरः सकाशात् आयेयमिति बुद्धिमकरोदित्यभिप्रायः १० विद्युतो ज्योतिरिति एतासुक्र

111
1915

ध्रुवसिष्ठस्येव देहे परिग्रहः प्रतिपादितेव वसिष्ठपुत्राणां वाक्यं हे वसिष्ठ यत् यदा विद्युतो विद्युतः इव स्वीयं ज्योतिः देहांत
र परिग्रहार्थं परि संजिहानं परित्यजंतं त्वा त्वां मित्रावरुणा मित्रावरुणौ अपश्यतां आत् आत् इत् एवं जायते इति समकल्पयता
मित्यर्थः तत् ते जनिम तदेकं अस्त्युत तत् अपि च यत् यदा अगस्त्यो विशः निवेशनात् मित्रावरुणौ आवां जनयिष्यावः इत्येत
त् पूर्वं वसिष्ठं आजभार आजहार॥ ॥इति पंचमस्य तृतीये त्रयोविंशो वर्गः॥ ११ ॥उतासि मैत्रावरुणेति
उत अपि च हे वसिष्ठ मैत्रावरुणः मित्रावरुणयोः पुत्रो असि हे ब्रह्मन् वसिष्ठ उर्वश्याः अप्सरसः मनसः सकाशात् पुत्रः स्या इति
इदं त्वं संकल्पात् द्रप्सं रेतः मित्रावरुणयोः उर्वशी द्रष्ट्वा यत् स्कन्नं आसीत् तस्मात् अधि जातो असि तथा च वक्ष्यति स
त्रे ह जाताविषिता नमोभिः कुंभे रेतः सिषिचतुः समानं ततो ह मान उदियाय मध्यात् ततो जातमृषिमाहुर्वसिष्ठं इति एवं जातं त्वां देवेन दैव संबोधिना ब्रह्मणा विश्वे देवाः पुष्करे अदधंत
धारयंत १२ स प्रकेत इति वसिष्ठः प्रकेतः प्रकृष्ट ज्ञानः उभयस्य उभयं दिव्यं पार्थिवं च प्रविद्वान् प्रकर्षेण जानन् सह
स्रदानो भवत् किं मनेन सह स्वस्य नदानीति विशेषणे उतवा अणिवा सदानः सर्वदान सहित एवाभवत् किं च वसिष्ठः यमे
न कारणात्मना सर्वं नियंत्रा ततं विस्तृतं परिधिं वस्त्रं सं स्यार्प्रवाहं वयिष्यन् अप्सरसः परि उर्वश्याः जज्ञे जातः १३
सत्रे ह जाताविति सत्रे यागे हपूरणः जातौ दीक्षितौ मित्रावरुणौ इषिता अभ्यर्थितौ स्वयमन्यैः जनैः नमोभिः स्तुतिभिः कुं
भे वासतीवरे न कुंभे समानं एकं रेतः सिषिचतुः असिंचतां ततो वासतीवरात् कुंभात् मध्यात् अगस्त्यो मानः शमी
तह उदियाय उदियाय तत एव कुंभात् वसिष्ठम् ऋषिं जातमाहुः १४ उक्थभृतमिति हे प्रतृदः तत्सवः वः युष्मा
न प्रमानः उदियाय मातुर्भवत् प्रवतनः एवं कुंभात् वसिष्ठः ऋषिं ज्ञानमाहुः १४ उक्थभृतमिति हे प्रतृदः तत्सव युष्मा
कं वसिष्ठः आगच्छति आगच्छति एनं वसिष्ठं सुमनस्यमानाः संतः प्रतिगृह्णीत आगतश्चासौ वसिष्ठः यज्ञे अग्रे पुरो
हितः प्रज्ञां वदतु उक्थभृतं ग्रावाणं सामभृतं प्रतिगृह्णातु ग्रावाणं अभिषवणं बिभ्रत् विभ्रतं अ
ग्रं वदाति वामं भवद्भ्यामिति मंत्रस्य ऋषिः तृतीयोऽनुवाकः सप्तमे मंडले द्वितीयोनुवाकः ॥ ॥
इति पंचमस्य तृतीये चतुर्विंशो वर्गः॥ ॥इति सप्तमे मंडले द्वितीयोऽनुवाकः॥ तृतीयेनुवाके द्वाविंशति सूक्तानि तत्र प्र

113
1915

प्रशुक्रेति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठ ऋषिः आद्याः एकविंशतिः द्विपदाः विंशाल्याः स्वराः विराजः द्वाविंशाद्याश्चतस्र
स्त्रिष्टुभः विश्वे विश्वे देवा देवता १ प्रशुक्रेति शुक्रा दीप्ता देवी सर्वेषां कामानां प्रदात्री मनीषा स्तुतिः अस्मत् अस्मत्तः अ
स्मिन् सूक्ते स्तोष्यमाणान् देवान् प्रति गच्छतु सुतष्टः सुसंस्कृतः रथो न रथ इव प्रैतु प्रगच्छतु २ विदुः पृथिव्याः इति आ
पः स्वयंते क्षरंतीः क्षरंत्यः आपः दिवः पृथिव्याश्च जनित्रं उत्पत्तिं विदुः जानंति अथ अपि च पृथ्वं ताः स्रोतांसि निःशेषं
आपश्चिदिति इंद्रः स्वयं एताः एव्याः गच्छंत्यः आपश्चित् अपोपि अस्मै इंद्राय पिन्वंत प्यायंते वृत्रेषु उपद्रवेषु सत्सु
उग्राः तेजस्विनः शूराः यो द्वयोरपि मंसते इदं मम मे देहं रक्षयंति ४ आ धूर्ष्विति अस्मै अस्य इंद्रस्य आगमनाय अश्वान् धूर्षु रं
धस्व आदधात इंद्रः न वार्यः वज्री वज्रवान् हिरण्यबाहुः हिरण्यहस्तो भवति ५ अभि प्रस्थातेति यज्ञस्य हे तिष्ठंतो
जनाः यज्ञं अभिप्रस्थात अभिक्रमत अहेव सूरणो अपि च पतयन् पतयतीत्यर्थः सर्वलोकयात्र योग्यं तमेव यज्ञं हिनोतु
गच्छत ६ त्मना समत्स्विति हे मदीयाः जनाः समत्सु संग्रामेषु त्मना स्वयमेव हिनोत गच्छत अपि च केतुं प्रज्ञापकं वीरं या
धानां प्रज्ञापकं यज्ञं जनाय लोकाय रक्षार्थमिन्सर्पिः दधानाः भवत ७ उदस्य शुष्मादिति अस्य यज्ञस्य शुष्मात् बलात् भा
नुः सूर्यः उदार्त उदगच्छत् न ग्रस्ताः ताभिरा पृथिवीव प्रभारं लोकस्यायं यज्ञो बिभर्ति च न पूरणः ८ इयामि देवा इति तत्र देवास्त्व
यं ते हे अग्ने अपायुः अहिं सादित्ययमपुक्तेन ऋतेन यज्ञेन साधन् कामान् साधयन् देवान् इयामि अपि च धियं देवा
नां परिचरणात्मकं कर्म दधामि करोतीत्यर्थः ९ अभि वहतेति॥ ॥हे जानाः वः यूयं अभि देवान् उद्दिश्य देवीं दीं साधियं
कर्म दधिध्वं विधत्त अपि च वः यूयं देव यादेवयुवा वाचं स्तुतिरूपां प्रकृणुध्वं प्रकर्षेण कुरुध्वं १० आ चष्ट इति सहस्रच
क्षाः बहुचक्षुः वरुणः आसां नदीनां पाथः जलं आ चष्टे अभिपश्यति कीदृशः वरुणः उग्रः तेजस्वी इति पंचमस्य तृतीये
पंचविंशो वर्गः ११ राजा राष्ट्राणामिति राष्ट्रानां राष्ट्राणां ईश्वराणामपि वरुणो राजा ईश्वरो भवति नदीनां पेशः रूपक
दपि भवति अस्मै अस्य वरुणस्य क्षत्रं बलं अप्रतं अन्यैरबाधितं विश्वायु सर्वतोगंत भवतीति १२ अविष्टो इति हे देवाः

नः अस्माकं विश्वासु सर्वासु विक्षु प्रजासु अभिष्टउरस्याम शंसं निंदि स्तोः निंदितुः इच्छतः शत्रोः असुं अदीतिं कृणोत कुरु
त १३ अव विषुदिति द्वेषां शत्रूणां दिद्युत् आयुधं अशोभा असुखकरी विषूक् सर्वतः व्येतु अपगच्छतु तन्वं नाम अंगा
नां द्वेषः पापं दर्शक्षु योत अस्मत्तः पृथक् कुरुत १४ अवीन्नइति हव्यात् हव्यान्नो अत्ता अग्निः नमोभिः अस्मदीयैः नम
स्कारैः प्रेष्ठः प्रियतमः सन्नः अस्मान् अवीत् रक्षतु अस्मै अग्नये स्तोम स्तोत्रम धायि अस्माभिर्व्यधायि १५ सजूर्दे
वेभिरिति हे स्तोतः अपां उदकानां नपातं पुत्रं अग्निं देवेभिः देवैः सजूः सह सखायं मित्रं स्वकृतिभिः कर्मभिः कृध्वं कुरुध्वं स च
अपां नपात् नः अस्मभ्यं शिवः सुखकरोऽस्तु भवतु १६ अब्जामुक्थैरिति अहिं मेघानां आहंतारं नदीनामुदकानां बु
ध्न्ये अंतरिक्षे बध्नं अस्मिन्निषण्णं अपः इति उदकेन सीदन्तं सीदंतं अब्जां अप्सु जातं इम
मर्पि उक्थैः स्तोत्रैः गृणीषे १७ मानोऽहिर्बुध्न्य इति अहिर्बुध्न्यः अग्निः नो अस्मान् रिषे हिंसकाय मा धात् मा ददातु अस्य
कृतवतः यज्ञः यज्ञकामस्य यज्ञः मा वासिधन् रीषत १८ उत न इति अयं स्तुत्यः देवः मारुतो वा उतापि वनः अस्मदीयेषु
पु नृषु पुरुषेषु श्रवः अन्नं धुः देवाः मारुतो वा धावयंतु रायेधनार्थं ईशत उत्साहमानाः अर्थ अरयः प्रयंतु प्रगच्छंतु म
यं नामित्यर्थः १९ तपंति शत्रुमिति महासेनाः सः महासेनाः राजानः एषां मरुतां देवानां वा अमेभिः शुकेः क्षमा भुवनानि
सर्वभारे त्यस्य शत्रुं स्वकीयं तपंति वाधंते २० आ यन्न इति अस्मान् देवपत्न्यः त्वष्टा सुदेवनाय नः यज्ञपत्नीः देवानां प
त्न्यः नः अस्मान् अच्छ अभ्यागमंति आगच्छंति तथा स्वपाणिः शोभनहस्तः त्वष्टा देवः वीरान् पुत्रान् दधातु अस्मभ्यं दद
तु॥ ॥इति पंचमस्य तृतीये षड्विंशो वर्गः॥ ॥२१ प्रतिनइति नः अस्माकं स्तोमं स्तोत्रं त्वष्टा प्रति जुषेत प्रति सेवेत ३३
अपिच अरमतिः पर्याप्तबुद्धिः सा रा अस्मै अस्मदर्थं वसूयुर्धनकामः स्यात् भूयात् २२ ता नो रासन्निति ता तानि अस्मा
कमभिलषितानि वसूनि धनानि रातिषाचः दानसमवेताः देवपत्न्यः नः अस्मभ्यं रासन् प्रयच्छंतु अपिच वरुणानी वरुण
स्य पत्नी आ गन्तु अस्मदीयं स्तोत्रं अग्निपत्नी तु रोदसी द्यावापृथिव्योः अपि च अग्निपत्नी त्वं कल्याणदानः त्वष्टा

115
1915

च वरूत्रीभिः उपद्रवाणां वारयित्रीभिः देवपत्नीभिः सह नः अस्मभ्यं सुशरणः सुशरणप्रदः अस्तु रायः धनानि च विद
धातु ददातु २३ तन्नो राय इति नः अस्माकं तत् तानि रायः धनानि पर्वताः परिपांतु नः अस्माकं तत् आपश्च परिपांतु
तत् रातिषाचः दानसहिताः देवपत्न्यश्च परिपांतु ओषधीः ओषधयश्च तत् परिपांतु उत अपि च द्यौः तत् परिपातु वनस्प
तिभिः सजोषाः सहिता पृथिवी अंतरिक्षं च तत् परिपातु नः अस्माकं तत् उभे रोदसी द्यावापृथिव्यौ च परिपातां ततः पारि
रक्षतां २४ अनुतदुर्वीइति तत् वक्ष्यमाणं उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ अनुजिहातां अनुगच्छतां अनुमन्येतां
मित्रः अर्यः युक्तः दीप्तः निवासप्रदः इंद्रः सखा इंद्रः सखायः वरुणश्च तत् तु जिहातयः सहासः शत्रूणां अभिभवितारः
विश्वे सर्वे मरुतां पितरः जुजिहातां धियध्यै भरणीयं धारयितुं रायः धनस्य अस्मं स्कं अनं वयं स्याम भवेमेति २५ तन्न इं
द्र इति नः अस्मभ्यं तत् इदं स्तोत्रं इंद्रः वरुणः मित्रः अग्निः आपः ओषधीः ओषधयः वनिनः वृक्षाश्च जुषंत जुषंतां सेवंतां
वयं च मरुतां उपस्थे उपस्थाने वर्तमानाः शर्मन् शर्मणि सुखे स्याम भवेम यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचम
स्य तृतीये सप्तविंशो वर्गः॥ शन्न इंद्राग्नी इति पंचदशर्चं द्वितीयं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः विश्वेदेवा देवता १
शन्न इंद्राग्नी इति नः अस्माकं इंद्राग्नी अवोभिः रक्षणैः शं शांत्यै भवतां रातहव्याय जमाने दत्तहविष्का इंद्रावरुणा इंद्राव
रुणौ अपि नः अस्मभ्यं शं शांत्यै भवतां इंद्रासोमा इंद्रासोमावपि नः शं शांत्यै सुविताय कल्याणाय भवतां शं आदरार्थ
यो विषयभोगान्निमित्तं इंद्रापूषणा इंद्रापूषणावपि वाजसातौ युद्धे नः शं शांत्यै भवतामित्यर्थः २ शन्नो भग इति नः अ
स्माकं शं शांत्यै भगो देवः अस्तु भवतु नः अस्माकं शं सु शांत्यै एव शंसः नराशंसः अस्तु भवतु नः अस्माकं शं शांत्यै पु
रंधिः बहुधीः अस्तु रायः धनानि अपि शं सु शांत्यै एव संतु नः अस्माकं सुयमस्य शोभनयमयुक्तस्य सत्यस्य शंसः वच
नमपि शं अस्तु नः अस्माकं शं शांत्यै पुरुजातः बहुप्रादुर्भावो अर्यमा देवो अस्तु ३ शंनो धातेति नः अस्माकं शं शांत्यै
धाता धाता अस्तु नः अस्माकं शंसु शांत्यै एव धर्ता पुण्यपापानां धारयिता वरुणः देवः अस्तु नः अस्माकं शं शांत्यै उरू

धी विवर्गगमनाः पृथिव्यपि स्वधाभिः अन्नैः सहास्तु बृहती महत्यौ रोदसी द्यावापृथिव्यौ अपि शं भवतां अद्रिः पर्वतोपि
नः अस्माकं शं शांतिः नः अस्माकं देवानां सुहवानि सुस्तुतयः शं संतु भवंतु ४ शं नो अग्निरिति ज्योतिरनीकः ज्योतिर्मुखो
पि नः अस्माकं शं शांतिः अस्तु भवतु मित्रावरुणावपि नः अस्माकं शं शांतिः भवतां अश्विनावपि शं भवतां सुकृतां पुण्य
कर्मणां पुरुषाणां सुकृतानि पुण्यकर्माणि अपि नः अस्माकं शं शांतिः संतु भवंतु इषिरः गमनशीलो पि वातः वायुरपि नः
अस्माकं शं शांतिः अभिवातु ५ शं नो द्यावापृथिवी पूर्वहूताविति नः अस्माकं शं शांतिः द्यावापृथिवी द्यावापृथिव्यौ पूर्वहूतौ प्रथ
मा हूते भवतां अंतरिक्षमपि नः अस्माकं दृशये ओषधीः ओषधयोपि भवंतु वनिनो वृक्षाश्च शं भवंतु जिष्णुः जयशीलो र
जसो लोकस्य पतिरिंद्रोपि नो स्माकं शं शांतिः दर्शनाय शमस्तु नः अस्माकं शं शांतिः अस्तु ॥ ॥इति पंचमस्य तृतीये अ
ष्टाविंशो वर्गः ॥ ॥शं न इंद्र इति देवः द्योतमानो दीप्तगुणयुक्तः इंद्रः वसुभिः देवैः सार्धं नः अस्माकं शं शांतिः भवतु सुशंसः शो
दि भनस्तुतिः वरुणः देवः आदित्यैः देवैः सार्धं शं शांतिः अस्तु भवतु जलाषः गंगाधरः रुद्रः देवः रुद्रैः सार्धं
शं शांतिः नः अस्माकं भवतु त्वष्टा ग्नाभिः देवपत्नीभिः सार्धं नो शं शांतिः भवतु इह यज्ञे नः स्तोत्रं शृणोतु ७
शं नः सोम इति नः अस्माकं शं शांतिः सोमो भवतु ब्रह्म स्तोत्रमपि नः अस्माकं शं शांतिः भवतु ग्रावाणः अभिषवे सोम
स्य ग्रावाणः अपि नः अस्माकं शं शांतिः भवंतु यज्ञाः नः शं शांतिः एव संतु स्वरूणां यूपानां मितयः उन्मानानि अपि
नः अस्माकं शं शांतिः भवंतु प्रस्वः ओषधयो पि नः अस्माकं शं शांतिः भवंतु वेदिरपि नः शं शांतिः एव अस्तु ८ शं नः सू
र्य इति नः अस्माकं शं शांतिः सूर्यः उरुचक्षाः विस्तीर्णतेजाः उदेतु उदयं प्राप्नोतु चतस्रः प्रदिशः महादिशो पि नः अस्मा
कं शं शांतिः भवंतु नः अस्माकं शं शांतिः पर्वताः ध्रुवयः ध्रुवाः भवंतु नः अस्माकं शं शांतिः सिंधवः नद्योपि भवंतु आपश्च ३५
नः शं शांतिः एव संतु ९ शं नो अदितिरिति अदितिः देवी व्रतेभिः व्रतैः कर्मभिः सार्धं नः अस्माकं शं भवतु स्वर्काः शोभ
न स्तुतयः मरुतोपि नः अस्माकं शं शांतिः भवंतु विष्णुः देवः नः अस्माकं शं शांतिः अस्तु पूषा देवोपि नः अस्माकं शं भवतु

117
1915

स्त्वेव अस्तु भवित्रं भुवनं अंतरिक्षं उदकं वा नो स्माकं शं शांतिः अस्तु वायुरपि शं शांतिः एव अस्तु १० शं नो देव इति देवः द्यो
तमानो दीप्तगुणयुक्तः सविता त्रायमाणः रक्षन् नः अस्माकं शं शांतिः भवतु विभातीः व्युच्छंत्यः उषसोपि नः अस्माकं शं शांतिः भवंतु
नः अस्माकं प्रजाभ्यः पर्जन्योपि शं भवतु शंभुः सुखस्य भावयिता क्षेत्रस्य पतिः नः अस्माकं शं शांतिः अस्तु ॥ ॥इति पंच
मस्य तृतीये एकोनत्रिंशो वर्गः ॥ ॥शं नो देवा इति विश्वेदेवाः बहुस्तोत्रकाः देवाः नः अस्माकं शं शांतिः भवंतु सरस्वती धी
भिः सह नः अस्माकं शं शांतिः अस्तु अभिषाचः यज्ञमभितः सेवमानाश्च नः शं शांतिः भवंतु रातिषाचः दानं सेवमानाः अपि
शं शांतिः एव भवंतु दिव्याः दिवि भवाश्च नः अस्माकं शं शांतिः भवंतु पार्थिवाः पृथिव्यां संभूताश्च नः शं भवंतु अप्याः अंतरि
क्षभवाश्च नः अस्माकं शं शांतिः भवंतु १२ शं नः सत्यस्येति सत्यस्य पतयः पालकाः देवाः नः अस्माकं शं शांतिः भवंतु अर्वंतः
अश्वाश्च नः अस्माकं शं शांतिः भवंतु गावोपि नः शं शांतिः एव भवंतु सुकृतः सुकर्माणः सुहस्ताः शोभनहस्ताः ऋभवोपि नः
अस्माकं शं शांतिः संतु हवेषु स्तोत्रेषु सत्सु पितरोपि नः अस्माकं शं शांतिः भवंतु १३ शं नो अज इति अज एकपात् नामधेयो
देवो नः अस्माकं शं शांतिः अस्तु अहिर्बुध्न्यश्च अस्माकं शं शांतिः अस्तु समुद्रोपि अस्माकं शं शांतिः अस्तु पेरुः उपद्रवेभ्यः पा
रयिता अपां नपात् देवः नः अस्माकं शं शांतिः अस्तु देवगोपा देवा गोपायिता यस्यां सा पृश्निः मरुतां माता नः अस्माकं शं शां
तिः भवतु १४ आदित्या रुद्रा इति नवीयः नवतरं अस्माभिः क्रियमाणमिदं ब्रह्म स्तोत्रं आदित्याः रुद्राः वसवः जुषंते जुष
तां सेवंतां दिव्याः दिवि भवाः पार्थिवासः पृथिव्यां भवाः गोजाताः पृश्निजाताः उतापि च यज्ञियासः यज्ञार्हाः ते सर्वेपि नः अ
स्माकं हवं शृण्वंतु १५ ये देवानामिति यज्ञियानां यजनीयानां देवानामपि यज्ञियाः यजनीयाः मनोः प्रजापतेश्च यजत्राः य
जनीयाः अमृताः मरणरहिताः ऋतज्ञाः सत्यज्ञाः ये देवाः संति ते सर्वे उरुगायं बहुकीर्तिं पुत्रं अद्य नः अस्मभ्यं रासंतां प्रयच्छं
तु यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य तृतीये त्रिंशो वर्गः ॥ ॥इति ऋग्भाष्ये पंचमाष्टके तृतीयोध्यायः ॥ ॥
मः ॥ ॥प्र ब्रह्मेति नवर्चं तृतीयं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः विश्वेदेवा देवता १ प्र ब्रह्मेति ऋतस्य यज्ञस्य सदनात् स्था

नान् देवयजनदेशान् अस्य स्तोतंस्तस्तान् स्यदीन् प्रेतु प्रकर्षेण गच्छतु किं तत्रास्ति सूर्यः सर्वस्य प्रेरकः देवः रश्मिभिः आलो
घैः किरणैः गाः अपः ससृजे कामिभिसस्त्रे अभिमुंचति अतः इह शं भद्रा त्वंस्त सूर्यस्येव विद्यते अपि च पृथिवी भूमिः सानुना सम
च्छ्रितेन पर्वतादिना उरुकं विस्तीर्णमसि तामिसत्तीवि सरति आप्नोति तथा अग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवं देवयज
नलक्षणं स्थानं अभिइदं शास्त्रने आईधे आदीप्यते २ इमां वामिति हे अस्कृता अस्कृतौ बलवन्तौ मित्रावरुणा मित्रावरुणौ वां
युवां प्रति इन्द्रपंनहविरूपमन्नमिव वनवाथः निवीय सीदस्मो अस्मदीयां पुरोवर्तिनीं स्तुतिं स्तुतिं कृण्वे अहं करोमि वां युवयोः
अन्यतरः इनः प्रभुः अरक्ष्यः शत्रुभिः हिंसितः वरुणः पद्वीः परस्य स्थानस्य प्रजनयिता धर्मा धर्मयोः धारयिता च वाणः अस्मा
भिः स्तूयमानो मित्रश्च जनं सर्वं प्राणिजातं यततीयातयति प्रवर्तयति ३ आ वातस्येति अजतः गच्छतः वातस्य वायोः इ
मा गतया अरंनेअजिरेनो रमंतं तथा सूराः स्तोत्रस्य प्रेरयितृः धेनवो न गावः अपीपयंत प्यायंते एधंते अपि च महः महत
दिवः द्योतमानस्य आदित्यस्य सदने अंतरिक्षे आध्मानः उत्स्यमानः वृषभः वर्षणशीलः पर्जन्यः सस्मिन् ऊधन् तस्मिन् अंतरि
क्षे अभिकस्त्रत्यादयन् ४ गिरा य एतेति पूर्वार्धं भ इंद्र स्तुतिः अपरः अर्यम्णः स्तुतिः हे मरुद्विक्रांतं इंद्र तेन वा प्रिया प्रियो
करयास्तु दुरं हे यो आयूधारकोऽप्यताएतीति हरीस्त्रीयो अश्वाय अनः गिरा स्तुतिरूपया वा वायुन जत्तूरथेषु जन्व हे इंद्र
युवाग आधयालिवोपः यः अपमारिरिषन हिंसितुं इच्छतः शत्रोः संबंधिनं मन्युं कोपं प्रमिनाति प्रकर्षेण हिनस्ति स्तक
तु स्तोमन कर्मणे अर्यमाणं आवर्त्तो स्तस्ताप्रवतया मि ५ यजंते अस्येति रुद्रः यस्य ते नमस्विनः हविर्लक्षणान्नवंतः
सजोषिक तस्य च यस्य धाम च धामानि स्थाने स्वकीये यज्ञगृहे स्थिताद्व स्पर्धः वयम्बगंतारः कर्माणि कुर्वंति यजमानाः
अस्य रुद्रस्य सख्यं साम्रिलंठारेन्धयनंत पूजयंतु नराभिः नेतृभिः स्तवानः स्तूयमानः रुद्र ऋष्टः अन्नं स्तोतृषु विवधविव
धानि हरणी सर्पः प्रेष्ठं रुद्रस्य प्रियतमं इदं नमः नमस्कारो रुद्राय मया क्रियते॥ ॥इति पंचमस्य चतुर्थे प्रथमो वर्गः ६ ॥
आ यन्नः पत्नीरिति यन्नया सांगंगादीनां नदीनां मध्ये सिंधुमाता अपां माता च सप्तमी सरस्वती नदी सप्तथी सप्तमी भवति सुदु

धाः कामान्दोग्धुं स्वधावाः स्वधाराः शोभनधाराः एताश्च नद्यः सुषयंत प्रवहंति स्विन स्वकीयेन पयसा उदकेन अभियांत्या
नाः पाश्च अभिवर्षयंतः महासः अन्नवत्यः वावशानाः कामयमानाः नद्यः साकं युगपदेव आगच्छंतु ७ उत त्ये न इति उत
पि च मंदसानाः मोदमानाः वाजिनः वेगवंतः ते मरुतो नः अस्मदीयां धियं यज्ञाख्यं कर्म तोकं च अस्मदीयं पुत्रं च अवंतु र
क्षंतु अस्मरा आधावरंती क्षांग्दे वनावनः अस्मान्परित्यक्ता अस्मद्व्यतिरिक्तान् अन्यान्माख्यान्तु माद्राक्षीत् ते पूर्वोक्ता
मरुतः वाक्कयुष्मं युक्तमापन्नः अस्मदीयरायिधनं अवीरधन वर्धयंतु ८ अच्छा प्रवो मही मितिहे स्तोतारः वो यूयं अर
मति उपरति रक्षितां महीं महती भूमिं प्रकृणुध्वं आह्वयत तथा विद्रध्वयज्ञार्हं न वीरं न सर्वेषां प्रेरकं च पूषणं देवं प्रकृणुध्वं
तपा अस्याः धियः नः अस्मदीयस्य कर्मणः अविताररक्षितारं भगं देवं च आह्वयत अपि च सातौ अस्मदीये यज्ञे वाजं ऋभू
णां अन्यतमं देवं आह्वयत च रस्यां वा अंरातिया चंदनं सेवकं पुरंधिं पुराणां धारयितारं ९ अच्छायं वइति हे मरुतः वः युष्मा
न् अयं श्लोकः अस्मदीयं इदं स्तोत्रं अच्छतु आभिगच्छतु निषिक्तपाणिं विष्णुं स्थागर्भस्य रक्षितारं अवोभिः अस्मद्विषयरक्ष
णैः युक्तं विष्णुं च अस्मदीयं स्तोत्रं अच्छतु गाभि च मरुतः विष्णुश्च गणते स्तुवते मह्यं प्रजायै पुत्ररूपां प्रजां वयः अन्नं च
धुः अदधुः ददतु हे मरुतः हे विष्णो यूयं स्वस्तिभिः अविनाशैः नः अस्मान् सदा सर्वदापातरक्षत॥ ॥इति पंचमस्य चतु
र्थे द्वितीयो वर्गः॥ ॥आ वो वाहिष्ठ इति अष्टर्चं चतुर्थं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः विश्वेदेवा देवता १ आ वो वाहिष्ठ इ
ति स्पृवन ऋभवः स्तूयंत ऋभुक्षणः विस्तीर्णस्य तेजसः निवासभूताः हे वाजाः ऋभवो वाहिष्ठः वोढतमः स्तवध्यै स्तोतुं अ
मृक्तः केनापि अहिंसितः युष्मदीयो रथः वः युष्मान् आवहतु असमंतात् अस्मदीयं यज्ञं प्रापयतु हे सुशिप्राः शोभनहन
वः यूयं तं सरथं आगत्य सवनेषु अस्मदीययज्ञेषु मदे मम दानिमित्रे त्रिपृष्ठैः क्षीरदधिसक्तुमिश्रैः महद्भिः सो
मैः अभिरणध्वं युष्मदीयं भरं अभिपूरयन सरथः युष्मान् आवह स्विति पूर्वेणान्वयः २ यूयं हरत्नमिति हे ऋभुक्षणः
ऋभवः सदृशाः स्वर्गं पश्यंतः यूयं हर्यूयमेव मघवत्सु हविर्लक्षणान्नवत्सु अस्मासु निमित्तेषु अम्रक्तं अहिंसितं चोरा

३५

119/1915

वे·भा·पं·
३५

रेभिः नाप्रहृतमित्यर्थः रंभं रमणीयं धनस्य धारयितृ तदन्नं तरं स्वधावंतः बलवंतः नेष्ट पूर्यं यज्ञेषु अस्मदीययज्ञेषु सोमपिबध्वं स
वयं सोमं पिबत अपि वयं यूयं मतिभिः धनैः स्तुतिभिः नः अस्मान् राधांसि धनानि विरप्श विशेषेण दत्त ॥ २ उवोचिथ सा
धाः पंचवर्षः इंद्र देवताकाः ॥ ॥ हि मघवन् धनवन् इंद्र महो महतः अर्णसः अन्यस्य च वसुनः धनस्य विभागे परिचरणा स्तु
कुले यजमानेभ्यो दातुं वाधमनुषि सेवसे खलु मघानि त्वदीयावुभावुभौ गभस्ती बाहू वसुना धनेन पूर्णा संपूर्णी भवतः
त्वदीयाः सूनृता वाचः नवसि यावस्य धनानि नियमनं नियच्छति ४ त्वमिंद्र स्वयशाइति हे इंद्र स्वयशाः असाधारणकी
र्तिः ऋभुक्षाः ऋभूणामीश्वरः संसाधुः साधकः वाजीम अन्नमिव क्रतुः कर्ता सोतुः मम अस्तं गृहं एयिथ प्राप्नुहि तु लघाव
सिष्ठाः एत संश्रयंतः ऋषयः वयं हे हरिवः अश्वोपेत इंद्र ते तव हविर्लक्षणान्नं ददतः यज्ञस्तोत्रं कृण्वंतः
कुर्वंतः संतः स्याम भवेम ५ सनितासीति हे हर्यश्व इंद्र याभिः धीभिः अस्मदीयाभिः स्तुतिभिः विवेषः व्याप्नोषि स दा
सुषे विमृह विरं नयसेभ्य अमागाय धनस्य सनिता सि ता सवसिवासि चरेइंद्र नः अस्माकं दाक
स्मिन् काले राधः धनानि आदशो प्रयच्छ युज्याभिः योग्याभिः ऊतिभिः रक्षाभिः रवि संभजेम ॥ ॥
इति पंचमस्य चतुर्थे नवमो वर्गः ॥ ९ ॥ वासयसीति हे इंद्र कदा कस्मिन् काले नः अस्मदीयं वचसः वाचो रूपं स्तोत्रं
जुषेथाः वयं अवगच्छेम तामस्ते नु सः सोमो अस्मान् वासयसि इदानीं किमपि स्तानि स्वपक्षया सि किं बवाज्यां बलव
त् अपि मयासु सदाभिस्त्वा तस्मात् अस्मदर्थं धनं यथा तस्माद्धेतु महतया सुवीरं शोभनपुत्रोपेतं रायिं धनं दी
पुत्रपौत्रादिना अमि धनः अस्मदीयं अन्नं गृहं नु जहीत त्यजते स ७ अभियं देवीति देवी द्योतमानानि ऋतिभिः भूमिरपि
इंद्र दीना नमासन्ना तांसहोमं इंद्रं अभिनवंते आधुनि कष्टः शोभनान्नैरूपेता शारदाः संवत्सरा श्वयंमि इंद्र नक्षते व्या
प्नुवंति मर्ताः मरणधर्माणः स्तोतारोवयं यमिंद्रं अस्यै शं सकी ये स्तोत्रे अत्युपनि धानं कृण्वंत कुर्वंति ॥ अधः श्रूयाणां स्तो
तॄणां विधारकः स इंद्रः अरहरुष्टि अरं आर्णो अतिं अधामंयस्य बलस्य हेतुमहत्तं तं इद्रं उपेति उपगच्छति ८ आ नो राधांसि
ति हे सवितः देव सत्यकाम स्तवध्यै स्तोतुं योग्यानि राधांसि धनानि नः अस्मान् आयंतु आगच्छंतु पर्वतस्य इंद्रस्य सदुःदेवस्य
रातौ दाने सति रायः धनानि अस्मान् आयांतु पायुः सर्वस्य पालकः दिव्यः दिविभवः सः इंद्रः सदा सर्वदा नः अस्मान् सिष
क्तु सेवतां अस्मिन् सूक्ते ये प्रतिपादिताः देवाः ते सर्वे यूयं नः अस्मान् स्वस्तिभिः कल्याणैः सदा पात पालयत
॥ इति पंचमस्य चतुर्थे दशमो वर्गः ॥ ॥ उदु ष्य देव इति अष्टर्चं पंचमं सूक्तं वासिष्ठ ऋषिः त्रिष्टुप् छंदः सविता देवतास
भगश्च ष्ठ्याबाजी देवताकं १ उदु ष्य देव इति सविता देवः स्यः देवः हिरण्ययीं सुवर्णमयीं यां अमतिं रूपं प्रभामित्यर्थः अशि
श्रेत् आश्रयति तां अमतिं उदयाम उद्गमयति उप पूरणः नूनं अयं भगः भजनीयः सविता मानुष्येभिः मनुष्यैः स्तोतृभिः हव्यः
हवनीयः स्तोतव्यो भवति पुरुस्पृहः बहुधनः यः देवः स्तोतृभ्यः रत्ना रत्नानि धनानि विदधाति करोति स सविता देवः तां अम
तिं उदयामतीति पूर्वेण संबंधः २ उदु तिष्ठेति हे सवितः देव त्वं उत्तिष्ठ ऊर्ध्वं गच्छ नतः हे हिरण्यपाणे सुवर्णहस्त त्वं अस्य प्र
श्रु यज्ञस्य प्रयतौ प्रणयने अस्मदीयमिदं स्तोत्रं श्रुधि शृणु उ पूरणः कीदृशः त्वं उर्वीं विस्तीर्णां पृथ्वीं प्रथि
तां अमतिं रूपं प्रभां विसृजानः विसृजन् नृभ्यः नेतृभ्यः स्तोतृभ्यः मर्तभोजनं मनुष्याणां भोगयोग्यं धनं आसुवानः प्रेर
यन् एवंभूतस्त्वं इदं स्तोत्रं शृणु इति संबंधः ३ अपि ष्टुत इति अपि च सविता देवः अस्माभिः स्तोतॄणां स्तुतः विश्वे सर्वे चित्
सर्वे देवाः अपि यं सवितारं आगृणंति अभिष्टुवंति नमस्यः सर्वैः नमस्करणीयः स देवः स्तोमान् नः अस्मदीयानि स्तोत्रा
णि चनः अन्नं धात धातु अन्नफलानि करोतु विश्वेभिः विश्वैः सर्वैः पायुभिः पालनैः सूरीन् स्तोतॄन् अस्मान् निपातु नितरां
पालयतु ४ अभि यं देवी अदितिः द्योतमाना अदितिः देवमाता यं सवितारं अभिगृणाति अभिष्टौति कीदृशी सवितुर्दे
वस्य सवं प्रसवं अनुज्ञां गृणाना सेवमाना सम्राजः सम्यक् राजमानाः वरुणः उपलक्षणमेतत् वरुणादयो देवाः यं स
वितारं अभिगृणंति अभिष्टुवंति मित्रासः मित्राः अर्यमा च सजोषाः समानप्रीतिः अर्यमा देवश्च यं अभिगृणंति स नः स्तो
मान् नाधादित्यादि पूर्वया संबंध ५ अभि ये मिथ इति रातिषाचः दानसेविनः वसुनः संभक्तारः यजमानाः मिथः पर

३५

121
1915

स्यदं संहनाम्ना सवितारं अभिलक्ष्य सपंनेप स्थिरंतिकी दृशं दिवः द्युलोकस्य पृथिव्याः प्रसेभ्वरा तिमित्रः प्रहृतं तनापिव
अहिर्बुध्न्यः बुध्न्ये अंतरिक्षे भवः बुध्न्यः एनी ति अहिः एतत् सदृश्यो मिः मध्यम स्थानो पि आहिर्बुध्न्य इति उच्यते सवितु
र्मित्रस्य सोः पि नो अस्माकं स वितु विषय स्तोत्रं शृणोतु तनपावस्त्री वाग्देवी यस्सवितृ पाहितासनो एक धेनुभिः मुख्याभिः
गोभिः निपातु नितरां नः अस्मान् पालयतु ६ अनुतत्र इति ध्यानः अस्माभिर्यच्यमानः आस्यभिः प्रजानां पालकः सवि
तादेवः सवितुर्देवस्य स्वस्य संबंधि रत्नं रमणीयं धनम् प्रसिद्धं धनं अस्माकं अनुमंसीष्ट अनुमन्यतां उग्रः ओजस्वी स्ते
तामग्र मननीयं सवितारं अवसेन अस्माकं रक्षणाय जोहवीमि भृशं ह्वयामि अथ अपि च अतुष्यः समर्थः स्तोतारमगं देवं
रमणीयं तमस्मिन्नदं अनंयामि धावने ७ शन्नो भवन्ति देवता तादेवतानीय शोहवेषु अस्मदीयेषु स्तोत्रेषु मितद्रवः मित
द्रुवः मितमार्गाः स्वर्काः शोभनगमाः वाजिनः एतद्गतिमान्तः देवाः नः अस्माकं शं सुखाय भवंतु अपि च अहिं आगस्मदं ता
रं वृकं वधता असहमानं चौरान्मिति रोषः रक्षांसि च जम्भयन्तः हिंसन्तः वाजिनो देवाः सनेमि पुरातनाः अमीवाः रोगान् अस्मान्
अस्मत् युयवन् पृथक् कुर्वंतु ८ वाजे इति हे वाजिनः देवाः विप्राः मेधाविनः अमृताः अमरणधर्माणः ऋतज्ञाः सत्यं ना
नंतः एवंभूताः सं नो धनेषु वाजे वाजे सर्वेषु युद्धेषु नः अस्मान् धनेषु धनविमित्तेषु अवत पालयत ततो यूयं अस्य मध्वः मधु
रं पलं इमं सोमं पिबत सोमपानेन मादयध्वं यूयं तृप्ताः सन्तः तृप्ताः यूयं देवयानैः देवगमनसाधनैः पथिभिः मा
र्गैः यात गच्छत॥ ॥इति पंचमस्य चतुर्थे पंचमो वर्गः॥ ॥ऊर्ध्वो अग्निरिति सप्तर्चं षष्ठं सूक्तं वासिष्ठं त्रिष्टुप्छंदः वि
श्वेदेवा देवता सूक्तविनियोगो लैंगिकः ऊर्ध्वो अग्निरिति अग्निः अंगनादिगुणविशिष्टः ऊर्ध्वः उद्गमनः सन् यस्य वासक
त् स्तोतुः मतिं अस्मदीयां शोभनां स्तुतिं अश्नोत् व्याप्नोतु सः नो प्रतीचीं अभिमुखी ऊर्णीः सर्वासां प्रजानां जनयित्री उ
षाः देवताः देवतानां पद्मसदनाशुग्रजानं अद्रीः अद्रयः तं तीव्रस्य धीयं तीपलीपजमानो पंथां पंथानं पज्ञमार्गं धेनुवरं पिनाविवन्मे
आते विवमेन पाह्नविनः संप्रेषिनः नः अस्मदीयः होता ऋतं यज्ञं आनियजतु करोत्विति अर्थः २ प्रवा नृजुद्धति एवाय अ

123
1915

मानानां संबंधि सुभिवारो भ आन्नेन युक्तं बर्हिः कुशमयं प्र बाह्यमे भक्ष्यते आसाद्यते इत्यर्थः विश्पतीवइवइतीदानी
मर्थं अस्मदीयानां प्रजानां पालकः नियुत्वान् अश्ववान् वायुपूषा वाविश्वा प्रजानां स्वस्तये क्षेमाय अक्तोः रात्रेः संबंधिन्याः
उषसः सकाशात् पूर्वहूतो पूर्वस्मिन् आह्वाने विदिष्टे अंतरिक्षे आइयाने आगच्छतां ३ ज्मया अत्रेति वसवः देवाः अत्र
अस्मिन् यज्ञे ज्मयाः पृथिव्याः रंतरमयंतां उरौ विस्तीर्णे अंतरिक्षे स्थिताः शुभ्राः दीप्यमानाः मरुतश्च मर्जयंत परिचरंते
उरुज्मयः प्रगलगमनाः वसवः मरुतश्च यूयं पथः युष्मदीयान् मार्गान् अर्वाक् अस्मदभिमुखं यथा भवति तथा कृणुध्वं कु
रुत आपिप्यं आपिप्यं मम युष्मान् प्रतिगतवतः नः अस्मदीयस्य अस्य दूतस्य अग्नेः आह्वानं प्रोतम् शृणुत ४ तेहिय
ज्ञेषु यज्ञियासु गृत्सु तेहि खलु भक्तिष्ठाः यज्ञियासः यज्ञार्हाः ऊमाः रक्षकाः विश्वे सर्वे देवाः सधस्थं सह स्थानं अभिसंति
अभिगच्छंति आक्रमंति अग्ने अध्वरे अस्मदीये यज्ञे उर्वतः कामयमानान् यक्षि यज तथा स्पृष्टी क्षिप्रं भगं देवं नासत्या
अश्विनौ पुरंधि पुरूणां धातारं इंद्रं च यज ५ आग्ने गिर इति हे अग्ने त्वं दिवः द्युलोकात् सकाशात् गिरः गरीयान् स्तुत्यान्
देवान् अस्मदीय यज्ञं प्रति आवह आह्वानं कुरु पृथिव्याः अंतरिक्षाच्च आवह कान् देवानिति मित्रं वरुणं इंद्रं अग्निं अर्यम
णं अदितिं पृथिवीं विष्णुं च एवंभूतान् देवान् एषामस्माकं यजमानानां अर्थाय आवह सरस्वती वाग्देवता मरुतश्च माद
यंतां अस्मदीयैः स्तोत्रैः हविर्भिश्च मादयंतु ६ ररे हव्यमिति यज्ञियानां यज्ञार्हेभ्यो देवेभ्यः मतिभिः अस्मदीयाभिः स्तुति
भिः सह हव्यं हविः ररे अस्माभिः दीयते मर्त्यानां मनुष्याणां अस्माकं कामं अभिलाषं असिन्वन् अप्रतिबध्नन् अग्निः न
क्षन् अस्मदीयं यज्ञं आगच्छतु हे देवाः यूयं अविदस्यं अनुपक्षीणं यससदा सां सर्वदा संभजनीयं रयिं धनं धात अस्मभ्यं दत्त
नु अद्य वयं युष्माभिः सहाय प्रतिरहस्य यज्ञे समागते देवैः सक्षीमहि संगमेमहि ७ नू रोदसी इति नु अद्य रोदसी द्यावापृ
थिव्यौ वसिष्ठैः अस्माभिः अभिष्टुते सर्वतः स्तुते अभूतां अथ ऋतावानः अस्माभिः क्रियमाणैः यज्ञैः उपेतौ वरुणः मित्रः अ
ग्निश्च एवं प्रहृताः देवाः अस्माभिः अभिष्टुताः आसन्नमः अस्मभ्यं अर्कं अर्चनीयं उपमं सर्वोत्कृष्टं अन्नं यच्छंतु ददतु चंद्रः

आह्वारकाः सर्वैर्यूयं नः अस्मान् स्वस्तिभिः अविनाशैः सदा सर्वदा पात पालयत॥ ॥इति पंचमस्य चतुर्थे षष्ठो वर्गः
ओ श्रुष्टिरिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रिष्टुभं वैश्वदेवं ओ श्रुष्टिरिति हे देवाः विदथ्या विदथ्येन य
ज्ञेन विशेन संपाद्या श्रुष्टिः सुखानि अस्मान् ओ समेतु आगच्छतु वयं तुराणां वेगवतां देवानां स्तोमं स्तोत्रं प्रति दधीमहि
कुर्मः किंच अद्य यदानीं सविता देवः प्रसवति तत् स्यामभ्यं धनं रत्निनः रमणीयधनवतः अस्य सवितुः तस्य धनस्य
विभागे दाने स्याम भवेम २ मित्रस्तन्न इति मित्रः देवः नः अस्मभ्यं तत् समिद्धं धनं ददातु तथा वरुणः ददातु रोद
सी द्यावापृथिवी ... तथा इंद्रः ... यां स्तुतिभिः ... सवितृ तद्धनं ददातु अर्यमा च ददातु तथा अदितिः
देवी ... ददातु वायुश्च भगश्च उभे देवौ यद्धनं नियुते अस्मान् ... नितरां यो अये तां तद्धन
मिति ... संबंधः ३ सेदुग्रो अस्त्विति हे पृषदश्वाः पृषदश्वा मरुतः देवाः यूयं यं यजमानं
५ अवाथ पालयथ स यजमानः उग्रः ... अग्निः सरस्वती ... अग्निः देवः सरस्व
ती ... सर्वे देवाः ... यजमानं ... तस्य यजमानस्य संबंधिनः रायः धनस्य कश्चिदपि
न ... ४ अयं हि नेतेति ... तस्य यज्ञस्य नेता प्रापयिता अयं हि अयं खलु वरु
णः ... अर्यमा ... राजानः समर्था देवाः आपः ... अस्मदीयं यज्ञादिलक्षणं कर्म पुः ... दधाति ...
... देवी ... आदित्यैः ... भवति ... देवाः अरिष्टान् बाधितान् सत
नः अस्मान् अंहः दुरितं ... पर्यवत् ... पारयंतु ५ अस्य देवस्येति ... यज्ञे हविर्भिः हवी ... एषस्य प्रापणी
... सर्वे देव ... रुद्रः देवः रुद्रियं
रुद्रसंबंधि ... अस्मान् प्रापयति खलु ... अश्विनौ देवौ ... हविर्लक्षणान्युप
... ६ मा वपूषन्निति हे आघृणे ... पूषन् देव जन अस्मिन् ... स्पः २९

125
1915

विष्णुः ... ककुभाः वरुत्री सर्वैः रमणीया सरस्वती ... अस्मान् ... देवपत्न्यश्च यद्धनं रासन् अस्मभ्य
मप्रयच्छन् ... अग्निरादिषु ... किंच मयोभुवः सुखस्य भावकाः अर्थतः गच्छंतः देवाः नः अस्मान् निपांतु नित
रां पालयंतु ... अपां ... आयुः ... उदकं ददातु अस्मभ्यं ७ नूरोदसीइति नु अद्य रोद
सी द्यावापृथिव्यौ अभिष्टिः अस्माभिः ... अस्माभिः क्रियमाणः यज्ञः उपेताः वरुण
मित्रः अग्निश्च एवं ... देवाः अस्माभिः अभिष्टुताः आसन् नः अस्मभ्यं अर्कं अर्चनीयं उपमं सर्वोत्कृष्टं अन्नं यच्छंतु ददतु
इंद्रः आह्वारकाः सर्वे यूयं नः अस्मान् स्वस्तिभिः अविनाशैः सदा सर्वदा पात पालयत॥ ॥इति पंचमस्य चतुर्थे सप्तमो वर्गः
॥प्रातरग्निमिति सप्तर्चं अष्टमं सूक्तं वसिष्ठः ऋषिः आद्या जगती शिष्टाः त्रिष्टुभः आद्या अग्नीद्रादिदेवत्या द्वितीयाद्याः पंच
भागदेवत्याः सप्तमी उषोदेवत्या १ प्रातरग्निमिति प्रातः उषः काले अग्निं देवं हवामहे वयं स्तोतारः आह्वयामः तथा प्रातःकाले
इंद्रं हवामहे तथा मित्रावरुणा मित्रावरुणौ अहोरात्राभिमानिनौ देवौ प्रातः वयं हवामहे तथा अश्विना अश्विनौ प्रातः वयं ह
वामहे तथा प्रातः भगं देवं पूषणं देवं ब्रह्मणस्पतिं ब्रह्मणस्पतिं आह्वयामः तथा प्रातः सोमं देवं उत अपि च रुद्रं देवं हुवेम
आह्वयामः २ प्रातर्जितमिति ... उग्रं देवं ... जितं जयशीलं उग्रं उद्गूर्णं अदितेः पुत्रं भगं देवं प्रातः
काले वयं हुवेम आह्वयामः आध्रश्चित् दरिद्रोपि स्तोता यं भगं देवं मन्यमानः स्तुवन् भगं भजनीयं धनं भक्षीम अविम
जमत्यं ... तुरश्चित् ... राजाचित् ... भगं देवं भजनीयं धनं भक्षीति आ
ह तं भगं प्रातः वयं हुवेमेति संबंधः ३ भग प्रणेतरिति हे भगदेव त्वं प्रणेतः प्रवर्तक ... भग त्वं सत्यराधः
सत्यधन त्वं नः अस्माकं ... प्रयच्छन् इमां अस्मदीयां धियं ... उदव उद्रक्ष फलयुक्तां कुरु हे भग त्वं गोभिरश्वै
श्च नः अस्मान् प्रजनय प्रादुर्भूतान् कुरु हे भग त्वत्प्रसादात् वयं नृभिः नेतृभिः पुत्रादिभिः नृवंतो मनुष्यवंतः प्रस्याम प्रभवे
म ४ उतेदानीमिति उत अपि च इदानीं अह्नां प्रपित्वे भगवंतः स्याम उत अपि च प्रपित्वे पूर्वाह्णे भगवंतः स्याम उत अपि च अह्नां दिवसा

नांमध्ये मध्ये हे भगवंतः स्याम उत अपि च इहे मघवन् धनवन् भगदेव सूर्यस्य देवस्य उदिता उदितौ उदये सति वयं त्वद्युप।
स्याम देवानां इंद्रादीनां सुमतौ अनुग्रहबुद्धौ स्याम भवेम ५ भग एवेति हे देवाः भगो देव एव भगवान् अस्तु तेन भगेन देवेन
धनेन वयं भगवंतः स्याम धनवंतो भवेम हे भग तं प्रसिद्धं त्वा त्वां सर्वः इत् सर्व एव जनः जोहवीति भृशं आह्वयति हे भगदे
व स त्वं इह अस्मिन् यज्ञे नः अस्माकं पुरएता पुरोगन्ता भव ६ समध्वरायेति दधिक्रावेव शुचये पदाय पदाय स्थाना
य रथं वाजिनं इव अश्वाः संनमंतु संगच्छंतु उषसः उषोदेवताः अध्वराय अस्मदीयाय यागाय संनमंतु संगच्छंतु वाजि
नः वेगवंतः अश्वाः रथं इव रथं यथा तथा उषसः अर्वाचीनं अस्मदभिमुखं वसुविदं धनस्य प्रापकं भगदेवं नः अस्मान्
प्रति आवहंतु आनयंतु ७ अश्वावतीरिति भद्राः भजनीयाः उषासः उषोदेवताः अश्वावतीः अश्ववत्यः अश्वसहिताः स
त्यः गोमतीः गोमत्यः वीरवतीः वीरवत्यः पुत्रादिभिः उपेताः अस्मभ्यं सदं सर्वदा उच्छंतु नैशं तमः विवासयंतु
कीदृश्यः घृतं दुहानाः दुहानाः सिंचंत्यः विश्वतः सर्वतः गुणैः प्रपीताः प्रवृद्धाः एवंभूताः उषसः तमः उच्छंतु अस्मिन् सूक्ते प्रति
पादिताः हे सर्वदेवाः यूयं नः अस्मान् सदा स्वस्तिभिः कल्याणैः पात पालयंत॥ ॥इति पंचमस्य चतुर्थे अष्टमो वर्गः॥ ॥
प्रब्रह्माण इति षडृचं नवमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः विश्वेदेवा देवता १ प्रब्रह्माण इति ब्रह्माणः अंगिरसः ऋष
यः प्रगमंत सर्वत्र आप्नुवंति किं च ऋतुः पर्जन्यः नभन्यस्य स्तोतुस्य अस्मदीयं स्तोत्रं प्रावितु प्रकर्षेण इक्षतु धेनवः प्रीणयित्र्यः
नद्यः उदप्रुतः उदकानि सिंचंत्यः प्रनवंत सर्पंतु अद्री अद्रिपतौ पत्नी यजमानौ अध्वरस्य यज्ञस्य पेशः रूपं युंज्यातां योज
येतां २ सुगस्ते अग्ने इति हे अग्ने सनाविमः सनातनः चिरकालात् आरभ्य लब्धः ते त्वदीयः अध्वा मार्गः सुगः सुष्ठु गंतव्यो भवतु
किं च ये अश्वाः श्यामवर्णाः रोहिताः लोहितवर्णाः अरुषाः ये वा ये त्वदीयाः अश्वाः सदनं सद्मनि यज्ञगृहे वीरवाहः
वीरं वहंतः अरुषाः आरोचमानाः राजंति तान् ऋजुयुक्तान् सारथीन् ये ऋतुसंयोजने सनः यज्ञगृहे निषण्णः अहं होतास
न् देवानां इंद्रादीनां अभिमाननाम संधानं कुर्वे आह्वयामि ३ समु वो यज्ञ इति हे देवाः वः युष्माकं यज्ञं नमोभिः नमस्कारैः ३९

120
1915

युष्माः इमे स्तोतारः संमहयन्त सम्यक् पूजयंति उपूरकः मंद्रः स्तुतिशीलः उप अंतिके अस्माकं समीपे स्थितः अस्मदीयः होता प्र
रिरिचे अन्येभ्यः कामान् अतिरिच्यते हे यजमानाः देवान् ऋषु सुष्ठु यजस्व हे पुरुवणीक बहुतेजस्क अग्ने त्वं यज्ञियाय
यज्ञार्हा अरमति अरं गमिं आवर्तताः आवर्तय ४ यदा वीरस्येति अतिथिः सर्वेषां अतिथिभूतः अग्निः यदा वीरस्य स्तोत्राणां प्रे
रयितुः रेवतः हविष्मतो यजमानस्य दुरोणे गृहे स्योनशीः सुखेन शयनीयः अभिहितः प्रजायते अग्निः दमे यज्ञगृहे सुधि
तः आधार्यः निहितः सन् सुप्रीतः सुप्रीतो भवति तदा सः अग्निः इषं तस्मै उपगच्छते विशे प्रजाये वार्यं वरणीयं धनं ददाति द
दाति ५ इमं न इति हे अग्ने त्वं नः अस्मदीयं इमं अध्वरं यज्ञं जुषस्व सेवस्व किं च मरुत्सु देवेषु इंद्रे च यशसं यशोयुक्तं हवि
र्लक्षणं अन्नं कृतं नः अस्मदीयं यज्ञं हे अग्ने त्वं कृधि कुरु स्थापय इत्यर्थः नक्ता रात्रिश्च उषासः दिवश्च अहनी अहोरात्री इत्यर्थः।
बर्हिः बर्हिषि आसदतां उपविशतां अपि च हे अग्ने उशंता उशंतौ यज्ञं इच्छंतौ मित्रावरुणा मित्रावरुणौ इह अस्मिन् यज्ञे यज
पूजय ६ एवाग्निमिति वसिष्ठः ऋषिः रायस्कामः पश्वादि धनानि इच्छन् एव एवं उक्तप्रकारेण सहस्यं बलस्य पुत्रं अग्निं दे
वं विश्वकृष्टस्य पुरुरूपस्य धनस्य लाभाय स्तौत् एवं स्तुतो ग्निः अस्मे अस्मभ्यं इषं अन्नं रयिं धनं वाजं बलं च यच्छतु प्रयच्छतु प्रय
यतु द्रावि सर्पः यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य चतुर्थे नवमो वर्गः॥ ॥प्र वीयज्ञेष्विति पंचर्चं दशमं सूक्तं
वसिष्ठ ऋषिः त्रिष्टुप् छंदः विश्वेदेवा देवता १ प्र वीयज्ञेष्विति देवयंतः देवान् कामयमानाः विप्राः यज्ञेषु नमोभिः स्तुतिभिः व
युष्मान् इषध्ये अभि प्राप्तुं प्रार्चन् प्रवीयति प्रकर्षेण स्तुवंति द्यावा दिवं च पृथिवी पृथिवीं च अभि श्वप्र स्तुवंति येषां विप्राणां मेधाविनां
ब्रह्माणि स्तोत्राणि असमानि च अनिभवनीयानि उर्वी विस्तृतशाखाः वृक्षस्य शाखा इव विष्वक् विनिश्वतः विषुप्रति विविधेन गच्छंति ते विप्राः प्रार्चन् इ
ति पूर्वेण संबंधः २ प्र यज्ञ एतु इति अयं अस्मदीयः यज्ञः प्र एतु देवान् प्रतिगच्छतु दृष्टांतः हेत्वानसप्तिः शीघ्रगामी अश्वो यथा
तद्वत् हे ऋत्विजः संविदा नस्यं समनसः सरव्यामनस्काः संतः घृताचीः स्रुचः उद्यच्छध्वं हस्ते उद्यम्य धारयत तथा अध्वराय यागं क
र्तुं साधुं साधकं बर्हिः स्तृणीत वृणीत अस्तृणीत हे अग्ने देवयूनि देवान् कामयमानानि त्वदीयानि शोचींषि उर्ध्वं उर्ध्वमुखानि अस्थुः

लिहंतु ३ आपुत्रासइति मातरं पितरं विशेषेण भर्तव्याः पुत्रासो न पुत्रा इव ते तद्वत् अस्मान् भरण्याः देवासः देवाः ब
र्हिषः कुशमयस्य वेद्या आस्तीर्णस्य सानौ उच्छ्रिते देशे आसदंतु उपविशंतु हे अग्ने विदथ्यां यज्ञयोग्यां त्वदीयां ज्वालां विश्वा
चीं सर्वतः आअनक्तु आसमंतात् सिंचतु देवताता यज्ञेन अस्माकं मृधः हिंसकान् हे अग्ने त्वं माकः माकार्षीः ४
ते सीषपंत इति यजत्राः यजनीयाः ते इह देवाः ऋतस्य उदकस्य सुदुघाः सुष्ठु दोग्धुं योग्याः धाराः दुहानाः क्षरंतः जो
षं प्रीतिं सेवमाना भवंति तथा आसीषपंत स्पृशंति आसमंतात् सर्पंतीत्यर्थः अस्मान् स्तोतॄन् सेवंते यावत् तथा अद्य अस्मि
न् दिने हे देवाः वसूनां धनानां ज्येष्ठं श्रेष्ठं वः युष्मदीयं महः मंहनीयं आगच्छतु यूयमपि समनसः समानमनस्काः यतयः आगंत
न आगच्छत हे देवाः पूर्यं आगंतेति संबंधः ५ एवा नो अग्नइति हे अग्ने एवं एवं स्तुतः त्वं विक्षु प्रजासु मध्ये अस्मभ्यं आ
दशस्य धनं आभिमुख्येन देहि हे सहसावन् बलवन् त्वया आस्क्राः अस्कन्नाः वयं युजा सहायभूतेन राया धनेन सधमादः सह
मादयंतः अरिष्टाः अहिंसिताः भवेम यूयं पात स्वस्तिभिः सदा नः ॥ इति पंचमस्य चतुर्थे दशमो वर्गः ॥ ॥दधिक्रां वइति पं
चर्चं एकादशं सूक्तं वसिष्ठ ऋषिः आद्या जगती शिष्टास्त्रिष्टुभः दधिक्रादि लिंगोक्त देवताका आद्यायाः शिष्टासु दधिक्रा देवता १ दधिक्रां
वइति हे स्तोतारः वः युष्माकं ऊतये रक्षणाय प्रथमं दधिक्रां अश्वाभिमानिनीं देवतां हुवे आह्वयामि ततः अश्विना अश्वि
नौ उषसं उषोदेवतां अग्निं समिद्धं सम्यक् दीप्तं भगं च भगदेवं आह्वयामि इंद्रं विष्णुं पूषणं ब्रह्मणस्पतिं आदित्यान् द्यावा
पृथिवी आपः उदकं स्वः सूर्यं इत्येतान् देवान् आह्वयामि २ दधिक्रामु नमसेति दधिक्रां एतन्नामकं अश्वविशेषं देवं नम
सा स्तोत्रेण बोधयंतः उदीरणाः प्रेरयंतः यज्ञं यागं उपप्रयंतः उपगच्छंतः वयं बर्हिषि इळां हवीरूपां देवीं सादयंतः आस्थापयंतः सुह
वा शोभनाह्वानौ विप्रा मेधाविनौ अश्विना अश्विनौ च आह्वयामः उपूरणः ३ दधिक्राव्णमिति दधिक्राव्णं अश्वं बु
बुधानः स्तोत्रेण बोधयन् अहं अग्निं देवं उपब्रुवे उपस्तौमि उषसं सूर्यं देवं गां च मध्यमिकां वाचं च एवंभूतान् देवान् अहं उ
पस्तौमि मंश्चतोः मन्यमानात् स्तुवतो जनात् वेतपते आज्ञानानीति मंश्चतुः तस्य वरुणस्य ब्रध्नं महांतं बभ्रुं पिंगलवर्णं

५०

129
1915

अश्वं तस्मात् यानात् अर्हं उपब्रुवे ते देवाः अस्मत् अस्मत्तः विश्वा विश्वानि सर्वाणि दुरिता दुरितानि पापानि यावयंतु पृथक्
कुर्वंतु ४ दधिक्रा वइति प्रथमः सर्वेषां अश्वानां मुख्यः वाजी शीघ्रगामी अर्वा गमनशीलः दधिक्रावा अश्वरूपो देवः प्रजानन्
रथस्य अग्रे गंतव्यान् अभिष्ठाय ज्ञात्वा सम्यक् जानन् रथानां मध्ये प्रमुखो भवति कीदृशः अश्वः उषसा देवतया सं
र्येण देवेन आदित्येभिः आदित्यैः वसुभिः अंगिरोभिः देवैः सह स्तोतृभ्यः ऋषिभिश्च संविदानः सम्यक् जानन् एकमत्यं
प्राप्त इत्यर्थः ५ आनो दधिक्रा इति दधिक्राः अश्वरूपो देवः ऋतस्य यज्ञस्य पथ्यां मार्गं अन्वेतवे अनुगंतुं प्रवर्तमानानां नः अ
स्माकं पथ्यां पथ्यां आ अनक्तु उदकेनाभिषिंचतु उ पूरणः दैव्यं शर्धः देवसंबंधि बलं इह अग्निः नः अस्मदीयं हवं शृणो
तु अमूराः अमूढाः महिषाः महांतः विश्वे सर्वे देवाः अस्मदीयं हवं शृण्वंतु ॥ ॥इति पंचमस्य चतुर्थे एकादशो वर्गः ॥ ॥
आदेवइति चतुर्ऋचं द्वादशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः सविता देवता १ आ देवो यातु इति स्वरत्नः शोभनरत्नोपेतः अं
तरिक्षप्राः स्वकीयेन तेजसा अंतरिक्षस्य पूरयिता अश्वैः स्वकीयैः वाहैः वहमानः उह्यमानः सविता सर्वस्य प्रेरकः देव आया
तु आगच्छतु किंच हस्ते नर्याणि नरेभ्यो हितानि पुरूणि बहूनि धनानि हस्ते दधानः दातुं धारयन् भूम भूतानि निवेशय
न् स्वस्वस्थाने स्थापयन् प्रसुवन् व्यापारेषु प्रेरयन् एवंभूतः सविता देवः आयातु २ उदस्य बाहू इति शिथिरा शिथि
लौ दाने प्रसारितौ बृहंता महांतौ हिरण्यया स्वर्णमयौ अस्य सवितुः संबंधिनौ बाहू हस्तौ दिवः अंतरिक्षस्य अंतान्
पर्यंतान् उदनष्टां ऊर्ध्वं व्यापुतां नूनं अद्य अस्य सवितुः स प्रसिद्धः महिमा महत्त्वं पनिष्ट अस्माभिः स्तूयते सूरश्चि
त् सूर्योपि अस्मै सवित्रे अपस्यां कर्म अनुदात् अनुददातु ३ स घा नो देव इति सहावा तेजः अंतराराणि अभिभावुकं ते
जो यस्य सः वसुपतिः धनानां पालकः स सविता देवः नः अस्मभ्यं वसूनि धनानि आसाविषत् आसमंतात् प्रेरयति द्युपू
रणः स सविता देवः उरूचीं विस्तीर्णगमनां अमतिं रूपं दीप्तिं इत्यर्थः विश्रयमाणः सन् अध अधुना नः अस्मभ्यं मर्तभोजनं
मनुष्याणां भोग्यं धनं रासते ददातु ४ इमा गिर इति इमाः इदानीं क्रियमाणाः गिरः स्तोत्र्यः प्रजाः सुजिह्वं शोभनजिह्वं पूर्णग
भस्तिं संपूर्णहस्तं अस्विनं सुपाणिं शोभनहस्तं सवितारं देवं स्तुवंति स च सविता चित्रं चायनीयं बृहन् महत् वयः

जनंजनेभ्य अस्माद्दुष्टवृष्टिं सतुस विता दिदेवा यूयं स्वस्तिभिः कल्याणैः सदा सर्वदा पात पालयत॥ ॥इति पंचमस्य
चतुर्थे द्वादशो वर्गः॥ ॥इमा रुद्रायेति चतुर्ऋचं चतुर्थात्वं सूक्तं वसिष्ठऋषिः अंत्या त्रिष्टुप् शिष्टा जगत्यः रुद्रो देवता १
इमा रुद्रायेति हे अस्मदीयाः स्तोतारः यूयं इमाः गिरः स्तुतीः रुद्राय देवाय भरत धारयत कीदृशाय स्थिरधन्वने दृढधनु
ष्काय क्षिप्रेषवे क्षिप्रगामि बाणाय स्वधाव्ने अन्नवते अषाढाय केनाप्यनभिभूताय सहमानाय शत्रूणामभिभवित्रे वे
धसे विधात्रे तिग्मायुधाय तीक्ष्णायुधाय एवंभूताय रुद्राय स्तुतीः भरत स च रुद्रः नः अस्मदीयाः स्तुतीः शृणोतु २ स
हि क्षयेण निवासेन आपतीक्ष्णायास्य एवं महते रुद्राय स्तुतीः भरत स च रुद्रः नः जगतः स्वक्षयेण ऐश्वर्येण चेतति प्रज्ञापय
ति हे रुद्र सहि समस्तजगत्यु पृथिव्यां भूतः जन्मनः जगतः स्तोत्रेण तर्पयंतीः नः अस्मदीयाः प्र
जाः हि ... ऐश्वर्येण प्रज्ञापयति हे रुद्र ... अस्मदीयाः ... अनमीवः रोगः तं अकृण्वन्भव ३ या ते दिद्यु
त् अवसृष्टा ... दिवस्परि ... क्ष्मया चरति परिवृणक्तु अशनिरूपा हेतिः क्ष्मया क्षितौ चर
ति ... हे रुद्र ... तव सहस्रं बहूनि भेषजा
नि ... अस्माकं तोकेषु पुत्रेषु तनयेषु पौत्रेषु च मा रिषः हिंसां मा कुरुथाः ४ मा नो
वधीः ... हे रुद्र नः अस्मान् मा वधीः मा हिंसीः तथा मा परा दाः ... अपि च हीळितस्य क्रुद्धस्य तव प्रसितौ प्र
कृष्टे संबंधने वयं मा भूम ... बर्हिषि जीवशंसे यज्ञे नः अस्मान् आभज ... कुरु हे रुद्र यू
यं ताः देवाः यूयं अस्मान् स्वस्तिभिः कल्याणैः सदा सर्वदा पात पालयत॥ ॥इति पंचमस्य चतुर्थे त्रयोदशो वर्गः॥ ॥
आपो यं व इति चतुर्ऋचं पंचचत्वारिंशं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः आपो देवता १ आपो यं वः इति देवयंतः देवान् इच्छंतः अ ध्व
र्यवः हे आपः ... इंद्रपानं इंद्रेण पातव्यं ... शुचिं ... संमृतं ऊर्मिं सोमर
सं अकृण्वत कुरुत ... ऊर्मिं वनेम संभजेमहि ... शुचिं ... इंद्रपानं ... लक्षणम् ... सिंचनं म

131/1915

पुरस्तात् ... तं पयसेमेति संबंधः २ तमूर्मिमाप इति हे आपः देवाः वः युष्मदीयं मधुमत्तमं रसवत्तमं ऊर्मिं ... सिद्धसे
माः ... आशुहेमा शीघ्रगतिः अपां नपात् देवः अवतु पालयतु इंद्रः यस्मिन्नूर्मौ वसुभिः देवैः सह मादयाते मद्येत अ
द्य अस्मिन् दिने देवयंतः देवकामा वयं वः युष्मदीयं तमूर्मिं अश्याम प्राप्नुयाम ३ शतपवित्रा इति शतपवित्राः बहूनिप
वित्राणि यासां ताः स्वधया स्वकार्यभूतेनान्नेन मदंतीः ... देवीः द्योतमानाः आपः देवानां इंद्रादीनां पाथः
स्थानम् अपियंति प्रविशंति ताः तादृश्यः आपः इंद्रस्य ... निव्रतानि ... कर्माणि न मिनंति न हिंसंति उत्सादयंति
हे अध्वर्यवः यूयं सिंधुभ्यः ताभ्यः अद्भ्यः घृतवत् उपस्तरणाभिधारणलक्षणाज्ययुक्तं हव्यं पुरोडाशादिकं हविः जु
होतन जुहुत ४ याः सूर्य इति सूर्यः देवः याः आपः रश्मिभिः स्वकीयैः किरणैः आततान विस्तारयति स्वरश्मिभिः उद
कसारमादाय वर्षति इत्यर्थः याभ्यः अद्भ्यः ऊर्मिं गमनमार्गं गातुं मेघेभ्यः निर्गमनसाधनं मार्गं इंद्रोपि अरदत् वज्रेण मेघा
न्नत्वा उत्पन्नं प्रकटितवान् हे सिंधवः ... नः अस्मभ्यं धातन धारयत हे देवाः यूयं पात स्वस्तिभिः सदा नः॥
॥इति पंचमस्य चतुर्थे चतुर्दशो वर्गः॥ ॥ऋभुक्षण इति चतुर्ऋचं षट्चत्वारिंशं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः ऋभवो देव
ता अंत्याया विकल्पेन विश्वे देवा देवता १ ऋभुक्षण इति ऋभुक्षा इति ऋभूणां ज्येष्ठस्य। वाजा इति तु कनिष्ठस्य अत्र
ऋभुक्षणो वाजा इति बहुवचनेन ऋभवस्त्रयोऽप्युच्यंते हे ऋभुक्षणः वाजाः नरः नेतारः मघवानः धनवंतः एवंभूताः हे ऋभ
वः यूयं अस्मे अस्मासु सुतेन सुतस्याभिषुतेन सोमेन मादयध्वं तृप्ताः भवत न संप्रसर्थे इदानीं यातां गच्छतां वः युष्म
दीयाः ऋतवः कर्मणां कर्तारः विभ्वः विभवः समर्थाः अश्वाः अर्वाचः अस्मदभिमुखाः नर्यं नराईं रथं युष्मदीयं आवर्त
यंतु २ ऋभुर्ऋभुभिरिति हे ऋभवः ऋभुभिः युष्माभिः वयं ऋभुः उरु भवन् ऋभवः संतः विभुभिः युष्माभिः विभ्वः विभवस्त्र
संतः शवोभिः शवांसि बलानि वः शवसा युष्मदीयेन बलेन अभिस्याम अभिभवेम ... वाजसातौ संग्रामे वाजः एतत्संज्ञ
कः ऋभुः अस्मान् अवतु पालयतु अपि च युजा सहायभूतेन इंद्रेण वृत्रं शत्रुं वयं तरुषेम हननाय प्राप्येण ऋभवो पिइं

133 / 1915

उ शो वर्गः॥ ॥आ मां मित्रेति चतुर्ऋचं सप्तदशं सूक्तं वसिष्ठ ऋषिः चतुर्थ्यतिजगती त्र्यूहेन शाक्वरी वा आदितः तिस्रः ज
गत्यः प्रथमा मैत्रावरुणी द्वितीया आग्नेयी तृतीया वैश्वदेवी चतुर्थी गंगादिनद्यो देवता का १ आ मां मित्रावरुणेति हे मित्राव
रुणा मित्रावरुणौ युवां इह अस्मिन् लोके मां अरक्षतं अभिमुख्येन पालयतं कुलायिन् कुलायं स्थानं तत्कुर्वन् विश्वय
न् विशेषेण वर्धमानं विषं नो अस्मान् आभिमुख्येन मा आगन् मा आगच्छतु तथा अजकावं रोगविशेषं तद्वत् दुर्दृशीकं दुर्दर्श
नं विषं तिरोदधाति तिरो धत्तां [illegible] त्सरुः सर्पः मां पद्येन पादभवेन रपसा शब्देन मा विदत् न जानातु २ यद्वि
जामन्निति यत् विषं [illegible] वि आमन् विविधजन्मनि परुषि वृक्षादीनां पर्वणि भुवत् उद्भवेत् यच्च विषं अष्ठीव
तो जानुनी कुल्फौ गुल्फौ च परि दिहत् उपचितं करोति अग्निः देवः शोचन् दीप्यमानः सन् इतः अस्मात् जनात् तद्वि
षं अपबाधतां अपहंतु मा मां ३ यच्छल्मलाविति यद्विषं शल्मलौ वृक्षे भवति यद्विषं नदीषु तत्र स्थासु अप्सु प्रादु
र्भवति परीतिपं चम्यर्थे वीरुद्भ्यः ओषधीभ्यः सकाशात् यद्विषं जायते विश्वे सर्वे देवाः तद्विषं इतः अस्मात् जनात् निःशे
षेण सुवंतु प्रेरयंतु मा मां ४ याः प्रवत इति या नद्यः प्रवतः प्रवणदेशं गच्छंत्यः या निवतः नीचैर्गच्छंत्यः उद्वतः याः ऊर्ध्वं
गच्छंत्यः उदन्वतीः उदकयुक्ताः अनुदकाः उदकरहिताश्च याः नद्यः पयसा उदकेन पिन्वमानाः विश्वं आप्याययंत्यः दे
वीः द्योतमानाः ताः ताः नद्यः अस्मभ्यं अशिपदाः शिपदं नाम रोगविशेषः तं न कुर्वंत्यः सत्यः शिवाः कल्याणा भवंतु
अपि च सर्वाः ताः नद्यः अशिमिदाः अहिंसाप्रदा भवंतु॥ ॥इति पंचमस्य चतुर्थे सप्तदशो वर्गः॥ ॥आदित्यानामि
ति त्र्यृचं अष्टादशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः आदित्याः देवता १ आदित्यानामिति आदित्यानां अदितेः पुत्राणां
अवसा रक्षणेन नूतनेन सर्पः नूतनेन अद्यतनेन शंतमेन सुखतमेन शर्मणा गृहेण सक्षी
महि वयं संगच्छेमहि तुरासः त्वरिताः आदित्याः श्रोणमाणाः अस्मदीयानि स्तोत्राणि शृण्वंतः यज्ञं यष्टारं इमं जनं अना
गास्त्वे अनपराधत्वे अदितित्वे अदीनत्वे धरधत्तु स्थापयंतु २ आदित्यास इति आदित्यासः अदितेः पुत्राः आदित्याः देवाः

वे॰भा॰चं॰
४७

आदितिः तेषां माता अदितिः शयेन ऋजवः मित्रः अर्यमा वरुणश्च एते त्रयः रजिष्ठाः रक्षिकाः माहयंतां तत्साः संतु भुवनस्य सर्वस्य
गोपाः गोपाः रक्षकाः एवंभूता देवाः अस्माकं संतु अस्माकमेव रक्षका भवंतु इत्यर्थः अद्यास्मिन् दिने अस्माकं अवसे
रक्षणाय सोमं अस्माभिरभिषुतं पिबंतु २ आदित्या विश्व इति आदित्याः अदितेः पुत्राः विश्वे सर्वे द्वादशसंख्याका मरुतः
विश्वे मरुतश्च एकोनपंचाशत्संख्याकाः विश्वे देवाश्च विश्वे ऋभवश्च इंद्रः अग्निः अश्विना अश्विनौ च एवंभूताः ये दे
वाः तुष्टुवानाः अस्माभिः स्तूयमानाः ते देवाः यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य चतुर्थे अष्टादशो वर्गः॥ ॥
आदित्यासइति त्र्यृचं एकोनविंशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप्छंदः आदित्या देवता १ आदित्यासइति हे आदित्यासः आ
दित्याः देवाः अदितयः असंजनीयाः स्याम भवेम देवत्रा देवेषु वसवः वासकाः हे देवाः युष्मदीयं पूः पालनं मर्त्यत्रा मनुष्ये
षु अस्माकं भवतु हे मित्रावरुणा॰ मित्रावरुणौ सनंतः युवां संभजंतः वयं सनेम युवाभ्यां दत्तधनं संभजेमहि हे द्यावापृथिवी॰ द्यौ
युवयोः प्रसादवशं भवंतः समृद्धिमंतः स्याम २ मित्रस्तन्न इति मित्रः वरुणः अहर्निशाभिमानिनौ देवौ एतद्यथा स
र्वे आदित्याः अस्मभ्यं शर्म सुखं मामहंत ददतु गोपाः विश्वस्य रक्षकाः ते देवाः तोकाय अस्मदीयाय पुत्राय तनया
य हे देवाः वसवः युष्मदीयाः वयं अन्यजातं अन्येनोत्पादितं एनः पापं मा भुजेम मा भुक्तवंतः
भूयास्म यत्कर्म हे देवाः वसवः येन कर्मणा चयध्वे यूयं अस्मान् नाशयत तत्तादृशं कर्म वयं मा कर्म मा कार्ष्म॥
स्मान् हे वसवः देवाः यत् येन तु परिश्रमेण कर्मणा चयध्वे अंगिरसः ऋषयः इयानाः सवितारं याचमानाः सवितुः देवस्य सव
॥ ३ तुरण्यव इति तुरण्यवः ... महान् पिता च वसिष्ठस्य पितृभूतः वरुणः विश्वे सर्वे देवाश्च
पितरो ... अस्मान् सुष्ठु सेवयंत॥ ॥इति पंचमस्य चतुर्थे एकोनविंशो वर्गः॥ ॥ ४७
सम्मनसः सुमनसः ... ॥ प्रद्यावायज्ञैरिति नवविंशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप्छंदः द्यावापृथिवी देवता १ प्रद्यावायज्ञैरिति यज्ञैर्यजनीयैः
प्रद्यावापृथिवी इति ... शंसामि ... ऋतावरी ... सहितः ... इह
इह सीदत ... द्यावापृथिवी॰ ... स्तोमैः ...

135/1915

इदं सर्वं ... पूर्वे ... महत्वे ... देवपुत्रे देवाः पुत्राः ययोः ते ते विदिते ... द्यावापृथिव्यौ पूर्वे पुरातनाः क
वयः गृणंतः स्तुवंतः पुरोहितेषु पुरस्तात् स्थापयामासुः २ प्रपूर्वजे इति हे अस्मदीयाः स्तोतारः यूयं नव्यसीभिः नवतरा
भिः गीर्भिः स्तुतिभिः ऋतस्य यज्ञस्य सदने स्थाने पूर्वजे अपूर्वं प्रजाते पितरा पितरौ विश्वस्य मातापितृभूते द्यावापृ
थिव्यौ प्रकृष्टं पुरस्कुरुत प्रसक्तः हे द्यावापृथिवी॰ द्यौः युवां दैव्येन देवसंबंधिना जनेन सह नः अस्मान् आभि आया
तं आगच्छतं किमर्थं युवयोः वरूथं अस्माभिः वरणीयं महि महत् यत् धनमस्ति तिरोधः तद्धनं अस्मभ्यं दीयतामित्यर्थः
३ उतो हिवामिति उतो हि अपि च खलु हे द्यावापृथिवी॰ द्यौः युवयोः स्वदासे शोभनहविर्दानाय यजमानाय देयानि पु
रूणि बहूनि रत्नयेयानि रमणीयानि धनानि संति भवंति तेषां मध्ये यद्धनं अस्कृधोयु अन्हसं अनल्पं असद्भवेत् तद्धनं अस्मे
अस्मभ्यं धत्तं प्रयच्छतं हे द्यावापृथिव्यौ यूयं युवां नः अस्मान् सर्वदा स्वस्तिभिः कल्याणैः पात पालयत॥ ॥इति पंचमस्य
चतुर्थे विंशो वर्गः॥ ॥वास्तोष्पतिरिति त्र्यृचं एकविंशं सूक्तं वसिष्ठः ऋषिः त्रिष्टुप्छंदः वास्तोष्पतिः देवता १ वास्तोष्प
त इति हे वास्तोष्पते गृहस्य पालयितः देव त्वं अस्मान् त्वदीयान् स्तोतॄन् प्रतिजानीहि प्रबुध्यस्व तदनंतरं नः अस्मा
कं स्वावेशः शोभननिवेशः अनमीवः अरोगकृत् भव किंच वयं त्वां यत् धनं ईमहे याचमहे तद्धनं नः अस्मभ्यं जुषस्व प्रय
च्छ अपि च नः अस्माकं द्विपदे पुत्रपौत्रादि जनाय शं सुखकरो भव चतुष्पदे गवाश्वादिपशवे शं सुखकरो भव २ वास्तोष्प
त इति हे वास्तोष्पते देव त्वं नः अस्माकं प्रतरणः प्रवर्धकः गयस्फानः अस्मदीयस्य धनस्य प्रवर्धकः एधि भव हे इंदो सोम
वत् अह्लादक ते तव सख्ये सखित्वे गोभिः पशुभिः अश्वेभिः अश्वैश्च सहिताः अजरासः जरारहिताः स्याम भवेम पिते
व पुत्रान् रक्षति तथा सखिभिः नः अस्मान् प्रति जुषस्व सेवस्व ३ वास्तोष्पत इति हे वास्तोष्पते देव शग्मया सुख
कर्या रण्वया रमणीयया गातुमत्या धनवत्या तेन या देव तया संसदा स्थानेन सक्षीमहि वयं संगच्छेमहि त्वमपि क्षेमे प्राप्त
स्य रक्षणे उत अपि च योगे अप्राप्तस्य प्रापणे नः अस्माकं वरणीयं धनं पाहि रक्ष हे वास्तोष्पते यूयं त्वं नः अस्मान् सदा सर्व

ऋ॰ भा॰ ५॰
४४

स्वस्तिभिः [illegible] पालयत हि॥ ॥इति पंचमस्य चतुर्थे एकविंशो वर्गः॥ ॥अमीवहेत्यष्टर्चं द्वितीयं सूक्तं वसिष्ठस्य
र्षेः आद्या गायत्री द्वितीया [illegible] चतुष्पदा बृहती [illegible] गायत्रीस्तः अनुष्टुभः [illegible] वास्तोष्पतिर्देवता [illegible]
[illegible]
[illegible] वास्तोष्पते [illegible] १
[illegible] रूपाणि आविशन् प्रविशन्
[illegible] २ यदर्जुनेति हे अर्जुन [illegible] सारमेय [illegible] देवस्तुत
[illegible] अस्मात्
[illegible] उपविष्टं [illegible]
[illegible] ३ स्तेनं रायेति हे पुनःसर सारमेय [illegible] सरतो [illegible]
[illegible] तं [illegible] अस्मान् किं
[illegible] ४ सं [illegible] सारमेय [illegible]
[illegible] ०
[illegible] आ [illegible] ४४
[illegible] ५ [illegible]
[illegible] तानां [illegible]
[illegible] आनंसयामि

लं भवति तथा इमे सर्वे जनाः निश्चलाः भवंतीत्यर्थः ७ सहस्रशृंगः सहस्रकिरणः वृषभः कामानां वर्षिता यः समुद्रा
त् अंतरिक्षात् उदाचरत् उदागच्छति सहस्येन अभिभवित्रा तेन सूर्येण वयं स्तोतारः जनान् सर्वान् निस्वापयामः
स्वापयामः ८ प्रोष्ठे शया इति प्रोष्ठे शयाः नार्यः स्त्रियः प्रोष्ठेशयाः अंगनेशयानाः वह्येशयाः वह्यं वहनं
तस्मिन् शयानाः याः तल्पशीवरीः तल्पेशयानाः याः स्त्रियः पुण्यगंधाः मंगलगंधाः ताः तादृशीः सर्वाः स्त्रीः स्वापयामसि
स्वापयामः॥ ॥इति पंचमस्य चतुर्थे द्वाविंशो वर्गः॥ ॥इति सप्तमे मंडले तृतीयोऽनुवाकः॥ ॥चतुर्थेऽनुवाके पंच
दश सूक्तानि तत्र क ईं व्यक्ता इति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं मरुतो देवता आद्या एकादश द्विपदा विराट्
विराजः शिष्टाः त्रिष्टुभः १ क ईं व्यक्ता इति व्यक्ताः कांतियुक्ताः नरः नेतारः सनीळाः समानौकसः रुद्रस्य महादेवस्य पु
त्राः मर्याः नृभ्यो हिताः अथ अपि वा स्वश्वाः शोभनवाहाः ईं इमे एवंभूताः के मरुतः २ नकिर्ह्येषामिति एषां मरुतां
जन्मानि जन्मानि नकिः हि वेद कश्चिदपि न खलु जानाति ते तादृशाः मरुतः मिथः परस्परं अभि जन्मे रुद्रपृश्निभ्यां सकाशा
त् प्रादुर्भूतं स्वकीयं जन्म अंग विद्रे स्वयमेव विदंति ३ अभि स्वपूभिरिति मरुतः स्वपूभिः स्वकीयैः पवनैः संचरणैः स्वय
मेव संचरंतः मिथः परस्परं अभिवपंत संगच्छंते अपि च वातस्वनसः वायुवत् स्वनंतः शब्दायमानाः श्येनाः गमनशी
लाः अस्पृध्रन् परस्परं रूपशोभादिभिः स्पर्धंते ४ एतानि धीर इति धीरः धीमान् आश्वलायनः निण्यानि ण्या
निर्हितवर्णानि एतानि सहस्रकानि गूढानि चिकेत आनीयात् मही महती पृश्निः मरुतां जननी यत् यानि मरुद्रत्ना
कानि गूढानि ऊधः ऊधनि अंतरिक्षे भार बभार एतानि चिकेतेति पूर्वेण संबंधः ५ सा विट् सुवीरेति सा विट् सा प्र
जा मरुतः परितः मरुद्भिः हेतुभिः सनात् चिरात् सहंती शत्रून् अभिभवंती नृम्णं धनं पुष्यंती लभंती सुवीरा
शोभनपुत्रपुत्रकाऽस्तु ६ यामं येष्ठा इति यामं यातव्यं गंतव्यं प्रदेशं येष्ठाः यातृतमाः अतिशयेन गंतारः शुभा
अलंकारेण शोभिष्ठाः अतिशयेन शोभायुक्ताः श्रिया कांत्या संमिश्लाः संगच्छमाना ओजोभिः बलैः उग्राः उद्गूर्णाः एवं

137/1915

णक्ता: भवंतीति शेषः ७ उपंबइति हेमरुतः वः युष्माकं ओजः तेजः उग्रं सत्तु इर्णं भवतु शवांसि युष्मदीयानि बला
नि विश्रापि राणि कैन्विन्नजगतपदर्नं आनिनं वंतु अथापि मरुद्गणः मरुतां संघः सुनिश्चाम्हद्गिमान्भवतु ॥
८ युभीत इति हेमरुतः वः युष्माकं युषः बलं युष्माः सर्वतः शोभमानं किंचवः मनांसि क्रुध्मी संग्रामेषु शत्रु हनन
र्मं कैपनशीलानि च स्वाः धर्मणी शीघ्रस्य शर्द्दस्य बलवतः युष्मदीयस्य गणस्य ऋष्टिः कृशाशीनां कंपयितुं वेगः सुनि
रेव तुल्ला: सा भासवपाय द्रुमिपरा दसुसाद यति एवं वत्तु त्रिधमादस्योसाहकइत्यर्थः ९ सनेम्य स्मादिति सनेमिपु
रातनं इंपरागतां दिद्युं दीप्यमानां वर्णिनालमि त्यर्थः वः युष्मदीय स्मत्तत् अस्मत्तः आयुयोत मा पृथक् कुरुत किंवइद
युष्मत् त्र्विन ज्योत्स्ना दुर्मतिः मा प्रणक् मा प्राप्नोतु १० प्रियावोनामेति हेमरुतः तुराणां यजमानार्थं त्वरया आगच्छतां
वः युष्माकं नाम आतूर्वे आ ह्वयामि पदैः मंत्रपदैः आङ्कमेन तृम्पितासो हे तुष्काः यानशमनाः अस्माकं आह्वानं कृत मि तिशाध्दा
पमा नानि संनः सुपथ सं तुष्टाः भवि ष्यतात् आह्वाना मितिशेषः ॥ इति पंचमस्य चतुर्थे त्रयोविंशो वर्गः ॥ ॥ ११ स्वायु
धा सइति स्वायुधासः शोभना युधाः इष्मिणः गंतारः सनिष्काः शोभनालंकाराः उतापि तत्त्वः स्वकीयानि शरीराणि शुंभमानाः
शब्दमिव शोभयंतः भवंतः एवं भूताः भवंतीत्यर्थः १२ शुचीवइति हेमरुतः शुचीनां शुद्धानां वः युष्माकं शुचीः शुचीनिद्रव्या
णि आनि हव्यानि यज्ञं शुचिनः प्रयच्छमानेभ्यः युष्मभ्यं शुचिं शुद्धं अध्वरं यागं हिनोमि अहं प्रेरयामि ऋतसापः ऋतं उ
दकं स्पृशंतः मरुतः ऋतेन सत्येनैव सत्यमापन् प्राप्नुवन् शुचिजन्मानः शोभनजन्मानाः शुचयः दीप्यमानाः पाव
काः शोधकाः एवं भूताः गच्छंतीत्यर्थः १३ अंसेष्विति हेमरुतः अंसेषु युष्मदीयेषु स्कंधप्रदेशेषु खादयः अलंकार विशे
षाः आयुधा भवंतीति शेषः रुक्माः रुचमानाः सु राजः युष्मदीयेषु स्कंधप्रदेशेषु युष्मदीयं वक्षः उरः प्रदेशं उपश्रि
ता याभिः आभिताः भवंति किंच हे मरुतः वृष्टिभिः वर्षैः साकं विद्युतः विद्युता द्वितीयया रुचानाः रोचमानाः तादृशभूताः यू

139
1915

यं आयुधैः मे धनाउनैः स्वधां उदकं अनुयच्छमानाः प्रयच्छंतः विरमयेति शेषः १४ प्रवुध्न्यावइति हेमरुतः वः युष्मदीया
न युष्माः अंतरिक्षे भवानि महांसि तेजांसि प्रेरते प्रकर्षेण गच्छंति किंच हे प्रयज्यवः प्रकर्षेण यष्टव्याः मरुतः यूयं धनाम
नि हरतानि तिरस्तं वर्षयंते हेमरुतः यूयं सहस्रियं सहस्रसंख्याकं दम्यं दमे गृहे भवं गृहमे धीयं गृहमेधि गुणस्य युष्म
दीयं देयं एतं एतादृशं भागं युष्मभ्यं सेवध्वं एतं भागं सहस्रियमिति कथं महत्तया भ्रूयते पावदेकादेवता कामयते या चंद
ह्मेनाय सतुर्लिः प्रयत्नेनाहि तर सियतावदेव स्यात् यावज्जुहोतीति १५ यदि स्तुतस्येति वाजिनः हविर्लक्षणान्नवंतः वि
प्रस्य मेधाविनः मम संबंधिनि हविः मन्न हविषा युक्ते स्तोत्रे क्रियमाणे सति हे मरुतः यूयं यदि यस्मात् कारणात् स्तुत
स्य स्तुतं मदीयं स्तोत्रं इत्थाइत्यं अनेन प्रकारेण अधीथ अवगच्छथ तस्मात् कारणात् हे मरुतः यूयं सुवीर्यस्य शोभन
पुत्रोपेतस्य रायः रायं धनं मक्षु शीघ्रं धात दत्त न राया अराति शत्रुः सन् अन्यः जनः यं रायं न वृत्वित् आदभन् नेवा मिह
न्यात् तद्धनं अस्मभ्यं दत्तेति संबंधः ॥ ॥ इति पंचमस्य चतुर्थे चतुर्विंशो वर्गः ॥ ॥ अत्यासोन इति अत्यासो न अत्याः स
तत गामिनो अश्वा इव स्वः स्वः ऋच्छंतः यतहर शोभमर्याः यत्सो त्सव स्यद्रष्टारो मनुष्याः इव सुभयं तत्रोमनं हर्म्येष्ठाः
हर्म्ये स्थिताः शिशवो न कुमारा इव शुभ्राः शोभमानाः वत्सासो न वत्सा इव प्रक्रीळिनः प्रकर्षेण क्रीडमानाः ते मरुतः प
योधाः पयसः उदकस्य धारयितारः भवंति १७ दशस्यंत इति मरुतः नः अस्मभ्यं दशस्यंतः धनानि प्रयच्छंतः सुमेके
सुरूपे रोदसी द्यावापृथिवी वरिवस्यंतः स्वमहिम्ना पूरयंतः मृळंतु मृळयंतु अस्मान् स्तुस्तुकान् कुर्वंतु अपि च हे
वसवः वासकाः मरुतः गोहा गवां मेघस्थानां उदकानां भेदकाः नृहा नृणां शत्रूणां हंता वः युष्मदीयं वधः आयुधं आ
रे अस्मत् दूरे भवतु यूयमपि सुम्नेभिः सुम्नैः सुखैः सह अस्मे अस्मासु नमध्वं स्वयमेव अभिमुखाः भवंतु १८
आवो होता इति हे मरुतः सत्तः होता स्तोनिषण्णः अस्मदीयो होता सवार्णीसवर्णीगुमन शालं रा निवदीयं दानं गृणानः
स्तुवन् वः युष्माना आ ह्वयति वः आह्वयति हे वृषणः कामानां वर्षितारः मरुतः यो होता ईवतः गच्छतः आपाः रवतो

वे·भा·पं·
५६

यजमानस्य गोपाः अभिष्टुप्यदाघ्ननिमित्तेन रक्षको भवति सहोता अहयावी मायारहितः सन् वः युष्मान् उक्थैः
स्तोत्रैः हवते स्तौति १९ इमे तुरमिति इमे ईदृशाः मरुतः तुरं कर्मसु त्वरितं यजमानं रमयंति क्रीडयंति इमे मरुतः
सहः सहसा बलेन सहस्वः बलवतः अनान् आनमंति इमे मरुतः वनुष्यतः हिंसकात् पुरुषात् शंसं शंसकं स्तोतारं नि
पांति पालयंति अररुषे अदात्रे गुरु महत् द्वेषः आ दधंति २० इमे रध्रं चिदिति इमे मरुतः रध्रं चित् स
मृद्धमपि जनं जुनंति प्रेरयंति भृमिं चिद्भ्रमणशीलमपि विरक्तं जुषंति प्रेरयंति वसवः देवाः युष्मान् यथा जुषंत तको
मपेरत हे वृषणः कामानां वर्षितारः ते यूयं तमांसि अपबाधध्वं नाशयत अपि च अस्मे अस्मभ्यं विश्वं बहुलं तोकं पु
त्रं तनयं पौत्रं च धत्त प्रयच्छत॥ ॥इति पंचमस्य चतुर्थे पंचविंशो वर्गः॥ ॥मा वो दात्रादिति हे मरुतः वः युष्माकं
दात्रात् दानात् मा निरराम वयं मा निर्गमाम यूयं अस्मान् परित्यज्य अन्येभ्यो धनं मा ददत सर्पः हे रथ्यः रथवंतः मरुतः
विभागे युष्मदीयस्य धनस्य विभागे पश्चात् मा दघ्म वयं पश्चात् भागिनो मा भूम यूयं प्रथमं अस्मभ्यमेव दत्त नियामकस्य
हे स्पार्हे स्पृहणीये वसव्ये वसुनि धने नः अस्मान् आ भजतन आभागिनः कुरुत हे वृषणः कामानां वर्षितारो मरुतः वः युष्मा
कं सुजातं शोभनजन्मनं यत् वसु ईं विद्यते तस्मिन् धने आभागिनः कुरुत इति संबंधः ईं पूरणः २२ सं यद्धनंतेति यत्
यदा शूराः विक्रांताः जनासः जनाः यह्वीषु महतीषु ओषधीषु विक्षु प्रजासु धनेन आसु मन्युभिः कोपैः संहनंत संगच्छं
ते अध अथ तदानीं हे रुद्रियासः रुद्रपुत्राः मरुतः यूयं पृतनासु युद्धेषु अर्यः अरेः शत्रोः सकाशात् नः अस्माकं त्रातारो भ
वत रक्षका भवत स्म पूरणः २३ भूरि चक्रेति हे मरुतः यूयं भूरि बहूनि पित्र्याणि अस्मत्पितृसंबंधीनि धनदानादी
नि कर्माणि चकर्थ कृतवंतः यानि युष्मान् पुरा चित् पूर्वकाले पित्र्याणि युष्माकं उक्थानि प्रशस्यानि यायानि कर्माणि शस्यंते प्रख्याप्यं
ते तानि चक्रेति संबंधः पृतनासु युद्धेषु उग्रः उद्गूर्णबलः मरुद्भिः युष्माभिः सह साढा शत्रूणामभिभविता भवति मरु
द्भिः इत् मरुद्भिः युष्माभिः एव स्तुतिभिः अर्वा स्तोता अभिगंता स्तोता वाजमन्नं सनिता संभक्ता भवति २४ अस्मे वीर

५६

141/1915

इति हे मरुतः अस्मे अस्माकं वीरः पुत्रः शुष्मी अस्तु बलवान् भवतु असुरः प्रज्ञावान् यः जनानां शत्रूणां विधर्ता विधार
कः येन पुत्रेण वयं सुक्षितिं येषु सुक्षिता साधु अपः आप्नुवंतः शत्रून् तरेम हिंसेम स पुत्रः बलवान् अस्त्विति पूर्वेण अन्वयः अ
भ वा पि च वः युष्मदीयाः वयं स्वमोकः आ सदने अभिस्याम अभितिष्ठेम २५ तन्न इंद्र इति नः अस्मदीयमिदं स्तोत्रं इंद्रः
वरुणः मित्रः अग्निः आपः ओषधीः ओषधयः वनिनः वनस्पतयः जुषंत जुषंतां सेवंतां वयं च मरुतां उपस्थे उपस्थाने वर्तमा
नाः शर्मन् शर्मणि सुखे स्याम भवेम यूयं पात नः स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य चतुर्थे षड्विंशो वर्गः॥ ॥मध्वो व इति स
प्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुतो देवता १ मध्वो व इति हे यजत्राः यजनीयाः मरुतः वः युष्मदीयं मारुतं
मरुत्संबंधि नाम नामधेयं मध्वः मधुनः मादयितारः स्तोतारः यज्ञेषु यागेषु शवसा बलेन मदंति प्रकर्षेण स्तुवंति
ये मरुतः उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यौ अपि एजयंति कंपयंति किंच उत्सं मेघं पिन्वंति वर्षयंति उग्राः उद्गूर्णाः
यत् ये मरुतः अयासुः यांति सर्वत्र गच्छंति तेषां मरुतां युष्माकं नाम प्रमदंतीति पूर्वेणान्वयः २ निचेतार इति ये मरुतः ग
णं नं स्तुवंतं जनं निचेतारो हि मृगयमाणा भवंति खलु अपि च यजमानस्य मन्म अभिमतं कामं प्रणेतारः भवंति प्रस
न्नाः हे मरुतः यूयं पिप्रियाणाः प्रीयमाणाः संतः अद्य अस्मिन् दिवसे अस्माकं विदथेषु यज्ञेषु वीतये सोमस्य भक्षणा
य बर्हिः बर्हिषि कुशमये आ सदत आसीदत उपविशत ३ नैतावदन्य इति इमे ईदृशाः मरुतः यथा यस्य रिमाणं ध
नादिकं हरति अन्ये मरुतः अपि रिक्ताः देवाः एतावत् नादिकं न रदपुरित्यर्थः तेन रुक्मैः रोचमानैः आयुधैः आभरणैः स्व
कीयाभिः तनूभिः आत्मीयैः केवलैः रंगैश्च भ्राजंते सर्वदा भासंते अपि च रोदसी द्यावापृथिव्यौ पिशानाः प्रकाशयंतः वि
श्वपिशः आसदीतयः एवं सहिताः मरुतः शुभे शोभायै समानं सदृशरूपं अंजि आभरणं आ अंजते स्वकीयावयवेषु अ
भिव्यक्तीकुर्वंति कमिति पूरणः ४ ऋधक् सा व इति हे मरुतः वः युष्मदीया सा प्रसिद्धा दिद्युत् हेतिः ऋधक् अस्मत् अस्मा
न् पृथक् भवतु यत् यच्च पिपयं वः युष्माकं आगः अपराधं पुरुषता पुरुषतया मानुष्यत्वेन कराम करवाम हे यजत्राः

वे·भा·४·
४०

पंजनीमाः मरुतः वोयुष्मदीयानां स्वांद्विपुलि अविर्दैषदपिमागस्य निवृत्ता अनवत्तमा अतिशयेन अन्नप्रदेत्यर्थः वः
युष्मदीयास्तुमतिः अस्तुपहस्तुरिः अस्त्रे अस्माकं अस्तु ५ कृते चिदिति अत्रा स्विन् कृते चिद् अस्मदीये यज्ञकर्मण्येव
मरुतोरणंतरमंतांकीळवाः मरुतः अनवद्यास अभिहिताः शुचयः दीप्तियुक्ताः पावकाः शोधकाः एवंभूताइति किं चहेम
रुतः यजत्राः यजनीयाः यूयं अस्मान् रक्षतिभिः अहुमहस्तुरिभिः प्रावनमकर्षेण पालयतन पान अस्मान्वाजि
भिः वाजैः अन्नैः युष्मत्सेपोयार्वं प्राणिरत प्रवर्धयत ७ उत स्तुतासइति उतापि च स्तुतासः एवं अस्माभिः स्तुताः म
रुतः हवीषिजंतुसप्तपंतुकीळवाः विश्वेभिः विश्वैः नामभिः वरैः सहिताः परस्ये नारः प्रस्थकाः हे मरुतः नः अस्मद्
यायै प्रजायै संततये अमृतस्य अमृतं उदकं दात इत तयाराय हविषः दातुः यजमानस्य स्तुतास्तुता निशोमनये
ष्याभिः याभिः स्त्रानिनिपमतउद्धिरत प्रयच्छत संर्थः ७ आस्तुतासइति हे मरुतः स्तुतासः एवमस्माभिः स्तुताः विश्वेभिः
विश्वैः पंक्तीऊताः रक्षा सहिताः सूरीन् स्तोतृन् अच्छ अभिलक्ष्य सर्वतातीयज्ञे आजिगात आगच्छत ये मरुतः त्मना
आत्मनैव नः अस्मान् शतिनः शत संख्याकान् वर्धयंति यापयं पुनःपोषाः हितिः शतिनो भवेमतथावर्धयंतीत्यर्थः
ति यूयं ओ मिमालानिपूर्वेणसंबंधः एवंभूताः मरुतः यूयं स्वस्तिभिः कल्याणैः सदा नः पात सर्वदा अस्मान् पालयत
॥ इतिपंचमस्य चतुर्थे सप्तविंशो वर्गः॥ ॥प्रसाकमुक्षइति पञ्चदशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप् छंदः मरुतो दे
वता १ प्रसाकमुक्षइति हे ओतारः स्तूयं साकमुक्षे सतत व गणाय मरुत्समूहाय प्रार्चत स्तोत्रं प्रोच्चारयततयः म
रुद्गणः दैव्यस्य देवसंबंधिनः आग्नः स्वर्गस्य स्वस्तुविषः अन्यापूर्वद्दि मानः ... भवति नस्मै गणायेति पूर्वेण संबंधः उ ४७
तापि च मरुतः महित्वा स्वकीयेन महत्त्वेन सहिताः रोदसी द्यावापृथिव्यौ नेरंतिभजंति ... मृतेः अवंशात्
... नितातिवना ... ऋतेनस्तेत्र ... २ जनूश्चिदिति हे तीमासः भीमाः तुविमन्यवः प्रवृद्धमतयः अयासः गं

143
1911

तारः हे मरुतः वः युष्माकं जनूः जन्म तेष्येण दीप्तेन रुद्रेण वनवेति शेषः उतापि च ये मरुतः महोभिः तेजोभिः ओजसा
बलेन च प्रसंति प्रभवंतिते यावः युष्माकं याम यामनि गमने विश्वः सर्वः स्वर्दृक् स्वर्गस्य द्रष्टा सर्वः जीवसमूहः भयते वि
भेति चित्पूरणः ३ बृहद्वय इति हे मरुतः यूयं मघवद्भ्यः हविर्लक्षणान्नवद्भ्यः अस्मभ्यं बृहत् वयः अन्नं दधातप्रयच्छ
त नः अस्मदीयां सुष्टुतिं शोभनं स्तोत्रं जुजोषन् इत् सेवतामेव गच्छतः मरुद्भिः प्राप्तः अध्वा मार्गः जंतुं प्राणिनं न वि ति
राति नाहिनस्ति उत एते नाप्याय पतेव नयान अस्मान् स्पार्हाभिः स्पृहणीयाभिः ऊतिभिः रक्षाभिः प्रतिरेत प्रवर्धयते ४
युष्मोतो विप्रइति हे मरुतः युष्मोतः युष्माभिः रक्षितः विप्रः स्तोता वाजी अन्नवान् शतस्व्योपेत धनवान् भवति युष्मोतः यु
ष्माभिः रक्षितः अर्वा अभिगंता सहुरिः शत्रूणामभिभविता स्तोता सहस्री सहस्रधनवान् भवति युष्मोतः युष्माभि
र्क्षितः संम्राट् संघात्म युक्तो भवति उतापि च वृत्रं शत्रुं हंति युष्मद्दत्तः हि नस्ति हे धूतयः कंपयितारो मरुतः वः यु
ष्माभिः दत्तं तत् प्रक्षिद्गुरे गंधनं प्रास्तु प्रभूतं भवतु ५ तां आरुद्रस्येति मीळ्हुषः कामानां वर्षितुः रुद्रस्य पुत्रान् तान् म
रुतः आविवासे अहंहोता परिचरामि ते मरुतः नः अस्मभ्यं कुवित् बहु इत्युनः पुनः प्रयःमंसंते नवंतां अभिमुखा भवंतु स
त्वर्जं नहितेन अप्रकाशेन पत्र एनः एनसा जिह्मा क्षिरे कुष्मेषु आविः प्रकाशेन यत् एनः एनसाच जिह्मा क्षिरे पुराणां क्षि
प्राणां मरुतां संबंधिन उमयमेनः अपराधं अवईमहे स्तोत्रेण वयमपनयामः ६ प्रसावाचीति मघोनां मघवधनवतां
मरुतां संबंधिनी सुष्टुतिः यशोभनास्तुतिः अस्मिन् सूक्ते कृतासा अस्माभिः प्रवाचि प्रोक्ता अस्तीत् मरुतः इदं हव्यं स्तुतं
जुषंत से वंतां हे वृषणः कामानां वर्षितारः यूयं द्वेषः द्वेष्टांसि शस्त्रं आरात् चित् दूरादेव युयोत अस्मत्तः पृथक्कुरु
त यूयं नः अस्मान् स्वस्तिभिः कल्याणैः सदा सर्वदा पात रक्षत॥ ॥इति पंचमस्य चतुर्थे अष्टाविंशो वर्गः॥ ॥यंत्रायध्व
इति द्वादशर्चं चतुर्थं सूक्तं आद्यात् तीयायं चान्त्यो द्वितीया चतुर्थी षष्ठी सप्तमी सप्तम्यष्टम्ये त्रिष्टुभो नवमी
द्वादश्ये गायत्र्यः मरुद्देवताकाशिष्टा मारुत्यः १ यंत्रायध्वइति हे देवासः देवाः इदमिदं इतो

मयदेवाः यं स्तोतारं त्रायध्वे पालयध्वे पंच स्तोतारं लयय सन्मार्गे प्रापयध्वे हे अग्ने वरुण मित्रार्यमन् मरुतः एवंभूता हे
देवाः तस्मै स्तोत्रे शर्म सुखं संयच्छत दत्त २ युष्माकं देवा इति हे देवाः युष्माकं युष्मदीयेन अवसा रक्षणेन प्रियेऽहनि सर्वे
वां देवानां प्रियतमे सुत्याभिधाने दिवसे ईजानः इष्टवान् जनः रिपुः शत्रून् तरति अतिक्रामति स यजमानः क्षयं स्व
कीयं निवासं प्रतिरते प्रवर्धयति यः यजमानः वः युष्मभ्यं मह्यं महीः महतीः इषः हविर्लक्षणान्यन्नानि वरायवरणीय यूयं म
ध्ये गच्छत अस्मदीयानि अवस्थापानि विस्तारं कुरुते निरोधनं कर्तुं विद्यमानि विशेषेण ददाति अत एव सः स्वकीयं निवासं व
र्धयति सर्वः ३ नहि व इति चरमं चरमः ऋषिः वः युष्माकं मध्ये चरमं चन अपि न हि परिमंसते वर्जयितुं न
शक्नोति किं तु सर्वान् एव युष्मान् स्तौति सर्वः अद्य अस्मिन्नहनि अस्माकं अस्मदीये सुते सोमे अभिषुते सति हे मरुतः का
मिनः सोमं कामयमानाः क्षिप्रं यूयं सर्वांसः सर्वे सोमं पिबत पानं कुरुत ४ नहि व ऊतिरिति हे मरुतः वः युष्मदीया ऊतिः ऊती
रक्षा पृतनासु युद्धेषु न हि मर्धति न हिनस्ति शत्रुभिः कृतां हिंसां न सहते स सर्वः हे नरः नेतारः यूयं यस्मै जनाय अ
राध्वं समाराधयत तं जनं न हि हिंसन्ति संप्रति नवीयसी नवतरा वः युष्मदीया सुमतिः अनुग्रहबुद्धिः अस्माकं अ
स्मान् अभ्यावर्ततां न माहेपिबिपीषवः सोमपानकामाः यूयं मम पितृत्वं प्रति प्रयाण आगच्छत ५ ओ षु घृष्विराधस इति
हे घृष्विराधसः परस्परं हृष्यन्ति संहत्य राधांसि येषां ते हे मरुतः यूयं अंधासि हवींषि सोमलक्षणानि पीतये भक्ष
णाय सुष्ठु उ ओ आगत आगच्छत हि यस्मात् कारणात् हे मरुतः वः युष्मभ्यं इमा इमानि हव्या हवींषि ददे अहं ददामि अतः का
रणात् यूयं अन्यत्र गंतुं मा गच्छत कं पूरणः ६ आ च नो बर्हिरिति हे मरुतः यूयं नः अस्मदीये बर्हिः कुशमये ब
र्हिषि आसदन आसीदत अस्माकं स्पार्हाणि स्पृहणीयानि वसूनि धनानि अस्मभ्यं दातुं नः अस्मान् अविता आगच्छ
त हे मरुतः अस्मिन्यज्ञे सोमस्य सोमात्मके हविषि स्वाहा स्वाहाकारेण मादया
ध्वे मादयध्वं॥ ॥इति पंचमस्य चतुर्थे सप्तविंशो वर्गः॥ ७ ॥सस्वश्चिद्धीति सस्वः अंतर्हिताः मरुतः तन्वः स्वकी

145
1915

याः स्वं गानि शुंभमानाः अलंकरणैः शोभयंतः मरुतः नीलपृष्ठाः असितवर्णाः हंसासः हंसाः इव आपप्तन् आपतंतु आ
गच्छंतु विश्वं शर्धः सर्वो मरुद्गणः मामां अभितः समंतात् निषेद निषेदतु हृष्टांतः सवने अस्मदीये यज्ञे मदंतः तृप्यंतः
रण्वाः रमणीयाः नरोन मनुष्या इव तद्विदूरणैः ८ यो नो मरुत इति हे वसवः वासयितारः मरुतः नः अस्मदी
यानि चित्तानि दुर्हृणायुः अशोभनं क्रोधनशीलः सर्वैः तिरः अज्ञातः सन् अभि जिघांसति आभिमुख्येन हंतुमिच्छति स
जनः द्रुहः पापानां पाशैः वरुणस्य पाशात् अस्मान्प्रति प्रतिमुंचतु सर्व्योपाद्यात् यूयं तं जनं तपिष्ठेन तप्ततमेन हन्मना हननेन
प्रसाधनेन अभिहंत निहिंत ९ सांतपना इति सांतपनाः शत्रूणां संतापकाः हे मरुतः इदं प्रत्यक्षेणोपलभ्यमानं हविः युष्मा
कं कल्पितं मि निरिशाधसः हे रिशादसः रिशातां हिंसकानां अत्तारः यूयं युष्माकं युष्माकं ऊती ऊत्या रक्षया तत्तादृशं हवि जु
जुष्टन सेवध्वं १० गृहमेधास इति गृहमेधासः गृहे क्रियमाणो यज्ञो येषां ते सुदानवः शोभनदानाः हे मरुतः यूयं युष्मा
कं युष्माकं ऊती ऊत्या रक्षया युष्माः आगत अस्मदीयं यज्ञं प्रति आगच्छत हे मरुतः मा अपभूतन अपगताः मा भवत ११
इहेह व इति हे स्वतवसः स्वायत्तबलाः कवयः क्रांतदर्शिनः सूर्यत्वचः सूर्यवर्णाः एवंभूताः हे मरुतः यूयं इहेह इहैव
युष्मदर्थं अस्मदीयं यज्ञं आ आरणे आ आ समंतात् विक्रमयामि १२ त्र्यंबकमिति त्र्यंबकं त्रिलोकस्य मातृभूतं पालकमित्य
र्थः सुगंधिं सुष्ठु व्यापकं पुष्टिवर्धनं यजमानस्य बलं वर्धयितारं एतादृशं रुद्रं यजाम हे वयं यजमानाः जिनः हविर्भिः
पूजयामहे किमर्थं मृत्योः सकाशात् मुक्षीय मुंचेय मामृतात् अमृतात् मोक्षात् नैव मुक्षीय इत्तत्र दृष्टांतः बंधना
त् वृंतात् उर्वारुकमिव उर्वारुकफलमिव तद्यथा ईषत्प्रयत्नेन मुंचन इति तद्वत्॥ ॥इति पंचमस्य चतुर्थे त्रिंशो व
र्गः॥इति चतुर्थाष्टके चतुर्थोऽध्यायः॥ ॥व्याख्याय निगमाभिज्ञः पंचमस्य चतुर्थकं ॥अध्यायं सायणाचार्यः पंचमं व्या
करोत्यथ॥१॥ नमः॥ यदद्य सूर्येति द्वादशर्चं पंचमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः मित्रावरुणौ देवता आद्यायाः सू
र्यो देवता १ यदद्य सूर्येति हे सूर्य देव उद्यन् उदयन् संप्रत्युदयं अद्य अस्मिन् अनुष्ठानकाले अस्मान् अनवः ब्रूया

द्विमित्रिरवृजिनाः अनागाः अनागसः इति एते आदित्याः दूरे विद्वेषु मध्ये भूयाः तदित्यर्थं अदिते आदीन देवदयं देवदाः देवेषु देवानां
मध्ये मित्राय वरुणाय च सम्यगमितं संस्थाम अनागसः भवेम किंच हे अर्यमन् देवानां गणे नः स्तवंतः तव प्रियासः प्रि
याः स्याम २ एष स्य इति हे मित्रावरुणौ एव पुरतः स्थमानः स्यः सर्वैः स्तवसा तेन प्रसिद्धः न चक्षाः नृणां मनुष्याणां द्रष्ट
सूर्यः उत्पेष्यावाप्यपि मीमांसि अभिलक्षत इति अन्तं अंतरिक्षे गच्छन् सर्वैः शोध्यते विश्वस्य सर्वस्य स्थातुः स्थावरस्य ज
गतः जंगमस्य च गोपाः किंच मर्त्येषु मनुष्येषु ऋजु ऋक अनिसकृतानि वृजिनानि पापानि च पश्यन् ३ अयुक्तः स
प्त हे मित्रावरुणौ युवयोः रागम नाय सत्रस्थात् अंतरिक्षात् अंतरिक्षे सप्त सप्त पणि स्वभावात् हरितः हरित व
र्णान् अयुक्त युक्तवान् रथेयाः हरितः इंद्र एनं सूर्यं रिवंच ताः तावीः घृतं घृतवनाः उदकवाः ताः दस्सः सत्यः वहंतिता अयुक्त
धाविता सप्त आमा नित्यं आमानिजो भवन् अभिमाति अन्तराः अःप्राणिभः इ सूर्यः ताः अयुवाः युवां कामयमानोयः
देवः संवदे सम्यक् पश्यति यूपेष गोपूथानीव पूषपाःस्य धा सर्वे यूपं न दवां तरेणाच्यत्र किंच सम्य कूपस्यांति तद्भ
कायान् धामिन भव पश्यति॥ ४ उद्वां पृक्षास इति हे मित्रावरुणौ वां युवयोः अर्यपि एक्षासः अन्नानि वरु पुरोडाश
दीनि मधुमंत माधुर्योपेतानि उदस्थुः संपादितान्यासन् सूर्यम् अनु कं रोचं अर्णः अर्णं अंतरिक्षं आरुहत् आरोह
य केत तद्यपि तद् मनार्य आदित्याः अदितेः पुत्राः देवाः अध्वनः मार्गान् दंतिविलिस्तानि साधयंति केते मित्रः अर्यमा
वरुणश्च नेभयोनि देवाः सजोषाः सजोषसः समानप्रीतयः संतः सः देवः आरुहदिति ५ इमे चेतार इति इमे मित्रः
अर्यमा वरुणश्चयो वृजिनं तस्य पापस्य बहेः प्रभूतस्य चेतारो हंतारः संनिवसंति हि मित्रादयः कृतस्य पशस्य दूरे
णगृहे वर्धतः हविषा क्रतवाव ध्रुः यास्ते राम्भासः क्रतवः अदितेः पुत्राः अदभ्याः अहिंसिताः ६ इमे मि
त्र इति इमे आदित्याः मित्रावरुणश्च हुर्वाणासः हुर्वाणाः जनानि माला अवेतनसंवितन अनुष्ठान विषय ज्ञान रहितम
पि द्वेषैः मायिनः चयति दातारं कुर्वंति अपि कर्तुं सर्वतः संनिवेक्षैः कवेन संहननवंतकमनिष्टपातं नपि वंतन

147
1915

णवंतः अंहोर्यरःकृतानि रक्षित नितरां नयंतः अस्मान् सुपथा शोभन मार्गेण नयंति प्रापयंति अभिमतं पदं॥ ॥इति
पंचमाष्टके पंचमे प्रथमो वर्गः ७ इमे दिव इति इमे मित्रादयः दिवः द्युलोकस्य पृथिव्याश्च संबंधिनः अनिमिषाः अनि
मिषेण सर्वदा विपश्चितः जानंतः कं अवेतसं अज्ञमं नयंति प्रापयंति कर्मणि प्रज्ञामे चित् प्रवणे पि अत्यंत निम्ने पि
द्विरोनरः नद्याः गाधं जालिमपत्तिष्ठन्तत्साम ध्यानि तेम हांतः नः अस्माकं अस्य विष्णितस्य व्याप्तितस्य कर्मणः पारं
पर्यमू पारयंतु नयंतु ८ यद्वो धावादिति यत् शर्मसु स्वंगोपावनूरक्षणे पितं भद्रं स्तकं सं अदितिः अदीनः अर्यमा मित्रः
वरुणश्चैतेम योदेवाः स्कदासे सुदानाय मर्त्याय यछंति प्रयच्छंति तस्मिन्व शर्मणि तोकं पुत्रं तनयं पौत्रं आ सर्वतः दधानाः
धारयंतो वयमपि रात्रस्तः गमनाय स्वरमाणाः देवहेळनं देवानां मित्रादीनां कोपनं मा कर्म मा कार्ष्म ९ अजवेदि मिति हे मि
त्रादयः सः अस्मात् ईरयते रिं यागसाधनं होत्राभिः वाग्रूपाभिः स्तुतिभिः सार्दैं अवयजे तवेद्यां कर्माणि कुर्वन् देवा
न् न स्तुयादित्यर्थः किंच प्राप्नुयात् वरुणश्चतः वरुणेन हिंसितः सः कांश्चित् रिपोः हिंसाः प्राप्नुयादिति शेषः अस्मा
कं अर्यमा देवः द्वेषोभिः द्वेष्टिभिः रक्षः प्रभृतिभिः परिवृणक्तु वर्जयतु उरुं विस्तीर्णं लोकं स्थानं स्कदासे शोभनदा
नाय मर्त्याय प्रयच्छतं हे वृषणौ कामानां वर्षकौ मित्रावरुणौ १० सस्वा ममि द्वृतीति एषां मित्रादीनां समृतिः संगतिः स
स्वः अंतर्हिता नित्यं गूढलेषा दीप्ताय भवति चित् ताहशाः एते अपीश्येन विमूढेन सहसा बलेन सहंते अभि भवंति अ
स्मान् हे घृतन् किंच हे वृषणः अभिमतवर्षकाः मित्रादयः युष्मत् युष्मत्तः भिया भीत्या रेममानाः कंपमानाः भवंति वि
रोधिनः यस्मादेवं तस्मात् दक्षस्य युष्माकं बलस्य महिमा महिम्ना नः अस्माकं मृळत दयां कुरुत चिन्नु हि पूरणे ११
यो राजभ्य इति यः यजमानः राजसु परिवृढस्य कर्मणि सुष्मस्तोत्ररूपाय सुमतिं शोभनां बुद्धिं आप्नोति ददाति कि
मर्थं वा अस्यामस्य साति दाने मित्रे परमस्यो तस्य रायः धनस्य च साती तस्य अर्थः स्तोतुः मस्तुं स्तोत्रं मघवान्
धनवंतः अर्यमादयः सीदंतः सेवंते सविता च तस्य उरुक्षयाय विस्तीर्णनिवासाय स्कथाम शोभन स्थानं च कि

रं कुर्वंति १२ इयं देवेति देव हे अनया स्तुतिमुपसंहरति दैवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेषु इयं पुरोहितिः पुर
स्क्रियापूजा स्तुतिलक्षणा अकारि कृताभूत् तां सविता विश्वानि सर्वाणि दुर्गादुः खानि गंतव्यानि आपदः तिरः तिरस्कु
रुतं तथा कृत्वानः अस्मानपि एतं पारयं तं यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे द्वितीयो वर्गः॥ ॥
उद्वां चक्षुरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः मित्रावरुणौ देवता १ उद्वां चक्षुरिति हे वरुण मित्रावरुणौ दे
वयोः द्योतमानयोः वां युवयोः चक्षुः प्रकाशकं तेजः सुप्रतीकं शोभनरूपं एवं रूपः सूर्यः ततन्वान् तेजो विस्तारयन्
उदेति उद्गच्छति अयोदितः यः देवः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अभिपश्यति स देवः मर्त्येषु प्रवृत्तं मन्युं स्तो
त्रं आ चिकेत आजानाति २ प्र वां स इति हे मित्रावरुणौ वां युवयोः मन्मानि मननीयानि स्तोत्राणि सः प्रसिद्धः विप्रः मेधा
वी ऋतवा यज्ञवान् दीर्घश्रुत चिरकालं स्तोता एवमुक्तलक्षणः वसिष्ठः प्र इयर्ति प्रेरयति यस्य ऋषेः ब्रह्माणि परिवृढानि स्तो
त्राणि हे सुक्रतू शोभनकर्माणौ क्रत्वा समर्थेन कर्मणा अवा यः रक्षथः यस्मै शरदः बहुसंवत्सरान् आ पृणेथे आपूरयथे
स उदियर्ति नपूरणः ३ प्रोरोर्मित्रावरुणेति हे मित्रावरुणा॰ णौ युवां उरोः विस्तीर्णायाः पृथिव्याः अपि प्ररिरिचाथे तथा
ऋष्वात् गुणैः महतः बृहतः स्वरूपतः महतः दिवः द्युलोकादपि प्र रिरिचाथे हे सुदानू शोभनदानौ किंच ओषधीषु विक्षु
प्रजासु च भिन्नप्रतासु यशः रूपं दधाथे धारयेथे किं कुर्वंतः ऋधक् सत्येन यतः विविक्तात् सत्येन गच्छतो जनान् अनिमि
षं अप्रमत्तवधानेन सर्वदा रक्षमाणौ पालयंतौ ४ शंसा मित्रस्येति हे ऋषे मित्रस्य वरुणस्य च धाम तेजः स्थानं शंस स्तुहि
यौ देवयोः शुष्मः बलं रोदसी द्यावापृथिव्यौ सहवर्तमाने महित्वा महत्त्वेन बद्बधे बाधतेपृथक् स्थापयति इयं पृथिवी
इयं द्यौरिति पृथक् करोति अयज्वनां अयष्टॄणां मासाः कालावयवाः अवीराः अपुत्राः एव अयन् यंतु गच्छंतु तद्विप
रीतः यज्ञमन्नाय ग्राथेमतिमान् यष्टा वृजनं बलं प्रतिरात प्रवर्धयतु ५ अमूरा विश्वेति हे अमूराः अमूढौ हे विश्वा व्या
प्ताहे वृषणा वर्षितारौ वां युवां इमाः इमानि स्तुतिः स्तोत्राणि सक्षिपंतु पाःस्तुतिषु चित्रं आश्चर्यं न दद्दशेन दृश्यते न य ५०

149
1915

प सं नप्रूः नाद स्थले युवाभ्यां मद्रि वैतोपि मद्रुतात् अपतेन क्रियमाणमपि स्तोत्रं न चमत्करोति स्पर्धः जनानां अनृता अ
नृता नि वृजिनानि वीनानि दुह्ः हिंस्याः सचंते सेवंते न महतः वां युवाभ्यां क्रियमाणानि निष्पानि रहस्यानपि स्तोत्राणि अपि
तिरः साना अस्मत् ७ समुवां य ज्ञमिति हे मित्रावरुणा॰ णौ वां युवयोर्यज्ञं नमोभिः नमस्कारैः स्तुतिभिः समु
महयं संपूजयामि हे मित्रावरुणा॰ णौ सवाधः बाधमुक्त हं हूवे आह्वयामि वाधा परिहाय वां युवां ऋषयः सेवितुं
नवानि नूतनानि मन्मानि स्तोत्राणि प्रभर्तुं कुरुता निमधास सूरीकृतानि इमानि इदानीं क्रियमाणानि ब्रह्मपरिवृढा
नि स्तोत्राणि युवां जुषताम् ७ इयं देवेति हे देव हे दैवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेषु इयं पुरोहितिः पुरस्क्रियापूजा
स्तुतिलक्षणा अकारि कृताभूत् तां सविता विश्वानि सर्वाणि दुर्गा दुःखानि गंतव्यानि आपदः तिरः तिरस्कुरुतं तथा कृ
त्वानः अस्मानपि एतं पारयंतं यूयं पात स्वस्तिभिः सदा नः इति पंचमस्य पंचमे तृतीयो वर्गः॥ ॥उत्सूर्य इति षळृचं रा
सप्तमं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः आद्याभिस्तिसृभिः सूर्यो देवता शिष्टाः मित्रावरुणदेवताः १ उत्सूर्य इति सूर्यः देवः नृ
हत् असचि कं पुरुपुरूणि बहूनि अर्चिः पिनि अंशितेरश्मेन उर्ध्वमयति किं प्रति मानुषाणां मनुष्याणां विश्वा सर्वाणि ज
निमा जनिमानि जनानि प्रकल्पयन् स देवः दिवा अहनि रात्रमान् सन् समीरहशो एकरूपः अतितिपनः सन् दृश्येत
स्मान् पुरुषपुरुषं प्रति आ रिलो भवतीति हि कृतिः स देवः कृत्वा सर्वस्य कर्ता हितः संपादितः प्रजापतिना कर्तृभिः
कर्मभिः स्कृतः स्कृतानी स्वीकृतो भवति २ स सूर्य प्रतीति हे सूर्य सः प्रसिद्धस्त्वं नः अस्मान् प्रति पुरः पु
रस्तात् उद्गाः उदयं कुः साधुभिः एभिः सोमेभिः सोमैः स्तुतैः एतशेभिः एतवर्णैः स्वार्थिकः शाकरः एताहृशैः एवे
गमनशीलैः अश्वैः उद्गाः अथ तथा कृत्वा अस्माभिः स्तुतः सन् नः अस्मान् अनागसः अपापान् प्रवोचः के भ्यः मित्रा
य वरुणाय अर्यम्णे अग्नये च ३ विनः सहस्रमिति नः अस्मभ्यं मुरुधः दुःखस्य प्रतिरोद्धारः ऋतावानः सत्यवंतः व
रुणादयः सहस्रं सहस्रसंख्याकं धनं विरद्दं त्विति रंतु किंच ते चंद्राः आह्लादकारिणः नः अस्मभ्यं उपमं स्तुत्यं अर्कं अ

र्णीयं आपप्तंतु किंच स्तवानाः अस्माभिः स्तूयमानाः नः अस्माकं कामं अपेक्षितं पूपुरंतु पूरयंतु हे सूर्य ते याअंतर्गा
ता इति सूर्यस्य स्तुतिः ४ द्यावाभूमी इति हे द्यावाभूमी द्यावापृथिव्यौ हे अदिते अखंडनीये द्यावाभूमी हे कथं महत्येनः अ
स्मान् त्रासीथां रक्षतं ये वयं सुजनिमानः शोभनजन्मानः वां युवां जज्ञुः ज्ञातवंतः स्म किंच वयं वरुणस्य हेळे क्रोधे मा
भूम तथा वायोः मा भूम नृणां स्तोतृणां मनुष्याणां प्रियतमस्य मित्रस्य हेळे मा भूम ५ प्र बाहवेति हे मित्रावरु
णौ जीवसे जीवनाय युवाभ्यां बाहू प्र सिसृतं प्रसारयतं हविः स्वीकारायेत्यर्थः किंच नः जीवसे अस्माकं जीवनाय किंच
नः अस्माकं गव्यूतिं गोमार्गं च भूमिं तृणादिप्ररोहाय घृतेन उदकेन आ समंतात् उक्षतं सिंचतं किंच नः अस्मान् जने ज
न समूहे आ श्रवयतं विख्यातं कुरुतं हे युवानौ नित्ययौवनौ युवां मे मम इमा इमानि हवा आह्वानानि आ श्रुतं शृणुतं ६ नू मि
त्रो वरुण इति मित्रः वरुणः अर्यमा च एते त्रयो देवाः नु अद्य नः अस्माकं त्मने आत्महिताय तोकाय पुत्राय च वरिवः ध
नं दधंतु प्रयच्छंतु नः अस्माकं विश्वा सर्वाणि गंतव्यानि सुगा सुगमनानि सुपथानि संतु यूयं पात स्वस्तिभिः स
दा नः ॥ ॥ इति पंचमस्य पंचमे चतुर्थो वर्गः ॥ ॥ उद्वेतीति षळृचं अष्टमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः आद्या अंत
्याः पंचम्याः पूर्वार्धस्य सूर्यो देवता अवशिष्टा अर्धर्चा मित्रावरुणदेवताः १ उद्वेतीति उद्वेति उद्गच्छति अयं सू
र्यः सुभगः शोभनभाग्यः विश्वचक्षाः सर्वस्य द्रष्टा मानुषाणां सर्वेषां मनुष्याणां साधारणः समप्रतिपादकश्चक्षुः पूर्व
स्तुहात् तान्मित्रस्य वरुणस्य च चक्षुः प्रकाशकः देवः द्योतमानः यः देवः चर्मेव चर्म यथा वेष्टयति तमांसि समविव्यक् सह विवेष्टि
संवेष्टयति सः महानुभावः देवः उदेति २ उद्वेतीति अयं सूर्यस्य सूर्यः उद्वेति उद्गच्छति कीदृशो यं जनानां सर्वेषां प्रस
वीता प्रसविता सर्वेषु कर्मसु अनुज्ञाता महान् पूज्यः केतुः सर्वस्य प्रज्ञापकः अर्णवः उदकप्रदः किं कुर्वन् उदेति समानं ५१
सर्वेषां एकरूपं एकमेव चक्रं रथांगं पर्याविवृत्सन् पर्यावर्तयितुमिच्छन् यं चक्रं धूर्षु रथस्य युक्तः एतशः एतशाश्व
नामा हरितवर्णोऽश्वो वहति एकोऽश्वो वहति सप्तनामेत्युक्तं ३ विभ्राजमान इति अयं सूर्यः विभ्राजमानः विशेषेण दीप्य

151
1915

मानः उषसां उपस्थात् उपस्थे मध्ये रेभैः स्तोतृभिः अनुमद्यमानः सन् उदेति किंच एष देवः द्योतमानः सविता मे मत्स्यं च
च्छंद उपच्छंदयति कामान् एषः कः यः देवः समानं सर्वेषां प्राणिनामेकरूपं धाम स्थायि तेजः स्थानं न प्रमिनाति न हिनस्ति न
संक्षपयति सः देवः उदेतीति ४ दिवो रुक्म इति अयं सूर्यः रुक्मः रोचमानः उरुचक्षाः प्रभूततेजास्कः सन् दिवः अंतरिक्षा
त् उदेति कीदृशोयं दूरेअर्थः दूरे प्रार्थ्यमानः तरणिः तारकः भ्राजमानः दीप्यमानः सन् उदेति नूनं निश्चयं जनाः सर्वप्रा
णिनः सूर्येण प्रेरकेण देवेन प्रसूताः अनुज्ञाताः प्रेरिताः संतः अर्थानि गंतव्यानि अनुष्ठेयानि अयन् संकल्पयन् अपां
सि कर्माणि कृण्वन् कुर्वंति ५ यत्रा चक्रुरिति यत्र यस्मिन् अंतरिक्षे अमृताः अमरणधर्माणः पूर्वे देवाः अस्मै सूर्याय
गातुं मार्गं चक्रुः अकुर्वन् तत् पाथः अंतरिक्षं अन्वेति अनुगच्छति कइव दीयन् गच्छन् श्येनो न श्येनो यथा गमनीयं श्येन इ
व अयं अर्थः स्तोपदिष्टः उक्तं हे मित्रावरुणा॰ णौ वां युवां सूरे सूर्ये उदिते सति प्रातःसवने नमोभिः नमस्कारैः स्तुतिभिः
उत अपि च हव्यैः हविर्भिश्च प्रति विधेम परिचरेम ६ नू मित्र इति वरुणः अर्यमा च एते त्रयो देवाः नु अद्य नः अस्माकं त्म
ने आत्मने आत्महिताय तोकाय पुत्राय च वरिवः धनं धंतु प्रयच्छंतु नः अस्माकं विश्वा सर्वाणि गंतव्यानि सुगा सुगमनानि
सुपथानि संतु भवंतु यूयं पात स्वस्तिभिः सदा नः ॥ ॥ इति पंचमस्य पंचमे पंचमो वर्गः ॥ ॥ दिवि क्षयंतेति पंचर्चं
नवमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः मित्रावरुणौ देवता १ दिवि क्षयंतेति दिवि द्युलोके पृथिव्यां अंतरिक्षे च वर्तमा
नस्य रजसः उदकस्य क्षयंता स्वामिनौ भवथः हे मित्रावरुणौ वां युवाभ्यां घृतस्य निर्णिजः रूपाणि घृतानीत्यर्थः तानि
प्र दृशीरन् प्रकर्षेण दीयंते नः अस्माकं संबंधि हव्यं मित्रः सुजातः सुष्ठु प्रादुर्भूतः अर्यमा राजा सर्वस्य स्वामी सुक्षत्रः शोभ
न बलः वरुणश्च एते भजंतु सेवंतां २ आ राजानेति हे राजाना सर्वस्य स्वामिनौ महः महतः ऋतस्य यज्ञस्य गोपा गोपा
यितारौ सिंधुपती सिंध्वाः पालयितारौ क्षत्रिया बलवंतौ युवां अर्वाक् अस्मदभिमुखं आयातं आगच्छतं किंच हे मित्रावरुणा॰
णौ जीरदानू क्षिप्रदानौ युवां नः अस्मभ्यं इळां अन्नं उत अपि च वृष्टिं तत्साधकां वृष्टिं च दिवः अंतरिक्षात् अव अवस्तात्

वे·भा·पं·
५२

हूयमानं प्रेरयंतं ३ मित्रस्तन्न इति मित्रो वरुणो देवो अर्यमा अर्यमा च ते त्रयो मिलिताः अस्मान् तत् तदा यदा अस्माकं अपेक्षि-
तं नरा साधिष्ठेभिः साधकतमैः पथिभिः मार्गैः नयंतु प्रापयंतु किंच नः अस्मान् सुदासे शोभनदानाय यजमानाय अ-
रिः अर्यमा पवावरन् असौ जंतुकं अध्यं इति रूपात् तथा कुर्वंतु अर्यम्णः पुनर् मित्रान् आदरार्थं देवगोपाः देवाः यूयं गोपा-
यितारो येषां अस्माकं ते वयं इ पातु भाभिः द्वातवेन्ना ओकस सह पुत्रा हिंसारहिताः मदेम हृष्येम ४ यो वां गर्तमिति हे मित्रा-
वरुणौ यो वां युवयोः एतं गर्तं रथं मनसा तक्षत् स्तोमैः संकल्पयेत् तथा ऊर्ध्वा ऊर्ध्वं तं मांधी निं कर्म इति रूपं स-
मवन्त कुर्वन्ति उभी स्वधात् एवं स्तार आरपस्य चार्यपारयेत् राजाना स्वामिनौ मित्रावरुणौ तावेतौ युवां अनं घृतेनोदकेन उ-
क्षथः सिंचतं नमसा क्षितीः क्षेमाभिवासाः प्रजाः तर्पयिथाय पातु क्षितयो मध्यंतिन पातर्पयिथामिति ५ एष स्तोम इ-
ति हे वरुण हे मित्र तुभ्यं युवयोः वायवे वायुः गंता आदित्यः स एवार्यमा तस्मै च एष स्तोमः स्तवः अयामि अकारि किमिव
शुक्रः दीप्तः सोमो न युष्मभ्यं प्रीतिकरः सोमो यथा दीयते तद्वत् धियः कर्माणि अस्मदीयानि अविघ्नं रक्षतं पुरंधीः स्तुतीः
जिगृतं भवतु अलं यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य पंचमे षष्ठो वर्गः॥ ॥प्रतिवां सूर इति पंचर्चं दशमं सूक्तं
वसिष्ठस्यार्षं त्रिष्टुभं मित्रावरुणदेवताकं १ प्रतिवां सूर इति सूर्ये सूर्ये उदिते प्रातः सवने मित्रं पूतदक्षं शुद्धबलं व-
रुणं वा युवां सूक्तैः प्रतिह्वये आह्वयेययोः मित्रावरुणयोः आक्षितं अक्षीणं ज्येष्ठं असुर्यं बलं आचिता आचिनेत्
नानि चरं संधेरूपेण वा मद्याम नि संग्रामे विश्वस्य वासु संप्रसमिज्ज्यते भवति २ ता हि देवानामिति ता हि तौ
मित्रावरुणौ देवानां मध्ये असुरा बलवंतौ अर्या अर्यौ तौ सर्वस्य स्वामिनौ ता नः अस्माकं क्षितीः मनुष्यादिरूपाः प्रजाः उर्जयं-
तीः प्रवृद्धाः करतं कुरुतं हे मित्रावरुणौ पयं वां युवां अस्मान् मा युवाम यनय स्यां युवयोः आतौ धावाबद्धावापृथि-
वी सर्वेषु नयोः सहमाना अयमा वो कस्य केअ ब्रव राजे रस्तु पलक्षणं असे राजाणि व पीपयन् आपयेयुः ३ ता भूरि
पाशाविति ता मित्रावरुणौ महिपाशौ प्रभूतबंधनसाधनपाशोपेतौ अनृतस्य भागरहितस्य सेतू बधकौ रिपवे

५२

153
1915

मर्त्याय रिपवे जनाय दुरत्येत् दुरितमौ भवतः हे मित्रावरुणौ वां युवयोः ऋतस्य यज्ञस्य पथा मार्गेण दुरिता दुःखानि
तरेम नावा अपो न प्रवहता भिउदकानीव ४ आ नो मित्रावरुणेति हे मित्रावरुणौ नः अस्माकं हव्यं तु हविः सेचनव-
तं यज्ञं आगच्छतामिति शेषः आ गव्यूतिं गोस्थानं घृतेन उदकेन सिंचतं अत्र अस्मिन् यज्ञे वां युवां प्रति इत् क्षामिः रत्नैः वरं
श्रेष्ठं हविः यः अजमान आपश्चात् इति शेषः अतः कं बलं कल्पयेत तस्मै जनाय यजमानाय दिव्यस्य दिविभवस्य धारा रमणी-
या स्वादुः उदकस्य उदकं प्रणीतं प्रयच्छतं ५ एष स्तोम इति हे वरुण हे मित्र तुभ्यं युवयोः वायवे वायुः गंता आदित्यः स एव
अर्यमा तस्मै च एष स्तोमः स्तवः अयामि अकारि किमिव शुक्रः दीप्तः सोमो न युष्मभ्यं प्रीतिकरः सोमो यथा दीयते तद्वत् धियः
कर्माणि अस्मदीयानि अविघ्नं रक्षतं पुरंधीः स्तुतीः जिगृतं भवतु अलं यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य पंच-
मे सप्तमो वर्गः ॥ ॥प्र मित्रयोरिति षोडशर्चं एकादशं सूक्तं वसिष्ठः ऋषिः दशमी बृहती एकादशी सतोबृहती द्वादशी
बृहती त्रयोदशी सतोबृहती चतुर्दशी बृहती पंचदशी सतोबृहती षोडशी पुरउष्णिक् शिष्टाः गायत्र्यः चतुर्थाद्यास्त्र-
योदशांता आदित्यदेवताकाः चतुर्दश्याद्याः तिस्रः सूर्यदेवत्याः आद्यं तोत्रं पूर्ववत् मैत्रावरुणो १ प्र मित्रयोरिति
मित्रयोः वरुणयोः मित्रावरुणयोः तुविजातयोः बहुप्रादुर्भावयोः देवयोः नः अस्मदीयः शूष्यः सुखकरः नमस्वान् ह-
विर्भिः युक्तः स्तोमः स्तोत्रं प्रैतु गच्छतु २ या धारयंतेति या यौ युवां धारयंत के देवाः आदिकर्तारः असुर्यं बलकरणा-
य कीदृशौ युवां सुक्षत्रौ सन् बलस्य पितरा बलस्य पालकौ बलप्रदावित्यर्थः प्र महसा प्रकृष्टेन तेजसा साधयंतमित्तु
न यथा भवथः ३ ता न स्तिपेति ता नो स्तिपा स्थायं तनू इति स्तिपा गृहाः नान्यपात इति स्तिपोत नूपा तन्वः पातारौ हे वरुण हे मि-
त्र युवां कल्पयेथां नरि तॄणां नः स्तोतॄणां अस्माकं धियः कर्माणि स्तुतिरूपाणि साधयतं सफलवंति कुरुतं ४ यदद्य सू-
र इति यत् धनं अस्माकं अपेक्षितं तत् अद्य अस्मिन् काले सूरे सूर्ये उदिते सति प्रातः सवने अनागाः पापस्य हंता मित्रः अ-
र्यमा सविता भगः चैते प्रत्येकं स्कवाणि प्रेरयेत ५ सुप्रावीरिति सक्षयः सनिवासः स्कप्रावीः अस्मिन् प्रकर्षेण रक्षिता सुप्र-

शाम आ रतार्थं स्तनप्रकर्षेण स्तुतिं संसव विशेषः कदाहे स्तवानः स्तदानाः युष्माकं यामन् यामनि गमने सति कीदृशानां
गमने येषूपं आगसन्ः अस्माकं अंहः पापं आतिपिप्रति आतिपारयथ तेषां गमनं इति॥ ॥इति पंचमस्य पंचमे अष्टमो व
र्गः॥ ६ ॥ उत स्वराजइति उत अपि च ये मित्रादयः स्वयं स्वराजः सर्वस्य स्वामिनः अदितिः तेषां माता च सति ये अदब्धस्य
अहिंसितस्य महः महतः ऋतस्य अस्य कर्मणः राजानः स्वामिनः ते ईशते समर्था भवंति अभिमतं दातुमिच्छंतीति शेषः ७ प्र
ति वां सूर उदिते इति हे मित्रावरुणौ मित्रं वरुणं च वां रिशादसं शत्रूणां अत्तारं अर्यमणं च प्रति प्रत्येकं गृणीषे स्तवे कदा सूरे सू
र्ये उदिते उदिते सति भाषा रिसर्थः ८ राया हिरण्ययेति हिरण्यया हितरमणीयेन राया धनेन सहिताय अवकाय अहिंसा
य रायसे अस्माकं बलाय पदंपदं दाती कियमाणाभतिः स्तुतिः भवत्विति शेषः विप्र हे मित्राः पाप्रा इयं मे स्तुतिः मेधसात
विप्र प्रज्ञाय गातय च भवतु ९ ते स्याम देवेति हे देव वरुण ते व यं तव स्तोतारः स्याम सम हे मित्र सर्वे मन्त्रेक बलं व पमित्र यजमानाः
किंतु सूरिभिः स्तोतृभिः ऋत्विग्भिः सहत वा हे मित्र देव तेव यं स्तुतिभिः सह स्याम किंव इषमन्नं स्वः उदकं च धीमहि धारयामहे
॥ १० बहवः सूरचक्षस इति बहवः महांतः सूरचक्षसः सूर्यस दृशप्रकाशाः अग्निजिह्वाः अग्निरेव जिह्वा आह्वनसाधनो
येषां तादृशाः ऋतावृधः यज्ञस्य वर्धयितारः मित्रादयः ये त्रीणि विश्वानि व्याप्तानि विदथानि क्षित्यादि स्थानानि परिभूतिभिः
परिभावुकैः धीतिभिः कर्मभिः येषु श्चक्रिरे तेषां अस्माकं यज्ञेऽवस्थानं भवतीति संबंधनीयं॥ ॥इति पंचमस्य पंचमे नवमो वर्गः॥ ॥
११ वि ये दधुरिति ये मित्रादयः शरदं संवत्सरं वि दधुः अकुर्वन् आत् अनंतरं एव मासं अनंतरं अहः सायं यज्ञं आत्
अनंतरं अक्तुं रात्रिं च ऋतुं ऋचं वा ते मित्रः वरुणः अर्यमा च नयज्ञे अनाप्यं अन्यैः अप्राप्यं क्षत्रं बलं राजानः राजमानाः आ ५७
नशु आसवंतः १२ तद्व इति तत् अद्य सूरे उदिते यागकाले वः युष्मान् मनामहे याचामहे कैः साधनैः सूक्तैः क
स्मिन् काले सूरे उदिते भासः आकेः त्सचयत् धनं हे ऋतावस उदकस्य रक्षकाः नेतारः यूयं वरुणादयः ओहते ओहध्ये तद्धनं म
नामहे इति १३ ऋतावान इति ऋतवंत ऋतावानः यज्ञवंतः ऋतजाताः ऋतात् प्रजापतेः सकाशात् उत्पन्नाः ऋतावृधः य

155
1915

ज्ञस्य वर्धयितारः घोरासः घोराः अनृतद्विषः अपगतं द्वेष्टारः नरः कर्मणां नेतारः तेषां वः युष्माकं सुम्नदिष्टमे सुखतमे सुम्ने
धने वयं ये वा च सूरयः स्तोतारः ते सर्वे स्याम भवेम १४ उदु त्यदिति त्यत् तत् दर्शतं दर्शनीयं वपुः मंडलं दिवः अंतरिक्ष
स्य प्रतिकूले समीपे उदु एति उदेति उत् पूरणः यदी यदि ईं तत् मंडलं आशुः शीघ्रगामि एतशः शुभ्रवर्णः देवः द्योतमानः अश्वः प
हति धारयति किमर्थं विश्वस्मै सर्वस्मै अरं वहति सम्यक् सर्वलोकदर्शनाय १५ शीर्ष्णः शीर्ष्ण इति शीर्ष्णः शीर्ष्णः सर्वस्या
पि शिरसः स सवितारं जग्मो वहंतीति अनेन संबध्यते जगतो जंगमस्य तस्थुषः स्थावरस्य पतिं स्वामिनं रथेन वर्तमानं
सूर्यं सुविताय कल्याणाय विश्वं रजः सर्वलोकं समया सर्वलोकस्य समीपे अभितः परितः समयेति द्वितीया सप्त सप्तसंख्या
काः सप्त स्वसारः स्वयमेव सरंत्यः हरितः हरितवर्णाः अश्वाः वहंति॥ ॥इति पंचमस्य पंचमे दशमो वर्गः॥ ॥ १६ तच्चक्षुरिति
तत् प्रसिद्धं चक्षुः सर्वस्य प्रकाशकं देवहितं देवेन हितं शुक्रं निर्मलं सूर्यमंडलं उच्चरत् उद्गच्छति तत् शरदः शतं शत संव
त्सरं पश्येम जीवेम शरदः शतं पुनरुक्तिरादरार्था १७ काव्येभिरिति हे अदाभ्या अदंभनीयौ हे वरुण त्वं मित्र च द्युमत् द्यु
तिमंतौ युवां काव्येभिः अस्मत्कृतैः स्तोत्रैः आयातं किमर्थं सोमपीतये सोमपानाय १८ दिवो धामभिरिति हे वरुण त्वं मि
त्रश्च अद्रुहा अद्रोग्धारौ युवां दिवः द्युसंबंधिभ्यो धामभिः धामभ्यः स्थानेभ्यः आयातं अस्मद्यज्ञमागच्छतं आगत्य च आतु
जीरा ऋणां सवना हिंसको एवंरूपौ संतौ सोमं पिबतं १९ आयातमिति हे मित्रावरुणा नेतारौ हे नरा यागनेतारौ आहु
तिं सोमलक्षणां जुषाणौ प्रियमाणौ संतौ आयातं आगच्छतं यज्ञं आगत्य च हे ऋतावृधा यज्ञस्य वर्धकौ युवां सोमं पातं पि
बतं॥ ॥इति पंचमस्य पंचमे एकादशो वर्गः॥ ॥ प्रति वां रथमिति दशर्चं द्वादशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः अश्विनौ
देवता १ प्रति वां रथमिति हे नृपती नृणां ऋत्विग्यजमानानां स्वामिनौ अश्विनौ वां युवयोः रथं जरध्यै जरा स्तुतिः स्तोतुं
प्रति गच्छामीति शेषः हविष्मता हविर्युक्तेन यज्ञियेन यज्ञार्हेण मनसा स्तोत्रेण यः रथः वां युवां वहति धिष्ण्यौ धिषणा
स्तुतिः दूतो न दूत इव अजीगः जागरयति प्रबोधयति अस्मान् प्रति गंतुं तं रथं अच्छ आविवक्मि आ वच्मि प्रबोधने दृष्टांतः

वे·भा·पं·
५४

सद्गुर्भपि नरा विप २ अशोचि अग्निरिति। अस्मे अस्माभिः समिधानः समिध्यमानः सन् अग्निः अशोचि आदीप्यते तमस
श्चिदन्ताः सोपि अंताः पर्वताः प्रदेशाः उषा अदर्शि उषस्तु पदस्यंते सर्वे केतुः सर्वस्य प्रज्ञापकः सूर्यः दिवो दुहितुः उषसः पुर
स्तात् पूर्वस्यां दिशि दिवो रोगाय शायमानः सन् अचेति ज्ञायते यस्मादेवं तस्मात् युवयोः आगमनसमय अतः आगच्छ
तमिति शेषः ३ अभि वां नूनमिति हे अश्विना॰ नौ वां युवां स्तोतारः स्तोता विवक्वान् स्तुतीनां वक्ता हे नासत्या अश्वि
नौ स्तोमैः अभिसिषक्ति सेवते नूनं खलु अतो वक्ति अस्मत्समिद्धसंपूर्वेभिः पूर्वस्तोमैः पथ्याभिः मार्गैः स्वर्विदा स्वर्गं आग
तावत्तु प्रगापकत्वेन रथेन नूनं निश्चयं अभियातं गच्छतं ४ अवी वां नूनमिति हे अश्विनौ वीरः रक्षितारः युवाभ्यां युवाकु काम
यमानो अहं नूनमद्य घर्मस्तोतो मम आमीत् शेषः यतस्य अस्माद् हे माध्वी मधुरस्य सोमस्य अर्हौ वां युवां स्तके अभिषुते सोमे च
सतुः वसुवम्नाः कुर्वे श्रोमि वां युवां आवहं तु केस्य विरासः सहस्रा अध्वारे जयोरति प्रवृद्धस्य अस्थी गते रथे हि तत्वाच्च स्थ
विरे इव मम प्रापि आगमनाय ऊर्ध्वे जल्याभिः ऋतुवासुषु अभिषुतानि मधूनि मधुररसानि युवां पिबतं पिबतं
५ प्रावामुरैवेति हे अश्विना॰ नौ हे वा हेतो युवां युवां वाक्यं अस्मद्यांत हिन्वितां च स्तुतं धनः मिच्छंती मे मम धियं बुद्धिं अ
नये अजायत अविता कर्तं कुरुतं किंच वाजेन संग्रामे पिविश्वाः पुरंधीः अस्मदीयाः बुद्धीः अविष्टं रक्षतं हे शचीपती कर्म
णां पालकौ ता नौ युवां ताभिः अस्मदीयैः ऋतुभिः कर्मभिः नः अस्मान् शकं प्रयच्छतं धनमिति शेषः॥ ॥इति
पंचमस्य पंचमे द्वादशो वर्गः॥ ॥अविष्टं धीष्विति हे अश्विना नौ नः अस्मान् आत्मधीषु एषु कर्मसु अविष्टं रक्षतं नः अ
स्मानं अहृपं असंक्षीणं आवत्तु युवां सा हस्र समर्पयंतेतः अस्मकं वां युवयोः अस्तु यस्मात् लब्धे तोके पुत्रे तनये तत्पुत्रादौ च तत् ५४
तु आगाः अभिमतं धनं प्रयच्छंतः ऋतावृधः शोभननामस्तनः देववीतिं देवानां प्राप्तिर्यस्मिन् तादृशाय यज्ञं आगमेम
आगमेम ७ एष स्य वामिति एष स्य मधुरतो द्योपमानस्य सः युवयोः प्रियतमेन प्रसिद्धः सोमः हे माध्वी मधुप्रियौ अश्वि
नौ वां युवयोः सुरतः निधिः निधि स्थानीयः हितः स्थापितः अस्मत् अस्माभिः रातः दत्तः किं मिव स त्वि सस्य पूर्वं गतेव

157
1915

पुरतोगं ताद्दृश रवस्य पंथा नियंजन प्रज्ञान इति नः पुरतो वर्तते न दृवत दुःस्थः यस्माद्देवं तस्मात् अहेळता अक्रुध्यता म
नसा अनुग्रह बुद्धिनैव मम सा अर्वाक् अस्मद् भिमुखं आ यातं आगच्छतं अश्वं ताद्दृश्यं हविः सोमादिकं अश्वं तो कुत्र मानुषीषु
विक्षु मनुष्यरूपासु प्रजासु वर्तमानं ८ एकस्मिन्योग इति रुद्रस्य सर्वस्य प्रतरौ वां युवयोरेकस्मिन् समाने उभयसा
धारणे योगे अस्मादृशे सनि वां युवयोः रथः सप्तस्रवतः सर्पण स्वभावाः सप्तगंगाद्याः परिगात् परिगच्छति शीघ्रमाग
च्छतीत्यर्थः न द्रुया कुलाः सुयशः प्रसवना देवयुक्ताः देवाभ्यां युवाभ्यां युक्ताः अश्वाः शीघ्रगमनेन वायंति न भुवं नत्ति न
श्राम्यंते ये अश्वाः धूर्षु रथस्य न रणय नारक्षाः शीघ्रं गतारः वहंति ९ असश्चतेति असश्चता क्वापि असज्जमानौ युवा
मघवद्भ्यः हविष्मद्भ्यो यजमानेभ्यः तेषाम यस्य: मदूतं हि भवतं ये राधा धनेन निमित्तेन मघपदेयं दातव्यं धनं नुनं तिप्रे
रयंति यच्छंति ये च वे बंधुस्तेनैव धानेन बंधुः अप्रयवो दिनं सूनृताभिः प्रियसत्यात्मिकाभिः वाग्भिः प्रतिरंति प्रवर्धय
ति किं कुर्वन्तः गव्या गोरूपाणि अश्वा अश्वरूपाणि च मघानि धनानि दंदतः आर्थिभ्यः प्रयच्छंतः तेभ्यः मघवद्भ्यः भूतमिति १०
नू मे हवमिति हे युवानानि तयो वतौ न अद्य युवां मे हवं अस्मदीयां स्तुतिं आश्रुणुतं श्रुत्वा च हे अश्विनौ द्रावत्त्रह वियु
क्त वर्तिः यह यासिष्टं आगच्छतं आगत्य च रत्नानि रमणीयानि धनानि धत्तं दत्तं सूरीन् स्तोतृन् जरतं वर्धयतं यूयं पा
त स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे त्रयोदशो वर्गः॥ ॥आ शुभ्रा यातमिति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्
षं आद्याः सप्त विराजः शिष्टास्त्रिष्टुभो अश्विनौ देवता १ आ शुभ्रा यातमिति हे शुभ्रा दीप्तौ सुरत्ना शोभन नाम्नौ अश्वि
ना॰ नौ आयातं अस्मद्यज्ञं आगच्छतं रत्नानामृणां उपकल्पयितारौ युवां युवाकोः युवां कामयमानस्य मम गिरः स्तुतीः जुजुष
णा सेवमानौ भवतमिति शेषः न केवलं स्तुतिं किं तु नः अस्मदीयानि प्रतिप्रत्तानि हव्यानि हवींषि च वीतं भक्षयतं २
प्र वामंधांसीति हे अश्विनौ वां युवाभ्यां मद्यानि मदजनकानि अंधांसि सोमलक्षणानि अन्नानि प्रास्थुः गृहीतानि आ
सन् अतो युवां मे मम हविः प्रवीन याय नाय अरं अलमर्थं शीघ्रं गंतं आगच्छतं अर्यः अरेः अस्मद्विरोधिनः हवनानि आ

ह्वमानानि तिरः तिरस्कुर्वन्ः अस्मदाह्वानं श्रुतं शृणुतं ३ प्रवां रथइति हे सुयामिसु स्वर्यायाः सहरथेव संतौ अश्विना॰
नौ वां युवयोः रथः अस्मभ्यं अस्मदर्थं इयानः याच्यमानः सन् प्र इयर्ति आगच्छति अस्मद्यज्ञं कीदृशो रथः मनोजवाः मनो
वेगः शतोतिः अपरिमिताभिः रक्षणैर्युक्तः किं कुर्वन् रजांसि लोकान् तिरः तिरस्कुर्वन् अतिक्रम्य इयर्तीति ४ अयं
हमिति यत् यदा वां युवां प्रति देवयाः देवौ युवां कामयमानः उ पूरणः अयम् अद्रिः अभिषवग्रावा सोमं सुन्वन् सोमम भि
षुण्वन् युवभ्यां युवाभ्यां अयं भिक्ष्य अभिषुण्वन्नीति संबंधः एवं कुर्वन् ऊर्ध्वः उन्नतः सन् विवक्ति उच्चैः शब्दं करोति तदानीं वल्गूः
ईदृशी युवां विप्रः मेधावी यजमानः हव्यैः हविर्भिः आवर्तयति आवर्तयति ५ चित्रं ह यदिति हे अश्विनौ वां युवयोः चि
त्रं चायनीयं यत् भोजनं धनं भुज्यमानं मा भिहीनाभिः स्वकर्तुं पूरणः तत् अस्मभ्यं रत्नं निःसर्ध्यः अयनयोः स्त्रुतिः अत्रये अत्रेः ऋषेः महि
तं नं कापि आवासं निपुणो नैमेदं कुर्वाणः अश्विभिः सन् स्तोत्रात् युवाभ्यां प्रियतमः सन् वां युवाभ्यामेव कृते आमा
नं रक्षणं संभवते धारयेत्॥ ॥इति पंचमस्य पंचमे चतुर्दशो वर्गः॥ ६ ॥उत त्यद्वामिति उ ताभिः वदे अश्विना॰ नौ
वां युवयोः कर्म कुर्वन्तिः तुरते अर्णवि महाविद्वेहे विदेशे अवानाय महर्षये तत् प्रतीयं प्रतिगमनं तस्य रूपस्य प्रत्य
वां युवयोः कर्म कुर्वन्ति तुरते अर्णवि महाविदेहे विदेशे अवानाय महर्षये लब्धं तत् प्रतीयं प्रति गमनं तस्य रूपस्य प्रत्य
यसमन्तं अमन्ततः किं मनुष्यवर्पः रूपं दृष्टः उ तिष्ठतः गमनास्वं स्तोः सकाशात् भासि रूपं अधिपद्धेः अस्यधत्तं युवं व्य
वानं महर्षिं जरेन पुनर्युवानं कथुः शची भिः ताहितुं अयनं स्य युवयोनयीकरणं प्रसिद्धं ७ उत त्यं भुज्युमिति उ
ताविषसंतो भुज्युं एतनामानं समुद्रे मध्ये समुद्रोदकस्य मध्ये सस्तापः भुज्युं साति भूताः दुरेवासः दुष्टगमनाः ज
नाः कूः सकवनः ईदृशं समुद्रमध्ये स्थितं हे अश्विना॰ नौ युवां भिः पर्षत् निरपारयतं यः भुज्युः युवाकुः युवां कामयितारा
वाः अरणवान् अतिगंतारावनमेनं निरपारयतं ८ वृकाय चिदिति वृकाय पथमदात्रे अभिलषते इत्यर्थः जसमानाय कर्म
भिः क्षीयमाणाय ऋषये चित् पूरणः शाकं अभिमतं धनं जस्तं उतापि च शयवे ऋषये हूयमाना आहूयमानौ युवां ऋ
नं अकृणुतं वां युवां अस्यांगां अधिवनं अपूरयतं कीरेण अपोम अद्भिरिव नदीनां पयोदकेन पूरयतः तत्र दृष्ट कीदृशी ५५

अध्यां स्तर्यं चित् स्तरी मपि निवृत्तप्रसवां स्वप्नामपि शक्यासाम र्थ्येन दोहनलक्षणेन युक्तां कृतां शचीभिः युष्मदीयैः
कर्मभिः हे अश्विना अश्विनाविति ९ एषस्य कारुरिति एषः स्तोता स्यः सः प्रसिद्धः वसिष्ठः कारुः स्तोता उषसामग्रे प्रातः
सवने बुधानः बुध्यमानः स्तमन्मा शोभनमतिः सूक्तैः जरते स्तौति तं इषः अन्नेन वर्धतु वर्धयतेन अघ्या अहंतव्या गौश्च
तां वर्धयतं सा गौः आपि दिहोत्री पयोभिः तं वसिष्ठं वर्धयतु एवं आत्मानं परोक्षेण निर्दिश्य यूयं पात स्वस्तिभिः सदा नः॥ ॥
॥इति पंचमस्य पंचमे पंचदशो वर्गः॥ ॥आ वां रथ इत्यष्टर्चं चतुर्दशं सूक्तं वसिष्ठः ऋषिः त्रिष्टुप् छंदः अश्विनौ देवता
१ आ वां रथइति हे अश्विनौ वां रथः वृषभिः अश्वैः युक्तः सन् आयातु यज्ञमस्मदीयं कीदृशो रथः रोदसी द्यावापृथिव्यौ
२ बद्बधानः बाधमानः हिरण्ययः हिरण्मयः घृतवर्तनिः घृतं उदकं वर्तन्यां यस्य तादृशः पविभिः रथनेमिभिः रुचानः दी
प्यमानः इषां वोळ्हा यजमानैः दत्तानां हविषां वाहकः नृपतिः नृणां यजमानानां स्वामी वाजिनीवान् अन्नवान् २
स पप्रथानइति सः रथः पंचजन्मान् तानि सर्वप्राणिनः पप्रथानः प्रथमानः त्रिवंधुरः उच्चावरं सारथ्य वरुत्थानं कास्तु
मयंता दृशौ त्रिभिर्युक्तः मनसा मनस्त्वायुक्तो अभ्यायातु येन रथेन देवयंतीः विशाः यजमानान् प्रतिगच्छथः हे अश्वि
ना॰ नौ कुत्रा चित् यत्र क्वापि यामं गमनं दधाना धारयंतौ तेन विशो गच्छथः सयातिति ३ स्वश्वा यशसेति हे देवौ स्वश्वा
शोभनाश्वौ यशसा यशस्वी अर्वाक् अस्मदभिमुखं आयातं गच्छतं हे दस्रौ दर्शनीयौ उपस्थितारो मधुमन्तं मधुररसोपेतं नि
पिं निधिवत् निहितं सोमं पिबाथः पिबतं वां युवयोः रथः वध्वा सूर्यया सह या दमानः गंतव्यान् प्रति गच्छन् गमयन् निस
र्यः एवं कुर्वन् पर्वतनिभ्यां स्वचक्राभ्यां दिवः अंतान् पर्यन्तप्रदेशान् विबाधते शीघ्रगमनेन पीडयति ४ युवोः श्रियमिति
युवोः युवयोः श्रियं रथं योषा सर्वदा भिश्रयंति योषित् सूरः सूर्यस्य दुहिता परि अह्णी तक दा परितक्यायां रात्रौ परि
तः तकनवति संग्रामे गंतव्ये किं च यत् यदा देवयंतं देवकामं यजमानं शचीभिः युवयोः गमनादिलक्षणैः कर्मभिः अ
वथः रक्षथः तदानीं घ्रं सं दीप्तं वयः अन्नं सोमादिलक्षणं ओमना अवनेन रक्षणेन निमित्तेन वां परि अगात् प्रप्यगात् ५

योरुस्य वामिति यः रथः हपूरणः स्यः सः प्रसिद्धः वां युवां हे रथिरा रथिनौ उस्राः तेजांसि वस्ते आच्छादयति यश्च रथः युज
नः अश्वैः युक्तः सन् वर्त्तिर्मार्गं परियाति परिगच्छति तेन रथेन हे अश्विना॰ नौ नः अस्माकं अस्मिन् यज्ञे उप सो उपुष्ठो प्रातः
कालेवां शम गाय पापा नांयोः मिश्रणाय च स्कलानां निवहं तं नितरां प्राघुतं ८ नरा गौरेवेति हे नरौ नेतारौ अश्विनौ गौरे
व गौराख्यौ मृगाविव युवं विद्योषेण दीप्यमानं सोमं प्रति नपातात् आयुक्तो अद्य अस्माकं सवनानि सवनानि उप यातं उपगच्छ
तं युवां हि वाम् रुचु यज्ञेषु वां युवां यजमानां मतिभिः स्तुतिभिः हवंते हि स्तवंति खलु अतो वां युवां अन्येयव्यरः देवयंतः
हवी कामयमानाः वां युवां मा नियमन् मा निपतु ७ युवं भुज्युमिति हे अश्विना॰ नौ युवं भुज्युं एतन्नामकं अवविद्धं वि
क्षिप्तं सखिभिः समुद्रे तन्मध्ये निमग्नं अर्णसः उदकात् उदूहथुः किं कुर्वतौ अविधानैः अक्षीयमाणैः अश्वैः अ
न्य विक्षिप्तपतनैर्गमनवद्भिः रथैः युक्तैः अश्वैः हंसनामभिः शारीरैः कर्मभिश्च पारयता पारयंतौ समुद्रे अर्णसः
उदूहथुरिति ८ नूमे हवमिति हे युवानौ नित्यतरुणौ मे हवं अस्मदीयां स्तुतिं आ शृणुतं अधि आगच्छतं च अस्मद्यज्ञं हे अश्विनौ
हविर्गृहीतं यज्ञे दानं आगतं दानं आगतं रत्नानि रमणीयानि धनानि धत्तं इदं स्तुतीन् स्तोतॄन् जरंतं वर्ध
यतं यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य पंचमे षोडशो वर्गः॥ ॥आ विश्ववारेति सप्तर्चं पंचदशं सूक्तं वसिष्ठ
स्यार्षं त्रिष्टुप्छंदः अश्विनौ देवता १ आ विश्ववारेति विश्ववारा सर्वैः वरणीयौ अश्विना॰ नौ नः अस्माकं यत् पदं आस
नं आगच्छतं वां युवयोः स्थानं वेषि मांवेद्यां माना विप्रो अत्रे तदर्थं स्तुत स्तुतः सुरतकर स्तुतसमागः वाजी वेगवान् अश्वो
न अश्व इव अस्मान् निहुत पूरणः युवयोः समीपं पद यंत अश्वं आसिद्ध्युः तत्स्थानं आस्यद्युहपृष्ठानः ध्रुवसे ध्रुवाय नि
त्यं वासाय यो मां नित्यो निर्स्थानं मिव २ सिषक्ति सा पामिति सा स्तुतिः अस्माभिः क्रियमाणा रोम्न ना स्तुतिः च निष्ठा कमनी
या सा यो नित्ये स्थानं मिव २ सिषक्ति से वते किं च पः घर्मः प्रवर्ग्यश्च मनुषः मनुष्यस्य यजमानस्य दुरोणे यागगृ
हे अतापि नौ गृह स्स घर्मः वां युवां अग्रु वक्ति ति शेषः समुद्रान् सवितश्चापि पीतिपूरया निदृष्टि हारा एत अवाचित

श्चित् पूरणः अश्वाविव यथा स्तुयु अमुसुयुक्तोरथोऽभवनतः तथेत्यर्थः तद्रुतुयु वां यज्ञेषु आनो यो जन्नूरएवं करोति ३
यानि स्थानानीति हे अश्विना॰ नौ युवां दिवः द्युलोकात् आगत्य यानि स्थानानि दधाथे कुरुथः कुत्र य ह्यीषु महतीषु ओ
षधीषु विश्रुत गमनि युवनौ युवां पर्वतस्य मेघस्य मूर्धनि स्थाने निसदं ता निषीदंतो इष मन्नं दाशुषे ह विर्दात्रे जनाय यज
मानाय वहंता प्रापयंतौ भवतमिति शेषः ४ चनिष्टं देवाइति हे देवा देवौ युवां ओषधीषु ओषधि विकारान् चरुपुरोडाशा
दिकान् अप्सु सोमरसान् चनिष्टं असंतकमनीय तमं कामयेथामित्यर्थः यत् अस्मात्तयोग्याः युवयोः उचिताः ओषधीः
अपश्च ऋषीणां संबंधिनीः अश्नवेथे भजथः तस्मात् अस्मदीयाः अपि कामयेथामित्यर्थः अस्मे अस्मासु पुरूणि बहू
नि रत्नानि रमणीयानि धनानि दधतौ पूर्व्याणि युगानि मिथुनानि आयापतिरूपाणि अनुचरव्ययुः स्याः तवंतो अ
नुग्रहार्थं ५ शुश्रुवांसेति हे अश्विना नौ चित् पूरणः युवां शुश्रुवांसा श्रुतवंतौ संतौ पुरूणि बहूनि ब्रह्माणि परिदृ
ढ कर्माणि स्तुति लक्षणानि ऋषीणां अस्माकं संबंधीनि अभिचक्षाथे अभिपश्यथः युवां अतो अनाय यजमानस्य मम वरं
यज्ञं प्रति प्रयातं वां युवयोः चनिष्ठा उत्कृष्टलक्षणा सुमतिः अनुग्रहमतिः अस्मे अस्मासु अस्तु भवतु ६ यो वां यज्ञमिति
हे नासत्या अश्विनौ वां युवयोः यः यज्ञः यजमानः समर्यः ऋत्विग्रूपैः मर्त्यैः सहितः हविष्मान् हविषा युक्तः कृतब्रह्मा कृ
तस्तोत्ररूपकर्मा भवाति भवति तं वरं रमणीयं वसिष्ठं आ उप प्रयातं प्रकर्षेण उपागच्छतं इमा इमानि ब्रह्माणि मंत्रजा
तानि युवभ्यां युवाभ्यां अर्यमि आगमनाय ऋच्यंते स्तूयंते इत्यर्थः ७ इयं मनीषेति हे अश्विना आश्विनौ इयं मनीषा स्तु
तिः युवयोः कृतेति शेषः तं देवाः दरायं युनरूयते इयं गीः स्तुतिः कृता हे वृषणा कामानां वर्षकौ इमां अस्मत्कृतां सुवृक्तिं
शोभनां स्तुतिं जुषेथां सेवेथां इमा इमानि ब्रह्माणि कर्माणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि संति अग्मन् ग
च्छंतु यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे सप्तदशो वर्गः॥ ॥इति सप्तमे मंडले चतुर्थोनुवाकः
॥पंचमेनुवाके एकविंशति सूक्तानि तत्राप स्वसुरिति षड्चं प्रथमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः अश्विनौ देवता १

वे·भा·पं· ५७

अपस्वसुरिति स्वसुः स्वसृस्थानीयायाः उषसः सकाशात् नक् नक्तं रात्रिः अपजिहीते अपगच्छति तस्या एव काशं ददाति त्यजति तस्याः कृष्णाः कृष्णवर्णा रात्रीः अरुषाय आरोचमानाय सूर्याय पंथां पंथानं मार्गं रिणक्ति रेचयति यस्मादेवं तस्मात् युवयोः आगमनसमयः प्राप्त इति अश्वामघाः अश्वधनौ गोमघा गोधनौ उभयोः प्रदातारावित्यर्थः ईदृशौ वां युवां वेमस्थानः आहूयामः दिवा नक्तं सर्वदा शरुं हिंसकं अस्मत् अस्मत्तः युयोतं पृथक् कुरुतं २ उपायातमिति हे अश्विनौ युवां उपायातं उपागच्छतं अस्मदाभिमुख्येन यातं किमर्थं दाशुषे हविषां दात्रे मर्त्याय यजमानाय रथेन वामं वननीयं धनं वहंतौ अस्मत् अस्मत्तः युयुतं पृथक् कुरुतं अमतिं अनं रहितं दारिद्र्यमित्यर्थः अमीवां रोगं च हे माध्वी मधुमंतौ युवां नक्तं अस्माकं दिवा नक्तं सर्वदा त्रासीथां रक्षतं ३ अवार्यमिति अवमस्यां आसन्नायां व्युष्टौ उषसि वां युवयोः रथं सुकृत्नामवः सुखेन यो नयंतीति अश्वाः वृषणः वर्षकाः युवां अवर्त्यं तु सृजगमत्विति स्यूतरश्मिं वसुमंतं तं रथं यमन् पुरकं रथं हे अश्विनौ अश्विनौ ऋतयुग्भिः युक्तेः अश्वैः आवहेथां ४ यो वां रथ इति हे नपती यजमानानां पालकौ अश्विनौ वां युवयोः यः रथः वोह्ना युवयोः वाहको स्तीति सर्वदा सन्निहितो वर्तते कीदृशः त्रिवंधुरः सारथ्यभिधानत्रयमपि तः वसुमान् धनवान् उस्रयामा उस्र दिवसं प्रति गता एनाए तेन रथेन हे नासत्या अश्विनौ नः अस्मान् उपायातं यद्यत्र रथः वां विश्वप्स्न्यः व्याप्तरूपः अभि गच्छति अभिगच्छति अथ आहयत्र यस्मात् विश्वप्स्न्यः वाजिनः वाजिगति गच्छतः उपयातं ५ युवं च्यवानमिति हे अश्विनौ युवं युवां च्यवानं जरसः जीर्णात् रूपात् अमुंचतं अमुंचतं तथापि पेदवे एतन्नामकाय राज्ञे आशुं शीघ्रं गामिनं मश्वं निऊहथुः न्यवहतं तथा अत्रिं महर्षिं अंहसः कृत्वा नारके शाकत्वानाम सम्यगुत्तमं त्यक्तवान् समीचार्यां विष्यवं तं निपारयतं तथा जाहुषं शिथिरे शिथिले राष्ट्रे स्वराष्ट्रे अंतर्मध्ये युनक्ति आगंव्यवातं इयं मनीषा हे अश्विनौ नौ इयं मनीषा स्तुतिः युवयोः कृते विशेषः नदेव आदरार्थं पुनरुच्यते इयं गीः स्तुतिः क्रमात् वृषणा कामानां वर्षकौ इमां अस्मत्कृतां स्तुतिं किंशीमता स्तुतिं जुषेथां इमा इमानि ब्रह्माणि क- ५७

मणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि संति अग्मन् गच्छंतु युवां यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे अष्टादशो वर्गः॥ ॥आगोमतेति पंचर्चं द्वितीयं सूक्तं वसिष्ठऋषिः त्रिष्टुप्छंदः अश्विनौ देवता १ आगोमतेति हे नासत्या अश्विनौ गोमता गोयुक्तेन अश्वावता अश्वयुक्तेन अश्वैः वृषभैश्वोक्तव्य इत्यर्थः पुरुश्चंद्रेण बहुधनेन धनप्रदेन त्यर्थः ताह दानर यन आ अभि आ यातं आगच्छतं वां विश्वाः बह्व्यः नियुतः स्तुतयः सचंते सेवंते अस्मत्प्रेरिताः स्पार्हया स्पृहणीयया श्रिया शोभया तन्वा शरीरेण च शुभाना दीप्यमानौ युवां २ आनो देवेभिरिति हे नासत्या अश्विनौ युवां देवेभिः इतरैर्देवैः उपसह सजोषसा समानप्रीतौ परस्परं संगतौ नः अस्माकं अर्वाक् अभिमुखं रथेन आ यातं आगच्छतं युवोः युवयोः नः अस्माकं च सख्यानि सख्यानि पित्र्याणि पितृतः प्राप्तानि उत अपि च युवयोः समानबंधुः बंधुकः पितामहः समानः एक एव तस्य वित्तं बंधु जानीतं विवस्वान् वरुणश्चोभावपि काश्यपौ अदितेर्जातौ विवस्वान् अश्विनोर्जनकः वरुणः वसिष्ठस्य सर्वं समानबंधुत्वं हि पूरणः ३ उदु स्तोमास इति स्तोमासः स्तोमाः स्तवाः अश्विनोः उद् अबुध्रन् उद् उत्थापयंति जामिबंधुरूपानि ब्रह्माणि कर्माणि देवीः द्योतमानाः उषसश्च कारात् अश्विनौ च अबुध्रन् विप्रः मेधावी वसिष्ठः इमे रोदसी द्यावापृथिव्यौ धिष्ण्या धिषणार्हे स्तुत्ये आविवासन् परिचरन् नासत्या अश्विनौ अभिमुखं विवक्ति स्तौति ४ विच्छुच्छंती हे अश्विनौ उषासः उषसः व्युच्छंति तमांसि विवासयंति चेत् पूरणः अतो वां युवयोः स्तुतिसमयः तात् ब्रह्माणि स्तोत्राणि कारवः स्तोतारः प्रभरंते प्रकर्षेण संपादयंति ऊर्ध्वं मस्रेत् आश्रयति भानुं तेजः सविता देवः अग्निः अपि समिधा समिंधनेन बृहत् अतिमहत् जरंते ५ आपश्चातादिति हे नासत्या अश्विनौ पश्चात् पश्चात् देशात् आयातं तथा पुरस्तात् पूर्वस्मात् देशात् तथा अधरात् अधस्तनात् देशात् दक्षिणतः उदक्तात् उदग्देशात् सर्वत्र आयातमिति संबंधः किं बहुना विश्वतः सर्वस्मात् दिशात् पांचजन्येन पंचजनहितेन राया धनेन सह आयातं निषाद पंचमाः चत्वारो वर्णाः पंचजनाः यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे एकोन

161
1915

विंशोवर्गः॥ ॥अतारिष्मेति पंचर्चं तृतीयं सूक्तं वसिष्ठऋषिः त्रिष्टुप्छंदः अश्विनौदेवता १ अतारिष्मेति अस्य तमसः
अज्ञानस्य तमसः पारं वयं समतारिष्म। तमसः पारं अतारिष्म तीर्णा स्मः किं कुर्वंतः देवयंतः देवकामाः स्तोमं स्तुतिं प्रतिदधानाः
देवेषु कुर्वाणाः पुरुदंसा बहुकर्माणौ पुरुतमा प्रत्नतमौ पुराजा पूर्वजातौ अत एव अमर्त्या अमरणधर्माणौ अश्विनौ
आगीः गच्छतः स्तोतारः स्तुतिभिः हवते स्तौति २ न्युप्रियइति प्रियः युवयोः प्रियः मनुष्यः मानुषः होता देवानामाह्वाता सी
दति पाठितः यज्ञेषु अश्विनोर्यः कर्माणि वर्तते इत्यर्थः हे नासत्यौ अश्विनौ यः यजते यागं करोति वंदते स्तौति च तस्य
संबंधिनं मध्वः मधुरं सोमरसं हे अश्विनौ उपाके समीपे स्थित्वैव अश्नीतं पिबतमित्यर्थः विदथेषु यज्ञेषु यां युवां प्रयस्वा
न् अन्नवान् आविवासे आह्वयेतु पूर्वः ३ अहेमयज्ञमिति उ राणाः स्तोत्रं कुर्वाणाः स्तोतारो वयं पथां अगच्छतां देवाना
म् अन्नवान् आविवासे आह्वयेतु स्तोत्रमिमां स्तुतिं जुषेथां सेवेथां वांयुवांप्रयस्वन्नः
यज्ञं यागं यागमावयन्नहं मह्यं यिमेहेः वृषणा कामानां वर्षकौ इमां स्तुतिं शोभनस्तुतिं जुषेथां सेवेथां युवां
श्रुष्टीव शीघ्रगंतारौ इव प्रेषितो अबोधि बोधयति शीघ्रगं तमश्विनिति किं कुर्वन् स्तोमैः स्तोत्रैः प्रतिजरमाणः प्रति स्तुवन्
कः वसिष्ठः अहं ४ उपत्यामिति अश्विनावागमिष्ठौ हविषां वोढारौ नः अस्माकं विशां प्रजानां ऋत्विजां उपगमनं उपगच्छतां की
दृशौ नौ रक्षोहणा रक्षसां हंतारौ संभृता सम्यक् भृतौ युष्मां गोपीथौ पाणी दृढपाणी अश्विनौ यवा अंधांसि अन्नानि
अभ्यक्ष्य विशिष्टेन अप्रतिहतेन अभिमंत्र्य स्मान् मामर्डिष्टं माहिंस्तं किंतु शिवेन मंगलेन सार्धं आगतं आगच्छतं
न सराणि सोमान् सम्यक् गच्छतं युवाम् अस्मान् मामर्डिष्टं माहिंसतं किंतु शिवेन मंगलेन सार्धं आगतं आगच्छतं तथा अधरा
५ आपश्चात्तादिति हे नासत्यौ अश्विनौ पश्चात्तात् पश्चात् देशात् आयातं तथा पुरस्तात् पूर्वस्मात् देशात् तथा अधरा
त् अधस्तनात् देशात् उदक्तात् उदक्तान् उदग्देशात् सर्वत आयातमिति संबंधः किं बहुना विश्वतः सर्वस्मात् देशा
त् पांचजन्येन पंचजनहितेन रायाधनेन सह आयातं निषादपंचमाः चत्वारो वर्णाः पंचजनाः यूयं पात स्वस्तिभिः
सदा नः॥ ॥इति पंचमस्य पंचमे विंशोवर्गः॥ ॥इमा उ वामिति षडृचं चतुर्थं सूक्तं वसिष्ठऋषिः आद्यातृतीयापंचम्यः
बृहत्यः शिष्टाः सतोबृहत्यः अश्विनौ देवता १ इमा उ वामिति इमाः दिविष्टयः दिवमिच्छंत्यः प्रजाः ऋत्विजो पि उवा

163
1911

यं हे अश्विनौ नेतारौ वासको वां हवंते आह्वयंति अयं वसिष्ठोपि हे शचीवसू कर्मधनौ वां युवां अवसे अस्मद्रक्षणाय अ
हं आह्वयामि किमर्थं हि यस्मात् कारणात् युवां विशंविशं प्रजांप्रजां प्रतिगच्छथः २ युवं चित्रमिति हे नरा नेतारौ अश्वि
नौ युवं युवां चित्रं चायनीयं भोजनं धनं ददथुः धारयेथे तद्धनं सूनृतावते स्तुतिवते स्तोत्रे चोदथां प्रेरयेतं तदर्थं समनसा
समानमनस्कौ संनीरथं युवयोः संबंधिनं अर्वाक् अस्मदभिमुखं नियच्छतं नियमतं तथा सुतं सोम्यं सोमसंबंधि मधुम
धुररसं पिबतं ३ आयातमितिहे अश्विनौ नौ युवां आयातं आगच्छतं आगत्य च उप समीपे भूषतं भवतं मध्वः मधुरं सो
मरसं पिबतं पीतात् च हे वृषणा वर्षकौ कामानां हे अन्यावसू ते न व्यथनो युवां पयः धृष्णु दकं अंतरिक्षात् दुग्धं नः अस्मा
न् मामर्धिष्टं माहिंस्तं आगतं आगच्छतं शीघ्रं ४ अश्वासो ये वामिति ये अश्वासः अश्वाः वां युवयोः स्वभूताः दाशुषः हविर्दा
तुः गृहं युवां विभ्रतः धारयंतः दीयमानिगमयंती त्यर्थः मक्षुयुभिः शीघ्रगं तृभिः हयेभिः अश्वैः हे नरा नेतारौ अश्विनौ नौ
देवादि वो अस्मयु अस्मान् कामयमानौ उप आयात अस्मद्यज्ञमागच्छतं ५ अधारुपंतइति अधाह अपि च हे अश्विना
नौ पंनः स्तुतिभिः गच्छंतः यजमानाः सूरयः मेधाविनः स्तोतारः पृक्षः अन्नं प्रयतं स चंत सेवंते तौ युवां मघवद्भ्यः अन्न
वद्भ्यः अस्मभ्यं ध्रुवं अविचलितं यशः अन्नं छर्दिः गृहं यंसतः प्रयच्छतं हे नासत्यौ अश्विनौ ६ प्रयेययुरिति हे ये यजमा
नाः अवृकासः परकीयधनस्य अनाहर्तारः जनानां मनुष्याणां मध्ये नृपातारः ऋत्विजां रक्षितारः संतः प्रययुः युवां प्राप्नु
वंति हविर्भिः प्राप्ताः हर्म्याः नः रथा इव भौत्याः दिपूर्णा रथाः यथा प्राप्नुवंति स्वामिगृहं तु तापि च ते नरः यजमानाः स्वेनशाव
सा स्वीयेन बलेन मंहः धृष्णु वर्धंते उ ताक्षियं क्षितिं स्थानं वासं क्षिपंति गच्छंति प्राप्नुवंति॥ ॥इति पंचमस्य पंचमे एकविं
शोवर्गः॥ ॥व्युषा आवइति अष्टर्चं पंचमं सूक्तं वसिष्ठऋषिः त्रिष्टुप्छंदः उषा देवता १ व्युषा आवइति इयं उषाः दिवि
जाः अंतरिक्षे प्रादुर्भूता आयः आगच्छन्ति भातं कृतवती त्यर्थः सैवोषाः ऋतेन ते जसा महिमानं स्वमहत्वं आविष्कृण्वा
ना आजगात आगतवती आगत्य च द्रुहः अस्मत् द्रोग्धान् अजुष्टं सर्वेषां अप्रियं तमश्च अपावः अपवृणोति किं च अंगि
रस्तमा गंतृतमा पथ्याः पदव्याः अजीगः उद्गिरति प्राणिनां व्यवहाराय प्रकाशनाये त्यर्थः २ महे नइति अद्यनः अस्मा

वे·भा·पं·
५९

कं महे महते श्रवनाय सत्व प्राप्तये बोधि प्रबवकिं बहेतुपमहे महते सौभगाय सौभाग्याय प्रयंधि प्रयच्छ अस्मान्‌ किंवधि
त्रं चानीयं यन्न संयशो धुक्कं रयिभनं धेहि आरय अस्मि अस्मासुहे मानुषि मनुष्य हितेदेवि मर्तेषु अस्मासु श्रवस्कं अन्नवं
तं पुत्रं धेहि संपुगंगः २ एते त्य इति दर्शनीया याः दर्शनीया याः प्रकाशयुक्ताया उषसः एसो पुरोदृश्यमानाः सेते प्रसिद्धाः
चित्राः आमर्त्यमृताः अमृताः अमरणाः भानवः रश्मयः आ अगु आगच्छंति किं कुर्वंतः देव्यानि देवानां संबंधीनि व्रता
नि कर्माणि जनयंतः उत्पादयंतः अंतरिक्षा अंतरिक्षाणि आदृणांतः आपूरयंतः एवं कुर्वंतः भानवः व्यस्थुः विविधं तिष्ठं
ति सर्पंति ४ एषा स्या युजाने ति एषा स्या सा उषाः पराकात्‌ दूरदेशात्‌ दूर स्थितान् पि युजाना उद्योगं कुर्वाणा प्रकाशाय पं
च क्षितीः निषाद पंचमान् चतुरो वर्णान् नाम्‌ सद्यः परि जिगाति परिगच्छति किं कुर्वती जनानां प्राणिनां वयुना प्रज्ञानानि
अभिपश्यंती साक्षि ते नाव लोक यंती कीदृशी सा दिवो दुहिता दुहितृ स्थानीया भुवनस्य जगतः जातस्य पत्नी पालयित्री प
रि मिगाती सत्वय ५ वाजिनी वती ति वाजिनीवती बहु अन्ना सूर्यस्य योषा योषित्‌ चित्रामघा विचित्रधना रयीणां व्यध
व्या राय न्यन स्वयस्य लोकस्य द्याविसर्ग अयन्नाय नानां बद्दे रो रयिरुक विसुनां ऋषिभिः स्तुता आरयंती प्राणिजातानि उ
षाः सर्कसुम स्तुनरावर्तमाना प्राणिनां मानुः दायय ति मधोनी धनवती उषाः वह्निभिः कर्मवोढृभिः यजमानैः गृणाना
स्तूयमाना उच्छ तिविनानं करोति प्रतितिस्तुतानानामि तिर्दधूता नां यौत मानां उषसं वहंतः धारयंतः अरुषासः आरोचमा
नाः चित्राः चायनीयाः अश्वाः प्रसरद्‌ श्रन्‌ प्रति दृश्यंते सा च उषाः अश्वाः रोप्यमाणा विश्व पिशा बहुरूपेण रथेन याति सर्व
मगस्त लोकिने परिवारयते जनाय रत्नं रमणीयं धनं दधाति ददाति च ७ सत्या सत्येभिरिति सत्या अन्यैरबाध्या महती पूजनी
या देवी देवगमनाय जनाय जनानां उषाः सत्येभिः सत्यैः महद्भिः देवेभिः देवैः यजत्रेभिः यजनीयैः सहिता सती दृढानि अत्यं
त कि राणि तमांसि रुजत्‌ भिनत्ति उस्रियाणां गवां संचाराय प्रतिरद्दत्यां ददाति सामर्थ्यात्‌ प्रकाशानि सूर्यः किंच गावः उ
पल क्षणमेतत्‌ सर्वे पतनशीलाः प्राणिनः उषसं वावशंत कामयंते ८ नूनो गोमद् इति हेउषः नू नः अस्मभ्यं गोमत्‌ बहु
भिः गोभिः युक्तं वीरवत्‌ पुत्रैः उपेतं अश्वावत्‌ अश्वैरुपेतं रत्नं रमणीयं धनं पुरुभोजः बहु अन्नं च अस्मि अस्मासु धेहि

२ हिन्नः अस्माकं बर्हिः यज्ञं पुरुष नापुरुषना यां पुरुष समहे पुअस्मत्‌ सदश्चेषु इत्यर्थः निदे निंदायै माकः माकार्षीः यू०॥
॥इति पंचमस्य पंचमे द्वाविंशो वर्गः॥ ॥उदु ज्योति रिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप्छंदः उषा देवता १ उदु ज्योति
रिति अमृतं अविनाशं विश्वजन्यं विश्वेषां जनानां हितकरं ज्योतिः विश्वानरः सर्वेषां नेता सविता देवः उदु अश्रेत्‌ ऊर्ध्वं श्र
यति देवानां व्रतः कत्वा यज्ञमानानां क्रत्वा कर्मणा निमित्तेन यागानुष्ठानाय उमि त्यर्थः चक्षुः चक्षुः स्थानीय मोषसं तेजः अ
२ जनिष्ट प्रादुर्भूत्‌ उसन्ना उषाः विश्वं सर्वं भुवनं भूतजातं आविरकः प्रादुरकरोत्‌ २ प्रमेपंथाइति मेमया देवयानाः
देवप्रापका पंथाः पंथानः प्रजादृश्रन्‌ प्रादृश्यंत कीदृशाः अमर्धंतः अहिंसंतः वसुभिः तेजोभिः इष्कृतासः संस्कृताः
पुरस्तात्‌ पूर्वस्यां दिशि उषसः केतुः प्रज्ञापकं तेजः अभूत्‌ उ अचेति ज्ञायते सा उषाश्च प्रतीची प्रत्यग्‌ वना अस्मदभिमु
खा हर्म्येभ्यः अधि उच्छ्रितेभ्यः देवेभ्यः आ अगात्‌ आगच्छति ३ तानीदहानीति हेउषः तानीत्‌ तान्येव तेजांसि बहुलानि
अहानि आसन्‌ उषः कालस्येव अहः शब्दः यानि सूर्यस्य उदिता उदितौ उदये सति प्राचीनं तस्य प्राग्देशं प्रत्यस्फुरयंति
हेउषः यतो यश्च तेजोभिः परिदृक्षे दृश्यसे सन्ना रइव रायेः जरयितरि सूर्ये आचरंती पत्नी साध्वी नारी इव लंदृश्य
से न पुनः पती व यथाप्यभिचारिणी नारी न त्यजति न दूतु सूर्यं अपरित्यजंती त्वं एवं येः तेजोभिः युक्ता परिदृश्यसे ता
न्येवाहानि आसन्निति संबंधः ४ तइद्देवानामिति तइत्‌ तेंगिरस एव ऋषीणां मध्ये देवानां सधमादः सह माद्य
तः आसन्‌ अभवन्‌ ये ऋतावानः सत्यवंतः कवयः अनूचानाः पूर्व्यासः पूर्वकालीनाः पितरः पालयितारः सर्वस्यांगि
रसः गूह्लान्तमसा आवृतं ज्योतिः सौर्यं तेजः अन्वविंदन्‌ लब्धवंतः मंत्रसामर्थ्यात्‌ सत्यमंत्राः सत्यस्तुतयः सन्तः उ
षसं अजनयन्‌ प्रादुरकुर्वन्‌ अआंगिरसां स्तुत्या उषसः एव स्तुतिर्ज्ञातव्या ५ समान उर्वे इति समाने सर्वेषां साधा
रणे ऊर्वे गोसमूहे पणिभिः परहृते पुनर्लब्धे अधि संगताः अपि अन्यर्धकः संगतासः मीलिताः संतः ते संजानते एकबुद्धयो
भवंति संहे व सायन्‌ मन्तुनिर्विष्टीत्यर्थः मिथः परस्परं यतंते न ते अंगिरसः देवानां व्रतानि कर्माणि यागलक्षणानि न मि
नंति न हिंसंति किंतु परिपालयंतीत्यर्थः किं कुर्वंतः अमर्धंतः हिंसंतः वसुभिः वासकैः उषसो तेजोभिः यादमानाः गच्छंतः

७ प्रति त्वा स्तोमैरितीहि सुभगे देवि उषः त्वां त्वां उषर्बुधः उषसि बुध्यंतः बुबुधांसः स्तुवंतो वसिष्ठाः स्तोमैः स्तोत्रैः ईळते स्तु
वंति गवां नेत्री धाप यित्री वाजपत्नी अन्नस्य पालयित्री दर्शीतं नः अस्मदर्थं उच्छ विभाहि हे उषः सुजाते प्रादुर्भावे प्रथ
मा हमार देवेष्वोषु स्व्यमा तात्र सस्तुतासव प्रतिपूरणः ७ एषा नेत्रीति एषा उषा राधसः स्तोतुः सूनृतानां स्तुतीनां
नेत्री सती उच्छं ती तमो विवासयंती वसिष्ठैः वसिष्ठगोत्रोत्पन्नैः ऋषिभिः स्तूयते दीर्घश्रुतं दीर्घं श्रूयमाणं सर्वत्र प्रसिद्धं र
यिं धनं अस्मे अस्मासु दधाना धारयंती॥ ॥इति पंचमस्य पंचमे त्रयो विंशो वर्गः॥ ॥उपो रुरुचे इति षळृचं सप्त
मं सूक्तं वसिष्ठस्य त्रिष्टुप् छंदः उषा देवता। १ उपो रुरुचे इति उपो उषा उपो समीप एव सूर्यस्य रुरुचे दीप्यते युवतिः
योषेव नित्यं तरुणी योषा यथा पत्युः समीपे दीप्यते तद्वत् किं कुर्वती विश्वं सर्वं जीवं संचरा
यै संचाराय प्रसुवंती प्रेरयंती किंच अग्निः मानुषाणां अध्याय समिधे अभूत संपि धनीयः अभवत् सप्रसिद्धः सप्तमाप्ति
जं अवबाधमाना बाधमानं ज्योतिः तेजः संधं अकः अकरोत् २ विश्वं प्रतीचीति विश्वं कृत्स्नं जगत् प्रति प्रती
ची अभिमुखी सप्रथाः सर्वतः पृथुतरा उदस्थात् उदगच्छत् उदितावरुशत् दीसं शुक्लं तेजो मयं वासः वसनीयं तेजः
समुद्दीव्यमानी धारयंती अश्वेत् वर्धति हिरण्यवर्णा हि रमणीयपेता रुक्मदर्शी संदृक् सुष्टुदर्शनीयं संदृकू तेजो
यस्याः सा गवां रश्मीनां माता निर्मात्री अरोचि रोचते अन्हां नेत्री दिवसानां प्रापयित्री ३ देवानां चक्षुरिति देवा
नां चक्षुः चक्षुः स्थानीयं तेजः वहंती प्रापयंती सुभगा सुधना स्वदृशीकं सुदर्शनं अश्वं सद्यो गंतारमादित्यं नयंती
प्रापयंती किं श्वेतं श्वेतवर्णेन सूर्यं प्राचा युक्तं कुर्वती अर्चीः किं दर्शीं उषाः रश्मिभिः स्वकीयैः व्यक्ता अदृशि दृश्य
ते चित्रामघा विविधधना विश्वं अनु सर्वं जगदनुलक्ष्य प्रभूता प्रवृद्धा सर्वं जगद्व्यवहारयेत्यर्थः ४ अंतिवामेति हे उ
षः अंतिवामा अस्मदंतिके वननीयं धनं यस्याः सा त्वं अमित्रं अस्मत् शत्रुं दूरे अस्मत्तः विप्रकृष्टदेशे वर्तमानं कुरु व्यु
च्छ विभाहि पथा विस्तीर्णां उरुं गव्यूतिं गव्यां अभयं नः अस्मत् दूरे कृणु यावय अस्मत्तः पृथ
क् कुरु वसूनि यानि च नानीच आभर आहर राधः धनं चोदय प्रेरय मघोनि धनवति ५ अ

167
1915

स्मे श्रेष्ठेभिरिति हे उषो हे देवि अस्मे अस्मभ्यं श्रेष्ठेभिः प्रशस्तैः भानुभिः रश्मिभिः प्रकाशैः विभाहि प्रकाशय किं कुर्वती नः
अस्माकं आयुः आयुष्यं प्रतिरंती वर्धयंती हे विश्ववारे विश्वैः संभजनीये देवि नः अस्मभ्यं इषं अन्नं च गोमत् गोभिः बहु
भिरूपेतं अश्ववत् अश्वैरुपेतं रथवत् रथैरूपेतं राधः धनं च दधती पोषयंती ६ यां त्वा दिव इति हे दिवो दुहितः उषः सु
जाते शोभनजनने यां त्वां भानुभिः ईळते वसिष्ठाः वर्धयंति सा त्वं अस्मासु वसिष्ठेषु क्षयं रयिं धनं महं महांतं रयिं ध
त्थ यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे चतुर्विंशो वर्गः॥ ॥प्रति केतव इति पंचर्चं अष्टमं सू
क्तं वसिष्ठस्य त्रिष्टुप् छंदः उषा देवता १ प्रति केतव इति प्रथमाः प्रथमोत्पन्नाः केतवः प्रज्ञापकाः रश्मयः प्रत्यदृश्र
न् दृश्यंते अस्याः अंजयः अंजकाः रश्मयः ऊर्ध्वाः ऊर्ध्वं श्रयंतः विश्रयंते सर्वं जगत् प्रति हे उषः देवि अर्वाचा अस्मदभि
मुखेन आगच्छता बृहता महता ज्योतिष्मता तेजोवता रथेन अस्मभ्यं वामं वननीयं धनं वक्षि वहसि २ प्रति षीमग्निरिति
अग्निः समिद्धः सन् सीं सर्वतः प्रति जरते अभिवर्धते विप्रासः मेधाविनः ऋत्विजः स्वम तिभिः स्तुतिभिः उपसंगृणंतः
स्तुवंतः उषा देवी ज्योतिषा विश्वा सर्वाणि तमांसि दुरितानि दुरितानि अपबाधमाना याति ऊर्ध्वं गच्छति ३ एता उ त्या इ
त्येता उ पूर्वः सा ता प्रसिद्धाः विभाती विभात्यः विभातं कुर्वत्यः ज्योतिस्तेजः यच्छंतीः प्रयच्छंत्यः उषसः पुरस्तात् पूर्व
स्यां दिशि प्रत्यदृश्रन् प्रतिदृश्यंते ताः उषसः सूर्यं यज्ञं अग्निं च अजीजनन् प्रादुरकुर्वन् उषसः उदयानंतरं तेषां स
मवात् तत् अजनत्सं उपचर्यं तेकिंच अपाचीनं निचीनं अजुष्टं अप्रियं सर्वेषां दृष्टिनिरोधकत्वात् अप्रियं तमः दर्शनं
मो अगात् अपगतमभूत् ४ अचेति दिव इति दिवो दुहिता मघोनी धनवती उषाः अचेति सर्वैः ज्ञायते विश्वे सर्वे विप्रा
भिः विभाती उच्छंती उप सं पश्यंति तां दर्शनीयां स्वधया अन्नेन युज्यमानं रथं आस्थात् आरोहति यं रथं सुयुजः शोभन
योजनाः अश्वासः अश्वाः आवहंती अभिमत देशं प्रापयंति तं रथं आस्थादिति ५ प्रति त्वाद्येति हे उषः त्वां त्वां अद्य अस्मि
न् काले सुमनसः शोभनस्तुतिकाः मघवानः हविर्लक्षणान्नवंतः अस्माकासः अस्मदीयाः ऋत्विजः वयं प्रतिबुधंत प्र
तिबोधयन् स्तुतिभिः हे उषः यूयं च विभाती व्युच्छंत्यः सत्यः तिल्विला यध्वं अगतः स्निग्धभूमिकं कुरुता यूयं पात

स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे पंचविंशो वर्गः॥ ॥व्युषा आवेति पंचर्चं नवमं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः उषा देवता॥ १ व्युषा आव इति जनानां सर्वप्राणिनां पथ्या हिताय श्रोतृम् किं कुर्वती मानुषीमनुष्यरूपाः पंच क्षिती:
निषादपंचमांश्चतुरो वर्णान् बोधयंती दिवजा उषाः स्तूसंदृग्भिः स्तुतेजोभिः उस्राभिः गोभिः भानुं अभ्यश्रेत् सूर्यश्चरोदसी
द्यावापृथिवीं लभ्रो पुस्के व वस्त्राप्रकाशके न तेजसा भ्यावः कृणोति २ व्यंजते दिव इति उषसः अंजून्ते जो सिदिवः अं
तान् क्षस्य अंतेषु पर्यवदे शेषु व्यंजते व्यक्तिं कुर्वंती सर्षः युक्ताः परस्परसंयुक्ताः विशोन प्रजा इव सेनाइव यतंते तेनमो
भासा नाय प्रसूक्तः रे उषः ते नव गावः रश्मयः तमः अंधकारं समावर्तयंति नाशयंति ज्योतिः तेजः यच्छंति प्रयच्छंति
सविता सूर्यः बाहू इव ३ अभूदुषा इति इंद्रतमा सर्वस्यैश्वर्य तमा मघोनी धनवती उषाः देवी अजीजनत् सुविताय कल्या
णाय श्रवांसि अन्नानि जनी भजत् उदपा द्युपतू प्रकाशयंती सर्वं दिवो दुहिता अंगिरस्तमा गंतृतमा तारदशी उषाः
स्तूकृते यजमानाय वसूनि धनानि विदधाति करोति ४ तावदुष इति हे उषः यावत् राधः धनं स्तोतृभ्यः पूर्वं अरदः
द्दत नव सस्तिताव नूतनं गृणानाः स्तुवमानाः जनाः स्तुभः मपि राधरेहि यो सा सांह वभस्य वृषभं रवेण वक्तुं प्रकाशेन ज
गुः आगं मि प्राणिनः ह्लादन्मत्ररठस्य अद्रेः दृढो द्वाराणि पणिभिः गाः प्रवेश्य पिहिता नि व्यौर्णोविदतान्यकरोः ५ देवं दे
वे दिवं दर्वदेवं सर्वमपि स्तोतारं राधसे धनाय चोदयंती प्रेरयंती अस्मद्भक् अस्मदभिमुखं सूनृताः वचांसि ईरयंती व्युच्छं
ती व्युच्छंती अस्माकं सनये दानाय धियः बुद्धीः धाः धेहि यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे षड्विं
शो वर्गः॥ ॥प्रति स्तोमेभिरिति सप्तर्चं दशमं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः उषा देवता १ प्रति स्तोमेभिरिति विप्रासः वि
प्राः मेधाविनः वसिष्ठाः वसिष्ठगोत्राः स्तोमेभिः स्तोत्रैः प्रबुध्यमानाः गीर्भिः स्तुतिभिः प्रथमाः इतरयजमानेभ्यः पूर्वभू
ताः संतः उषसं प्रति अबुध्रन् प्रतिबोधयंति वीरगीः उपसं र जसी द्यावापृथिव्यौ समंते समानपर्यंते एकीभूतयोर्विवर्त
यंती व्यावर्तयंती विश्वा सर्वाणि भुवनानि आविष्कृण्वंती प्रकटीकुर्वंती स्वभासा २ एषास्यन्व्यमिति एषा उषाः स्या

169
1915

सा गतदिवसेषु प्रसिद्धा रस्मा नान व्यं नवतरं आयुः आयुष्मत् यौवनमिति सर्यः ताद्दशं दधाना धारयंती गूढ्वी गूढं तमो
अंधकारं ज्योतिषा स्वतेजसा निवारयंती अबोधि बुध्यते अग्रे पुरो दृशः सर्वस्य पुरस्तात् एति युवतिर्नित्यं तरुणी अह
याणा अलज्जा यती स्त्रीव गो साय धापसु रश्मे संचरती त इत्स्तूर्यस्य पुरतो एति एवं भूता सती सूर्यं यज्ञं अग्निं च प्राचिकि
तत् प्रज्ञापयति ३ अश्वावतीरिति अश्वावतीः बहुभ्र्वस्यः गोमत्यः वीरवती: वीरवत्यः पुत्रप्रदाः अतएव भद्राः स्तु
त्याः उषासः उषसः सदं सर्वदा नः अस्माकं उच्छंतु विवासंतु घृतं उदकं दुहाना दोग्ध्र्यः प्रतीतासर्वतः प्रवृधाः यूयं पात
स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य पंचमे सप्तविंशो वर्गः॥ ॥२७ इति ऋग्भाष्ये पंचमाष्टके पंचमोध्यायः॥ ॥ ६३॥
प्रत्यु अदर्शीति षडृचं एकादशं सूक्तं वसिष्ठऋषिः प्रथमाद्या अयुजः बृहत्यः द्वितीयाद्या युजः सतो बृहत्यः उषा देवता
१ प्रत्यु अदर्शि आयती आगच्छंती उच्छंती तमांसि विवासयंती दिवः द्युलोकस्य दुहिता पुत्री एवं भूता उषाः प्रत्यदर्
शि प्रतिदृश्यते सर्वैः उपूरुणः सेषा महि महत् तमः अंधकारं अप उब्जयति अपवृणोति किमर्थं चक्षसे दर्शनार्थं एवं क
र्त्यास्त्री नरीजनानां सूनृतानेत्री उषाः ज्योतिः प्रकाशं कृणोति करोति २ उदुस्रिया इति सूर्यः दिवः उस्रियाः रश्मीन् स
दृशु गपद्वदुत् सृजति उद्गमयति तथा उषम् प्रादुर्भवन् नक्तं नभसि दृश्यमानग्रह नक्षत्रादिकं अर्चिवत् दीप्तिमत्
सौरेण तेजसा क्लिन्नं चंद्रप्रभ तिनक्षत्राणिमासंते सुशुभ्रः सूर्यरश्मिभ्यद्दमागं करोति एवं च सति हे उषः देवते तव सू
र्यस्य च व्युषि विवासने प्रकाशने सति भक्तेनान्नेन संगमेमहि वयं संगच्छेमहि इत्यर्थः ३ प्रति त्वा दुहितरिति हे दि
वो दुहितः उषः दवने त्वां जीराः क्षिप्रकारिणो वयं प्रत्यम् त्स्म हि प्रतिबोधयामः वेमहे वनन्वति संभक्त्यर्धनवति या त्वं
पुरु बहु स्पार्हं स्पृहणीयं धनं वहसि प्रापयसि हा शुचे हविर्दनवते यजमानाय रत्नं रमणीयं धन मिवमयः सुखं च या
त्वं वहसि प्रापयसि तां त्वां प्रति अबुत्स्महीत्यन्वयः ४ उच्छंतीयेति हे महिमहति देवि उषः उच्छंती तमांसि वर्जयंती भंह
ना महिम्ना युक्तायास्तं त्वः सर्वं जगत् प्रख्येप्रबोधनार्थं दृशे दर्शनार्थं च कृणोषि करोषि तस्याः ताद्दश्याः रत्न भाजः रम

वे·भा·पं·
६२

पीपानां जगानां भाजयितारः सेवधिन्याः ईमहे याचामहे अपि च वयं तेन तव प्रियतमाः स्याम भवेम मातुर्न सूनवः यथा ज
नन्याः पुत्राः प्रियतमाः भवंति तद्वत् ५ तच्चित्रं राध इति हे उषः तत् चित्रं चायनीयं राधः धनं आ भर आहर अस्मभ्यं प्र
यच्छ यत् धनं दीर्घश्रुत्तमं अतिशयेन प्रख्यातं आपि वहेहि दिवो दुहितः स्वर्गस्य पुत्रि यं मर्तभोजनं मनुष्याणां भोगयोग्यं यद
न्नमस्ति तत् राध्नहि अस्मभ्यं प्रयच्छ तं धनं अस्मभ्यं भुनजामहै अश्नवहै ६ श्रवः सूरिभ्य इति हे उषः सूरि
भ्यः स्तोतृभ्यः अस्मभ्यं अमृतं मरणरहितं निसंवसत्वं वासकं श्रवः श्रवणीयं यशः राध्नि सन्तु वाजान् गोमतः गोभिः
युक्तान् वाजान् अन्नानि च अस्मभ्यं राध्नि मघोनः हविष्मतः यजमानस्य चोदयित्री प्रेरयित्री सूनृतावती प्रिय
सत्यात्मिका वाक् सूनृता तद्वती उषाः स्रिधः शत्रून् अपोच्छतु अपगमयतु॥ ॥इति पंचमस्य षष्ठे प्रथमो वर्गः॥ ॥
इंद्रावरुणेति दशर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं जगतीछंदः इंद्रावरुणौ देवता १ इंद्रावरुणेति हे इंद्रावरुणा० णौ युवं यु
वां नः अस्माकं विशे विशाय जनाय यजमानाय अध्वराय यज्ञाय महि महत् शर्म गृहं सुखं वा यच्छतं अपि
च यं दीर्घप्रयज्युं अति वनुष्यति जिघांसति हन्ति संग्रामेषु दुढ्यः दुर्धियः दु
ष्टा मतिं संधीन् सुतरां वयं जयेम अभिभवेम २ सम्राळन्य इति हे इंद्रावरुणा० णौ वां युवयोर्मध्ये अन्यः एकः वरु
णः सम्राट् सम्यक्राजमानः अन्यः इंद्रः स्वराट् स्वयमेव राजमानः उच्यते तथाविधौ इंद्रावरुणौ महांतौ महावसू म
हाधनौ च भवतः हे इंद्रावरुणा० वां युवां परमे व्योमनि उत्कृष्टे आकाशे विश्वे देवासः सर्वे देवाः ७ जः शरीर
सामर्थ्यं बलं संदधुः सम्यक्योजयन् तथा बलं सामर्थ्यं युवाभ्यां संदधुः ३ अन्वपां खानीति हे इंद्रावरुणा० णौ अपां ६२
उदकानां खानि द्वाराणि परिमितानि ओजसा बलेन अतृन्तं आवरकस्य वृत्रस्य वधेन दृष्टि पति वं
भगिराकृत्वा सूर्यः अंतरिक्षे ऐरयतं अभ्यगमयतं स्वभाविना आ वृतं
स्वर्यं हे इंद्रावरुणा० णौ मायिनः प्रज्ञावतः अस्य सोमस्य पानेन मदे हर्षे सति अपि

171
1915

तः अक्षरहितान् धरी अपि जलेनापूरयतं कर्माण्यस्माभिरनुष्ठितानि धियं तं सिंचतं फलेनापूरयतं ४
युवामिद्धीति हे इंद्रावरुणा० णौ वाहयः हविषां वोढारः ऋत्विजः युत्सु युद्धेषु पृतनासु रक्षणार्थं युवामित् युवामेव हवंते
आह्वयंति सितज्ञवः संकुचितजानुकाः अंगिरसो पि क्षेमस्य रक्षणस्य प्रसवे उत्पादने निमित्तभूते सति युवामेव हवं
ते अतः कारणात् हे इंद्रावरुणा कारवः स्तोतारो वयमपि उभयस्य दिव्यस्य पार्थिवस्य च वस्वः वसुनः धनस्य ईशाना
ईश्वरौ स्वहवा स्वह्वानौ युवां आहुवामहे आह्वयामहे ५ इंद्रावरुणेति हे इंद्रावरुणा० णौ यत् यौ युवां भुवनस्य
लोकस्य संबंधीनि इमानि परिदृश्यमानानि विश्वा सर्वाणि जातानि भूतजातानि मज्मना बलेन च चक्रथुः कृतवंतौ तयोर्यु
वयोः मध्ये एकं वरुणं क्षेमेण रक्षणेन मित्रो देवः दुवस्यति परिचरति मित्रावरुणौ सख्यौ अत एव सहचरौ दृश्येते
अन्यः एकः इंद्रः मरुद्भिः मरुद्गणैः उग्रः उद्गूर्णबलः सन् शुभं शोभनमलंकारं ईयते प्राप्नोति॥ ॥इति पंचमस्य षष्ठे द्वि
तीयो वर्गः॥ ॥महे शुल्कायेति वरुणस्य इंद्रस्य वरुणस्य च त्विषी त्विषिः दीप्तं ओजः बलं नु क्षिप्रं मिमाते स्तोत्रेण निर्मि
माते यजमानपत्न्यः स्तोत्रेण हि अयेते किमर्थं महे महते शुल्काय धनाय धनस्य लाभार्थं अस्य इंद्रस्य वरुणस्य च
ध्रुवं नित्यं स्वं स्वकीयं असाधारणं यत् ओजः विषेते तत् ओजः मिमाते इत्यन्वयः तयोः इंद्रावरुणयोः अन्यः एकः वरु
णः अजामिं अबंधुं अस्मभ्यं नाहिंसंतं कर्माण्यकुर्वंतं अस्तोतारं अयजमानं च आ तिरत् अभिहंति अन्यः ए
कः इंद्रः अल्पैः बहुतरान् शत्रून् प्रथमो ति प्रकर्षेण बाधितान् करोति ७ न तमंह इति हे इं
द्रावरुणा० णौ तं मर्तं मनुष्यं अंहः पापं न नशत् न व्याप्नोति न दुरितानि दुर्गमनानि पापफलानि प्राप्नुवंति कुतश्च न
कस्मादपि निमित्तात् तपः संतापश्च तं न प्राप्नोति हे देवौ इंद्रावरुणौ यस्य मर्तस्य मनुष्यस्य अध्वरं यज्ञं गच्छथः प्राप्नु
थः युवां वीथः कामयथे पूजयथे वा तं मनुष्यं परिह्वृतिः परिबाधा न नशते उक्तप्रकारेण न व्याप्नोति ८ अर्वाङ्नरेति हे न
रा नेतारौ इंद्रावरुणा० णौ दैव्येन देवसंबंधिना अवसा रक्षणेन सह अर्वाक् अस्मदभिमुखं आ गतं आगच्छतं आ

गाः स्वमेहवं महीयं स्तोत्रं यदिन्द्रं सोम्पयः सेवे पतार्हि प्रगुतं युवोहि युवयोः खलु यत्र सख्यं सखित्वं उ नवा अपिच य
त् आप्यं बन्धुत्वं माडीकं सुखं तस्य सा धनं तद्रुभयं हे इंद्रावरुणौ मियं छतं अस्मभ्यं प्रयच्छतं ९ अस्माकमिति हे वरुणौ
अस्माकं पूर्णां कर्षकं ओजः बलं पयोः तादृशौ इंद्रावरुणा॰णौ भरे भरे संग्रामे संग्रामे अस्माकं पुरोयोधा पुरस्तात् यो
द्धारौ भवतं यत् शौर्यं युवां उभयविधाः पूर्वकालीना इदानींतनाश्च नरः स्तोतारः स्पर्द्धियुद्धे योधुवां हवंते अयं सं
विनोकस्य पुत्रस्य तनयस्य पौत्रस्य सातिषु संभजनीयेषु निमित्तभूतेषु युवां हवंते तौ अस्माकं पुरोयोधा भवत
मित्यन्वयः १० अस्मे इंद्र इति अस्मे अस्मभ्यं इंद्रः वरुणः मित्रः अर्यमा एते देवाः द्युम्नं द्योतमानं यच्छन्तु प्रयच्छन्तु
याम हि महत् सप्रथः सर्वतः विस्तीर्णं शर्म गृहं च प्रयच्छन्तु अपिच ऋतावृधः यज्ञस्य वर्धयित्र्याः अदितेः देवमातुः ज्यो
तिः तेजः अस्मान् अस्माकं अपथ्यं अहिंसकं मस्तु वयं देवस्य सवितुः श्लोकं स्तोत्रं मन्नामहे अनीमः कुर्म इत्यर्थः॥ ॥
इति पंचमस्य षष्ठे तृतीयो वर्गः॥ ॥युवां नरेति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जगती छंदः मित्रावरुणौ देवता ॥
युवां नरेति हे नरा इंद्रावरुणौ युवां युवयोः आप्यं बंधुभावं पश्यमानासः पश्यंतः गव्यंतः गाः आत्मन इच्छंतः यजमानाः
प्रथुपर्शवः ऽऽर्त्विजः स्तोत्राणि पृथुः पार्श्वाः स्रुच्याः प्रतीचीं ते प्राचां प्राचीनं ययुः बर्हिराहरणार्थं गच्छंति हे इंद्रावरुणा॰णौ युवां दासा
नि वृत्राणि आर्याणि च कर्माणि जातान्निहतं हिं
सा सानि उपक्षायितृणि च हे ब्रह्माणि आवरकाणि शत्रुजातानि आर्याणि वकमानिवृत्तान्यपराणि च शत्रु जातानि हतं हिं
लं अपिच सुदासं एतत्संज्ञं राजानं अवसा रक्षणेन सार्धं अपातं आगच्छतं २ यत्रा नर इति यत्र यस्मिन्संग्रामे नरो नेता
रः कृतध्वजः समवंते युद्धार्थं संगच्छंते यस्मिंश्च आजौ आजौ युद्धे नच्चेति निपातद्वय समुदायो विभज्य योजनीयः किं
चाकिंमपि प्रियं अनुकूलं न भवति अपि तु सर्वं दुःखरं भवति यत्र चयत्र हे भुवनानि भूतजातानि स्वर्दृशः शरीरपात
नादूर्ध्वं स्वर्गस्य द्रष्टारो वीराश्च भयंते बिभ्यति तत्र तादृशे संग्रामे हे इंद्रावरुणा॰णौ नः अस्मान् अधिवोचतं अस्मत्
पक्षपातवचनौ भवतं ३ सं भूम्या इति हे इंद्रावरुणा॰णौ भूम्याः अंताः पर्यंताः ध्वसिराः सैनिकैः ध्वस्ताः समदृश्यन्

अं द स्तं तेन पादि विशे, लोकस्य घोषः सैनिकानां शब्दश्च आअरुहत् आरूढो भूत् जनानां अस्मदीयानां भटानां अरा
तयः शत्रवः मां उप अस्थुः उपास्थिताः एवं प्रवर्तमाने अस्मिन् युद्धे हे हवनश्रुता आह्वानशालीइंद्रावरुणौ अवर्क् अस्मद
भिमुखं अवसा रक्षणेन सह आगतं आगच्छतं ४ इंद्रावरुणेति हे इंद्रावरुणा॰णौ वधनाभिः वधकैः आयुधैः अप्रतिभे
दं अप्रतिगतं अप्राप्तपरं एतत्संज्ञं सुदासं शत्रुं वन्धं तारहिंसंतौ युवां सुदासं एतत्संज्ञ मयाज्यं राजानं प्रावतं प्रकर्षेण
रक्षतं एषां तृत्सूनां मम याज्यानां ब्रह्माणि स्तोत्राणि अश्रुणुतं अशृणुतं तं कदा हवीमनि संग्रामे यस्मादेवं तस्मात् तृत्सूनां मम
याज्यानां पुरोहितिः मम पुरोधानं सत्या सत्यफलं अभवत् तेषु तत्र मम पौरोहित्यं तत्सफलं जातमित्यर्थः ५ इंद्रावरुणा
विति हे इंद्रावरुणौ अर्यः शत्रोः संबंधीनि अघानि आयुधानि मां अभ्यातमंति अभितो बाधंते अपिच वनुषां हिंसकानां
मध्ये अरातयः शत्रवश्च मां अभितपंति युवं हि युवां खलु उभयस्य पार्थिवस्य दिव्यस्य वस्वः वस्वनः धनस्य राजथः ईशाथे
अधस्म अतः कारणात् पार्ये तरणीये दिवि दिवसे युद्धदिने नः अस्मान् अवतं रक्षतं॥ ॥इति पंचमस्य षष्ठे चतुर्थो वर्गः॥
युवां हवंत इति उभयविधाः उभयासः सश्रीराजानः ससहायभूताः तृत्सवश्च एवंहि प्रकाराः जनाः आजिषु संग्रा
मेषु इंद्रं च वरुणं च युवां हवंते आह्वयंते किमर्थं वस्वः धनस्य सातये संभजनार्थं यत्र येषु आजिषु दशभिः दशसंख्या
कैः राजभिः शत्रुभूतैः नृपैः निबाधितं नितरां हिंसितं सुदासं तृत्सुभिः सह वर्तमानं प्रावतं युवां प्रकर्षेण रक्षितं आजि
षु इत्यन्वयः ७ दशराजान इति हे इंद्रावरुणा॰णौ दशसंख्याकाः राजानः सुदासः शत्रवः समिताः संगताः परस्परं स
अ ंवेताः अयज्यवः अयजमानाः एवंभूताः ते सुदासं एतत्संज्ञं एकमपि राजानं न युयुधुः न संप्रजह्रुः युवाभ्यामनुग्र
हीतं प्रहर्तुं न शेकुः नरां नेतॄणां सदां हविर्भिः युक्तानां नॄणां ऋत्विजां उपस्तुतिः स्तोत्रं सत्या सफलाभूत् अपिच एषां
देवहूतिषु यज्ञेषु सर्वे देवाः अभवत् युष्मदनुग्रहात् प्रादुर्भवंति ८ दाशराज्ञ इति हे इंद्रावरुणौ दाशराज्ञे दशभिः
राजभिः शत्रुभूतैः विश्वतः सर्वतः परियताय परिवेष्टिताय सुदासे राज्ञे अशिक्षतं बलं प्रायच्छतं यत्र यस्मिंदेशे श्वि

173
1915

के.भा.पं.
६४

संवः नेमं स्थंगछंतः कपर्दिनः जटिलाः धीवंतः कर्मभिः युक्ताः न त्सव वसिष्ठशिष्या ऋत्विजः नमसा हविर्लक्षणेनान्ने
नाभिपास्त स्थाप्य असंसं तपर्यन्त् तस्मिन्ने यो युवां नमेरा हो बलं प्रापयन्तामित्यर्थः ९ वृत्राण्यन्य इति हे इंद्रावरुणा०
णौ युवयोरन्यः एकः इंद्रः वृत्राणि शत्रून् समिथेषु संग्रामेषु जिघ्नते हंति अन्यः एकः वरुणः सदा सर्वदा व्रतानि कर्माणि
अभिरक्षति सर्वतो रक्षति हे वृषणा कामानां वर्षितारौ इंद्रावरुणौ तथाविधौ वां युवां सुवृक्तिभिः स्तुतिभिः हवामहे आ
ह्वयामहे आहूतौ च युवां अस्मै अस्मभ्यं शर्म सुखं यच्छतं दत्तं १० अस्मे इदं इंद्र इति अस्मे अस्मभ्यं इंद्रः वरुणः मित्रः अर्यमा
एते देवाः द्युम्नं द्योतमानं धनं यच्छंतु प्रयच्छंतु तथा महि महत् सप्रथः सर्वतः विस्तीर्णं शर्म गृहं च प्रयच्छंतु अपि च
अदितेः देवमातुः ज्योतिः तेजः अस्मभ्यं अवधं अहिंसकमस्तु वयं च देवस्य सवितुः श्लो
कं स्तोत्रं मनामहे आनीमः कुर्मः इत्यर्थः ॥ ॥इति पंचमस्य षष्ठे पंचमो वर्गः॥ ॥आ वां राजानाविति पंचर्चं चतुर्दशं सूक्तं वसि
ष्ठस्यार्षं त्रिष्टुप्छंदः इंद्रावरुणौ देवता १ आ वां राजानाविति हे राजानौ ईश्वरौ इंद्रावरुणा० णौ अध्वरे यागे वां युवां ह
व्यः हविर्भिः हविर्निमित्तैः स्तोत्रैः आववृत्यां आवर्तयामि अभिमुखान् करोमि यद्यस्मिन् अध्वरे सवनीयाः धाना धार्यमाणा विषुरूपा रूप्यते इति रू
पाः सवनीयाः ब्रह्मणा आततुर्युवयोः मध्ये अस्मद्‌ब्रह्मणा अस्मद्धृतं वाचा हविरत्रान्तरं रूपं च
तुश्चंति प्रीणा च विभ्रतीः कर्मणा उपजिघ्नते तनेन प्रीणामीत्यादि ५ युवोरा
ष्ट्रं बृहदिन्वति द्यौरिति युवयोः राष्ट्रं बृहत् महत् इन्वति व्याप्नोति यौ युवां
वृषभौ हे इंद्रावरुणौ युवयोः द्युलोकस्य स्वामिनौ तथा युवयोः मध्ये वरुणस्य देवस्य हेलः क्रोधः
सेनाभिः अस्तु सिन्धुभिः रोगादिभिः सिनीयः पापकर्मणः सकाशात् अस्मान्नं करोतु २
नः अस्मान् परिवृणक्तु परिवर्जयतु इंद्रः उरुं विस्तीर्णं लोकं स्थानं कृणवत् करोतु ३
कृतं नः इति हे इंद्रावरुणौ नः अस्माकं विदथेषु यज्ञेषु नियमाणं यज्ञं चारु शोभनं फलसहितं कृतं कुरुतं तथा अस्माकं
ब्रह्मा स्तोत्राणि पृतनासु संग्रामेषु शस्तानि प्रशस्तानि फलभांजि कृतं कुरुतं अपि च देवजूतः देवाभ्यां युवा
भ्यां प्रेरितः रयिः धनं नः अस्मान् उप एतु प्राप्नोतु तथा स्पार्हाभिः स्पृहणीयाभिः ऊतिभिः रक्षाभिः नः अस्मान् प्र

135/1915

ति रक्षतं युवां पूर्वथा पूर्वं ४ अस्मे इंद्रावरुणेति हे इंद्रावरुणा० णौ अस्मभ्यं रयिं धनं धत्तं प्रयच्छतं कीदृशं विश्ववारं सर्वैः
वरणीयं वसुमंतं निवासयुक्तं पुरुक्षुं बहन्नं आदित्यः अदितेः पुत्रः यः वरुणः अनृता अनृतानि निहंता नितरां मिनाति प्रहि
नस्ति शूरः शौर्यवान् वरुणः अमिता अमितानि वसूनि धनानि दयते स्तोतृभ्यः ददाति ५ इयमिंद्रमिति इमं मदीया इयं
गीः स्तुतिः इंद्रं वरुणं च अष्ट व्याप्नोति यान् तु जा नाम या प्रेर्यमाणा सा तोके पुत्रे तनये पौत्रे च विषये प्रावत् प्ररक्षतु अ
स्मान् वयं च रत्नधाः शोभनधाना सन्तः देववीतिं देवैः कामयितव्यं यज्ञं गमेम प्राप्नुयामहे॥ यूयं पात स्वस्तिभिः सदा
नः॥ ॥इति पंचमस्य षष्ठे षष्ठो वर्गः॥ ॥पुनीषे वामिति पंचर्चं पंचदशं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप्छंदः मित्रावरुणौ देवता
१ पुनीषे वामिति हे इंद्रावरुणौ वां युवयोरर्थं अरक्षसं रक्षोरहितां मनीषां स्तुतिं पुनीषे शोधयामि किं कुर्वन् इंद्राय वरुणा
य सोमं सुन्वन् इंद्रं वरुणं उद्दिश्य सोमं अग्नौ प्रक्षिपन् कीदृशां मनीषां देवीं द्योतमानां उप संनद्धं समिधं घृतप्रतीकां
प्रदीप्तावयवां परोक्षः तावीद्राविंद्रावरुणौ अस्मिन् युद्धे यामन् यामनि युद्धार्थं गमने स तिनः अस्मान् उरुष्यतां २ स्पर्धंते
वा उ देवहूये इति यत्राह्वाने अत्र अस्मिन् संग्रामे स्पर्धंते विशा नवः आत्माभिः स्पर्धंते खलु उपूरकः येषु संग्रामेषु ध्वजेषु प
ताकासु दिधवः शत्रुभिः आयुधानि पतंति तान् तेषु संग्रामेषु विद्यमानान् अमित्रान् शत्रून् हे इंद्रावरुणौ युवं युवां शर्वा
शारुणा हिंसकेनायुधेन पराचः पराङ्मुखान् विषूचः विविधगतीन् हतं हिंस्तं ३ आपश्चिद्धीति आपश्चित् हि अद्भि
क्वाराः सोमाः स्वयशसः स्वायत्तयशसः स्वायत्तयशस्काः देवीः द्योतमानाः संतः सदस्सु सदनेषु स्थानेषु इंद्रं वरुणं
च देवताः मधुः धारयंति अवस्थापयंति सोमेन आप्यायिता हि देवताः स्वे स्वे स्थाने तिष्ठंते तयोः इंद्रावरुणयोः
अन्यः एकः प्रविक्ताः पृथक्कृताः पुण्यापुण्यविवेकोन विविक्तफलभोक्त्रीः कृष्टीः प्रजाः आसां कार्येण धारयति अन्यः इंद्रः
वृत्राणि शत्रुजातानि अप्रतीनि अन्यैः प्रतिगतानि हंति हिनस्ति ४ स सुक्रतुरिति सुक्रतुः शोभनकर्मा सः होता ऋत

चित्रकृतस्य उरुकस्य चेतानि चेताः क्रमवन्तु हे आदित्य अदितेः पुत्रौ इंद्रावरुणौ यः मम स्तान् नमस्कारेण युक्तः सन् हाव
साधनेन युक्तः वां युवां परिचरती निदाधः स्तुक्रतुरित्यमपः अपि यपः हविष्मान् हविर्भिः युक्तः सन् अवसे तर्पणार्थं वां युवां
आववर्तत् आवर्तयितसः यजमानः प्रयस्वान् अन्नवान् मत्स्वासः विताय सुपुप्रासस्यायफलाय असहित्व अवेदेव ५ इय
मिंद्र मिति मे मरीयाद्वयं मीः स्कृतिः इंद्रं वरुणं च अष्ट्याभीयुत धाकृतु आमया प्रेर्यमाणा सातो केपुत्रे तनये पौत्रे च विषये
प्रावत् प्रस्त्वतु अस्मान् वयं च स्कस्तासः शोभनधनाः संतः हेवबीतिं देवैः कामयितव्यं यज्ञं गमेम प्राप्नुयामहे यूयं पातस्व
स्तिभिः सदानः॥ ॥इति पंचमस्य षष्ठे सप्तमो वर्गः॥ ॥धीराविसितस्पष्टं चौ उयांसक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः वरुणो देव
ता १ धीरा त्वस्येति अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु त्रिप्रंधीराधाराणि मेयेर्वांति भवंतिं यः वरुणः उवीं
विस्तीर्णे रोदसी चित्ययावापृथिव्यौ अपि विथितलं मायिषिधं स्थवृत्सकीये स्थाने स्थिते अकरोत् यश्च हहतं महांतं ना
कं आदित्यं नक्षत्रं च क्रूरं रश्मीयांस्तादृशप्रनुनुदे प्रेरयति स्म अहमिश्च यत् दर्शनीयं प्रेरयति द्विः प्रकारः स्तम्भ मिंच
यंप प्रथत् भूमि स्तारितवान् अस्य वरुणस्य लभ्यपः २ उत स्वयेति उतकिं स्वयातन्वा आत्मीयेन शारीरेण संवदे सह वदनं
करोमि अहो किंमुत लग्नेन वरुणेन सह संवदे कदा सुकदा स्वन्नु वरुणे देव अंतर्भुवानि अंतर्भूतो भवानि वरुणस्य विने
तं लयी नवानि हव्यं मे अपि मे मदीयं हव्यं स्तोत्रं अहणानो क्रुध्यन् वरुण किं केन हेतुना जुषेत सेवेत स्कमनाः हाम
नमनस्कः सन् अहं कदा कस्मिन् काले मृळीकं सुखयितारं वरुणं अभिख्यं अभिपश्येयं ३ एच्छेतदिति हे वरुण तदेनः
पापं एच्छे तां च कामि दिदृक्षु दृष्टुमिच्छन् अहं पिएकं च विधं प्रष्टुं चिकितुषः विदुषः जनान् उपो एमि उपागामि कवयश्चि
तू कांतदर्शिनो जना अश्रमिमत्वं समान मितू समानमेव आहुः अकथयन् यत् आहुः हे स्तोतः तुभ्यं अयं ह अयमेव वरुणः
हृणीते क्रुध्यति इति अतः क्रोधं परित्यज अस्मान् पाशेभ्यः मोचयः ४ किमागइतिहे वरुण ज्येष्ठं अधिकं किं आगः आसकः ६५

177/1915

अपराधः मयाकृतोबभूव यत् एवं आगसा सस्वायं मि मत्तः संस्तोतारं जिघांससि हंतुमिच्छसि हे दुळभ दुर्दभ अन्यैर्बा
धितुमशक्य स्वधावः तेज स्विन् हे वरुण तदागो मे मह्यं प्रवोचः प्रब्रूहि एवं सति तस्य प्रायश्चित्तं कृत्वा अनेनाः अपापः
पत् अहं तुरः त्वरमाणः नमसान मस्कारेण त्वां अवयांउपगच्छेयं ५ अव द्रुग्धानीति हे वरुण पित्र्या पितृतः प्राप्ता
नि नः अस्मदीयानि द्रुग्धा नि बंधनहेतुभूतानि अवसृज विमुंच वयं च यानि द्रोहकर्माणि तन्वभिः शरीरैः चकृम कृतवंतः
स्म तानि च अवसृज हे राजन् दाम्ना अपि वरुण पशुतृपं नतायुं स्तेन्य प्रायश्चित्तं कृत्वा अवसाने यव सादिभिः पशूनां तर्पयि
तारं स्तेनमिव दाम्नः रज्जोः वत्सं न वत्स मिव च वसिष्ठं मां श्राथ अत्र अवसृज अविसुंच ६ न सस्वो दक्ष इति हे वरुण सः स्वः दक्षः
सः पापाकर्मस्वः दक्षः पापप्रवृत्तौ कारणं न भवति किं तर्हि ध्रुतिः स्थिरा उत्पत्ति समय एव निमिता दैवगतिः कारणं सा च
ध्रुतिः वक्ष्यमाणरूपा सुरा प्रमाद कारिणी मन्युः क्रोधश्च अनर्थहेतुः विभीदकः द्यूत साधनो अक्षः सर्वत्र तेषु पुरुषं प्रे
रयत् अनर्थहेतुर्भवति अचित्तिः अज्ञानं अविवेकारणं इद्र्श्यादि दैवगति रेव पुरुषस्य पाप प्रवृत्तौ कारणं अपि च कनीय
सः हीनस्य पुरुषस्य पापप्रवृत्तौ उपारेउ पागते समीपे स्थिते ज्यायान् अधिकः ईश्वरः अस्ति सएव तं पापे
प्रवर्तयति एवं च सति स्वप्नश्चन स्वप्नोपि अनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति इत्थं पूरकः स्वप्नेपि पा
प मक्ति तदपि ईश्वरः एव प्रेरयति हे वरुण तथा त्वं नव्यमितिभावः ७ अरं दासइति मीढुषे कामानां वर्षित्रे भूर्णये अ
गतो भर्त्रे देवाय दानादिगुण युक्ताय वरुणाय अनागाः तस्मै सादात् अपापः सन् अहं अरं पर्याप्तं कराणि परिचरणं क
रवाणि दासो न यथादासः स्वामिनं सम्यक्परिचरति तद्वत् अर्यः स्वामी सच देवः अचितः अज्ञान् नः अस्मान् अचेत
यत् चेतयतु गृत्संस्तोतारं कवितरः प्राज्ञतरो देवः रायेधनप्राप्त्यर्थं जुनाति प्रेरयतु ८ अयंसुतुभ्यमितिहे स्व
धावः अन्नवन् वरुण तुभ्यं त्वदर्थं क्रियमाण अयं स्तोमः स्तोत्रं हृदि त्वदीये सुसुष्ठु उपश्रितः उपगतः समवेतो अस्तु

वे·भा·पं·
६५

विनृपुरकः नः अस्मदीये वेश्मनि रक्षणे शं उपद्रवाणां शमनं अस्तु योगे च नः अस्मदीये प्रापणे रक्षा उपशमनं मेधास्तु उपद्र
वाणं यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य षष्ठे अष्टमो वर्गः॥ ॥रदत्पथ इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठऋ
षिः त्रिष्टुप्छंदः वरुणो देवता १ रदत्पथ इति अयं वरुणः देवः सूर्याय आदित्याय पथो मार्गान् अंतरिक्षप्रदेशान् प्ररदत्
प्रायच्छत् समुद्रियाः समुद्रे भवानि अर्णांसि उदकानि नदीनां प्रास्रजत् सर्जनं अभ्यद्रवस यथा अर्वतीः वडवाः प्रतिशीघ्रं ग
च्छंति तद्वत् कृतवान् ग्रीवमनमात्मनः इकनु महीः महतीः अवनीः रात्रीः अहभ्यः अहोभ्यः सकाशात् चकार भेदेन कृत
वान् अजंगयं सूर्य एव वरुण इत्युच्यते २ आत्मा त इति हे वरुण तव संबंधी स्वयं अंतरिक्षे प्रेर्यमाणो वातो वायुरात्मा सर्व
स्य प्राणिजातस्य प्राणरूपेण धारयिता सहिरजः उदकं आनवीनोत् समंतात् प्रेरयति वातेन हि वृष्टि आर्यते भूर्णिः जगतो भ
र्ता स वायुः यवसे घासे प्राशितः यथा पशुः अन्नवान् भवति तद्वत् स वायुः भवति संभक्षणात् अन्नवान् भवति
हे वरुण महतः बृहतो परिस्थिते तव मे रोदसी द्यावापृथिव्यौ अंतः द्यावापृथिव्योर्मध्ये तव विश्वा सर्वाणि धाम धामानि स्था
नानि प्रियाणि सर्वेषां प्रीतिकराणि भवंति ३ परिस्पश इति वरुणस्य देवस्य स्पशः चाराः स्मदिष्टाः प्रशस्तगतयः इमे के
द्यावापृथिवी उभे नेउ भे रोदसी द्यावापृथिव्यौ परितः ईक्षंते उभयोर्लोकयोः पुण्यपापकारिणो जनान् पश्यंति स्पर्शः
यस्मादेव न स्वात् ऋतावानः कर्मवंतः यज्ञधीराः यज्ञेषु कृतबुद्धयः प्रचेतसः प्राज्ञाः कवयः क्रांतदर्शिनः येज
नाः मन्म प्रज्ञाभिः स्तोत्राणि इयंतं गमयंति वरुणं प्रापयंति तानपि परि पश्यंति स्पर्शः अतो अस्मान् अपि स्तोतृत्वेन ज्ञात्वा
पापाद्रक्षंतु इति कृत्वा स्तौति ४ उवाच मह्यमिति मेधिराय मेधाविने मे मह्यं वरुणः उवाच उक्तवान् किं त्रिः सप्त एकविंशति ६५
संख्याकानि नामानि अघ्न्या गौर्बिभर्ति धारयतीति वाक् अघ्न्या गौरुच्यते उरसि कंठे शिरसि च बद्धा निगायन्नारीनि स
स्थ्यां स्थानानि विद्वान् अपि पदानि गुह्यानि जानन् विप्रः मेधावी स वरुणः उपराय समीपे रज्यमानाय अंते

179
1915

वासितं नमस्यं शिक्षन् उपरि क्षन् परस्य उत्कृष्टस्य स्थानस्य ब्रह्मलोकलक्षणस्य संबंधी नि गुह्या गुह्यानि उपदेशागम्यानि न
वार्य दृश्यानि ब्रवोचत् अवोचत् उक्तवान् आ नो हे वरुणस्य शिष्योस्मि तस्मात् स वरुणः अस्मात् पापात् मोचयतीत्यर्थः ५ तिस्रो द्या
व इति तिस्रः त्रिप्रकाराः उत्तममध्यमाधमभावेन त्रिविधाः द्यावः द्युलोकाः अस्मिन् वरुणे अंतर्मध्ये निहिताः तिस्रः त्रिविधाः
भूमीः भूम्यः षड्विधानाः वसंतादिभेदेन षट्प्रकाराः यास्ता ऋतवः उपराः अस्मिन्नेव वरुणे उप्ताः अंतर्भूताः अपि च
गृत्सः मेधावी राजा ईश्वरः स वरुणः दिवि अंतरिक्षे हिरण्ययं सुवर्णमयं प्रेंखं दोलावत् दिगं च यसंस्पर्शिनं एतं सूर्यं शुभं कं दी
प्यमानं चक्रे कृतवान् दिवि सूर्यं अदधात् सोमं मंत्री विनिक्षिप्यते ६ अव सिंधुमिति द्यौरिव स्तूर्य इव द्रप्सो वरुणः सिंधुं समुद्रं
अवस्थानवेलायां अवस्थापयति यथा वेलां नातिक्रामति तथा करोतीत्यर्थः कीदृशो वरुणः द्रप्सो द्रवणशीलः उदबिंदुरिव
श्वेतः शुभ्रवर्णः मृगः शुभ्रोपमः गौरमृग इव तुविष्मान् बलवान् गंभीरशंसः गंभीरमहान् शंसः स्तोत्रं यस्य सतथो
क्तः रजसः उदकस्य विमानो निर्माता सपारक्षत्रः सुदुस्तरात् पारकं क्षत्रं बलं यस्य तादृशो वरुण सतो विद्यमानस्यास्य
जगतो राजा अधीश्वरो भवति ७ यो मृळयातीति आगः अपराधं चकुषे चित् कृतवतेपि स्तोत्रे यः वरुणः मृळयाति दयां करोति
तस्मिन् वरुणे अनागाः अनपराधाः सतो वयं स्याम वर्तमाना भवेम किं कुर्वंतः अदितेः अदीनस्य वरुणस्य संबंधी निव्रता
नि कर्माणि अनु अनुपूर्वेण ऋध्यंतः समर्धयंतः हे वरुणादयो देवाः यूयं नः अस्मान् सर्वदा स्वस्तिभिः कल्याणैः पात रक्षत॥
॥ ॥इति पंचमस्य षष्ठो नवमो वर्गः॥ ॥प्रशुंध्युवमिति सप्तर्चं अष्टदशं सूक्तं वसिष्ठऋषिः त्रिष्टुप्छंदः इंद्रावरुणो दे
वता १ प्रशुंध्युवमिति ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तौति नियुक्ते हे वसिष्ठ त्वं मीळ्हुषे सेक्त्रे वरुणाय शुंध्युवं शोधयि
त्रीं प्रेष्ठां प्रियतमां मतिं मननीयां स्तुतिं प्रभरस्व प्रापय यः वरुणः ईं एनं सूर्यं अर्वाचं अस्मदभिमुखं करते अंतरिक्षे करोति
तस्मै वरुणाय स्तव यः कीदृशं सूर्यं यजत्रं यष्टव्यं सहस्रामघं बहुधनं वृषणं कामानां वर्षकं बृहंतं महांतं २ अधान्व

ध्येति अथ अधुना । स्य वरुणस्य संदृशं संदर्शनं नु क्षिप्रं अगन्वान् गतवान् अहं अग्नेरनीकं ज्वालासंघं मंसि स्तवानि तं वरु
णं यद्वा स्मसीति शेषः यत् यदा स वरुणः स्वः सुखकरं अश्मन् अश्मनि आभिषवार्थे पाषाणे अवस्थितं अभिषुतमिसर्थः इदं अं
धः सोमलक्षणमन्नं अधिपा अधिकं पाः पालयन् तदानीं मा मां वपुः शरीरं दृशये दर्शनाय अभिनिनीयात् अभिप्रापये
त् २ आ यद्रुहावेति यत् यदा अहं वरुणश्चोभौ नावं आरुहाव रूढौ भवावः यत् यदा समुद्रं मध्यं समुद्रस्य मध्यं च प्रेरया
वः प्रकर्षेण गमयावः यद्वा यदा अपां उदकानां अधि उपरि स्नुभिः गंत्रीभिः अस्माभिः नौभिः चरावः चराव तदानीं शुभे शो
भनार्थं प्रेंखे नौरूपायां दोलायां प्रेंखयावहै निम्नोन्नततरंगैरितश्चेतश्च प्रविचलं तौ संक्रीडावहै कं सुखरूपः ४ वसिष्ठं हेति व
सिष्ठं ह वसिष्ठं खलु वरुणः नावि नौकायां आधात् आरोहयत् तथा तम् ऋषिं अहोभिः रक्षणैः स्वपाः स्वपसं शोभनकर्मा
णं चकार कृतवान् अपि च विप्रो मेधावी वरुणः अह्नां दिवसानां सुदिनत्वे स्तोतारं अस्तावयदिति शेषः किं कुर्वन् यान्
यान् द्यावः दिवसान् यान् यानीः उषासः रात्रीः तनवत् विस्तारयत् ५ क्व त्यानीति हे वरुण त्या
नि तानि पुरातनानि नौ आवयोः सख्यानि क्व भवन्ति पुरा पूर्वस्मिन्काले अद्रुहं अभि संयत् सख्यमस्तित्तस्य च
बृहं अवांसेवावहै पितृ पूरक आपि अहे स्वधावः अन्नवन् वरुण ते बृहंतं मानं गृहं अगमम् गच्छामि कीदृशं बृहंतं महांतं मानं मांतिस
म्मितं सहस्रद्वारं ६ य आपिर्नित्य इति हे वरुण यः वसिष्ठः नित्यः ध्रुवः आपिः बंधुः प्रियः सन् त्वां प्रति आगां
सि अपराधान् कृणवत् अकरत् स इदानीं तेन वसस्ता... यक्षिन् पूजनीय वरुण ते नवं स्वभूता वयं एनस्वंतः पापेन युक्ताः
संतो मा भुजेम मा भुक्ष्म अहि भोगान् ... विप्रो मेधावी स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वरूथं वरणीयं
गृहं यंधि प्रयच्छ उपरूपः ७ ध्रुवासु त्वासु क्षितिषु ... क्षियंतो निवसंतो वयं हे वरुण त्वा
कं महि निरीयः सर्वकर्षः अस्मत् अस्मत्तः पाशं बाधकं पाशं विमीच न... अदितेः अखंडनीयायाः पृथिव्याः उपस्थात् अवः

६७

1811/1915

रक्षणं वरुणेन रत्नं स्वानाः संभजमानाः वयं त्वां ... यूयं पात स्वस्तिभिः सदा नः ॥ ॥इति पंचमस्य षष्ठे दशमो वर्गः॥ ॥
मो षु वरुणेति पंचर्चं एकोनविंशं सूक्तं वसिष्ठ ऋषिः अंत्या जगती शिष्टाः गायत्र्यः वरुणो देवता १ मो षु वरुणेति हे राजन् ईश्वर
वरुण त्वदीयं मृन्मयं गृहादि निर्मितं गृहं सो मा उ मेव अहं गमं गतोस्मि अपि तु स्कशोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्तवानस्मि
त्वं मां मृळ सुखय हे सुक्षत्र शोभनधन वरुण मृळय दयां च कुरु २ यदेमीति हे अद्रिवः आयुधवन् वरुण यत् यदा प्रस्फु
रन्निव शीतेन मति चलन्निव दृतिर्न दृतिरिव ध्मातो वायुना पूर्णः सन् त्वया बद्धोहं एमि गच्छामि तदानीं मृ
ळ सुखय हे सुक्षत्र मृळय दयां च कुरु ३ क्रत्वः समहेति हे समह सहतां स्वभावेन निर्मल वरुण दीनता दीनतया अश
क्त्या क्रत्वः कर्मणा कर्तव्येन विहितस्य तस्मात् ... लक्षणस्य प्रतीपं अननुष्ठानं अगमम् प्राप्तवानस्मि अत एव त्वया बद्धः
नादृशं मां मृळ ०४ अपां मध्य इति अपां समुद्रोदकानां मध्ये तस्थिवांसं स्थितवंतमपि जरितारं स्तोतारं मां तृष्णावि
पासा अविदत् प्राप्तवती लवणोदकस्य समुद्रजलस्य पानानर्हणात् अतः तादृशं मां मृळ ० ५ यत्किंचेदमिति हे वरुण दे
व्ये दैवे जने यत्किंच अभिद्रोहं अपकारं मनुष्याः वयं चरामसि चरामः तथा अचित्ती अचित्या अज्ञानेन
त्वदीयं यत् धर्मधारकं कर्म युयोपिम यत् विमोहितवंतः हे देव तस्मादेनसः पापात् नः अस्मान् मा रिरीषः मा हिंसीः ॥ ॥
इति पंचमस्य षष्ठे एकादशो वर्गः ॥ ॥इति सप्तमे मंडले पंचमोनुवाकः ॥ ५ ॥ षष्ठेनुवाके पंचदश सूक्तानि तत्र प्रवीरयेति
सप्तर्चं प्रथमं सूक्तं वसिष्ठ ऋषिः त्रिष्टुप् छंदः वायुर्देवता पंचम्याद्याः ऐंद्रवायव्यः १ प्रवीरयेति हे वायो वीरया विविधमीरयि
त्र्यां तुभ्यं शुचयः शुद्धाः मधुमंतः माधुर्योपेताः सुताः सोमाः अभिषुताः सोमाः अध्वर्युभिः ऋत्विग्भिः प्रददिरे प्रदीयंते यतः एवं अ
तः कारणात् हे वायो नियुत्वतः ... वहस्व प्राप येन ... अस्मद्यज्ञं अभिगच्छ अभिगत्य सुतस्य अभिषुतस्यां
धसः अन्नस्य सोमलक्षणस्य ... मदाय मदोत्पत्त्यर्थं २ ईशानायेति हे वायो ईशानाय ईश्वरायतेनु

वे·भा·पं·
५८

र्ययं प्रकृतिं प्रकृष्टां आहुतिं यः यजमानः आनट् दद्यात् तथाविधस्य विपाः शुद्धस्य सोमस्य पातः वायो तुभ्यं शुचिं शुद्धं सोमं यः
प्रयच्छति मर्त्यः तं पुमन्तं अपत्यवन्तं यजमानं प्रशस्तं सुस्वं कृणोषि करोषि स च जातः जातः सर्वत्र प्रादुर्भूतः प्रख्यातः सन् वाजी
अन्नवान् भवति धनवान् प्राप्तये आयन् अवत्य त्वं सर्वं धनं लभत इत्यर्थः २ राये नु यामिति इमे रोदसी द्यावापृथिव्यौ यं वायुं
राये धनार्थं जजिनत् अजनयतां तं देवं वायुं देवी द्योतमाना धिषणा स्तुतिः राये धनार्थं धारयति धनं यथाल
भ्यते तथा धारयतीत्यर्थः अध अथ नाश्यं स्वकीयं प्रदत्ताथां स्वाः स्वकीयाः नियुतः वडवाः यं वायुं सचन्त सेवन्ते उ तापि
चश्चेनं शुभ्रवर्णाभिः केदारिकैः सनिवस्कः धिनिवस्तं धनानां वायुं नियुतः अस्मदीयं यज्ञं प्रापयन्ती तिशेषः ४ उच्छन्नुषस इति
येन गिरः वायुं अज्ञेषयन्ति पाजरिमाः पापरहिताः उषसः स्वदिनाः शोभनदिनस्य हेतुभूताः सत्यः उच्छन् व्यवासयन्त तेज
दीप्यमानाः दीप्यमानाः संतः उरुविस्तीर्णं ज्योतिः सूर्याख्यं विविदुः वा पोः प्रासाद लभंत आपिच उशिजः कामयमाना स्ते अंगिरसः
गव्यं विनूगोसं घरूपमपि ईर्यं पशुं पणि भिरपस्हृतं विवर्त्रुः आविष्कृतं लभंत तथा तेषां अंगिरसां अर्थाय प्रदिवः पुराण्यः
आपः अनु समनु अव्यगच्छन् ५ ते सत्येनेति ते प्रसिद्धा सत्येन यथार्थेन मनसा मननीयेन स्तोत्रेण युक्ताः दीध्यानाः दीप्य
मानाः स्वेन स्वकीयेन विहितेन क्रतुना कर्मणा निरयनेमितिकाख्येनायुक्ताः सः युक्ताः एवंभूताः यजमानाः हे इंद्रवायू शार
र्द्धं धरिक्षालनिः यहनीयं ईशानयोः वांयुवयोः स्वभूतं रथं वहंति स्वस्वं यज्ञं प्रापयंति तत्र उक्थं अन्नानि हविर्लक्षणानि
आशिसर्वान्तेषुवां आशिसवंते ६ ईशानास इति हे इंद्रवायू ईशानासः ईश्वराः प्रभवः ये जनाः नः अस्मभ्यं गोभिः अश्वि
भिः अश्वैः वसुभिः वा सर्वैः हिरण्येन च सहितं सत् क्रतुं अरणीयं सुखं दधते ददति प्रयच्छन्ति सूरयः दातारः विश्वं व्याप्तं
आयुः अवंश्यापृणां स्वसहं पूतनासु संग्रामेषु अर्वद्भिः अश्वैः वरिः सरैश्च सरुः अभिभवेयुः ७ अर्वंतो नेति अर्वंतो न अ
श्वाः इव हविषां वोढारः श्रवसः अन्नस्य अन्नं भिक्षमाणाः याचमानाः वा अपंतः वलं आत्मनः इच्छंतः वसिष्ठाः वयं सुश्रवसे ६७

183
1915

शोभनरक्षणाय सुष्टुतिभिः शोभनाभिः स्तुतिभिः इंद्रवायू इंद्रं च वायुं च हुवेम आह्वयेम हि यूयं पात स्वस्तिभिः सदा नः ॥ ॥
इति पंचमस्य षष्ठे द्वादशो वर्गः ॥ १२ ॥ कुविदंगेति सप्तर्चं दशमं सूक्तं वसिष्ठऋषिः त्रिष्टुप्छंदः वायुर्देवता १ कुविदंग
ति देवाः स्तोतारः पुरा पूर्वस्मिकाले ये वृधासः स्तोतारः कुविद् बहुशः अंगक्षिप्रं नमसा वायुविषयेण स्तोत्रेण अनवद्यासः
अवद्यरहिताः आसन् ते अयापि वा यवे हवी पितुं सूर्येण सह उषसं अवासयन् उषसो व्युष्टिं सूर्योदयं च वायुयागार्थं कुर्वं
ती त्यर्थः किमर्थं मनवे मनुष्याय अश्वाधिताय बाधितानां पुत्रादीनां रक्षणार्थमित्यर्थः २ उशंतादूतेति हे इंद्रवायू उशंता उ
शंतौ कामयमानौ दूतौ दूतोगं नारायोपा गोपायितारौ इह शोभुवां दभायाहिं सायेन भवतं अपि तु मासः मासांश्च पूर्वीः ब
ह्वीः शरदः संवत्सरांश्च चिरकालं अस्मान् पाथः रक्षतं अपिच हे इंद्रवायू सुष्टुतिः अस्मदीया शोभना स्तुतिः वांयुवांइय
नागच्छ वी आभुवंतिमार्डीकं सुखं ईडयाव तेन यानव्यं प्रशस्यस्तुतिं सन्धुः प्राप्यं धनं च यद्द ३ पीवो अन्नामिति पीवो
अन्नं पीवांसि स्थूलानि अन्नानि येषां तान् रयिवृधः धनेन वर्धमानान् एवंभूतान् जनान् सुमेधाः शोभनप्रज्ञाः नियुतां व
उवाना स्ववाहनां अभिश्रीः अभिश्रयणीयः श्वेतः श्वेतवर्णः वायुः सिषक्ति सेवते नेच जनाः समनसः समानमनस्काः संतो
वायवं वायुमुद्दिश्य यष्टुं वितस्थुः विविधमवतिष्ठंते स्थिताच ते नरः कर्मणां नेतारो जनाः विश्वेत् विश्वानि सर्वाणि एव स्वपत्या
नि शोभनापत्यहेतूनि चक्रुः कुर्वंति ४ यावत्तर इति हे इंद्रवायू युवयोः तन्वः शरीरस्य तरः वेगः यावदस्ति यावच्च नरः कर्मणां
नेतारः ऋत्विजः चक्षसा ज्ञानेन दीध्यानाः दीप्यमानाः भवंति तस्य सर्वस्यानुरूपं शुचिपाः शुचेः सोमस्य पातारौ इंद्रवायू शु
चिं शुद्धं सोमं अस्मदीयं पातं पिबतं इदं बर्हिः स्तीर्णं बर्हिश्च आसदनं पानार्थं आसीदतं ५ नियुवानेति हे इंद्रवायू स्पा
र्हवीराः स्पृहणीयस्तोतृकान् नियुतः आश्वीयान् अश्वान् स्वरथं उभयोः एकरथं नियुवाना नियमयंतौ युवां अर्वाक् अस्मद
भिमुखं पानं आगच्छतं इदं हि इदं खलु मध्वः मधुरस्य सोमस्य अयं ग्रहेषु आद्यः ऐंद्रवायवाख्यं ग्रहं वां युवयोः अर्थं प्रयतं

यकर्षेपसिमार्धंउत्तरवेदिं प्रतिनीतंअधअधूत्यारद्यास्यसोमस्य पानानंतरं पीणानाप्रीयमाणौयुवांअस्मेअस्मान् विमुमु
क्तंपापात् विमोचयतं ६ आवांशतमिति हे इंद्र वायू याः नियुतः शतं शतसंख्याकाः संत्यः वांयुवां सचंते सेवंते याश्च विश्ववाराः
सर्वैर्वरणीयाः नियुतः सहस्रं सहस्रसंख्याकाः संत्यः युवां सचंते स विरत्नाभिः शोभनधनप्रदाभिः ताभिः नियुद्भिः अर्वाक्
अस्मदभिमुखं आयातं आगच्छतं हे नरा नेतारौ प्रतिगत सत्र उत्तरवेदिं प्रतिनीतस्य मध्वः मधुरस्य सोमस्य सोमं पातं पिबतं
७ अर्वंतो न इति अर्वंतो न अश्वा इव हविषां वोळारः श्रवसः अन्नस्य अन्नं भिक्षमाणाः याचमानाः वाजयंतः बलमात्मनः इ
च्छंतः वसिष्ठाश्च पंसः अवसे शोभनरक्षणाय स्तुभिः शोभनाभिः स्तुतिभिः इंद्रवायू इंद्रं च वायुं च हुवेम आह्वयेम हि यूयं पा
त स्वस्तिभिः सदा नः ॥ ॥ इति पंचमस्य षष्ठे त्रयोदशो वर्गः ॥ ॥ आ वायो इति पंचर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप् छंदः वा
युर्देवता १ आ वायो इति हे शुचिपाः शुद्धस्य सोमस्य पातः वायो नः अस्माकं उपसमीपं आ भूष आगच्छ हे विश्ववार विश्वैः वर
णीय तव वाहनभूताः नियुतः वडवाः सहस्रं सहस्रसंख्याकाः वियंति यतः एवं अतः शीघ्रमागच्छ ते तव मद्यं मदकरं सोमल
क्षणं अंधः अन्नं उप अयामि उपयतं पात्रे गृहीतं आसीत् हे देव वायो यस्य सोमस्य पूर्वपेयं प्रथमपानं दधिषे धारयसि तदु
पयतमिति अन्वयः २ प्र सोता जीर इति जीरः क्षिप्रकारी सोता अभिषोता अध्वर्युः इंद्राय वायवे पिबध्यै पानार्थं अध्वरेषु यागे
षु सोमं प्राभरत् पुरस्तात् उत्तरवेदिं प्रापितवान् हे इंद्रवायू यत् येषु यज्ञेषु मध्वः सोमस्य अग्रियं अग्रे भवं प्रथमभागं देवयं
तो देवकामाः अध्वर्यवः शचीभिः कर्मभिः अभिषवादिकर्मभिः वायुवयोः त्वं प्रभरंति प्रकर्षेण संपादयंति तेषु अध्वरेष्वित्यन्व ६९
यः ३ प्र याभिरिति हे वायो दुरोणे यज्ञगृहे हविर्दाश्वांसं हविषां दातारं यजमानं इष्टये यागाय याभिः नियुद्भिः वडवाभिः अच्छ
प्रयासि अभिगच्छसि ताभिः अस्मान् प्रयाहीति शेषः आगत्य च नः अस्मभ्यं सुभोजसं शोभनान्नयुक्तं रयिं धनं नियुत्वन्नि
तराभिः प्रयच्छ तथा गां सुभगं भग गोसंघं अश्वासं घं एनदुभयात्मकं राधो धनं च नियुत्वन् प्रयच्छ ४ ये वायव इति स्तुत्य

सोतारः इंद्रमादनासः स्तोत्रैः इंद्रस्य तर्पयितारः तथा वायवे सोमवर्षकाः भवंति ये सदेवासः देवाः अर्यः अरेः शत्रोः निहनासः
निहंतारः तैः अस्मदीयैः सूरिभिः स्तोतृभिः सह वृत्राणि शत्रून् घ्नंतः हिंसंतः स्याम भवेम किं कुर्वंतः अभियात् शत्रून् भटान् नृभिः
अस्मदीयैः पुरुषैः युधा युद्धैः सासह्वांसः अभिभवंतः ५ आ नो नियुद्भिरिति हे वायो नः अस्माकं अध्वरं यज्ञं शतिनीभिः शतसं
ख्यावतीभिः सहस्रिणीभिः सहस्रसंख्यावतीभिश्च नियुद्भिः वडवाभिश्च उपायाहि उपागच्छ तदनंतरं अस्मिन् सवने प्रातःसव
ने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ॥ इति पंचमस्य षष्ठे चतुर्दशो वर्गः ॥ ॥ शुचिं नु स्तोममिति चतुर्थं सूक्तं वसिष्ठस्यार्
षं त्रिष्टुप् छंदः इंद्राग्नी देवता १ शुचिमिति हे वृत्रहणा शत्रुहंतारौ इंद्राग्नी शुचिं शुद्धं नव जातं इदानीमुत्पन्नं अस्मदीयं स्तो
मं स्तोत्रं अथास्मिन्काले जुषेथां सेवेथां कृत्वा युवां आह्वातुं शक्नोमि उभा हि उभौ वां युवां जोहवीमि पुनः पुनराह्वयामि
किंच नातौ युवां उशते कामयमानाय वाजमन्नं सचथः तदानीमेव भिष्ठा धात् तमौ भवतं २ ता सानसी इति हे इंद्राग्नी ता ता द
शीमानसा सर्वैः संभजनीयौ युवां शवसा नाशावः बलं न इत्त आ चरतो हि खलु महतं बलमिव शत्रूणां भंजकौ आस्तामित्यर्थः
कीदृशौ संतौ साकं वृधा सह प्रवृद्धौ शवसा बलेन शत्रूणां सावयमानौ नित यारायः धनस्य भूरेः बहुलस्य यवसस्य अन्नस्य क्षयंतौ
ईश्वरौ वां विध युवं युवां सुतो विरस्य स्थूलस्य घषेः शत्रूणां धर्षकस्य वाजस्य अन्नस्य कि पाय ग्रहणमपि कर्तव्यमिति कर्मणः सं
प्रदानत्वात् चतुर्थ्यर्थे षष्ठी अन्नं एकं यो जयतं अस्मभ्यं प्रयच्छमित्यर्थः ३ उपो ह यदिति वाजिनः हविष्मंतः विप्राः मेधा
विनः प्रमतिं प्रकृष्टां मतिं इंद्राग्न्योः अनुग्रहबुद्धिं इच्छमानाः आनशुः इच्छंतः यतयः यजमानाः विदथं विदंति जानंति देवा स्त
त्र यप्यंते इति विदथः यज्ञः तं धीभिः कर्मभिः उपो उप गच्छंति हि यत् भरणः ते नरः कर्मणां नेतारः जनाः अर्वंतो न काष्ठां यथा अ
श्वाः शीघ्रं युद्धभूमिं आप्नुवंति तथा नक्षमाणाः ऐंद्राग्नानि कर्माणि व्याप्नुवंतः इंद्राग्नी इंद्रं च अग्निं च जोहुवतः पुनः पुनराह्व
यंतो भवंति ४ गीर्भिर्विप्रः प्रमतिमिच्छमान इति हे इंद्राग्नी प्रमतिं युवयोरनुग्रहबुद्धिं इच्छमानः इच्छन् विप्रः मेधावी वसिष्ठः

185
1915

यद्वा संयद्वा सायुक्तं पूर्वभाजं पूर्वमेव संभजनीयं रयिं धनं उ इति स्तुतिगीर्भिः स्तुतिभिः ईडिषुवांस्तोता इति हस्त्रहणाइअस्यहंतारौसु
वआशीःसनायुधौइंद्राग्नी अभिः नवतरैः प्रशस्तैः इभिः दातश्रेः धनेभ्यः अस्मान् प्रतिरतं प्रवर्धयतं ५ संयन्महीमिमहीम
हस्तौ मिथती परस्परं हिंसतौ स्पर्धमाने स्पर्धां कुर्वंतौ सूरसातौ रणे यतेते मलं कुर्वंतौ वैरिसेनेतन्नू रुचा आत्मीयेन तेज
सा संयतम् पेस आहनं संतने हिंस्तंतयासीमस्कतासीममभिषुण्वताजनेनयतमानसंघेन देवयुभिः देवान् कामयमा
नैः सहमिदृ यथा अदेवयुं असोमसुतं जनं संहिंस्तं॥ ॥इति पंचमस्य षष्ठे पंचदशो वर्गः॥ ॥इमामुषितिहेइंद्राग्नी
इमा सुइमामयमः अस्मदीयां सोमस्कतिं सोमाभिषवमांसीमनसायतुमनसो माभावायस्कमृत्य उपयातं उपगच्छ
तं अपिबतुवां अस्मात्परित्यज्य अन्यस्मिन् चिकित्सेतमस्माथेअन्यान् न मन्येथे अस्मानेव सर्वदापुष्येथे हि यस्मात् एवं तस्मा
त् वांयुवां यान्याह्वःयज्ञभिः वक्षवाजे अन्नैः हविर्लक्षणैः आवर्तीय आवर्तयामि ७ सोअग्नइति हे अग्ने सः त्वं एना
रमेनमसा अन्नेन अस्मदीयेन हविषा समिद्धः संदीप्तः सन् मित्रं वरुणं इंद्रं च अच्छवोचः अभिब्रूयाः अयं अस्मद
यः रक्षणायघानिकयपवपयन् आगः अपराधं सर्वनःव—नः कायेभ्य कृमस्कृतवंतः तस्मात् आगसः स्कम्हकसु
वुरस्तन्वआगः अर्यमा आदितिः मित्राद्यपश्याशेषयंतुअस्मत्तः विषोअयंतु ८ एताअग्नइति हे अग्नेइंद्राग्नीएता
इति इमान्यज्ञन् आस्तुषाणासः शाघ्रंसंभजमानाः वयंयुवोःयुवयोः स्वभूतान् राजान् अन्नानि सखासदयुग
परेवत्रअग्नसताम् अतिमास्तुषाम् अपिवइंद्रः विष्णुः मरुतश्च नः अस्मान् परित्यजन् अस्मान् परित्यज्य अन्यान् माद्र
क्षुः किंतु सर्वदा अस्मान् एव पश्यंतु यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य षष्ठे षोडशो वर्गः॥ ॥इयंवामितिद्र
इत्यादि पंचमंसूक्तं वसिष्ठस्यार्षं त्रैष्टुभं ऐंद्राग्नं इयं वामिति हि इंद्राग्नी इयंपूर्वस्क
तिः सुस्थास्कतिः अस्मत्ततः स्तोतुः अस्मान्वसिष्ठान् वांयुवाभ्यां युवयोरर्थं अभ्याह्ने पातरइतिरिवबद्धा सती अ

183
1915

अनिपादुर्भविनां स्तुमभिनिउन्नरत्नसंबंधः २ श्रृणु तमिति हे इंद्राग्नी अरितुः स्तोतुः हवं आह्वानं युवां श्रृणुतं श्रुतावगि
रः नद्यास्तुतीः वनतं संभजतं तथा ईशानाईश्वरौ युवां धियः अनुष्ठितानि कर्माणि पिप्यतं फलैः पूरयतं ३ मापापत्वा
यतिहेनराने तारौ इंद्राग्नी नः अस्मान् पापत्वाय हीनभावाय मारीरधतं मा भिरयतं तथा अभिशस्तये शत्रुभिः कृताय अ
भिशंसनाय मरीरधतं तथा निदे निंदकाय नः अस्मान् मारीधतं ४ इंद्रे अग्नेति अवस्यवः रक्षणकामाः वयं इंद्रे देवे अ
ग्नावपि च यजन् वरुणं नमः हविर्लक्षणमन्नं स्तुतिं स्तुतिं च आ ईरयाम हे अभिप्रेरयामः तथा धिया कर्मणा युक्ताः धे
नाः स्तुतिवाचश्च अभिप्रयामः ५ ताहि शश्वंत इति ताहितौ खलु इंद्राग्नी वांश्वंतः बहवः विप्रासः मेधाविनः जनाः ऊ
तये रक्षणाय ईडतेऽस्मं अनेन प्रकारेण ईडते स्तुवंति तथा सबाधः परस्परं बाध्यमानाः जनाः वाजसातये अन्नलाभा
य तावेवेंद्राग्नी ईडते ६ तावांगीर्भिरिति विपन्यवः स्तोतुमिच्छंतः प्रयस्वंतः हविर्लक्षणेनान्नेनोपेताः सनिष्यवः सनि
धनं आत्मनः इच्छंतः वयं मेधसातामभिधानां सातौ संभजने निमित्तभूते सति हे इंद्राग्नी तौ तौ वा युवां गीर्भिः स्तुतिभिः हवा
महे आह्वयामहे॥ ॥इति पंचमस्य षष्ठे सप्तदशो वर्गः॥ ७ ॥इंद्राग्नीइति हे चर्षणीनां मनुष्याणां शत्रुभूतानां अभिभ
वितारौ इंद्राग्नी अस्मभ्यं अवसा अन्नेन सह आगतं आगच्छतं दुःशंसः दुष्टाभिशंसनः शत्रुरस्मान् माईशत बा
धितुं मा शक्नोतु ८ माकस्यनइति हे इंद्राग्नी कस्य कस्यचिदपि अररुषः अरेः मर्त्यस्य मनुष्यस्य संबंधिनी धूर्तिः हिंसा
नः अस्मान् माप्रणक् मा भाभातु शर्म स्तरंच अस्मभ्यं यच्छतं दत्तं ९ गोमद्धिरण्यवदिति हे इंद्राग्नी गोमत् गोभिर्युक्तं हि
रण्यवत् स्वर्णयुक्तं अश्वावत् अश्वैरुपेतं यत् वसु वां युवां ईमहे याचामहे तद्वसु युवयोः प्रसादात् वयं वनेमहि सं
भजेमहि १० यत्सोमइति सोमे स्तुते अभिषुते सति नरः कर्मणां नेतारः ऋत्विजः सपर्यवः परिचरणकामाः संतः स
प्तावंता प्रशस्ताश्वौ इंद्राग्नी इंद्र अग्निं च यत् यदा आजोहवुः अभिहूयंते तदा युवां आगच्छतमिति शेषः ११ उक्थेभिरि

ति वृत्रहंतमा वृत्राणां आवरकाणां हंतृतमौ मंदाना मोदमानौ याविंद्राग्नी उक्थेभिः शस्त्रैः गिरा चित् स्तुत्या च आविवा
सतः परिचर्यतो आंगूषैः अन्यैश्च स्तोत्रैः आविवासतः तौ युवां आगच्छतमिति शेषः १२ ताविदुःशंसमिति हे इंद्राग्नी तौ
द्रू नृतौ युवां दुःशंसं दुष्टाभिशंसनं दुर्विद्वांसं दुर्विज्ञानं रक्षस्विनं बलवंतं आभोगं अस्मत्तः आभोक्तारं मर्त्यं मनुष्यं
तुहन्मना हननसाधनेनायुधेन हतं हिंस्तं उदधिं हन्मना हननेन यथा उदधानकुंभं अनायासेन हिंस्तं तद्वत्॥ ॥इतिपं
चमस्य षष्ठे अष्टादशो वर्गः॥ ॥प्रक्षोदसेति षष्ठं सूक्तं वसिष्ठऋषिः त्रिष्टुप् छंदः सरस्वती देवता तृतीया तु सरस्वान्
देवता १ प्रक्षोदसेति एषा क्षमाना नदीरूपा सा सरस्वती आयसी आयसा निर्मिता पूः पुरीव धरुणं धरुणा धारकेण क्षोदसा
उदकेन प्रससे प्रधावति रथीरिव रथीव गच्छति सिंधुः स्यंदनशीला नदीरूपा सा अन्याः विश्वाः सर्वाः अपः आपगाः महिना महिम्ना प्र
बाबधाना अन्याः बाधमाना रथ्येव मनोलीय विस्तीर्णा सती याति गच्छति २ एकाचेतदिति सहस्रवत्सरेण क्रतुना यजमाण
नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयामास सा च नहुषेण सहस्रसंवत्सरपर्याप्तं पयो घृतं च प्रददौ अयमर्थो अत्र प्रतिपा
द्यते नदीनां अन्यासां मध्ये शुचिः शुद्धा गिरिभ्यः सकाशात् आ समुद्रात् समुद्रपर्यंतं यती गच्छंती एका सरस्वती नदी अचे
तत् नाहुषस्य पार्थिवाज्ञासीत् तथा भुवनस्य भूतजातस्य भूरेः बहुलस्य रायः धनानि चेतंती प्रयच्छंती नाहुषाय राज्ञे
घृतं पयश्च सहस्रसंवत्सरक्रतोः पर्याप्तं दुदुहे दुग्धवती ३ स वावृध इति मध्यस्थानो वायुः सरस्वान् नर्यः नृणां हितः वृषा
सेचनसमर्थः शिशुः अल्पः शिशुरपि समये अल्पया वर्धमानः वृषभः वर्षिता एवंभूतः सः सरस्वान् यज्ञियासु
शारीरासु योषणासु योषित्सु आसक्तः कर्मयोग्यासु मध्यमस्थानासु अप्सु मध्ये वावृधे वर्धते सः तादृशः सरस्वान् मघ ७१
वद्भ्यः हविष्मद्भ्यः यजमानेभ्यः वाजिनं बलवंतं पुत्रं ददाति इदानीं तासां सातये लाभाय तन्वं तेषां शरीरं विमार्ष्टि मृजीत विमार्ष्टि
संकरोतीत्यर्थः स्वरस्वतः स्तुतिः रपि सरस्वत्याः प्रीणनार्थं ४ उतस्यान इति उत अपि च जुषाणा प्रीयमाणा सुभगा शोभन

189
1915

धना स्या सा सरस्वती नः अस्माकं अस्मिन्यज्ञे उपश्रवत् अस्मदीयाः स्तुतीः उपशृणोतु कीदृशी मितज्ञुभिः प्रह्वैः जानुभिः
नमस्यैः नमस्कारैः देवैः इयाना उपगम्यमाना युजा नित्ययुक्तेन राया चित् धनेन च संगता सखिभ्यः उत्तरा उत्कृष्टतरा ईदृ
शी अस्मदीयाः उपशृणोतु इत्यन्वयः ५ इमा जुह्वाना इति हे सरस्वति इमा इमानि अस्मदीयानि हवींषि जुह्वानाः तुभ्यं जुह्व
तो वयं नमोभिः स्वादिष्ठैः नमस्कारैः युष्मत् सकाशात् अददीमहि धनानीति शेषः स्तोमं च अस्मदीयं प्रतिजुषस्व सेवस्व
वयं च प्रियतमे अतिशयेन प्रियतमे त्वदीये शर्मन् शर्मणि अस्त्वैर्दधानाः निधीयमानाः संतः शरणं न वृक्षं आश्रयभू
तं वृक्षमिव उपस्थेयाम त्वां उपतिष्ठेम संगच्छेमहि ६ अयमु त इति हे सुभगे शोभनधने सरस्वति अयं वसिष्ठः ते त्वां
ऋतस्य यज्ञस्य संबंधिनी द्वारौ पूर्वापरे व्यावः विवृणोति उपूर्वकः हे शुभ्रे शुभ्रवर्णे देवि वर्धस्व वर्धस्व तथा स्तुवते स्तो
त्रं कुर्वते वसिष्ठाय वाजान् अन्नानि रासि प्रदेहि यूयं पात स्वस्तिभिः सदा नः॥ ॥इति पंचमस्य षष्ठे एकोनविंशो वर्गः॥
बृहदु गायिष इति सप्तमं सूक्तं वसिष्ठऋषिः आद्या बृहती द्वितीया प्रस्तारपंक्तिः तृतीया सतोबृहती शिष्टा गायत्र्यः आ
द्यस्तृचः सरस्वतीदेवताकः अंत्यः तृचः सरस्वद्देवताकः १ बृहदु गायिष इति अनया ऋषिः स्वात्मानं प्रबोध्य सरस्वत्या
स्तुतिं प्रेरयति हे वसिष्ठ त्वं बृहदु बृहदेव वचः स्तोत्रं गायिषे गायसि किमर्थं नदीनां मध्ये असुर्या असुराय बलवत्ये नदी रू
पायै सरस्वत्यै अस्याः प्रीणनार्थमित्यर्थः तथा रोदसी द्यावापृथिव्योः स्थितां दिवि देवतारूपेण भूम्यां वाग्रूपेण निवसंतीं स
रस्वतीमित्यर्थः सरस्वतीमिव सुवृक्तिभिः स्तोमैः दोषवर्जितैः महय पूजय २ उभे यदिति हे शुभ्रे शुभ्रवर्णे सरस्वति यत् य
स्याः तव महिना महिम्ना उभे अंधसी ग्राम्यं आरण्यं पूरवः पूरयितव्याः मनुष्याः अभिक्षयंति अधिगच्छंति सा त्वं अवित्री
रक्षित्री सती नः अस्मान् बोधि बुध्यस्व अपि च मरुत्सखा मरुतः माध्यमिका वाचः सखायो यस्याः तादृशी त्वं मघोनां हविर्ल
क्षणधनोपेतानां अस्माकं राधः धनं चोदय प्रेरय ३ भद्रमिद्भद्रेति भद्रं कल्याणी सरस्वती भद्रमित् कल्याणमेव कृणवत्

अस्माकं करोतु तथा अकवारी अकुत्सितगमना वाजिनीवती अन्नवती चेतति चेतयतु अस्मान् ज्ञापयतु तथा जमदग्निवत्
जमदग्निना ऋषिणेव मया गृणाना स्तूयमाना वसिष्ठवत् वसिष्ठानुरूपं स्तुवानां स्तूयमाना च भव ४ जनीयंत इति जनीयंतः
जायां आत्मन इच्छंतः अग्रवः आपाः ताः इच्छंतः पुत्रीयंतः पुत्रान् कामयमानाः सुदानवः शोभनदानाः अग्रवः उपगंता
रः सरस्वंतं सरस्वंतं हवामहे स्तुमहे ५ ये ते सरस्व इति हे सरस्वः देव ते तव ये ऊर्मयः उदकसंघाः मधुमंतः रस
वंतः घृतश्चुतः घृतस्य उदकस्य क्षारयितारो भवंति तेभिः तैः ऊर्मिभिः नः अस्माकं अविता रक्षिता भव ६ पीपिवांसमि
ति पीपिवांसं प्रवृद्धं सरस्वतो देवस्य स्तनं आप्यायमानं स्तनवद्धारकं रसमिंबम भक्षीमहि प्रजेम इषं आपुयाम यो विश्वद
र्शतो विश्वैः सर्वैः दर्शनीयः विश्वैः दृश्यमानो भवति मंडलं ... तथा प्रजां पुत्रादिरूपां इषमन्नं च सरस्वतः प्रसादा
त् प्राप्नवामहि॥ ॥इति पंचमस्य षष्ठे विंशो वर्गः॥ ॥यज्ञे दिव इति दशर्चं अष्टमं सूक्तं वसिष्ठस्यार्षं त्रिष्टुप् छंदः प्रथमा
द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे॥ शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि॥ ३१॥ अस्मा उषास आतिरंत याममिंद्राय राम
नक्तमूर्म्याः सुवाचः॥ अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिंधवः सुपाराः॥ अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु २१
संहिता गिरीणां॥ न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार॥ इंद्रस्य वज्र आयसो निमिश्ल इंद्रस्य बाह्वोर्भूयिष्ठमो
जः॥ शीर्षन्निंद्रस्य क्रतवो निरेक आसन्नेषंत श्रुत्या उपाके॥ मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानां॥ मन्ये त्वा स

२४१
1415

त्वनामिंद्र केतुं मन्ये त्वा वृषभं चर्षणीनां॥ आ यद्वज्रं बाह्वोरिंद्र धत्से मदच्युतमहये हंतवा उ॥ प्र पर्वता अनवंत प्र गावः प्र ब्रह्माणो अ
भिनक्षंत इंद्रं॥ ३२॥ तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात्॥ इंद्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम॥ वृ
त्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः॥ मरुद्भिरिंद्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि॥ त्रिः षष्टिस्त्वा मरुतो वा
वृधाना उस्रा इव राशयो यज्ञियासः॥ उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम॥ तिग्ममायुधं मरुतामनीकं कस्त इंद्र प्रति
वज्रं दधर्ष॥ अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन्॥ मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः॥ गिर्वाहसे
गिर इंद्राय पूर्वीर्धेहि तन्वे कुविदंग वेदत्॥ ३३॥ उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनां॥ नि स्पृश धिया तन्वि श्रुतस्य जुष्ट
तरस्य कु०॥ तद्विविड्ढि यत्त इंद्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास॥ उप भूष जरितर्मा रुवण्यः श्रावया वाचं कु०॥ अव द्रप्सो अंशुमती
मतिष्ठदियानः कृष्णो दशभिः सहस्रैः॥ आवत्तमिंद्रः शच्या धमंतमप स्नेहितीर्नृमणा अधत्त॥ द्रप्समपश्यं विषुणे चरंतमुपह्वरे न
द्यो अंशुमत्याः॥ नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ॥ अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः॥ वि
शो अदेवीरभ्याचरंतीर्बृहस्पतिना युजेंद्रः ससाहे॥ ३४॥ त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिंद्र॥ गूळ्हे द्यावापृथि
वी अन्वविंदो विभुमद्भ्यो भुवनेभ्यो रणं धाः॥ त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघंथ॥ त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इंद्र श
च्येदविंदः॥ त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ॥ त्वं सिंधूँरसृजस्तस्तभानान्त्वमपो अजयो दासपत्नीः॥ स सुक्रतू
रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान्॥ य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः॥ स वृत्रहेंद्रश्चर्षणीधृत्तं सुष्टुत्या
हव्यं हुवेम॥ स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता॥ स वृत्रहेंद्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव॥ कृण्वन्न
पांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः॥ ३५॥ या इंद्र भुज आभरः स्वर्वाँ असुरेभ्यः॥ स्तोतारमिन्मघवन्नस्य वर्धय ये च
त्वे वृक्तबर्हिषः॥ यमिंद्र दधिषे त्वमश्वं गां भागमव्ययं॥ यजमाने सुन्वति दक्षिणावति तस्मिंतं धेहि मा पणौ॥ य इंद्र सस्त्यव्रतोऽनुष्वा
पमदेवयुः॥ स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः॥ यच्छक्रासि परावति यदर्वावति वृत्रहन्॥ अतस्त्वा गीर्भिर्द्युगदिंद्र केशि
भिः सुतावाँ आ विवासति॥ यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि॥ यत्पार्थिवे सदने वृत्रहंतम यदंतरिक्ष आ गहि॥ ३६॥ स
नः सोमेषु सोमपाः सुतेषु शवसस्पते॥ मादयस्व राधसा सूनृतावतेंद्र राया परीणसा॥ मा न इंद्र परा वृणग्भवा नः सधमाद्यः॥ त्वं न ऊ
ती त्वमिन्न आप्यं मा न इंद्र परा वृणक्॥ अस्मे इंद्र सचा सुते नि षदा पीतये मधु॥ कृधी जरित्रे मघवन्नवो महदस्मे इंद्र सचा सुते॥
न त्वा देवास आशत न मर्त्यासो अद्रिवः॥ विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत॥ विश्वाः पृतना अभिभूतरं नरं स

१०५०८ स्ततक्षुरिंद्रं जजनुश्च राजसे ॥ क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनं ॥ ३ ७ ॥ समीं रेभासो अस्वरन्निंद्रं सोमस्य
२ पीतये ॥ स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ नेमिं नमंति चक्षसा मेषं विप्रा अभिस्वरा ॥ सुदीतयो वो अद्रुहोऽपि
कर्णे तरस्विनः समृक्वभिः ॥ तमिंद्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ॥ मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त
द्राये नो विश्वा सुपथा कृणोतु वज्री ॥ त्वं पुर इंद्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै ॥ त्वद्विश्वानि भुवनानि वज्रिन्द्यावा
रेजेते पृथिवी च भीषा ॥ तन्म ऋतमिंद्र शूर चित्र पात्वपो न वज्रिन्दुरिताति पर्षि भूरि ॥ कदा न इंद्र राय आ दशस्येर्विश्वप्स्न्य
स्य स्पृहयाय्यस्य राजन ॥ ३ ८ ॥ ॥ इति पंचमाष्टके षष्ठोध्यायः ॥ ॥ ॐ इंद्राय साम गायत विप्राय बृहते बृहत्
॥ धर्मकृते विपश्चिते पनस्यवे ॥ त्वमिंद्राभिभूरसि त्वं सूर्यमरोचयः ॥ विश्वकर्मा विश्वदेवो महाँ असि ॥ विभ्राजं ज्योतिषा स्व
रगच्छो रोचनं दिवः ॥ देवास्त इंद्र सख्याय येमिरे ॥ एंद्र नो गधि प्रियः सत्राजिदगोह्यः ॥ गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी ॥ इंद्रासि सुन्वतो वृधः पतिर्दिवः ॥ त्वं हि शश्वतीनामिंद्र दर्ता पुरामसि ॥ हंता दस्योर्म
नोर्वृधः पतिर्दिवः ॥ १ ॥ अधा हींद्र गिर्वण उप त्वा कामान्महः ससृज्महे ॥ उदेव यंत उदभिः ॥ वार्ण त्वा यव्याभिर्वर्धंति शूर ब्रह्मा
णि ॥ वावृध्वांसं चिदद्रिवो दिवेदिवे ॥ युंजंति हरी इषिरस्य गाथयोरौ रथ उरुयुगे ॥ इंद्रवाहा वचोयुजा ॥ त्वं न इंद्रा भरँ ओजो
नृम्णं शतक्रतो विचर्षणे ॥ आ वीरं पृतनाषहं ॥ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ॥ अधा ते सुम्नमीमहे ॥ त्वां शु
ष्मिन्पुरुहूत वाजयंतमुप ब्रुवे शतक्रतो ॥ स नो रास्व सुवीर्यं ॥ २ ॥ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ॥ स इंद्र स्तोमवा
हसामिह श्रुध्युप स्वसरमा गहि ॥ मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषंति वेधसः ॥ तव श्रवांस्युपमान्युक्थ्या सुतेष्विंद्र
गिर्वणः ॥ श्रायंत इव सूर्यं विश्वेदिंद्रस्य भक्षत ॥ वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ अनर्शरातिं वसुदामुप
स्तुहि भद्रा इंद्रस्य रातयः ॥ सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन ॥ त्वमिंद्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ॥ अ
शस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ अनु ते शुष्मं तुरयंतमीयतुः क्षोणी शिशुं न मातरा ॥ विश्वास्ते स्पृधः श्नथयंत मन्य
वे वृत्रं यदिंद्र तूर्वसि ॥ इत ऊती वो अजरं प्रहेतारमप्रहितं ॥ आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधं ॥ इष्कर्तारमनिष्कृतं स राम
हस्कृतं शतमूतिं शतक्रतुं ॥ समानमिंद्रमवसे हवामहे वसवानं वसूजुवं ॥ ३ ॥ अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यंति प २२
श्चात ॥ यदा मह्यं दीधरो भागमिंद्रादिन्मया कृणवो वीर्याणि ॥ दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ॥
असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जंघनाव भूरि ॥ प्र सु स्तोमं भरत वाजयंत इंद्राय सत्यं यदि सत्यमस्ति ॥ नेंद्रो अस्ती

२१९
१४११

ति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥ अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ॥ ऋतस्य मा प्रदि
शो वर्धयंत्यादर्दिरो भुवना दर्दरीमि ॥ आ यन्मा वेना अरुहन्नृतस्य एकमासीनं हर्यतस्य पृष्ठे ॥ मनश्चिन्मे हृद आ प्र
त्यवोचदचिक्रदंछिशुमंतः सखायः ॥ विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निंद्र सुन्वते ॥ पारावतं यत्पुरुसंभृ
तं वस्वपावृणोः शरभाय ऋषिबंधवे ॥ ४ ॥ प्र नूनं धावता पृथङ्नेह यो वो अवावरीत ॥ नि षीं वृत्रस्य मर्मणि वज्रमिंद्रो
अपीपतत ॥ मनोजवा अयमान आयसीमतरत्पुरं ॥ दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत ॥ समुद्रे अंतः शय
त उद्ना वज्रो अभीवृतः ॥ भरंत्यस्मै संयतः पुरः प्रस्रवणा बलिं ॥ यद्वाग्वदंत्यविचेतनानि राष्ट्री देवानां निषसाद मंद्रा ॥
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति ॥ सा नो मंद्रेषमू
र्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ॥ हनाव वृत्रं रिणचा
व सिंधूनिंद्रस्य यंतु प्रसवे विसृष्टाः ॥ ५ ॥ ऋधगित्था स मर्त्यः शशमे देवतातये ॥ यो नूनं मित्रावरुणावभिष्टय आच
क्रे हव्यदातये ॥ वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा ॥ ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मि
भिः ॥ प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत ॥ अयःशीर्षा मदेरघुः ॥ न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते ॥
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतं ॥ प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ॥ वरूथ्यं१ वरुणे छंद्यं वचः
स्तोत्रं राजसु गायत ॥ ६ ॥ ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणां ॥ ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते
॥ आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा ॥ उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥ रातिं यद्वामरक्षसं
हवामहे युवाभ्यां वाजिनीवसू ॥ प्राचीं होत्रां प्रतिरंताविंतं नरा गृणाना जमदग्निना ॥ आ नो यज्ञं दिविस्पृशं वायो या
हि सुमन्मभिः ॥ अंतः पवित्र उपरि श्रीणानो१ऽयं शुक्रो अयामि ते ॥ वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ॥ अ
धा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरं ॥ ७ ॥ बण्महाँ असि सूर्य बळादित्य महाँ असि ॥ महस्ते सतो महि
मा पनस्यतेऽद्धा देव महाँ असि ॥ बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ॥ मह्ना देवानामसुर्यः पुरोहितो विभु ज्यो
तिरदाभ्यं ॥ इयं या नीच्यर्किणी रूपा रोहिण्या कृता ॥ चित्रेव प्रत्यदर्श्यायत्यंतर्दशसु बाहुषु ॥ प्रजा ह तिस्रो अत्या
यमीयुर्न्यन्या अर्कमभितो विविश्रे ॥ बृहद्ध तस्थौ भुवनेष्वंतः पवमानो हरित आ विवेश ॥ माता रुद्राणां दुहिता वसू

सं०प०७
२३

नां स्वसादित्यानाममृतस्य नाभिः ॥ प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ वचोविदं वाचमुदीरयंतीं
विश्वाभिर्धीभिरुपतिष्ठमानां ॥ देवीं देवेभ्यः पर्येयुषीं गामामावृक्त मर्त्यो दभ्रचेताः ॥ ८ ॥ त्वमग्ने बृहद्वयो दधासि दे
वदाशुषे ॥ कविर्गृहपतिर्युवा ॥ स न ईळानया सह देवाँ अग्ने दुवस्युवा ॥ चिकिद्विभानवावह ॥ त्वया ह स्विद्युजा वयं चो
दिष्ठेन यविष्ठ्य ॥ अभि ष्मो वाजसातये ॥ और्वभृगुवच्छुचिमप्नवानवदा हुवे ॥ अग्निं समुद्रवाससं ॥ हुवे वातस्वनं क
विं पर्जन्यक्रंद्यं सहः ॥ अग्निं० ॥ ९ ॥ आ सवं सवितुर्यथा भगस्येव भुजिं हुवे ॥ अग्निं० ॥ अग्निं वो वृधंतमध्वराणां पुरू
तमं ॥ अच्छा नप्त्रे सहस्वते ॥ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ॥ अस्य क्रत्वा यशस्वतः ॥ अयं विश्वा अभि श्रियो
ग्निर्देवेषु पत्यते ॥ आ वाजैरुप नो गमत् ॥ विश्वेषामिह स्तुहि होतॄणां यशस्तमं ॥ अग्निं यज्ञेषु पूर्व्यं ॥ १० ॥ शीरं पा
वकशोचिषं ज्येष्ठो यो दमेष्वा ॥ दीदाय दीर्घश्रुत्तमः ॥ तमर्वंतं न सानसिं गृणीहि विप्र शुष्मिणं ॥ मित्रं न यातयज्जनं ॥
उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ॥ वायोरनीके अस्थिरन् ॥ यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनं ॥ आपश्चिन्नि
दधा पदं ॥ पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः ॥ भद्रा सूर्य इवोपदृक् ॥ ११ ॥ अग्ने घृतस्य धीतिभिस्तेपानो देव
शोचिषा ॥ आ देवान्वक्षि यक्षि च ॥ तं त्वाजनंत मातरः कविं देवासो अंगिरः ॥ हव्यवाहममर्त्यं ॥ प्रचेतसं त्वा कवेऽग्ने दूतं वरे
ण्यं ॥ हव्यवाहं नि षेदिरे ॥ नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति ॥ अथैतादृग्भरामि ते ॥ यदग्ने कानि कानि चि
दा ते दारूणि दध्मसि ॥ ता जुषस्व यविष्ठ्य ॥ यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति ॥ सर्वं तदस्तु ते घृतं ॥ अग्निमिंधा
नो मनसा धियं सचेत मर्त्यः ॥ अग्निमीधे विवस्वभिः ॥ १२ ॥ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ॥ उपो षु जा
तमार्यस्य वर्धनमग्निं नक्षंत नो गिरः ॥ प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ॥ अनु मातरं पृथिवीं वि वावृते तस्थौ नाक
स्य सानवि ॥ यस्मादेजंत कृष्टयश्चर्कृत्यानि कृण्वतः ॥ सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥ प्र यं राय
निनीषसि मर्तो यस्ते वसो दाशत् ॥ स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणं ॥ स दृळ्हे चिदभि तृणत्ति वाज
मर्वता स धत्ते अक्षिति श्रवः ॥ त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥ १३ ॥ यो विश्वा दयते वसु होता मंद्रो साम
जनानां ॥ मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यंत्वग्नये ॥ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यंते देवयवः ॥ उभे तोके २३
तनये दस्म विश्पते पर्षि राधो मघोनां ॥ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ॥ उपस्तुतासो अग्नये ॥
आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ॥ कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥ प्रेष्ठमु प्रि

277
1915

याणां स्तुह्यासावातिथिं ॥ अग्निं रथानां यमं ॥ १४ ॥ उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ॥ दुष्टरा यस्य
प्रवणे नोर्मयो धिया वाजं सिषासतः ॥ मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः ॥ यः सुहोता स्वध्वरः ॥ मो ते रिषन्ये
अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ॥ कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥ आग्ने याहि मरुत्सखा रुद्रे
भिः सोमपीतये ॥ सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥ १५ ॥ नवमं मंडलं ॥ ॥ स्वादिष्ठया मदिष्ठया पवस्व सोम
धारया ॥ इंद्राय पातवे सुतः ॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहते ॥ द्रुणा सधस्थमासदत् ॥ वरिवोधातमो
भव मंहिष्ठो वृत्रहंतमः ॥ पर्षि राधो मघोनां ॥ अभ्यर्ष महानां देवानां वीतिमंधसा ॥ अभि वाजमुत श्रवः ॥ त्वामच्छा
चरामसि तदिदर्थं दिवेदिवे ॥ इंदो त्वे न आशसः ॥ १ ॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ॥ वारेण शश्वता तना ॥ तमीम
ण्वीः समर्य आ गृभ्णंति योषणो दश ॥ स्वसारः पार्ये दिवि ॥ तमीं हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं ॥ त्रिधातु वारणं मधु ॥ अभी
३ ममघ्न्या उत श्रीणंति धेनवः शिशुं ॥ सोममिंद्राय पातवे ॥ अस्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते ॥ शूरो मघा च मंहते ॥ २ ॥
पवस्व देववीरति पवित्रं सोम रंह्या ॥ इंद्रमिंदो वृषा विश ॥ आ वच्यस्व महि प्सरो वृषेंदो द्युम्नवत्तमः ॥ आ योनिं धर्णसिः सदः
॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ॥ अपो वसिष्ट सुक्रतुः ॥ महांतं त्वा महीरन्वापो अर्षंति सिंधवः ॥ यद्गोभिर्वा
सयिष्यसे ॥ समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः ॥ हरिः पवित्रे अस्मयुः ॥ ३ ॥ अचिक्रदद्वृषा हरिर्महान्मित्रो
न दर्शतः ॥ सं सूर्येण रोचते ॥ गिरस्त इंद्र ओजसा मर्मृज्यंते अपस्युवः ॥ याभिर्मदाय शुंभसे ॥ तं त्वा मदाय घृष्वय उ
लोककृत्नुमीमहे ॥ तव प्रशस्तयो महीः ॥ अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया ॥ पर्जन्यो वृष्टिमाँ इव ॥ गोषा इंदो नृषा
अस्यश्वसा वाजसा उत ॥ आत्मा यज्ञस्य पूर्व्यः ॥ ४ ॥ एष देवो अमर्त्यः पर्णवीरिव दीयति ॥ अभि द्रोणान्यासदं ॥ एष देवो
विपा कृतोऽति ह्वरांसि धावति ॥ पवमानो अदाभ्यः ॥ एष देवो विपन्युभिः पवमान ऋतायुभिः ॥ हरिर्वाजाय मृज्यते ॥ एष
विश्वानि वार्या शूरो यन्निव सत्वभिः ॥ पवमानः सिषासति ॥ एष देवो रथर्यति पवमानो दशस्यति ॥ आविष्कृणोति वग्वनुं
॥ ५ ॥ एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ॥ दधद्रत्नानि दाशुषे ॥ एष दिवं वि धावति तिरो रजांसि धारया ॥ पवमानः
कनिक्रदत् ॥ एष दिवं व्यासरत्तिरो रजांस्यस्पृतः ॥ पवमानः स्वध्वरः ॥ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ॥ हरिः प

पं०प०७
२४

त्रिंषे अर्षति ॥ पुरुरुस्पृपुरु त्मनाजस्तुनोजुनयंवनिर्षः ॥ धारयापवतेस्कृतः ॥ ८ ॥ सनाबसोमुजेषिनुपवमानुमहिश्र
वः ॥ अथानोवस्येसस्कृधि ॥ सनाज्योतिःसनास्वर्विश्वानिसोमसोभगा ॥ अथा० ॥ सनादक्षमुतक्रतुमपसोमुमृधो
जहि ॥ अथा० ॥ पवीतारःपुनीतनसोममिंद्रायपातवे ॥ अथा० ॥ त्वंसूर्येनआभजतवक्रत्वातवोतिभिः ॥ अथा० ॥ ७ ॥
तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं ॥ अथा० ॥ अभ्यर्षस्वायुधसोमद्विबर्हसंरयिं ॥ अथा० ॥ अभ्यर्षानपच्युतोरयिं
समत्सुसासहिः ॥ अथा० ॥ त्वांयज्ञैरवीवृधन्पवमानविधर्मणि ॥ अथा० ॥ रयिंनश्चित्रमश्विनमिंदोविश्वायुमाभर ॥ अ
था० ॥ ८ ॥ समिद्धोविश्वतस्पतिःपवमानोविराजति ॥ प्रीणन्वृषाकनिक्रदत् ॥ तनूनपात्पवमानःशृंगेशिशानोअर्ष
ति ॥ अंतरिक्षेणरारजत् ॥ ईळेन्यःपवमानोरयिर्विराजतिद्युमान् ॥ मधोर्धाराभिरोजसा ॥ बर्हिःप्राचीनमोजसापव
मानस्तृणन्हरिः ॥ देवेषुदेवईयते ॥ उदातैर्जिहतेबृहद्द्वारोदेवीर्हिरण्ययीः ॥ पवमानेनसुष्टुताः ॥ २ ॥ सुशिल्पेबृह
तीमही पवमानोवृषण्यति ॥ नक्तोषासानदर्शते ॥ उभादेवानृचक्षसाहोतारादैव्याहुवे ॥ पवमानइंद्रोवृषा ॥ भारती
पवमानस्यसरस्वतीळामही ॥ इमंनोयज्ञमागमंतिस्रोदेवीःसुपेशसः ॥ त्वष्टारमग्रजांगोपांपुरोयावानमाहुवे ॥ इं
दुरिंद्रोवृषाहरिःपवमानःप्रजापतिः ॥ वनस्पतिंपवमानमध्वासमंग्धिधारया ॥ सहस्रवल्शंहरितंभ्राजमानंहि
रण्ययं ॥ विश्वेदेवाःस्वाहाकृतिंपवमानस्यागत ॥ वायुर्बृहस्पतिःसूर्योग्निरिंद्रःसजोषसः ॥ १० ॥ मंद्रयासोमधा
रयावृषापवस्वदेवयुः ॥ अव्योवारेष्वस्मयुः ॥ अभित्यमद्यंमदमिंदविंद्रइतिक्षर ॥ अभिवाजिनोअर्वतः ॥ अभित्यं
पूर्व्यंमदंसुवानोअर्षपवित्रआ ॥ अभिवाजमुतश्रवः ॥ अनुद्रप्सासइंदवआपोनप्रवतासरन् ॥ पुनानाइंद्रमाशत ॥ यमत्यमिव
वाजिनंमृजंतियोषणोदश ॥ वनेक्रीळंतमत्यविं ॥ ११ ॥ तंगोभिर्वृषणंरसंमदायदेववीतये ॥ सुतंभरायसंसृज ॥ देवोदेवा
यधारयेंद्रायपवतेसुतः ॥ पयोयदस्यपीपयत् ॥ आत्मायज्ञस्यरंह्यासुष्वाणःपवतेसुतः ॥ प्रत्नंनिपातिकाव्यं ॥ एवापुनानइं
द्रयुर्मदंमदिष्ठवीतये ॥ गुहाचिद्दधिषेगिरः ॥ १२ ॥ असृग्रमिंदवःपथाधर्मन्नृतस्यसुश्रियः ॥ विदानाअस्ययोजनं ॥ प्र
धारामध्वोअग्रियोमहीरपोविगाहते ॥ हविर्हविःषुवंद्यः ॥ प्रयुजोवाचोअग्रियोवृषावचक्रदद्वने ॥ सद्माभिसत्योअ
ध्वरः ॥ परियत्काव्याकविर्नृम्णावसानोअर्षति ॥ स्वर्वाजीसिषासति ॥ पवमानोअभिस्पृधोविशोराजेवसीदति ॥ यदीमृ

गम
२४

30
1915

ण्वंतिवेधसः ॥ १३ ॥ अव्योवारेपरिप्रियोहरिर्वनेषुसीदति ॥ रेभोवनुष्यतेमती ॥ सवायुमिंद्रमश्विनासाकंमदेनगच्छति ॥ र
णायोअस्यधर्मभिः ॥ आमित्रावरुणाभगंमध्वःपवंतऊर्मयः ॥ विदानाअस्यशक्मभिः ॥ अस्मभ्यंरोदसीरयिंमध्वोवाजस्यसा
तये ॥ श्रवोवसूनिसंजितं ॥ १४ ॥ एतेसोमाअभिप्रियमिंद्रस्यकाममक्षरन् ॥ वर्धंतोअस्यवीर्यं ॥ पुनानासश्चमूषदोगच्छं
तोवायुमश्विना ॥ तेनोधांतुसुवीर्यं ॥ इंद्रस्यसोमराधसेपुनानोहार्दिचोदय ॥ ऋतस्ययोनिमासदं ॥ मृजंतित्वादशक्षिपोहि
न्वंतिसप्तधीतयः ॥ अनुविप्राअमादिषुः ॥ देवेभ्यस्त्वामदायकंसृजानमतिमेष्यः ॥ संगोभिर्वासयामसि ॥ १५ ॥ पुनानःक
लशेष्वावस्त्राण्यरुषोहरिः ॥ परिगव्यान्यव्यत ॥ मघोनआपवस्वनोजहिविश्वाअपद्विषः ॥ इंदोसखायमाविश ॥ वृष्टिंदि
वःपरिस्रवद्युम्नंपृथिव्याअधि ॥ सहोनःसोमपृत्सुधाः ॥ नृचक्षसंत्वावयमिंद्रपीतंस्वर्विदं ॥ भक्षीमहिप्रजामिषं ॥ १६ ॥ प
रिप्रियादिवःकविर्वयांसिनप्त्योर्हितः ॥ सुवानोयातिकविक्रतुः ॥ प्रप्रक्षयायपन्यसेजनायजुष्टोअद्रुहे ॥ वीत्यर्षचनिष्ठया ॥ स
सूनुर्मातरासुचिर्जातोजातेअरोचयत् ॥ महान्मही‌ऋतावृधा ॥ सप्तसप्तधीतिभिर्हितोनद्योअजिन्वदद्रुहः ॥ याएकमक्षिवावृ
धुः ॥ ताअभिसंतमस्तृतंमहेयुवानमादधुः ॥ इंदुमिंद्रतवव्रते ॥ १७ ॥ अभिवह्निरमर्त्यःसप्तपश्यतिवावहिः ॥ क्रिविर्देवीर
तर्पयत् ॥ अवाकल्पेषुनःपुमस्तमांसिसोमयोध्या ॥ तानिपुनानजंघनः ॥ नूनव्यसेनवीयसेसूक्तायसाधयापथः ॥ प्रत्न
वद्रोचयारुचः ॥ पवमानमहिश्रवोगामश्वंरासिवीरवत् ॥ सनामेधांसनास्वः ॥ १८ ॥ प्रस्वानासोरथाइवार्वंतोनश्रवस्यवः
॥ सोमासोरायेअक्रमुः ॥ हिन्वानासोरथाइवदधन्विरेगभस्त्योः ॥ भरासःकारिणामिव ॥ राजानोनप्रशस्तिभिःसोमासो
गोभिरंजते ॥ यज्ञोनसप्तधातृभिः ॥ परिस्वानासइंदवोमदायबर्हणागिरा ॥ सुताअर्षंतिधारया ॥ आपानासोविवस्वतो
जनंतउषसोभगं ॥ सूराअण्वंवितन्वते ॥ १९ ॥ अपद्वारामतीनांप्रत्नाऋण्वंतिकारवः ॥ वृष्णोहरसआयवः ॥ समीचीना
सआसतेहोतारःसप्तजामयः ॥ पदमेकस्यपिप्रतः ॥ नाभानाभिंनआददेचक्षुश्चित्सूर्येसचा ॥ कवेरपत्यमादुहे ॥ अ
भिप्रियादिवस्पदमध्वर्युभिर्गुहाहितं ॥ सूरःपश्यतिचक्षसा ॥ २० ॥ उपोषुजातमप्तुरंपवमानाअमंदिषुः ॥ अभिदेवाइ
यक्षते ॥ अभितमधुनापयाथर्वाणोअशिश्रयुः ॥ देवंदेवायदेवयु ॥ सनःपवस्वशंगवेशंजनायशमर्वते ॥ शंराजन्नोष
धीभ्यः ॥ बभ्रवेनुस्वतवसेरुणायदिविस्पृशे ॥ सोमायगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावा
धावतामधु ॥ २१ ॥ नमसेदुपसीदतदध्नेदभिश्रीणीतन ॥ इंदुमिंद्रेदधातन ॥ अमित्रहाविचर्षणिःपवस्वसोमशंगवे ॥
देवेभ्योअनुकामकृत् ॥ इंद्रायसोमपातवेमदायपरिषिच्यसे ॥ मनश्चिन्मनसस्पतिः ॥ पवमानसुवीर्यंरयिंसोमरिरीहि

नः॥ इंदुरिंद्रेणनो युजा॥ २२॥ सोमा असृग्रमिंदवः सुता ऋतस्य सादने॥ इंद्राय मधुमत्तमाः॥ अभि विप्रा अनूषत गावो वत्सं न
मातरः॥ इंद्रं सोमस्य पीतये॥ मदच्युत्क्षेति सादने सिंधोरूर्मा विपश्चित॥ सोमो गौरी अधिश्रितः॥ दिवो नाभा विचक्ष
णोव्यो वारे महीयते॥ सोमो यः सुक्रतुः कविः॥ यः सोमः कलशेष्वाँ अंतः पवित्र आहितः॥ तमिंदुः परिषस्वजे॥ २३॥ प्र
वाचमिंदुरिष्यति समुद्रस्याधि विष्टपि॥ जिन्वन्कोशं मधुश्चुतं॥ नित्यस्तोत्रो वनस्पतिर्धीनामंतः सबर्दुघः॥ हिन्वानो मा
नुषा युगा॥ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति॥ विप्रस्य धारया कविः॥ आ पवमान धारय रयिं सहस्रव
र्चसं॥ अस्मे इंदो स्वाभुवं॥ २४ ॥ ५ ॥ इति षष्ठाष्टके सप्तमोध्यायः॥ ॥ ॐ सोमः पुनानो अर्षति सहस्रधारो
अत्यविः॥ वायोरिंद्रस्य निष्कृतं॥ पवमानमवस्यवो विप्रमभि प्र गायत॥ सुष्वाणं देववीतये॥ पवंते वाजसातये सोमाः सहस्रपाजसः॥ गृ
णाना देववीतये॥ उत नो वाजसातये पवस्व बृहतीरिषः॥ द्युमदिंदो सुवीर्यं॥ ते नः सहस्रिणं रयिं पवंतामा सुवीर्यं॥ सुवाना दे
वास इंदवः॥ १॥ अत्या हियाना न हेतृभिरसृग्रं वाजसातये॥ वि वारमव्यमाशवः॥ वाश्रा अर्षंतींदवोभि वत्सं न धेनवः॥ दधन्विरे
गभस्त्योः॥ जुष्ट इंद्राय मत्सरः पवमान कनिक्रदत॥ विश्वा अप द्विषो जहि॥ अपघ्नंतो अराव्णः पवमानाः स्वर्दृशः॥ योनावृ
तस्य सीदत॥ २॥ परि प्रासिष्यदत्कविः सिंधोरूर्मावधि श्रितः॥ कारं बिभ्रत्पुरुस्पृहं॥ गिरा यदी सबंधवः पंच व्राता अपस्यवः
॥ परिष्कृण्वंति धर्णसिं॥ आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत॥ यदी गोभिर्वसायते॥ निरिणानो वि धावति जहच्छर्याणि ता
न्वा॥ अत्रा सं जिघ्नते युजा॥ नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा॥ गाः कृण्वानो न निर्णिजं॥ ३॥ अति श्रिती तिरश्चता
गव्या जिगात्यण्व्या॥ वग्नुमियर्ति यं विदे॥ अभि क्षिपः समग्मत मर्जयंतीरिषस्पतिं॥ पृष्ठा गृभ्णत वाजिनः॥ परि दिव्यानि मर्मृ
शद्विश्वानि सोम पार्थिवा॥ वसूनि याह्यस्मयुः॥ ४॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः॥ गच्छन्निंद्रस्य निष्कृतं॥ एष
पुरू धियायते बृहते देवतातये॥ यत्रामृतास आसते॥ एष हितो वि नीयतेंतः शुभ्रावता पथा॥ यदी तुंजंति भूर्णयः॥ एष शृं
गाणि दोधुवच्छिशीते यूथ्यो वृषा॥ नृम्णा दधान ओजसा॥ एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः॥ पतिः सिंधूनां भ
वन॥ एष वसूनि पिब्दना परुषा ययिवाँ अति॥ अव शादेषु गच्छति॥ एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः॥ प्रचक्राणं महीरि
षः॥ एतमु त्यं दश क्षिपो मृजंति सप्त धीतयः॥ स्वायुधं मदिंतमं॥ ५॥ प्र ते सोतार ओण्यो रसं मदाय घृष्वये॥ सर्गो न तक्त्येत
शः॥ क्रत्वा दक्षस्य रथ्यमपो वसानमंधसा॥ गोषामण्वेषु सश्चिम॥ अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज॥ पुनीहींद्राय
पातवे॥ प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति॥ क्रत्वा सधस्थमासदत॥ प्र त्वा नमोभिरिंदव इंद्र सोमा असृक्षत॥ महे भ

303
1915

राय कारिणः॥ पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः॥ शूरो न गोषु तिष्ठति॥ दिवो न सानु पिप्युषी धारा सुतस्य वेधसः॥ वृ
था पवित्रे अर्षति॥ त्वं सोम विपश्चितं तना पुनान आयुषु॥ अव्यो वारं वि धावसि॥ ६॥ प्र निम्नेनेव सिंधवो घ्नंतो वृत्राणि भूर्णयः
सोमा असृग्रमाशवः॥ अभि सुवानास इंदवो वृष्टयः पृथिवीमिव॥ इंद्रं सोमासो अक्षरन॥ अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अ
र्षति॥ विघ्नन्रक्षांसि देवयुः॥ आ कलशेषु धावति पवित्रे परि षिच्यते॥ उक्थैर्यज्ञेषु वर्धते॥ अति त्री सोम रोचना रोहन्न भ्राजसे दिवं
इष्णन्सूर्यं न चोदयः॥ अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः॥ दधाना चक्षसि प्रियं॥ तमु त्वा वाजिनं नरो धीभिर्विप्रा
अवस्यवः॥ मृजंति देववीतये॥ मधोर्धारामनु क्षर तीव्रः सधस्थमासदः॥ चारुरृताय पीतये॥ ७॥ परि सुवानो गिरिष्ठाः
पवित्रे सोमो अक्षाः॥ मदेषु सर्वधा असि॥ त्वं विप्रस्त्वं कविर्मधु प्र जातमंधसः॥ मदे०॥ तव विश्वे सजोषसो देवासः पीतिमाशत॥
मदे०॥ आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे॥ मदे०॥ य इमे रोदसी मही सं मातरेव दोहते॥ मदे०॥ परि यो रोदसी उभे सद्यो वा
जेभिरर्षति॥ मदे०॥ स शुष्मी कलशेष्वा पुनानो अचिक्रदत॥ मदे०॥ ८॥ यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु॥ तन्नः पुनान
आ भर॥ युवं हि स्थः स्वर्पती इंद्रश्च सोम गोपती॥ ईशाना पिप्यतं धियः॥ वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि॥ हरिः सन्यो
निमासदत॥ अवावशंत धीतयो वृषभस्याधि रेतसि॥ सूनोर्वत्सस्य मातरः॥ कुविद्वृषण्यंतीभ्यः पुनानो गर्भमादधत॥ याः
शुक्रं दुहते पयः॥ उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु॥ पवमान विदा रयिं॥ नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर
॥ दूरे वा सतो अंति वा॥ ९॥ प्र कविर्देववीतयेव्यो वारेभिरर्षति॥ साह्वान्विश्वा अभि स्पृधः॥ स हि ष्मा जरितृभ्य आ वाजं
गोमंतमिन्वति॥ पवमानः सहस्रिणं॥ परि विश्वानि चेतसा मृशसे पवसे मती॥ स नः सोम श्रवो विदः॥ अभ्यर्ष बृहद्यशो मघव
द्भ्यो ध्रुवं रयिं॥ इषं स्तोतृभ्य आ भर॥ त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ॥ पुनानो वह्ने अद्भुत॥ स वह्निरप्सु दुष्टरो मृज्यमानो
गभस्त्योः॥ सोमश्चमूषु सीदति॥ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि॥ दधत्स्तोत्रे सुवीर्यं॥ १०॥ एते धावंतींदवः सो
मा इंद्राय घृष्वयः॥ मत्सरासः स्वर्विदः॥ प्रवृण्वंतो अभियुजः सुष्वये वरिवोविदः॥ स्वयं स्तोत्रे वयस्कृतः॥ वृथा क्रीळंत इंद
वः सधस्थमभ्येकमित॥ सिंधोरूर्मा व्यक्षरन॥ एते विश्वानि वार्या पवमानास आशत॥ हिता न सप्तयो रथे॥ आस्मिन्पिशं
गमिंदवो दधाता वेनमादिशे॥ यो अस्मभ्यमरावा॥ ऋभुर्न रथ्यं नवं दधाता केतमादिशे॥ शुक्राः पवध्वमर्णसा॥ एत उ त्ये
अवीवशन्काष्ठां वाजिनो अक्रत॥ सतः प्रासाविषुर्मतिं॥ ११॥ एते सोमास आशवो रथा इव प्र वाजिनः॥ सर्गाः सृष्टा अहे
षत॥ एते वाता इवोरवः पर्जन्यस्येव वृष्टयः॥ अग्नेरिव भ्रमा वृथा॥ एते पूता विपश्चितः सोमासो दध्याशिरः॥ विपा व्यानशुर्धि

उ०प्र० ८
२८

यः॥ एतेमृष्टाअमर्त्याःससृवांसोनशश्रमुः॥ इयक्षंतःपथोरजः॥ एतेपृष्ठानिरोदसोर्विप्रयंतोव्यानशुः॥ उतेदमुत्तमंरजः॥
तंतुंतन्वानमुत्तममनुप्रवतआशत॥ उतेदमुत्तमाय्यं॥ त्वंसोमपणिभ्यआवसुगव्यानिधारयः॥ ततंतंतुमचिक्रदः॥१२॥
सोमाअसृग्रमिंदवःसुताऋतस्यधारया॥ अभिविश्वानिकाव्या॥ अनुप्रत्नासआयवःपदंनवीयोअक्रमुः॥ रुचेजनंतसूर्यं॥
आपवमाननोभरार्योअदाशुषोगयं॥ कृधिप्रजावतीरिषः॥ अभिसोमासआयवःपवंतेमद्यंमदं॥ अभिकोशंमधुश्चुतं॥
सोमोअर्षतिधर्णसिर्दधानइंद्रियंरसं॥ सुवीरोअभिशस्तिपाः॥ इंद्रायसोमपवसेदेवेभ्यःसधमाद्यः॥ इंदोवाजंसिषाससि॥ अ
स्यपीत्वामदानामिंद्रोवृत्राण्यप्रति॥ जघानजघनच्चनु॥१३॥ प्रसोमासोअधन्विषुःपवमानासइंदवः॥ श्रीणानाअप्सुमृंजत॥
अभिगावोअधन्विषुरापोनप्रवतायतीः॥ पुनानाइंद्रमाशत॥ प्रपवमानधन्वसिसोमेंद्रायपातवे॥ नृभिर्यतोविनीयसे॥ त्वंसो
मनृमादनःपवस्वचर्षणीसहे॥ सस्निर्योअनुमाद्यः॥ इंदोयदद्रिभिःसुतःपवित्रंपरिधावसि॥ अरमिंद्रस्यधाम्ने॥ पवस्ववृ
त्रहंतमोक्थेभिरनुमाद्यः॥ शुचिःपावकोअद्भुतः॥ शुचिःपावकउच्यतेसोमःसुतस्यमध्वः॥ देवावीरघशंसहा॥१४॥ पव
स्वदक्षसाधनोदेवेभ्यःपीतयेहरे॥ मरुद्भ्योवायवेमदः॥ पवमानधियाहितोभियोनिंकनिक्रदत्॥ धर्मणावायुमा
विश॥ संदेवैःशोभतेवृषाकविर्योनावधिप्रियः॥ वृत्रहादेववीतमः॥ विश्वारूपाण्याविशन्पुनानोयातिहर्यतः॥ यत्रामृतास
आसते॥ अरुषोजनयन्गिरःसोमःपवतआयुषक्॥ इंद्रंगच्छन्कविक्रतुः॥ आपवस्वमदिंतमपवित्रंधारयाकवे॥ अर्कस्य
योनिमासदं॥१५॥ तमृक्षंतवाजिनमुपस्थेअदितेरधि॥ विप्रासोअण्व्याधिया॥ तंगावोअभ्यनूषतसहस्रधारमक्षि
तं॥ इंदुंधर्तारमादिवः॥ वेनुंधामंधमयाम्यन्पवमानमधिद्यवि॥ धर्णसिंभूरिधायसं॥ तमह्यन्भुरिजोर्धियासंवसानंविव
स्वतः॥ पतिंवाचोअदाभ्यं॥ तंसानावधिजामयोहरिंहिन्वंत्यद्रिभिः॥ हर्यतंभूरिचक्षसं॥ तंत्वाहिन्वंतिवेधसःपवमानगिरा
वृधं॥ इंदविंद्रायमत्सरं॥१६॥ एषकविरभिष्टुतःपवित्रेअधितोशते॥ पुनानोघ्नन्नपस्रिधः॥ एषइंद्रायवायवेस्वर्जि
त्परिषिच्यते॥ पवित्रेदक्षसाधनः॥ एषनृभिर्विनीयतेदिवोमूर्धावृषासुतः॥ सोमोवनेषुविश्ववित्॥ एषगव्युरचिक्रद
त्पवमानोहिरण्ययुः॥ इंदुःसत्राजिदस्तृतः॥ एषसूर्येणहासतेपवमानोअधिद्यवि॥ पवित्रेमत्सरोमदः॥ एषशुष्म्यसिष्य राम
ददंतरिक्षेवृषाहरिः॥ पुनानइंदुरिंद्रमा॥१७॥ एषवाजीहितोनृभिर्विश्वविन्मनसस्पतिः॥ अव्योवारंविधावति॥ ए २८
षपवित्रेअक्षरत्सोमोदेवेभ्यःसुतः॥ विश्वाधामान्याविशन्॥ एषदेवःशुभायतेधियानामर्त्यः॥ वृत्रहादेववीतमः॥ एषवृ
षाकनिक्रदद्दशभिर्जामिभिर्यतः॥ अभिद्रोणानिधावति॥ एषसूर्यमरोचयत्पवमानोविचर्षणिः॥ विश्वाधामानिविश्व

305
1715

वित्॥ एषशुष्म्यदाभ्यःसोमःपुनानोअर्षति॥ देवावीरघशंसहा॥१८॥ प्रास्यधाराअक्षरन्वृष्णःसुतस्यौजसा॥ देवाँअनुप्रभू
षतः॥ सप्तिंमृजंतिवेधसोगृणंतःकारवोगिरा॥ ज्योतिर्जज्ञानमुक्थ्यं॥ सुषहासोमतानितेपुनानायप्रभूवसो॥ वर्धासमुद्रमुक्थ्यं॥ ए
विश्वावसूनिसंजयन्पवस्वसोमधारया॥ इनुद्वेषांसिसध्र्यक्॥ रक्षासुनोअररुषःस्वनात्समस्यकस्यचित्॥ निदोयत्रमुमुच्महे॥ ए
दोपार्थिवंरयिंदिव्यंपवस्वधारया॥ द्युमंतंशुष्ममाभर॥१९॥ प्रधाराअस्यशुष्मिणोवृथापवित्रेअक्षरन्॥ पुनानोवाचमिष्यति
॥ इंदुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत्॥ इयर्तिवग्नुमिंद्रियं॥ आनःशुष्मंनृषाह्यंवीरवंतंपुरुस्पृहं॥ पवस्वसोमधारया॥ प्रसो
मोअतिधारयापवमानोअसिष्यदत्॥ अभिद्रोणान्यासदं॥ अप्सुत्वामधुमत्तमंहरिंहिन्वंत्यद्रिभिः॥ इंदविंद्रायपीतये॥ सुनोताम
धुमत्तमंसोममिंद्रायवज्रिणे॥ चारुंशर्धायमत्सरं॥२०॥ प्रसोमासःस्वाध्यःपवमानासोअक्रमुः॥ रयिंकृण्वंतिचेतनं॥ दिवस्पृथि
व्याअधिभवेंदोद्युम्नवर्धनः॥ भवावाजानांपतिः॥ तुभ्यंवाताअभिप्रियस्तुभ्यमर्षंतिसिंधवः॥ सोमवर्धंतितेमहः॥ आप्यायस्वसमे
तुतेविश्वतःसोमवृष्ण्यं॥ भवावाजस्यसंगथे॥ तुभ्यंगावोघृतंपयोबभ्रोदुदुह्रेअक्षितं॥ वर्षिष्ठेअधिसानवि॥ स्वायुधस्यतेस
तोभुवनस्यपतेवयं॥ इंदोसखित्वमुश्मसि॥२१॥ प्रसोमासोमदच्युतःश्रवसेनोमघोनः॥ सुताविदथेअक्रमुः॥ आदींत्रित
स्ययोषणोहरिंहिन्वंत्यद्रिभिः॥ इंदुमिंद्रायपीतये॥ आदींहंसोयथागणंविश्वस्यावीवशन्मतिं॥ अत्योनगोभिरज्यते॥ उभे
सोमावचाकशन्मृगोनतक्तोअर्षसि॥ सीदन्नृतस्ययोनिमा॥ अभिगावोअनूषतयोषाजारमिवप्रियं॥ अगन्नाजिंयथाहि
तं॥ अस्मेधेहिद्युमद्यशोमघवद्भ्यश्चमह्यंच॥ सनिंमेधामुतश्रवः॥२२॥ प्रसोमासोविपश्चितोपांनयंत्यूर्मयः॥ वनानि
महिषाइव॥ अभिद्रोणानिबभ्रवःशुक्राऋतस्यधारया॥ वाजंगोमंतमक्षरन्॥ सुताइंद्रायवायवेवरुणायमरुद्
भ्यः॥ सोमाअर्षंतुविष्णवे॥ तिस्रोवाचउदीरतेगावोमिमंतिधेनवः॥ हरिरेतिकनिक्रदत्॥ अभिब्रह्मीरनूषतयह्वीरृ
तस्यमातरः॥ मर्मृज्यंतेदिवःशिशुं॥ रायःसमुद्रांश्चतुरोस्मभ्यंसोमविश्वतः॥ आपवस्वसहस्रिणः॥२३॥ प्रसुवाना
धारयातनेंदुर्हिन्वानोअर्षति॥ रुजद्दृळ्हाव्योजसा॥ सुतइंद्रायवायवेवरुणायमरुद्भ्यः॥ सोमोअर्षतिविष्णवे॥ वृ
षाणंवृषभिर्यतंसुन्वंतिसोममद्रिभिः॥ दुहंतिशक्मनापयः॥ भुवस्त्रितस्यमर्ज्योभुवदिंद्रायमत्सरः॥ संरूपैरज्यतेह
रिः॥ अभीमृतस्यविष्टपंदुहतेपृश्निमातरः॥ चारुप्रियतमंहविः॥ समेनमह्रुताइमागिरोअर्षंतिसस्रुतः॥ धेनूर्वाश्रोअवीव
॥२४॥ शत्॥ आनःपवस्वधारयापवमानरयिंपृथुं॥ ययाज्योतिर्विदासिनः॥ इंदोसमुद्रमींखयपवस्वविश्वमेजय॥ रायोधर्ता
नओजसा॥ त्वयावीरेणवीरवोभिष्यामपृतन्यतः॥ क्षराणोअभिवार्यं॥ प्रवाजमिंदुरिष्यतिसिषासन्वाजसाऋषिः॥

सं० प० ८
२७

॥ वृषा शिशान आयुधा ॥ तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि ॥ सोमं जनस्य गोपतिं ॥ विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः ॥ पुनानस्य प्रभूवसो
ः ॥ २५ ॥ असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ॥ कार्ष्मन्वाजी न्यक्रमीत ॥ स वह्निः सोम जागृविः पवस्व देववीरति ॥ अभि कोशं मधुश्चुतं ॥ स
नो ज्योतींषि पूर्व्य पवमान वि रोचय ॥ क्रत्वे दक्षाय नो हिनु ॥ शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः ॥ पवते वारे अव्यये ॥ स विश्वा दाशुषे वसु
सोमो दिव्यानि पार्थिवा ॥ पवतामान्तरिक्ष्या ॥ आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि ॥ वीरयुः शवसस्पते ॥ २६ ॥ स सुतः पीतये वृषा सोमः प
वित्रे अर्षति ॥ विघ्नन्रक्षांसि देवयुः ॥ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ॥ अभि योनिं कनिक्रदत ॥ स वाजी रोचना दिवः पवमानो वि धाव
ति ॥ रक्षोहा वारमव्ययं ॥ स त्रितस्याधि सानवि पवमानो अरोचयत ॥ जामिभिः सूर्यं सह ॥ स वृत्रहा वृषा सुतो वरिवोविददाभ्यः ॥ सोमो वाजमि
वासरत ॥ स देवः कविनेषितो ऽभि द्रोणानि धावति ॥ इन्दुरिन्द्राय मंहना ॥ २७ ॥ एष उ स्य वृषा रथो ऽव्यो वारेभिरर्षति ॥ गच्छन्वाजं सहस्रिणं ॥
एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ॥ इन्दुमिन्द्राय पीतये ॥ एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ॥ याभिर्मदाय शुम्भते ॥ एष स्य मानुषी
ष्वा श्येनो न विक्षु सीदति ॥ गच्छञ्जारो न योषितं ॥ एष स्य मद्यो रसो ऽव चष्टे दिवः शिशुः ॥ य इन्दुर्वारमाविशत ॥ एष स्य पीतये सुतो हरिरर्ष
ति धर्णसिः ॥ क्रन्दन्योनिमभि प्रियं ॥ २८ ॥ आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ॥ यत्र देवा इति ब्रवन ॥ परिष्कृण्वन्ननिष्कृतं जनाय यातय
न्निषः ॥ वृष्टिं दिवः परि स्रव ॥ सुत एति पवित्र आ त्विषिं दधान ओजसा ॥ विचक्षाणो विरोचयन ॥ अयं स यो दिवस्परि रघुयामा पवित्र आ ॥ सि
न्धोरूर्मा व्यक्षरत ॥ आविवासन्परावतो अथो अर्वावतः सुतः ॥ इन्द्राय सिच्यते मधु ॥ समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः ॥ योनावृत
स्य सीदत ॥ २९ ॥ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ॥ शुम्भन्ति विप्रं धीतिभिः ॥ आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः ॥ ध्रु
वे सदसि सीदति ॥ नू नो रयिं महामिन्दो ऽस्मभ्यं सोम विश्वतः ॥ आ पवस्व सहस्रिणं ॥ विश्वा सोम पवमान द्युम्नानीन्दवा भर ॥ विदाः सह
स्रिणीरिषः ॥ स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यं ॥ जरितुर्वर्धया गिरः ॥ पुनान इन्दवा भर सोम द्विबर्हसं रयिं ॥ वृषन्निन्दो न उक्थ्यं
॥ ३० ॥ प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ॥ घ्नन्तः कृष्णामप त्वचं ॥ सुवितस्य मनामहे ऽति सेतुं दुराव्यं ॥ साह्वांसो दस्युमव्रतं ॥
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ॥ चरन्ति विद्युतो दिवि ॥ आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत ॥ अश्वावद्वाजवत्सु
तः ॥ स पवस्व विचर्षण आ मही रोदसी पृण ॥ उषाः सूर्यो न रश्मिभिः ॥ परि णः शर्मयन्त्या धारया सोम विश्वतः ॥ सरा रसेव विष्टपं
॥ ३१ ॥ जनयन्रोचना दिवो जनयन्नप्सु सूर्यं ॥ वसानो गा अपो हरिः ॥ एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ॥ धारया पवते सुतः ॥ वावृ
धानाय तूर्वये पवन्ते वाजसातये ॥ सोमाः सहस्रपाजसः ॥ दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते ॥ क्रन्दन्देवाँ अजीजनत ॥ अ
भि विश्वानि वार्याभि देवाँ ऋतावृधः ॥ सोमः पुनानो अर्षति ॥ गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः ॥ पवस्व बृहतीरिषः ॥ ३२ ॥
यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः ॥ तं गीर्भिर्वासयामसि ॥ तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा ॥ इन्दुमिन्द्राय पीतये ॥

THE ASIATIC SOCIETY OF BOMBAY

307
1915

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः ॥ विप्रस्य मेध्यातिथेः ॥ पवमान विदा रयिमस्मभ्यं सोम सुश्रियं ॥ इन्दो सहस्रवर्चसं
॥ इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ ॥ यदक्षारति देवयुः ॥ पवस्व वाजसातये विप्रस्य गृणतो वृधे ॥ सोम रास्व सुवीर्यं ॥ ३३ ॥ ॥
॥ ० ॥ इति षष्ठाष्टके अष्टमोध्यायः समाप्तः ॥ ० ॥ ० श्रीकृष्ण ॥ ० ॥ श्रीनागेश्वरः प्रसन्नोऽस्तु ॥ ० ॥

इतिपंचमाष्टकः समाप्तः

LIBRARY OF THE BOMBAY BRANCH

309/1915

॥अथषष्ठाष्टकप्रारंभः॥ ५३३५

LIBRARY OF THE BOMBAY BRANCH OF THE

श्री.ष.
१

श्रीगणेशाय नमः॥ यस्य निश्वसितं वेदा यो वेदेभ्यो खिलं जगत् निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं इत्थं पंचमाष्टकं व्याख्या
येदानीं ऋषिछंदोदेवताविनियोगप्रदर्शनपुरःसरं षष्ठस्य प्रथमोध्यायो व्याख्यातुं आरभ्यते अष्टमं मंडलस्य द्वितीयेनुवाके षट्
सूक्तानि आतानीयइंद्रेति त्रयस्त्रिंशदृचं सप्तमं सूक्तं कण्वगोत्रः पवत्ररथ ऋषिः उष्णिक् छंदः इंद्रो देवता तथा चानुक्रांतं यइंद्र
त्रयस्त्रिंशत्पर्वत औष्णिहं त्विति महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ इदमादिके द्वे सूक्ते तथैव पंचमारण्यके सूत्र्यते औष्णि
होतृचाशीतिर्य इंद्र सोमपातम इति द्वे सूक्ते इति दशामेहनि निष्केवल्ये आदितः षड्चः शंसनीयाः सूत्र्यते हि य इंद्र सोमपातम
इति षळुष्णिहः इति अभिप्लविकेषु उक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिन आद्यस्तृचो वैकल्पिकोनुरूपः सूत्रितं च य इंद्र सोमपात
म एंद्र नो गधीति तृतीये पर्याये छावाकेशा स्यं एवमेव तृचो नुरूपः सूत्रितं च इंद्रः क्रतेषु सोमेषु य इंद्र सोमपातम इति त
त्र प्रथमा १ य इंद्रेति हे इंद्र यस्त्वं सोमपातमः अतिशयेन सोमस्य पाता हे शविष्ठ बलवत्तम इंद्र तस्य तव सोमपानजनि
तः यः मदः चेतति ऋत्रवधादिकर्तुं सम्यक् जानाति येन सोमपानजनितेन मदेन अत्रिणं अत्तारं राक्षसादिकं निहंसि निकृ
ष्णां हिंसां प्रापयसि तं मदं तादृकं मदोपेतं त्वां इमहे याचामहे २ येना दशग्वमिति हे इंद्र येन सोमपानजनितेन मदेन दशा
ग्वं येदशाभिर्मासैः सत्रासनं परिसमाप्य निरगमन् ते दशग्वाः अंगिरसः तेषामन्यतमं आध्रिगुं अधृतगमनं अनिवारित
गतिं एतत्संज्ञं ऋषिं वेपयं तं तमां सि वर्जयंतं स्वर्णरं सर्वस्य नेतारं सूर्यं च आविथ रक्षितवानसि दस्यो अपनयनेन रक्षितवानसि येन च म
देन समुद्रं उदधिं आविथ अंतरिक्षं वा ररक्षिथ त्वदीयं तं मदं त्वं तं त्वां ईमहे याचामहे मदे हि सति स्तुतः सन् इंद्रो बहुधनं प्रयच्छ
ति अतस्तत्कारणस्य मदस्य याचोपपन्ना अभीष्टप्राप्त्यै ३ येन सिंधुमिति हे इंद्र महीः महतीः अपः वृष्टयुदकानि सिंधुं नदीं प्र १
ति येन सोमपानजन्येन मदेन प्रचोदयः प्रेरयसि दृष्टांतः रथान् इव यथा रथिनः रथान् स्वाभिलषितदेशगमनाय प्रेरयंति
तद्वत् ऋतस्य यज्ञस्य पथ्यां पाथानं मार्गं पातवे पातुं प्राप्तुं तं मदं ईमहे याचामहे॥ ४ ॥इमं स्तोममिति हे अद्रिवः वज्रवन् इंद्र

311
191

घृतं न घृतमिव मंत्रपूतमाज्यमिव पूतं शुद्धं इमं अस्मदीयं स्तोमं स्तोत्रं बुध्यस्व तिरोषः किमर्थं अभिष्टये इष्टस्य धनादेः
अस्माकं लाभायेत्यर्थः येन स्तोत्रेण स्तूयमानः सं नः ओजसा आत्मीयेन बलेन सद्यः तदानीमेव स्तुतिसमय एव नु क्षिप्रं ववक्षिथ अस्मान् वहसि अभिलषितं प्रापयसि इमं स्तोममित्यन्वयः ५ इमं जुषस्वेति हे गिर्वणः गिरां स्तुतीनां संभक्त इंद्र इमं
सोमं मया क्रियमाणं जुषस्व सेवस्व सख्य स्तोमः समुद्र इव समुद्रो यथा चंद्रोदयं प्राप्य पिन्वते वर्द्धते तद्वत् विस्तृतो भवतीत्य
र्थः हे इंद्र येन स्तोमेन त्वं नु विश्वाभिः व्याप्ताभिः ऊतिभिः रक्षाभिः ववक्षिथ वहसि श्रेयांसि अस्मान् प्रापयसि॥ ॥
॥इति षष्ठस्य प्रथमे प्रथमो वर्गः॥ ॥यो नो देव इति यः नः देवः इंद्रः परावतः दूरात् द्युलोकादागत्य नः अस्माकं सखित्वना
य सखित्वाय मीं अंधनानि प्रददौ हे इंद्र दिवो न वृष्टिं दिवः सकाशात् वृष्टिमिव प्रयच्छन् अस्मदीयानि धनानि विस्तारय
न् यः त्वं ववक्षिथ अस्मान् वोढुमिच्छसि तादृशं त्वां स्तोम। तिरोषः ७ ववक्षुरिति अस्य केतवः प्रज्ञानानि अस्मत्स्तु
ति विषयाणि ववक्षुः अस्मान् श्रेयांसि प्रापयंतु यत् यदा अयमिंद्रः स्तोनि आ दिव्यद्वव रोदसी द्यावापृथिव्योः रश्म्यादिप्रदा
नेन अवर्धयत् तदानीमित्यर्थः ८ यदिंद्र वृद्धे इति हे प्रवृद्ध प्रकर्षेण महान् सन्नपि सतां अनुष्ठातृणां पालयितः इंद्र सहस्रं
सहस्रसंख्याकान् महिषान् महतः अस्कराणि वृत्राहोन् यदियदा अघः अवधीः हेतेः खांदसं रूपं आदित् अनंतरमेव हे इं
द्र ते तव इंद्रियं वीर्यं महित्वं सत्प्रवाशघे प्रकर्षेण वर्धते ९ इंद्रः सूर्यस्येति आयमिंद्रः सूर्यस्यादित्यस्य रश्मिभिः अ
र्शसानं बाधमानं मं देहादिके अस्करन्यापाति नितरां दहति दृष्टांतः अग्निर्वनेव यथा वनानि अरण्यानि दावानलो भस्मसा
त् करोति तद्वत् एवं सासहिः शत्रूणां अभिभवनशीलः इंद्रः प्रवावृधे प्रकर्षेण वर्धते १० इयं तइ ति हे इंद्र ते त्वां इयं क्रिय
माणा धीतिः स्तुतिः एति गच्छति कीदृशी ऋत्वियावती ऋतौ वसंतादिकाले अनुष्ठेयं यज्ञकर्म ऋत्वियं तद्वती नवीयसा अतिश
येन अभिनवा स्तुतिः सपर्यंती पूजयंती पुरुप्रिया बहुलं प्रीणयित्री सती मिमीते पितृ इंद्रगतान् गुणान् परिच्छिनत्त्येव मा

भा.प.
२
ह्यात्मं प्रख्यापयत्येवंसियमित्यन्वयः॥ ॥इतिषष्ठस्य प्रथमे द्वितीयोवर्गः॥ ११॥गंभीरयज्ञस्येति यज्ञस्य यष्टव्यस्येंद्रस्य गर्भः
स्तोतारिंद्र वपुः इंद्रे आत्मनः इच्छत आ अनुषक् अनुषक्तं अनुपूर्वेण संततं यथा भवति तथा ऋतुप्रज्ञाय कं सोमं पुनीते दशाप
वित्रेण शोधयति इंद्रपानार्थमिति शेषः सस्तोता इंद्रस्य इंद्र विषयैः स्तोमैः स्तोत्रैः वावृधे वर्धते स च स्तोमैः मिमीते इत्तु इंद
स्य गुणजातं परिच्छिन्नत्येव ११ सनिर्मित्रस्येति मित्रस्य स्तोतुः सनिः धनस्य दाता इंद्रः सोमस्य पीतये पानाय पप्रथे विस्ती
र्णशरीरो भवत् स्थानः प्राचः प्राचनीय प्रकर्षेण स्तुत्यगुणं प्रापुवतीवा शाव स्तुतिरूपा वाक् स्तुचते सोमाभिषवं कुर्वतः य
जमानस्य संबंधिनी यया स्तुत्या गुणबाहुल्येन विस्तीर्णो भवति तथेंद्रः प प्रथ इत्यर्थः प्रथितेन च साम्नि मिमीते इत्तु इंद्रमहा
त्म्यं यथावत् परिच्छिन्नत्येव १२ यं विप्रा इति विप्राः मेधाविनः उक्थवाहसः शस्त्राणां वोढारः प्रापयितारः आयवः मनुष्याः
यमिंद्रं अभि प्रमंदुः अभि प्रकर्षेण मादयंति तस्येंद्रस्य आसनि आस्ये घृतं न घृतमिव शुद्धं पियं सेचनेन वर्द्धयं किं तद्धविः
ऋतस्य यज्ञस्य संबंधि यत् सोमलक्षणं हविरस्ति तदित्यर्थः १४ उत स्वराजे इति उतापि च अदितिः देवमाता स्वराजे स्व
यमेव राजमानाय इंद्राय पुरुप्रशस्तं बहुल मुत्कृष्टं स्तोमं स्तोत्रं जीजनत किमर्थं ऊतये रक्षणार्थं यत्स्तोत्रं ऋतस्य यज्ञ
स्य संबंधि तमित्यन्वयः १५ अभि वह्नय इति वह्नयः वोढारः ऋत्विजः ऊतये रक्षणार्थं प्रशस्तये अनूषत इंद्रं अभ्यष्टुवन् हे देव
इंद्र न संप्रत्यर्थं संप्रति विव्रता विविधकर्माणो हरी त्वदीयौ अश्वौ ऋतस्य यज्ञस्य संबंधि यत् स्तोत्रं विद्यते तदभिलक्ष्य त्वां
वहतः इति शेषः॥ ॥इतिषष्ठस्य प्रथमे तृतीयोवर्गः॥ ॥१६॥यत्सोममिति हे इंद्र विष्णवि विष्णोर्भानार्थमागते
सति अन्यदीय यागे सोमं यत् यदि तेन विष्णुना सार्धं पिबसि पतवा यदि च आप्त्ये अपांपुत्रे त्रिते एतत्संज्ञे राजर्षौ य
जमाने सोमं पिबसि घेति पूरणः यत वा यदि च मरुत्सु च सोमपानाया गतेषु अन्यदीय यज्ञे मंदसे माद्यसि तथापि अस्म
दीयैः इंदुभिः सोमैः सम्यक् माद्य १७ यद्वा शक्रेति हे शक्र इंद्र परावति दूरदेशे समुद्रे समुंदनशीले सोमे अधि सप्तम्य

र्थानुवादी यत् वा यदि वा मंदसे माद्यसि तथापि अस्माकमेव अस्माकमेव सोमैः अभिषुत्तैः सति इंदुभिः सोमरसैः संरण सम्यक् र
मस्व १८ यद्वासीति हे सत्पते सतां पालयितः इंद्र सुन्वतः सोमाभिषवं कुर्वतः यजमानस्य यत् वा यदि वा वृधासि वर्धयिता भवसि
यस्य च यजमानस्य उक्थे शस्त्रे वा शस्तितः तिरष्यसि रमसे एवमपि इंदुभिः अस्मदीयैः एवं सोमैः सम्यक् रमस्व १९ देवंदेवमिति
हे ऋत्विग्यजमानाः वः युष्माकं अवसे रक्षणाय देवंदेवं इंद्रमिंद्रं दानादिगुणयुक्तं इंद्रं बहुषु देशेषु युगपत् प्रवर्त्तेषु मार्गेषु तत्र
तत्र हविः स्वीकरणाय बहूनि शरीराणि आददानः स्वयमेकोप्यनेकः सन् तत्र तत्र संनिधत्ते सर्वत्रमिंद्रं गृणीषणि अहं सोमैः अथा
नंतरं सर्वे इंद्रं मदायाः स्तुतयः व्यानशुः व्याप्नुवंति किमर्थं तुर्वणि तूर्णं संभजनाय यज्ञायागार्थं २० यज्ञेभिरिति यज्ञेभिः यज्ञैः
यजमानसाधनैः हविर्भिः यज्ञवाहसं यज्ञे वोढव्यं फलस्य प्रापयितारं एवं सोमेभिः सोमपानतमं सर्वेषां सोमानां पातृतमं इंद्रं वृ
धाभिः स्तुतिभिः वावृधुः स्तोतारो वर्धयंति ताश्च क्रियमाणाः स्तुतयः व्यानशुः तमिंद्रं व्याप्नुवंति॥ ॥इतिषष्ठस्य प्रथमे चतुर्थोव
र्गः॥२१॥महीरस्येति अस्येंद्रस्य प्रणीतयः धनानां प्रकृष्ट प्रापणानि महीः महत्यः महंति भवंति उतापि च अस्य प्रशस्तयः कीर्तयः
पूर्वीः बह्व्यः विस्तृता भवंतितः उ भयविद्याः दाशुषे हविर्दत्तवते यजमानाय दातुं विश्वानि सर्वाणि वसूनि धनानि व्यानशुः व्या
प्नुवंति २२ इंद्रं वृत्रायेति देवासः देवाः वृत्राय हंतवे हंतुं इमं इंद्रं पुरः दधिरे पुरस्तात् स्वामित्वेन धारयेरन् वाणीः वाण्यः स्तु
तिरूपाः वाचश्च इमम इंद्रं अनूषत स्तुवंति किमर्थं ओजसे सम्यक् बलार्थं यया वृधानुगुण मुत्कृष्टं बलं अस्य जायते तथा स्तु
वंतीत्यर्थः २३ महांतमिति महिना महिम्ना महांतं सर्वेभ्योधिकं हवनश्रुतं आह्वानस्य श्रोतारमिंद्रं वयं स्तोमेभिः स्तोमैः त्रिवृ
त्पंचदशादिभिः अर्कैः अर्चनसाधनैः शस्त्रैश्च अभिप्रणोनुमः आभिमुख्येन प्रकर्षेण पुनःपुनः स्तुमः २४ नयं विविक्त इति
यं वज्रिणं वज्रवंतं इंद्रं रोदसी द्यावापृथिव्यौ न विविक्तः न पृथक् कुरुतः स्वसमीपात् अंतरिक्षाणि गंधर्वादीनि स्थानानि च यं न
पृथक् कुर्वंति अस्येंद्रस्य अमात् इत् अमतिरुजतिः अमन इति अमो बलं बलात् एव तित्विषे किमर्थं ओजसे इति अनेन संबध्यते

२५ यदिंद्रेति हेइंद्र पृतनाज्ये संग्रामे त्वा त्वां यत्र यदा देवाः पुरो दधिरे वृत्रहननाय पुरतो धारयन् आदित् अनंतरमेव हर्यता कां
तो हरी अश्वौ ते तां त्वां वक्षतुः अवहतां॥ ॥इति षष्ठस्य प्रथमे पंचमो वर्गः॥ ॥यदा वृत्रमिति हे वज्रिन् इंद्र नदीवृतं नद्यः आपः
ताः आवृण्वंतं वृत्रं असुरं यदा यस्मिन्काले शवसा बलेन अवधीः अहिंसीः आदित् ०२७ यदा ते विष्णुरिति हे इंद्र ते तव अनुजः वि
ष्णुः देवः ओजसा बलेन यदा यस्मिन् काले त्रीणि पदानि पदत्रय रूपेण त्रीन् लोकान् विचक्रमे विक्रांतवान् आदित् २८ यदा ते ति हे
इंद्र ते त्वदीयौ हर्यता हर्यतौ कांतौ हरी अश्वौ दिवे दिवे प्रतिदिवसं यदा यस्मिन्काले वावृधाते प्रवृद्धौ बभूवतुः आदित् अनंतरमेव त्वया
विश्वानि सर्वाणि भुवनानि भूतजातानि येमिरे नियम्यंते स्म २९ यदा त इति हे इंद्र ते तुभ्यं त्वदर्थं मारुतीः मरुद्रूपाः त्वदीयाः वि
शः प्रजाः यदा यस्मिन्काले येमिरे नियच्छंति भूतजातानि आदित् ३० यदा सूर्यमिति हे इंद्र अमुं विप्रकृष्टं शुक्रं निर्मलं ज्योतिः
र्दीप्यमानं सूर्यं आदित्यं दिवि द्युलोके जगतः प्रकाशनाय यदा यस्मिन्काले अधारयः धारितवानसि आदित् ३१ इमां त इति हे इं
द्र विप्रः मेधावी स्तोता अध्वरे यज्ञे इमां पुरोवर्तिनीं धियं तां पूरयंतीं सुष्टुतिं शोभनां स्तुतिं धीतिभिः कर्मभिः परिचरणैः सार्द्धं
तेन वां प्रेरयति जामिं पदेव यथा बंधुभूतं पुरुषं उत्कृष्टानि पदानि स्थानानि प्रापयति तद्वत् ३२ यदस्येति अध्वरे यज्ञे अस्येंद्रस्य
धामानि स्थाने प्रिये प्रिणापितव्ये सति समीचीनाः सः संगताः स्तोतारः यत् यदा प्रास्वरन् प्रकर्षेण स्तुवन् कस्मिन्देशे नाभौ
पृथिव्याः नाभिस्थानीये मध्ये यज्ञस्य यजमानसाधनस्य सोमस्य दोहने अभिषवस्थाने तदानीं धनं प्रदेहीति उत्तरत्र सं
बंधः ३३ सुवीर्यमिति सुवीर्यं शोभनवीर्योपेतं स्व शोभनाश्वसंघेन च सुगव्यं शोभनगोसंघयुक्तं च धनं हे इंद्र नः अस्मभ्यं दे
हि ददस्व अहं च अध्वरे यागे हि तेन च यथा मानुषो होता स्तिकं स्तौति एवमेव पूर्वचित्तये सर्वप्रज्ञानाय अन्येभ्यः स्तोतृभ्यः पूर्वमेव
अस्मत् स्तोत्रपरिज्ञानाय प्रशंसिषमिति शेषः॥ ॥इति षष्ठस्य प्रथमे षष्ठो वर्गः॥ ॥इति अष्टमे मंडले द्वितीयोनुवाकः॥ ॥
तृतीयेनुवाके षट्सूक्तानि तत्रेंद्रः सुत इति त्रयस्त्रिंशदृचं प्रथमं सूक्तं काण्वः नारदऋषिः उष्णिक्छंदः इंद्रो देवता १ इंद्रः सुते

ष्विति सोमेषु सुतेषु अभिषुतेषु सत्सु इंद्रः तान्पीत्वा क्रतुं कर्मणां कर्तारं उक्थ्यं स्तोतारं च पुनाति शोधयति किमर्थं वृधस्य वर्धक
स्य दक्षसः बलस्य विदे लाभाय स तादृशः इंद्रः महान् हि महान् खलु अतः एवं कर्तुं शक्नोतीति भावः २ स प्रथम इति सः इंद्रः
प्रथमे प्रथिते विस्तीर्णे व्योमनि विशेषेण रक्षके देवानां सदने स्थाने स्वर्गाख्ये तत्र स्थितः सन् वृधः यजमानानां वर्धयिता अभ
वत् तथा सुपारः सुष्ठु पारयिता प्रारब्धस्य सम्यक् परिसमापयिता सु श्रवस्तमः अतिशयेन शोभनान्नवान् सः सम्यक् अ
प्सु जित् अंतरिक्षे वर्तमानानां असुराणां जेता तमह्वे इति उत्तरत्र संबंधः ३ तमह्व इति तं पूर्वोक्तगुणं शुष्मिणं बलवंत
मिंद्रं वाजसातये अन्नानां लाभाय भराय संग्रामाय च अह्वे आह्वये इंद्र त्वं सुम्ने सुखे लिप्सति सति नः अस्माकं अतमः अं
तिकतमः सन्निकृष्टतमो भव तथा वृधे वर्धनार्थं सखा भव ४ इयं त इति हे गिर्वणः स्तुतिभिः वननीयेंद्र त्वदर्थं इयं पुरोवर्ति
नी सुन्वतः सोमाभिषवं कुर्वतः यजमानस्य संबंधिनी रातिः ऋत्विग्भिः दीयमाना सोमाहुतिः क्षरति आहवनीयं प्रति गच्छति
त्वं त्वया मदानः मादमानः अस्य बर्हिषः वेद्यां स्तीर्णे बर्हिषि विराजसि विशेषेण शोभसे ५ नूनं तदिति हे इंद्र नूनं अवश्यं तत् धनं नः
अस्मभ्यं दधि दद स्व यत् धनं त्वां सुसंतः सोमाभिपुष्णंतो वयं ईमहे याचामहे अपि च चित्रं चायनीयं स्वर्विदं सर्वस्य अर्भकं
आस्तिकं रयिं पुत्रं नः अस्मभ्यं आ भर आहर॥ ॥इति षष्ठस्य प्रथमे सप्तमो वर्गः॥ ॥६॥ स्तोता यदिति हे इंद्र विचर्षणिः वि
शेषेण द्रष्टा स्तोता ते त्वदर्थं गिरः स्तुतीः यत् यदा अति प्रशर्धयत् अतिशयेन प्रशर्धयित्रीः अकरोत् शत्रूणां प्रसहने समर्थाः
यत् यदा च ताः गिरः जुषंत त्वां असेवंत तदा वयाः इव शाखा इव यथा एकस्मिन् वृक्षे बद्धाः शाखाः उपरि प्ररोहंति तथा जुरोहं
ते सुत्या सर्वगुणाः त्वयि प्ररोहंति ७ प्रत्नवदिति हे इंद्र प्रत्नवत् पुरा यथा स्तोतॄन् अपेक्षितफलप्रदानेन स्तुतीः जनयसि एवमि
दानीमपि गिरः स्तुतीः जनय उत सादय अरितुः स्तोतुः हवं आह्वानं शृणु नादवाः स्वं मदे मदे सोमेन तर्पणे तर्पणे सति सुकृत्वने शो
भनकर्त्रे यजमानाय वक्षिथः अपेक्षितं फलं वहसि ददासीत्यर्थः ८ क्रीळंत्वस्येति अस्येंद्रस्य सूनृताः प्रियसत्यात्मिकाः वा

चः क्री ळंति विहरंति दृष्टांतः प्रवता प्रवणेन मार्गेण यतीः गच्छंत्यः आपोन आप इव यथा निम्नोन्नतेन यथा गच्छंत्यः तद्वत् दिवः स्व
र्गस्य पतिः पालयिता यः इंद्रः अपा अन याधिया स्तुत्या उच्यते प्रतिपाद्यते अस्येत्यन्वय ९ उतो यतीति उतो अपि च वशी वश
यिता एक इत् एक एव कृष्टीनां मनुष्याणां पतिः पालयितेति यः इंद्रः उच्यते के नमोवृधेः नमसा स्तोत्रेण वर्धयितृभिः अवस्युभिः
रक्षणेच्छुभिः सह पूर्वैः स्तुते अभिषुते सामिवणे गमस्व १० स्तुहि श्रुत मिति हे स्तोतः विपश्चितं विशिष्ट ज्ञानं श्रुतं प्रख्यातं इंद्रं
स्तुहि यस्येंद्रस्य हरी अश्वौ प्रसक्षिणा शत्रूणां प्रसहनशीलौ न मस्विनः हविष्मतः दाशुषः दत्तवतः यजमानस्य गृहं गंतारौ
गमनशीलौ च भिंद्रं स्तुहीति संबंधः॥ ॥इति षष्ठस्य प्रथमे ऽष्टमो वर्गः॥११॥ तूतुजान इति हे मंहिष्ठ मति महते फलाय मति
र्बुद्धिर्यस्यासौ मंहिष्ठमतिः तादृशेंद्र त्वं तु जानः त्वरमाणः सन् प्रुषितप्सुभिः स्निग्धरूपैः आशुभिः शीघ्रगामिभिः अश्वेभिः अश्वैः
यज्ञं अस्मदीयं आयाहि आगच्छ हि यस्मात् तेन यज्ञ तस्मिन् यज्ञे शमितत्स्वं विषत एव अतः आगच्छेत्यर्थः १२ इंद्र शविष्ठेति हे
शविष्ठ बलवत्तम सत्पते सतां पालयितः इंद्र गृणते स्तुवते अस्मा करयिं धनं धारय अवस्थापय अपि च सूरिभ्यः स्तोतृभ्यः अमृतं अ
नश्वरं च सुत्वनं आ क्षितिमन्नं अन्नं देहीति शेषः १३ हवे त्वेति हे इंद्र सूरे सूर्यउदिते उदयं प्राप्ते सति प्रातः सवने त्वां हवे
आह्वयेन था दिवः दिवसस्य मध्यंदिने मध्यभागे माध्यंदिने सवने त्वां हुवे हे इंद्र स त्वं जुषाणः प्रीयमाणः सन् सप्तिभिः सं
र्पणशीलैः अश्वैः नः अस्मान् आगहि आगच्छ १४ आ तू गहीति हे इंद्र तु क्षिप्रं आगहि आगच्छ आगत्य तु क्षिप्रं प्रद्रव सोमा
य त्र निषसति तं देशं प्रति शीघ्रं गच्छ गत्वा च गोमतः गोविकारैः पयः प्रभृतिभिः श्रयणद्रव्यैः युक्तस्य सुतस्याभिषुतस्य सोम
पानेन मत्स्व हृष्टो भव तत्पूर्वं तदनंतरं यथा विद उपलभेत यथा पूर्व्यं पूर्वैः कृतं तं तुं विस्तृतं यज्ञं तनुष्व समर्कं निष्पादय १५ यच्छक्रा
सीति हे शक्र इंद्र परावति दूरदेशे यत् यदि असि भवसि हे वृत्रहन् यत् यदि वा अर्वावति समीपे वर्तसे यत्र वा यदि वा समुद्रे अ
र्लक्ष्ये वर्तसे तत् तस्मात् सर्वस्मात् स्थानात् आगत्य अंधसः अन्नस्य सोमलक्षणस्य पानेन अविता इत् असि रक्षितैव भवसि॥ ४

॥इति षष्ठस्य प्रथमे नवमो वर्गः॥१६॥ इंद्रं वर्धंत्विति नः अस्माकं गिरः स्तुतिरूपा वाचः इंद्रं वर्धयंतु सुतासः अभिषुताः इंदवः
सोमाः अस्मदीयाः तमिंद्रं वर्धयंतु हविष्मतीः हविर्भिः युक्ताः विशः प्रजाः तस्मिन्निंद्रे अराणिषुः अरंसिषुः १७ तमिद्विप्रा इति
विप्राः मेधाविनः अवस्यवः रक्षणकामाः स्तोतारः तमित् तमेवेंद्रं प्रवत्वतीभिः प्रकर्षेणाभिगंत्रीभिः ऊतिभिः तर्पिकाभिः आ
हुतीभिः वर्धयंति तथा क्षोणीः क्षोण्यः क्षोणी पृथिवी तदुपलक्षिताः सर्वलोकाः वयाइव वृक्षस्य शाखाइव तदधीनाः संतः अ
वर्धयन्त वर्धयंति १८ त्रिकद्रुकेष्विति त्रिकद्रुकेषु त्रिकद्रुका नाम ज्योतिः गौ रायुः इति त्रीणि अभिप्लविकानि अहानि तेषु देवा
सः देवाः चेतनं चेतयितारमिंद्रं यज्ञं यष्टव्यं अत्नत अतन्वत तमेवेंद्रं नः अस्माकं गिरः स्तुतयश्च वर्धयंतु कीदृशं सदावृधं सर्व
दा स्तोतॄणां वर्धयितारं १९ स्तोता यदिति हे इंद्र यत् यस्य ते तव स्तोता अनुव्रतः अनुकूलकर्मा सन् ऋतुथा ऋतुषु कालेका
ले उक्था निशस्त्रादि दधे विधत्ते करोति परीक्षः स इंद्रः अद्भुतः आश्चर्यभूतः शुचिः शुद्धः पावकः अन्येषामपि शोधकः उच्य
ते स्तोतृभिः स्तूयते २० तदिद्रुद्रस्येति तदित् तदेव रुद्रस्य वस्य यद्धं अपत्यं मरुत्संज्ञकं तदेव बलं प्रयतेषु चिरंतनेषु धाम
सु पृथिव्यादि स्थानेषु च तति जायते यत्र यस्मिन् बलविषये विचेतसः विशिष्ट ज्ञानाः स्तोतारः तस्य सिद्धं मनः मनसा
धनं स्तोत्रं विदधुः कुर्वंति तदित्यन्वयः॥ ॥इति षष्ठस्य प्रथमे दशमो वर्गः॥२१॥ यदि म इति हे इंद्र मे मम सख्यं यदि आवरः
आभिमुख्येन वृणुयाः तर्हि इमस्य अस्य पुरोवर्तिनः अंधसः अन्नस्य सोमलक्षणस्य स्वांशं पाहि पिब येन त्वसीतेन सोमेन हे
तुना वयं विश्वाः सर्वाः द्विषः शत्रुसेनाः अतारिम अतितरेम २२ कदा त इति हे गिर्वणः स्तुतीनां संभक्तः इंद्र ते तव स्तोता श्रंत
मः अतिशयेन सुखवान् कदा कस्मिन् काले भवाति भवेत् कदा कस्मिंश्चित् काले नः अस्मान् गव्ये गोसमूहे अश्व्ये अश्वसंघे च
सा निवासभूते अन्यस्मिन्नपि धने दधे धारय २३ उत त इति उतापि च हे इंद्र स्तुषु ता शोभनस्तुतो वृषणा कामानां वर्षि
तारौ हरी अश्वौ अजुर्यस्य जरारहितस्य ते तव रथं इदानीं वहतः अस्मिन्निकटं प्रापयतः मदिन्तमं अतिशयेन मद्वंतं यं त्वां
धनं ईमहे याचामहे तस्य त इत्यन्वयः २४ तमामहे इति यं इमहे तं पुरुष्टुतं बहुभिः स्तुतं तं तमिंद्रं प्रत्नाभिः पुराणीभिः ऊति

भा॰ष॰
५

भिः नक्षिकरीभिः सोमाहुतिभिः हेतुभिः ईमहे याचामहे सर्वेंद्रः प्रिये प्रीतिकरे बर्हिषि आस्तीर्णे दर्भे नि सदत् हविः स्वीकर
णाय उपविशतु अथ अनंतरं हिता हे भवंतमा नानि च पुरोडाशादीनि सोमलक्षणानि च हवींषि स्वीकरोतु इति शेषः २५
वर्धस्वा सु इति हे पुरुष्टुत बहुभिः स्तुत इंद्र ऋषिभिः स्तुताभिः ऋषिभिः मंत्रदर्शिभिः पुरा स्तुताभिः उतीतिभिः रक्षाभिः स्तुस्तुव
र्धस्व अस्मान् वर्धय पुनः अस्मभ्यं चापि पुष्टी प्रवृद्धां इषं अन्नं अथ धुक्ष स्व अस्मदभिमुखं क्षारयेदित्यर्थः॥ ॥इति षष्ठस्य
प्रथमे एकादशो वर्गः॥ २६॥ इंद्र त्वमिति हे आद्रिवः वज्रवन् इंद्र त्वं इत्था अनेन प्रकारेण स्तुवतः स्तोत्रं कुर्वतः यजमानस्य अ
विता इत् अवसि रक्षितैव भवसि यतः एवं अतः कारणात् अहमपि ऋतात् यज्ञात् इत् माः मनोयुजं मननीयेन स्तोत्रेण प्राप्यं त्वदीयां
धियं अनुयच्छामि हे इंद्र यामि प्राप्नोमि २७ इह त्वेति हे इंद्र अस्मिन् यागे स्वेन पीतये सोमपानाय अभिस्वर अभिगच्छ किं कुर्वन् त्वा
त्वोतोपसिद्धे सधमाद्या मयासह हविर्भिः मादयितव्यौ प्रतद्यसविस्तीर्णघनौ इदृशौ हरी त्वदीयौ अश्वौ युजानः रथेन संयो
जयन् २८ अभिस्वरं तु इति अभिस्वरंतु अभिगच्छंतु ते हि इंद्र तवानुचराः रुद्रासः रुद्रपुत्राः ये मरुतः संति अपि च ते प्रियं प्र
यणायं इमं यज्ञं सक्षत प्राप्नुवंति उ तोऽपि च मरुत्वतीः मरुद्भिर्युक्ताः विशः अन्याः अपि हवीः प्रजाः प्रयः अस्मदीयं हविर्लक्षणं
अन्नं अभिगच्छंतु २९ इमा अस्येति अस्य संबंधिन्यः इमाः मरुदादिरूपाः प्रजाः प्रतर्नयः प्रकर्षेण शत्रूणां हिंसित्र्यः पदं स्था
नं जुषंत असेवत दिवि स्वर्लोके यत् स्थानं अन्यैः दुःप्रापमस्ति तत् सदमित्यर्थः अपि च ताः यज्ञस्य ज्योतिष्टोमादेः नाभाना
भौ नाभिस्थानगायेह्यविभिः संदधुः संनिदधते यथा येन प्रकारेण विदे विंदेत् अपेक्षितं धनं लभेत तेत्यर्थः ३० अयं दीर्घायेति
दीर्घाय प्राचीनं प्रागायनाय यज्ञगृहे अध्वरे यज्ञे प्रयति गच्छति प्रवर्तमाने सति अयमिंद्रः प्रवर्तमानं तं यज्ञं आनुषक् आनुपूर्व्येण वि ५
चक्षा विशेषेण द्रष्टा भिनीते नियाहरति किमर्थं दीदये आपनावस्य रूपे सेवदर्शनाय॥ ॥इति षष्ठस्य प्रथमे द्वादशो वर्गः॥
॥वृषायमिति हे इंद्र ते सुदीपः अयं रथः वृषा कामानां वर्षिता उतोऽपि च ते तव हरी अश्वौ वृषणा वर्षितारौ हे शतक्रतो बहुकर्मन् इंद्र त्वं
च वृषा वर्षिता कामानां तत् आहवः तदाह्वयं मा हवं च वृषा वर्षिता ३१ वृषा ग्रावेति ग्रावा अभिषवसाधनपाषाणः वृषा वर्षिता का

317
195

मानां हे इंद्र त्वदियः सोमपानजन्यो मदश्च वृषा वर्षिता स्तुता अभिषुतः सोमश्च वृषा वर्षिता यं यज्ञं मिन्वसि त्वं प्राप्नोति स च यज्ञः
वृषा अभीष्टस्य फलस्य वर्षिता त्वदीयो हवश्च वृषा ३२ वृषा त्वेति हे वज्रिन् वज्रवन् इंद्र वृषणं वर्षितारं त्वा त्वां वृषा हविषां आ
हर्ता अहं चित्राभिः नानाविधाभिः ऊतिभिः स्तुतिभिः हुवे आह्वये हि यस्मात् त्वं प्रति स्तोमं अभिलक्ष्य कृतं स्तोत्रं वावंथ वननसि संभज
सि अतः त्वदीयः हवः आह्वानं वृषा वर्षिता तस्मात् त्वां हुवे इत्यर्थः॥ ॥इति षष्ठस्य प्रथमे त्रयोदशो वर्गः॥ ॥यदिंद्राहमिति
पंचदशर्चं द्वितीयं सूक्तं गोषूक्त्यश्वसूक्तिनौ काण्वगोत्रौ ऋषी पत्री छंदः इंद्रो देवता १ यदिंद्रेति हे इंद्र यथा त्वं एक इत् एक ए
व वस्वः वसुनः धनस्य ईशीय एवमपि यत् यदि ईशीय ऐश्वर्ययुक्तः अहं स्यां तदानीं मम स्तोता गोसखा स्यात् गोभिः सहि
तो भवेत् २ शिक्षेयमिति हे शचीपते शाकिन् इंद्र अस्मै मनीषिणे मनसः ईशित्रे स्तोत्रे दित्सेयं दातुमिच्छेयं तदनंतरं शिक्षे
यं प्राप्यितं धनं दद्यां च यत् यदि अहं गोपतिः गवां अधिपतिः स्यां भवेयं त्वत्प्रसादादिति शेषः ३ धेनुष्टइति हे इंद्र ते तव सूनृ
ता स्तुतिरूपा वाक् धेनुः दोग्ध्री गौः भूत्वा सुन्वते सोमाभिषवं कुर्वते यजमानाय गामश्वं च गवाश्वादिकं सर्वमभिलषितं दुहे दुग्ध
किं कुर्वती पिप्युषी तमेव प्रवर्धयित्री ४ नते वर्तेति हे इंद्र ते तव राधसः धनस्य स्तोतृभ्यः दानव्यस्य वर्ता निवारकः देवो नास्ति
न विद्यते न मर्त्यः मनुष्योऽपि निवारको नास्ति स्तुतः स्तोतृभिः प्रख्यापितगुणः सन् यत् मस्यं मरुनी यं धनं दित्ससि त्वं दातुमि
च्छसि ५ यज्ञ इंद्रमिति यज्ञः त्यागः इंद्रं देवं अवर्धयत् स इंद्रः यत् यस्मात् भूमिं पृथिवीं व्यवर्तयत् रक्ष्यादिप्रदानेन विरा
मेण वर्तमानमकरोत् किं कुर्वन् दिवि अंतरिक्षे मेघं ओपशं उपत्य शयानं चकाणः कुर्वन्॥ ॥इति षष्ठस्य प्रथमे चतुर्दशो व
र्गः ६ वावृधानस्येति हे इंद्र वावृधानस्य वर्धमानस्य विश्वा सर्वाणि धनानि शत्रुसंबंधीनि जिग्युषः जितवतः तव ऊतिं र
क्षां वयं आवृणीमहे आभिमुख्येन संभजामहे ७ अंतरिक्षमिति सोमस्य पानेन मदे हर्षे सति रोचमाना रोचमानं अंतरिक्षं
यमिंद्रो व्यतिरत् व्यवर्धयत् यस्मात् कारणात् बलं असुरं अभिनत् व्यदारयत् उदगा आजदिति अंगिरोभ्यः ऋषिभ्यः च

त्वानुचरैः पणिभिरपहृताः गाः उदाजः उदगमयः किं कुर्वन् गुहा गुहायां बिले सतीः विद्यमानाः यथान्यदृश्यंते तथा पणिभि
गूढाः ताः गाः अविंदन् प्रकाशाय लब्धवान् अपिच पणीनां अधिपतिं बलमसुरमपि अधोमुखं नुनुदिषे प्रेरितवान् ९ इंद्रेणरोचनेति
दिवः द्युलोकस्य संबंधीनि रोचना रोचमानानि दिव ग्रहात्मकानि नक्षत्राणि इंद्रेण दृळ्हानि दृढावयवानि दृंहितानि वर्धितानि
अपिच स्थिराणि न पराणुदे पराणोदनाय तानि न भवंति न केनापि स्थानात् प्रच्याव यितुं शक्यानीत्यर्थः १० अपामूर्मिरिति अपां
समुद्राणां ऊर्मिः तरंगः मदन्निव पथा माद्यन्नुपरि उपरिजायते हे इंद्र स्तोमः त्वदीयं स्तोत्रं तथा अजिरायते अजिरः क्षिप्रगामी
सदृवाचरति अपि च ते त्वदीयाः मदाः स्तोत्रजन्याः सोमपानजन्या वा अराजिषुः विशेषेण राजंते॥ ११ ॥इतिषष्ठस्य प्रथमे
पंचदशो वर्गः॥ ॥त्वं हि स्तोमवर्धन इति हे इंद्र त्वं हि त्वं खलु स्तोमवर्धनः स्तोमैः त्रिवृत्पंचदशादिना वर्धनीयो ऽसि तथा
उक्थवर्धनः उक्थैः शस्त्रैः वर्धनीयश्च त्वमेवासि उत अपि च स्तोतॄणां अस्माकं भद्रकृत् भद्रस्य कल्याणस्य फलस्य कर्तापि त्व
मेवासि १२ इंद्रमिदिति केशिना केशिनौ मूर्धजानि लोमानि केशाः तद्वंतौ हरी अश्वौ सुराधसं शोभनधनं इंद्रमित् इंद्रमेव य
ज्ञं उप अस्मद्यज्ञं प्रति सोमपेयाय सोमपानार्थं वक्षतः वहतां १३ अपां फेनेनेति पुरा किलेंद्रः असुरान् जित्वा नमुचिमसुरं
ग्रहीतुं न शशाक स च युध्यमानः तेनासुरेण अगृह्यत स च गृहीतमिंद्रमेवमवोचत् त्वां विसृजामि सत्रावहनिच १४ माया
भिरिति हे इंद्र मायाभिः उत्सिसृप्सतः सर्वत्र प्रसरतः द्यां आरुरुक्षतः द्युलोकं आरोहतः दस्यून् शुष्केणार्द्रेण वा युधेन यदिमां
माहिंसीः इति सः इंद्रः तेन विसृष्टः सन् अहोरात्रयोः संधौ शुष्कार्द्रविलक्षणेन फेनेन तस्य शिरः चिच्छेद अयमर्थो ऽस्यां प्रति
र पाद्यते हे इंद्र अपां फेनेन नमुचेरसुरस्य शिरः उदवर्तयः शरीरात् पृथग्भवमवर्तयः अ— त्सीरित्यर्थः कदा यत् य
दा विश्वाः सर्वाः स्पृधः स्पर्धमानाः आसुरीः सेनाः अजयः जितवानसि असुरान् अबाधथाः अबाधथा अवाधुखं प्रेरितवानसि १५
असुन्वामिति हे इंद्र त्वं सोमपाः सोमस्य पाता महान् उ नरः उरुव्यचाः भवत् असुन्वां सोमाभिषवरहितां संसदं जनसंहतीं वि

षूचीः परस्परविघटनेन नाशय त्वं नाशयः विशेषेण नाशयसि॥ ॥इतिषष्ठस्य प्रथमे षोडशो वर्गः॥ ॥तम्वभीति त्रयोदशर्चं
सूक्तं यंस्तुवंगोषूक्त्यश्वसूक्तिनौ काण्वगोत्रौ ऋषी उष्णिक् छंदः इंद्रो देवता १ तम्वभीति पुरुहूतं बहुभिराहूतं पुरुष्टुतं बहुभिः
स्तुतं तम् सु तमेव इंद्रं हे स्तोतारः अभिप्रगायत अभिमुख्येन प्रकर्षेण स्तुध्वं तविषं महांतमिंद्रं गीर्भिः वाग्भिः आविवासत परिच
रत २ यस्य द्विबर्हस इति द्विबर्हसः द्वयोः स्वर्गमर्त्यस्थानयोः परिवृढस्य यस्येंद्रस्य बृहत् महत् सहो बलं रोदसी द्यावापृथि
व्यौ दाधार धारयति तथा आशून् क्षिप्रगमनान् गिरीन् पर्वतान् सरणशीलाः अपः उदकानि च वृषत्वना वीर्येण यस्येंद्रस्य
बलं धारयति तत्र तत्रावस्थापयति तम्वभीति पूर्वया संबंधः सत्वमित्युत्तरया च ३ स राजसीति हे पुरुष्टुत बहुभिः स्तुतेंद्र
स पूर्वोक्तगुणस्त्वं राजसि दीप्यसे अपि च त्वमेकः असहायः सन् वृत्राणि शत्रून् जिघ्नसे हतवानसि किमर्थं जेत्राजेतव्यानि
धनानि श्रवस्या श्रवणीयानि अन्नानि च यतवे नियंतुं स्वाधीनं कर्तुं ४ तं ते मदमिति हे अद्रिवः वज्रवन् इंद्र ते त्वदीयं तं मदं
सोमपानजनितं हर्षं गृणीमसि गृणीमः प्रशंसामः कीदृशं वृषणं वर्षितारं कामानां पृत्सु संग्रामेषु सासहिं शत्रूणामभिभ
वितारं लोककृत्नुं लोकस्य स्थानस्य कर्तारं हे हरिश्रियं हरिभ्यां श्रयणीयं उपूरणः ५ येन ज्योतींषीति हे इंद्र येन आसीयेन
मदेन आयवे ओर्वशोपाय मानवे विवस्वतः पुत्राय च ज्योतींषि सूर्यादीनि वृत्रादिभिरावृतानि तद्वधेन विवेदिथ अलंभयः
प्रकाशितवानित्यर्थः तेन मंदेन मंदानः मोदमानस्त्वं अस्य बर्हिषः वृद्धस्य यज्ञस्य विराजसि विशेषेण दीप्यसे॥ ॥इति
षष्ठस्य प्रथमे सप्तदशो वर्गः॥ ६ ॥ तदद्येति हे इंद्र ते त्वदीयं तत् प्रसिद्धं बलं अद्यापि इदानीमपि पूर्वथा पूर्वस्मिन् कालइव
उक्थिनः शस्त्रिणः स्तोतारः अनुष्टुवंति क्रमेण प्रशंसंति सत्वं वृषपत्नीः वृषा पर्जन्यः पतिर्यासां तादृशीः अपः दिवेदिवे प्रतिदिवसं
जयस्वायत्तं कुरु ७ तव त्यदिति हे इंद्र त्यत् तत् प्रसिद्धं इंद्रियं इंद्रस्य लिंगं बृहत् प्रभूतं वीर्यं धिषणा स्तुतिः शिशाति तीक्ष्णीक
रोति तथा तव त्वदीयं शुष्मं शोषकं बलं उत अपि च क्रतुं प्रज्ञानं वरेण्यं वरणीयं वज्रमायुधं च स्तुतिः शिशाति तीक्ष्णीकरोति ८ तव द्यौरि

भा.प.
७

तिहेइंद्र तवत्वदीयं पौंस्यं बलं द्यौः वर्धति त्वदीयं श्रवः यशः पृथिवी वर्धयति त्वां आपः उदकानि अंतरिक्षाणि पर्वतासः गिर
यश्च हिन्विरे प्रीणयंति ९ त्वां विष्णुरिति हे इंद्र बृहन् महान् क्षयः निवासहेतुः विष्णुः मित्रावरुणश्च त्वां गृणाति स्तौति तथा
मारुतं मरुत्संबंधि शर्धः बलं त्वां अनुमदति त्वां मादयति १० त्वं वृषेति हे इंद्र वृषा वर्षिता त्वं जनानां देवजनानां मध्ये मं
हिष्ठः दातृतमः अभवः प्रादुर्भवसि अत एव विश्वा सर्वाणि स्वपत्यानि शोभनपुत्रादिभिः सहितानि सत्रा सह दधिषे धार
यसि॥ ॥इति षष्ठस्य प्रथमे अष्टादशो वर्गः॥ ११॥ सत्रा त्वमिति हे पुरुष्टुत बहुभिः स्तुत इंद्र त्वमेकः असहाय एव सन्
सत्रा महांति वृत्राणि शत्रुजातानि नाशयसि हि नंसि अपि च अस्मात् इंद्रात् अन्यः कश्चित् नृत्यः बहुतरं करणं कर्म वृत्रवधा
हे दिकं न इन्वति न प्राप्नोति १२ यदिंद्रेति हे इंद्र यत् अस्मिन् संग्रामे त्वां नाना मन्यवः मन्मना स्तोत्रेण नाना बहु प्रकारं हवंते आ
ह्वयंति किमर्थं ऊतये रक्षायै अथ अस्मिन् संग्रामे अस्माकेभिः अस्मदीयैरेव नृभिः स्तोतृभिः आहूतः सन् स्वः सर्वशत्रुब
लं जय अभिभव १३ अरं क्षयायेति हे स्तोतारः महि महते नः अस्माकं क्षयाय गृहाय गृहार्थं अरं अलं पर्याप्तं विश्वा विश्वानि
रूपाणि इंद्रगातानि गुणजातानि आविशन् स्तुत्या धुवन् शचीपतिं कर्मणां पालकं तमेव इंद्रं जैत्राय जेतव्यधनार्थं हृ
र्षय स्तुत्या परिचरणे नेति शेषः॥ ॥इति षष्ठस्य प्रथमे एकोनविंशो वर्गः॥ ॥प्रसंम्राजं इति द्वादशर्चं तृतीयं सूक्तं इरि
विदि काण्वः ऋषिः गायत्री छंदः इंद्रो देवता १ प्रसंम्राजमिति चर्षणीनां मनुष्याणां मध्ये संम्राजं सम्यक् राजमानं इंद्रं
हे स्तोतारः प्रस्तोत प्रकर्षेण स्तुत कीदृशं गीर्भिः स्तुतिभिः नव्यं स्तुत्यं नरं नेतारं नृणां हं नृणां शत्रुमनुष्याणां अभिभवि
तारं मंहिष्ठं दातृतमं २ यस्मिन्नुक्थानीति यस्मिन् इंद्रे उक्थानि शस्त्राणि रण्यंति रमंते विश्वानि सर्वाणि श्रवस्या श्रवणीया
नि हविर्लक्षणानि अन्नानि च रमंते दृष्टांतः समुद्रे उदधौ अपां उदकानां अवीनतरंग जालं तद्यथा समुद्रे नमवितिष्ठति तथा र
ण्यंती त्यर्थः ३ तं सुष्टुत्येति तमिंद्रं सुष्टुत्या शोभनया स्तुत्या आविवासे परिचरामि कीदृशं ज्येष्ठराज्यं ज्येष्ठेषु देवेषु म ७

323
1915

ध्ये राजमानं भरे संग्रामे मरुः महतः वृत्रवधादेः कृ— कर्तारं वाजिनं मन्नवतं किमर्थं सनिभ्यः धनेभ्यः धनलाभाये
त्यर्थः ४ यस्यानूनाइति यस्य इंद्रस्य मदाः सोमपानजनिताः अनूनाः अन्यूनाः गभीराः गांभीर्योपेताः उरवः विस्तीर्णाः तरुत्राः
शत्रूणां तारकाः शूरासातौ संग्रामे हर्षमंतः हर्षयुक्ताः संग्रामोत्सुकाः भवंति तमिंद्रमिति पूर्वया संबंधः ५ तमिद्धनेष्विति
धनेषु हितेषु निहितेषु सत्सु तमित् तमेवेंद्रं अधिवाकाय पक्षपातवचनाय हवंते स्तोतारः आह्वयंति येषां पक्षे इंद्रो वर्तते
त एव जयंति जयेन तानि धनानि लभंते नान्ये ६ तमिच्यौत्नैरिति तमित् तमिंद्रं च्यौत्नैः बलकरैः स्तोत्रैः आर्यंति ईश्व
रं कुर्वंति तमेव चर्षणयः मनुष्याः कृतिभिः अकर्मभिश्च आर्यंति एष इंद्रः वरिवः स्तुतः धनस्य कर्ता भवति स्तोतॄणां॥ ॥
॥इति षष्ठस्य प्रथमे विंशो वर्गः॥ ७ ॥इंद्रो ब्रह्मेति अयमिंद्रः ब्रह्मा परिवृढः सर्वेभ्योधिकः स एवेंद्रः ऋषिद्रष्टा स इंद्रः पु
रुहूतः बहुभिर्हूतश्च महीभिः महतीभिः शचीभिः क्रियाभिः वृत्रवधादिरूपाभिः पुरु महान् बहु प्रभूतो भवति ८ स
स्तोम्य इति सः पूर्वोक्तः इंद्रः स्तोम्यः स्तुत्यार्हः स एव हव्यः आह्वातव्यः सत्यः अवितथस्वभावः सत्वा शत्रूणां अवसादयिता तुवि
कूर्मिः बहुकर्मा यितः एवं अतः कारणात् एकश्चित् सन् असहायो पि भवन् अभिभूतिः शत्रूणामभिभविता भवति ९
तमर्केभिरिति चर्षणयः द्रष्टारो मंत्राणां स्तोतारः मनुष्याः तमिंद्रं अर्केभिः अर्चनसाधनैः यज्ञरूपैः मंत्रैः वर्धति वर्धयंति
तथा उद्गातारः सामभिः गानविशिष्टैः मंत्रैस्तं वर्धयंति तथा गायत्रैः गायत्र्यादिछंदोयुक्तैः शस्त्ररूपैः तमेवेंद्रं होतारो वर्धयं
ति १० प्रणेतारमिति वस्यः वस्यः वसीयः प्रशस्त वसु धनं अच्छ आभिमुख्येन प्रणेतारं प्रापयितारं समत्सु संग्रामेषु शत्रु
निरसनेन ज्योतिः प्रकाशं जयलक्षणं कर्तारं करणशीलं कुतः युधा युद्धेन अभित्वान् शत्रून् ससह्वांसं अभिभूतवंतं एवं
गुणाक मिंद्रं वर्धयंती निशेषः ११ स नः पप्रिरिति पप्रिः पूरयिता पुरुहूतः बहुभिराहूतः स इंद्रः विश्वाः सर्वाः द्विषः द्वेष्ट्रीः
प्रजाः नः अस्मान् नावा तरण साधनेन स्वस्ति क्षेमेण अति अतिपारयति अतिपारयतु १२ स त्वं न इति हे इंद्र सनात् शास्त्र

भा·प·

८

नः अस्मभ्यं वाजेभिः बलैः दशस्य च धनप्रयच्छ च गातु यजगातुं मार्गं अस्मभ्यं इच्छ च तथा नः अस्मान् स्वस्तिभिः क्षेमैः च अच्छ नेषि अभिप्रापय॥ ॥इति षष्ठस्य प्रथमे एकत्रिंशो वर्गः॥ ॥आयाहीति पंचदशर्चं पंचमं सूक्तं इरिंबिठि ऋषिः चतुर्दशी बृहती पंचदशी सतोबृहती आदितः त्रयोदश गायत्र्यः इंद्रो देवता १ आयाहीति हे इंद्र त्वं आयाहि आगच्छ ते त्वदर्थं सुषुमहि अभिषुतवंतः खलु सोमं वयं तमिमं अभिषुतं सोमं पिब तदर्थं इमम् मदीयं इदं बर्हिः वेद्यामास्तीर्णं आसदः आसीद २ आत्वा ब्रह्मयुजेति हे इंद्र ब्रह्मयुजा मंत्रेण युज्यमानौ केशिना केशवंतौ हरी अश्वौ त्वां आवहतां अभिप्रापयतां त्वं चास्मदीय इंद्र उपतु पेत्यनः अस्माकं ब्रह्माणि स्तोत्राणि शृणु ३ ब्रह्मणस्त्वेति हे इंद्र ब्रह्मणः ब्राह्मणा वयं त्वां त्वां युजा योग्येन स्तोत्रेण हवामहे आह्वयामहे कथंभूतं सोमपां सोमस्य पातारं कीदृशा वयं सोमिनः सोमयुक्ताः सुतावंतः अभिषुतसोमेन युक्ताः ४ आनो याहीति हे इंद्र सुतवतः अभिषुतसोमयुक्तान् नः अस्मान् आयाहि अभिगच्छ ततोऽस्माकं संबंधी निसुष्टुतीः शोभनानि स्तोत्राणि उपगच्छ आनीहि हे सुशिप्रिन् शोभनहनुक हे इंद्र अंधसः अन्नस्य सोमलक्षणस्य स्वांशलक्षणं भागं पिब ५ आ ते सिंचामीति हे इंद्र ते तव कुक्ष्योः उदरयोः आसिंचामि सोमेन पूरयामीत्यर्थः सोमः ते गात्राणि शरीरावयवानि अनुक्रमेण विधावतु व्याप्नोतु त्वं च मधुमधुरं मया सिच्यमानं सोमं जिह्वया रसनेंद्रियेण गृभाय गृहाण॥ ॥इति षष्ठस्य प्रथमे द्वात्रिंशो वर्गः॥ ६॥ स्वादुष्टे इति सुसंदृक् सम्यक् सुष्टु दात्रे हे इंद्र ते तुभ्यं मधुमान् साधुर्यवान् अयं सोमः स्वादुरस्तु ऋत्विक् करोतु न च तन्वे शरीराय च स्वादुरस्तु ते तव हृदे हृदयाय च स सोमः शमस्तु सुखजनकमस्तु ७ अयमु त्वेति हे विचर्षणे विदृष्टः इंद्र जनीरिव जाया इव तायथा सुवृक्तः वस्त्रैः संवृता भवंति एवं संवृतः पयः प्रभृतिभिः श्रयणद्रव्यैः आवृतो यं सोमः अभिप्रसर्पतु अभिगच्छतु उपसर्पकः ८ तुविग्रीव इति तुविग्रीवः विस्तीर्णकंधरः वपोदरः पीवरोदरः सुबाहुः शोभनबाहुः एवंगुणकः इंद्रः अंधसः अन्नस्य सोमात्मकस्य मदे हर्षे सति वृत्राणि शत्रुजातानि जिघ्नते हंति ९ इंद्र प्रेहीति हे इंद्र ओजसा बलेन विश्वस्य सर्वस्य जगतः ईशानः स्वामी भवन् त्वं पुरः अस्माकं पुरस्तात् प्रेहि प्रागच्छ हे वृत्रहन् शत्रूणां हंतः वृत्राणि अस्मदीयानि शत्रुजातानि जहि विनाशय १० दीर्घस्त इति हे इंद्र ते तव अंकुशः सृणिः आकर्षणसाधनं आयुधं दीर्घोऽस्तु आयतो भवतु यथा दूरस्थमपि वस्तुः व्याप्नोति तथा यामवान् भवति स्यर्थः येनांकुशेन सन्ति सोमाभिषवं कुर्वते यजमानाय वसु धनमाहृत्य प्रयच्छसि ददासि॥ ॥इति षष्ठे प्रथमे त्रयोविंशो वर्गः ११ अयं त इंद्रेति हे इंद्र ते तुभ्यं त्वदर्थं अयं सोमो बर्हिषि वेद्यां आस्तीर्णे दर्भे निपूतः नितरां दशापवित्रेण शोधितः अभिषवादिसंस्कारैः संस्कृत इत्यर्थः इंद्र इदानीं अस्य इमं सोमं प्रति एहि आगच्छ आगत्य यत्र सात्मकः सोमो हूयते तद्देशं प्राप्ति द्रवत्। धं गच्छ तदनंतरं सोमं पिब १२ शाचिगो इति शाचिगो शाचयः शक्ता गावो यस्यासौ शाचिगुः शाचयो व्यक्ताः प्रख्याता गावो रश्मयो गावो वा यस्य तादृशः हे शाचिपूजन पूज्यते अनेनेति पूजनं स्तोत्रादि प्रख्यातपूजनं ते तव रणाय रमणाय सुखजननाय अयं सोमः सुतोऽभिषुतः कारणात् हे आखंडल शत्रूणां आखंडयितः प्रहूयसे प्रकृष्टाभिः स्तुतिभिः आहूयसे अतः आगत्य इमं सोममपिबति भावः १३ यस्ते शृंगेति हे शृंगवृषो नपात् शृंगवृषा नामकश्चिदृषिः तस्य चेंद्रः स्वयं तेन तव पुत्रतया अजनि इत्याख्यायिका नपादिति तस्य पुत्रनाम शृंगवृषः नपात् शृंगवृषऋषिपुत्र इंद्र ते तव संबंधी प्राणयात् प्रकर्षेण नपातयिता रक्षिता कुंडपाय्यः क्रतुविशेषः एतत्संज्ञः यः क्रतुरस्ति अस्मिन् कुंडपाय्ये क्रतौ मनः आनिदध्रे अभितो वर्तमानाः कुंडयापिनामानः ऋषयः पुरा निदधिरे सम्यक् तदेव सं क्रतुं अनुष्ठितवंतः १४ वास्तोष्पत इति हे वास्तोष्पते गृहस्य ते स्थूणा गृहाधारभूतः स्तंभः ध्रुवा स्थिरा भवतु सोम्यानां संपादिनां अस्माकं अंसत्रं अंसत्राणां अं सोपलक्षितस्य स्त्र शरीरस्य त्रायकं रक्षकं बलं भवतु अपि च द्रप्सः द्रवणशीलः सोमः तदानंत्रा शश्वतीनां बह्वीनां पुरां असुरपुरीणां भेत्ता विदारयिता एवंभूतः इंद्रः मुनीनां अस्माकं सखा भवतु १५ पृदाकुसानुरिति पृदाकुसानुः सर्प इव समुच्छ्रितः उन्नतशिरस्कः इत्यर्थः यजतः यष्टव्यः ग

भा॰प॰

९

वृषणः गवां पापयिता इंद्रः एकः सन् असहाय एवं सन् बहुतरान् शत्रून् अभिभवति स्पर्धिभिरणशीलं अश्वं व्याप्नु
वंतं तमिंद्रं सोमस्य पीतये पानार्थं पुरः अस्माकं पुरस्तात् नयतु प्रापयति साममिथ्यति स्तोता इति लभ्यते केन साधनेन नुस्रि
ग्गामिना गमा गरुण साधनेन स्तोत्रेण॥ ॥इति षष्ठस्य प्रथमे चतुर्विंशो वर्गः॥ ॥इदं हेति द्वाविंशर्चं षष्ठं सूक्तं इ
रिंबिठिः ऋषिः उष्णिक् छंदः उत त्या अश्विदेवताका देवेभिरदितिर्न उत स्य नः इति स्तः आदितिदेवताकाः शमग्निरेषा अ
ग्निसूर्यवायुदेवताका शिष्टाः आदित्यदेवताकाः १ इदं हेति इदं ह इदानीं खलु नूनं अवश्यं आदित्यानां अदितेः पुत्राणां
एषां मित्रादीनां सवीमनि प्रेरणे सति मर्त्यः मनुष्यः स्तोता अपूर्व्यं अभिभवं कम्यं कस्य करं धनं भिक्षेत याचेत नकालां
तरे २ अनर्वाण इति एषां आदित्यानां पथ्याः मार्गाः अनर्वाणः परैरप्रतिगताः अत एव अस्रिधाः अहिंसिताश्च संति
भवंति हि यस्मादेवं तस्मात्पायवः पालयितारः ते मार्गाः स्वगेदयः सुखविषये वर्धकाः भवंतु ३ तत्सु न इति सविता भगः
वरुणः मित्रः अर्यमा एते देवाः सप्रथः सर्वतः विस्तीर्णं तत् शर्म सुखं नः अस्मभ्यं सुसुष्ठु यच्छंतु ददतु यत् शर्म ईमहे वयं
याचामहे ४ देवेभिरिति हे देवि दानादिगुणयुक्ते अरिमर्मन् अहिंसित भरणे पुरुप्रिये बहुभिः प्रियमाणे अदितेः सुरेभिः
प्राज्ञैः सुशर्मभिः सुसुखैः देवेभिः देवैः आत्मीयैः पुत्रैः सार्धं स्मान् शोभनं यथा भवति तथा आगहि आगच्छ ५ ते हि पु
त्रास इति अदितेः पुत्रासः पुत्राः ते हि ते खलु मित्रादयो देवाः द्वेषांसि द्वेष्टॄणि राक्षसादीनि योतवे पृथक् कर्तुं विदुः जानंति
तथा उरुक्षयः विस्तीर्णस्य कर्मणः कर्तारो अनेहसः अनाहंतारः रक्षकाः ते अंहोश्चित् आहननशीलात् पापादपि पृथ
क् कर्तुं अस्मान् जानंति॥ ॥इति षष्ठस्य प्रथमे पंचविंशो वर्गः॥ ॥अदितिर्न इति नः अस्माकं पशुं अदितिः देवमाता
दिवा अहनि पातु रक्षतु तथा अद्वयाः वात्याग्यं तर भेदन प्रकार द्वयरहिता सा अदितिः नक्तं रात्रौ च अस्मदीयं गवादि प
शुजातं रक्षतु तथा अदितिरस्मान् पि अंहसः पापात् पातु रक्षतु केन साधनेन सदावृधा सर्वदा वृद्धिमता आत्मीयेन रक्ष

पि

९

णेन ७ उत स्या न इति उतापि च स्या सा पूर्वोक्ता मतिः मंतव्या अदितिः ऊत्या रक्षया सार्धं दिवा अह्नि नः अस्मान् आगम
त् आगच्छतु आगत्य च शंताति शांतिकरं मयः सुखं सा अदितिः करत् करोति स्रिधः बाधकान् शत्रूंश्च अपगमयतु ८ उत त्ये
ति उतापि च त्यौ तौ प्रसिद्धौ दैव्यौ देवपुत्रौ भिषजा भिषजौ चिकित्सकौ अश्विना अश्विनौ नः अस्माकं शं सुखं कुरुतां इतः अस्म
त्तः रपः पापं युयुतां पृथक् कुरुतां स्रिधः शत्रूंश्च अपगमयतां ९ शमग्निरिति अग्निभिः गार्हपत्यादिभिः अग्निः देवः शं क
रत् अस्माकं सुखं करोतु सूर्यः आदित्यश्च नः अस्माकं शं सुखं यथा भवति तथा तपतु प्रदीप्यतां वातः वायुश्च अरपाः अपा
पः सन् शं यथा भवति तथा च वातु अनुवर्ततां स्रिधः शत्रूंश्च एते अग्न्यादयः अपगमयंतु १० अपामीवामिति हे आदित्याः
अमीवां रोगं अपसेधत अस्मत्तो ऽपगमयत स्रिधं अपसेधकं शत्रुं च अपसेधकं शत्रुं च अपसेधत दुर्मतिं अस्माकं दुःख
स्य मंतारं च अप सेधत अपि च हे आदित्यासः आदित्याः नः अस्मान् अंहसः पापात् युयोतन पृथक् कुरुत॥ ॥इति षष्ठ
स्य प्रथमे षड्विंशो वर्गः॥ ११॥ युयोतेति हे आदित्यासः आदित्याः शरुं हिंसकं अस्मत् आ अस्मत्तश्च युयोत पृथक् कुरुत उ
तापि च अमतिं दुर्बुद्धिं च पृथक् कुरुत हे विश्ववेदसः सर्वधनाः द्वेषः द्वेष्टॄन् शत्रून् ऋधक् पृथक् पृथक् कृणुत कुरुत १२ तत्सु
न इति हे आदित्याः तत् शर्म सुखं नः अस्मभ्यं सु सुष्ठु यच्छत दत्त हि हे सुदानवः शोभनदानाः युष्मदीयं यत् शर्म एनस्वंतं
चित् पापिनमपि कर्तारं एनसः पापात् मुमोचयिषति तद्यच्छतेति अन्वयः १३ यो नः कश्चिदिति यः कश्चित् मर्त्यः मनुष्यः
नः अस्मान् रक्षस्विन् रक्षोभावेन पिशाच्यात्मना रिरिक्षति जिघांसति स मनुष्यः स्वैः एवैः आत्मीयैः चेष्टितैः रिरि
षीष्ट हिंसितो भूयात् स जनः युपगमनशीलश्च भवतु १४ समित्तमिति दुःशंसं दुःकीर्तिं रिपुं शत्रुं तं मर्त्यं इत् मनुष्य
मिव अघं पापं सम् अश्नवत् सम्यक् व्याप्नोतु यः मर्त्यः अस्मत्रा अस्मासु अस्मद्विषये दुर्हणावान् दुष्टहननवान् उपजाय
ते द्वयुः द्वाभ्यां प्रकाराभ्यां उक्तश्च भवति प्रत्यक्षं शोभितं वदति परोक्षं कुत्सं अहितं तादृशः कपटः द्वयुरित्युच्यतेप

भा.ष.

३०

स्मा दस्म द्विषयेकपटो भवति तमपि पापं व्याश्नोत। व्याप्नोत्वित्यर्थः १५ पाकत्रा स्थनेति हे देवाः आदित्याः यूयं पाकत्रा पाकेषु पक्व
प्रज्ञेषु स्तोतृषु स्थान भवथ यतः एवं अतः कारणात् हृत्सु आत्मीयेषु हृदयेषु द्वयुं कपटिनं अद्वयुं अकपटिनं च मर्त्यं
मनुष्यं उपउपेत्य हे वसवः वासकाः आनीय अवगच्छथ॥ इति षष्ठस्य प्रथमे सप्तविंशो वर्गः॥ ॥आ शर्मेति पर्वतानां मे
घानां संबंधि शर्म सुखं वयं आवृणीमहे आभिमुख्येन संभजामहे उत अपि च अपां उदकानां च सुखं आवृणीमहे हे द्या
वाक्षामा द्यावापृथिव्यौ अस्मत् आरे अस्मत्तः विप्रकृष्टदेशे परः पापं कृतं कुरुतं १७ ते नो भद्रेणेति हे वसवः वासयितारः
आदित्याः ते पूर्वोक्तगुणाः यूयं भद्रेण शोभनेन शर्मणा सुखेन युष्माकं वा नीतः विश्वानि सर्वाणि दुरिता दुर्गमनानि अतिपि
पर्तन अतिपारयत १८ तुचे तनायेति हे आदित्यासः अदितेः पुत्राः सुमहसः शोभनतेजस्काः नः अस्माकं तुचे तनाय
पुत्राय तनयाय पौत्राय जीवसे जीवनाय यत् द्राघीयः दीर्घतमं तत् प्रसिद्धमायुः जीवितं सु कृणोतन कुरुत १९
यज्ञो हीळ इति हे आदित्याः हीळः गंतव्यः प्राप्तव्यः अस्माभिः अनुष्ठितः यज्ञः वः युष्माकं अंतरः अंतिके वर्तमा
नो भवति अतो ऽस्मान् मृळत सुखयत वः युष्माकं स आप्स्य बंधुत्वे वर्तमानाः वयं युष्मे इत युष्मास्वेव अपि अस्मि सर्वदा
भवामो ऽपि २० बृहद्वरूथमिति मरुतां देवानां त्रातारं पालयितारं देवं इंद्रं अश्विना अश्विनौ च मित्रं वरुणं च बृहद्वरूथं प्रौ
ढं वरूथं गृहं स्वस्तये अविनाशाय ईमहे याचामहे २१ अनेह इति हे मित्र अर्यमन् वरुण मरुतः ते सर्वे यूयं अनेहः
अहिंसितं नृवत् नृभिः पुत्रादिभिः उपेतं शंस्यं स्तुत्यं त्रिवरूथं त्रिभूमिकं छर्दिः गृहं नः अस्मभ्यं यंतन दत्त २२ ये चिद्धी ३०
ति हे आदित्याः ये चित् ये च वयं मनवः मनुष्याः हि यस्मात् मृत्युबंधवः स्मसि मृत्योः यमस्य बंधुभूताः प्रत्यासन्नमर
णाः भवामः अतो हेतोः तेषां नः अस्माकं जीवसे जीवनाय आयुः जीवितं सु प्रतिरतन शोभनं वर्धयत॥ ॥इति षष्ठ
स्य प्रथमे अष्टाविंशो वर्गः॥ ॥तमग्ने यतीति सप्तत्रिंशदृचं सप्तमं सूक्तं काण्वः सोभरिः ऋषिः प्रथमा तृतीया युजः

327
1715

द्वितीया चतुर्थ्यादियुजः सतोबृहत्यः पितुर्न पुत्र एषा सप्तविंशी द्विपदा विराट् अक्षराविराट् यमादित्यास इत्येषा चतुस्त्रिंशी
उष्णिक् पूर्यरा राजा नृ इत्येषा पंचत्रिंशी सतोबृहती अदान्मेत्येषा ककुप् उत म इत्येषा शतत्रिंशी पंक्तिः षट्त्रिंशी सप्तत्रिं
शी च त्रसदस्य नाम्नादाने देवता केचन तु स्त्रीशा पंच त्रिंश्यो आदित्यदेवताके शिष्टाः आग्नेय्यः १ तमग्ने यतीति हे स्तोतः तं प्रसि
द्धमग्निं गृणीय स्तुहि कीदृशं स्वर्णरं सर्वस्य नेतारं देवासः ऋत्विजः देवतानां द्विगुण पुत्रं अरतिं अर्यं स्वामिनं दधन्विरे प्रापु
वंति प्राप्य च तेनाग्निना देवत्रा देवान् हव्यं चरुपुरोडाशादिलक्षणं हविः आउ हरिः अभिप्रापयंति २ विभूतरातिमिति
ऋषिरात्मानं संबोध्य स्तौ प्रेरयति हे विप्रमेधा वित् सोभरे एतत्संज्ञ ऋषे अध्वराय यागाय इंद्रमग्निं प्र ईळिष्व प्रस्तुहि कीदृ
शं विभूतरातिं व्याप्तधनं चित्रशोचिषं चायनीयदीप्तिं अस्य सोम्यस्य सोमसाध्यस्य अस्य मेधस्य यज्ञस्य पूर्व्यं नियंतारं पूरत
नं ३ यजिष्ठं त्वेति हे अग्ने यजिष्ठं यष्टृतमं त्वां ववृमहे वृणीमहे संभजनामहे कीदृशं तं देवेषु मध्ये देवत्रा द्विगुण
पुत्र होतारं देवानामाह्वातारं अविनाशिनं तस्य यज्ञस्य यागस्य सुक्रतुं सुष्ठु कर्तारं ४ ऊर्जो नपातमिति ऊर्जस्य नपातं न
पातयितारं सुभगं शोभन धनं सुदीतिं सुष्ठु दीपयंतं श्रेष्ठशोचिषं प्रशस्यतमतेजस्कं अग्निं स्तोमि इति शेषः स तादृशो ऽग्निः
नः अस्मदर्थं दिवि द्युलोके मित्रस्य वरुणस्य च सुम्नं सुखं अभिलक्ष्य यक्षति यजतु तथा सः अग्निः अपां अब्देवतानां सुम्नं
अभियजतु ५ यः समिधेति यः मनुष्यः समिधा इध्मेन अग्नये अभ्यर्थं ददाश परिचरति यश्च आहुती आहुत्या आज्या
दिसाध्यया परिचरति यश्च वेदेन वेदाध्ययनेन परिचरति यश्च नमसा नमस्कारेण परिचरति सः स्वध्वरः शोभनेनाध्व
रेण ज्योतिष्टोमादिना युक्तः स्यात्॥ ॥इति षष्ठस्य प्रथमे एकोनत्रिंशो वर्गः॥ ॥तस्येदर्वंत इति यः पूर्वोक्तः तस्येत् तस्ये
व आशवः व्यापनशीलाः अर्वंतः अश्वाः रंहयंते वेगं कुर्वंति शत्रून् प्रसहंत इत्यर्थः द्युम्नतमं दीप्ततमं यशः कीर्तिश्च त
स्यैव भवति अपि च देवकृतं देवैः कृतं अंहः पापं कुतश्चन कस्मादपि हेतोः तं न नशत् न व्याप्नोति न च मर्त्यकृतं मनुष्यैः

कृतं ७ त्वमग्न इति हे सहसः सूनो बलस्य पुत्र जायमान अग्ने गांहविर्लक्षणानां स्वामिन् अग्ने वः तव अवयवभूतैः अग्निभिः
गार्हपत्यादिभिः वयं त्वत्स्वयः शोभनाग्निकाः स्याम भवेम सुवीरः शोभनैः वीरैः उपेतस्त्वं च अस्मयुः अस्मान् कामयमा
नो भव ८ प्रशंसमान इति प्रशंसमानः स्तुवन् अतिथिर्न अतिथिरिव सो अग्निः मित्रियः मित्राणां स्तोतॄणां हितो भवति
तथा रथो न रथ इव वेद्यः लंभनीयः भवत्स्तः हे अग्ने त्वेपि साधवः समीचीनाः क्षेमासः क्षेमाः रक्षणान्यपि संति भवंति त
था रयीणां धनानां त्वमेव राजा ईश्वरो भवसि ९ सो अद्धेति हे अग्ने यः मर्तः मनुष्यः दाश्वध्वरः दत्तयज्ञो भवति स अद्धा
सत्यफलो भवतु हे सुभग शोभनधनाग्ने स एव प्रशंस्यः श्लाघनीयश्च भवतु तथा सः धीभिः कर्मभिः सनिता स्तुः संभज
नशीलो भवतु १० यस्य त्वमिति हे अग्ने यस्य यजमानस्य अध्वराय यागनिष्पादनार्थं त्वं ऊर्ध्वः उद्युक्तः सन् तिष्ठसि सय
मानः क्षयद्वीरः निवसद्भिः अश्वैः कृतं निष्पादितं जयादिकं सनिता संभजनशीलो भवति सः तादृशो जनः विपन्युभिः मे
धाविभिः सश्चरैश्च सनिता भवति॥ ॥इति षष्ठस्य प्रथमे त्रिंशो वर्गः॥ ३१॥ यस्याग्निरिति यस्य यजमानस्य गृहे विश्व
वार्यो विश्वैः वरणीयः वपुः रूपवान् दीप्तिवान् अग्निः स्तोमं स्तोत्रं चनः अन्नं चरुविर्लक्षणं दधीत धारयेत् नूयस्य च हव्या
वासमुक्षयि हव्यासान्दे देवान् वेविषत् व्याप्रिविषः आपयेत् स यजमान इति पूर्वत्र संबंधः १२ विप्रस्य वेति हे सहसो बल
स्य पुत्राग्ने विप्रस्य मेधाविनः स्तुवतः स्तोतुर्वा रातिषु हविर्दानेषु मक्षूतमस्य शीघ्रतमस्य यष्टुर्वा विविदुषः अभिज्ञस्य व
चः वचनं हे वसो वासक अग्ने अवो देवं देवानां अवस्तात् उपरि मर्त्यं मर्त्यानां उपरिष्टाच्च कधिकुरु सर्वत्र नमः प्र देवतां आपयेति
यावत् १३ यो अग्निमिति यो यजमानः हव्यदातिभिः हविषां दानैः नमोभिः नमस्कारैः वा सुदक्षं शोभनबलमग्निं आवि
वासति परिचरति गिरा वा स्तुत्या वा अजिरशोचिं क्षिप्रगामिनं जुष्कं तमग्निं परिचरति सः समृद्धो भवतीति शेषः १४
समिधेति यः मर्तः मनुष्यः अस्य अग्नेः धामभिः गार्हपत्यादिशरीरैः सार्द्धं अदितिं अखंडनीयं तमेवाग्निं निशीति निशिताया
प्र ज्वलहेतुभूतया समिधा दाशत् परिचरेत् अभिक्रामेत् १५ तदग्ने द्युम्नमिति हे अग्ने तत् द्युम्नं समर्थं आभर ३३

329
1915

अस्मभ्यमाहरयत् सदनेगृहे वर्तमानं कं चित्कमपि अत्रिणं अत्तारं राक्षसादिकं सासहत् अत्यर्थमभिभवेत् तथा दुर्ध्यः
दुर्धियः पापाबुद्धेः शत्रुजनस्य मन्युं क्रोधं यद्युम्नं अभिभवेत् तदाहरेत्यन्वयः॥ ॥इति षष्ठस्य प्रथमे एकत्रिंशो वर्गः॥
येन वष्ट इति॥ येनाग्ने येन तेजसा वरुणो देवः वष्टि प्रकाशयति येन च मित्रो अर्यमा च वष्टि येन च नासत्या अश्विनौ च वक्षा
त भगो देवश्च वष्टि शवसा बलेन गातुवित्तमाः स्तोत्रस्य ज्ञातृतमाः इंद्रवोताः ईश्वरेण त्वया रक्षिताः सन्तो वयं हे अग्ने त्वदी
यं तत्तेजः विधेम हि परिचरेम हि १७ ते घेदिति हे अग्ने ते घेत् त एव खलु रवाध्यः शोभनध्यानाः भवंति हे विप्र मेधाविन्
देवद्योतमानाग्ने विप्रासः विप्राः ऋत्विजः न चक्षसं न्नृणां चेष्टारं सुक्रतुं सुकर्माणं त्वां यांनि। दधिरे यागार्थं गार्हपत्यादिस्था
नेषु स्थापयंति ते घेत्यन्वयः १८ त इद्वेदिमिति हे सुभग शोभनधनाग्ने त इत्तत्त एव यजमानाः त्वद्यागाय वेदिं च क्रिर कु
र्वंति तदनंतरं ते यजमानाः आहुतिं च रुपुरोगाशादि साध्यां दाक्षिण्यादिषु कुर्वंति तत्र दिविद्योतमाने सोत्ये हविसो तु
सोमाभिषातुं चक्रिरे यत्त उद्योगं कुर्वंति अनुष्ठितयज्ञाः ते इत्त त एव वाजेभिः वाजैः बलैः महत्महतं धनं जिग्युः जयंति के
ये यजमानाः हे अग्ने त्वयि कामं अभिलाषं येरिरे निरंतां गच्छंति त्वां आदरातिशयेन स्तुवंतीत्यर्थः १९ भद्रोन इति आहुतः ह
विर्भिः तर्पितोग्निः नः अस्माकं भद्रः कल्याणः भवतु हे सुभग शोभनधनाग्ने भद्रा कल्याणी रातिः दानं च अस्माकं भवतु भ
द्रः कल्याण अध्वरो यागश्च भवतु उतापि च भद्राः कल्याण्यः प्रशस्तयः स्तुतयश्च भवंतु २० भद्रं मन इति हे अग्ने वृत्रतूर्ये
संग्रामे भद्रं शोभनं मनः कृणुष्व अस्माकं कुरु येन मनसा त्वं समत्सु संग्रामेषु सासहः भृशं शत्रून् अभिभवसि अपि च शर्ध
तां अभिभवतां शत्रूणां भूरि भूरीणि बहूनि स्थिराणि दृढान्यपि अवतनुहि अवांचि कुरु पराजितानि कुर्वित्यर्थः वयं वाभि
र्गीर्भिः हविर्भिः स्तोत्रैश्च ते त्वां वनेम संभजेम हि॥ ॥इति षष्ठप्रथमे द्वात्रिंशो वर्गः॥ ३२॥ ईळे गिरेति गिरा वा चा स्तु
ति रूपया मनुर्हितं मनुना प्रजापतिना यजमानेन वा आहितं तमग्निं ईळे स्तौमि कीदृशं यजिष्ठं यष्टृतमं हव्यवाहनं हविषां

चोढारं अरतिं ईश्वरं दूतं देवानां दूत्ये वर्तमानं यम् अग्निं देवाः न्येरिरे नितरां प्रेरयंति २२ तिग्मजंभायेति तिग्मजंभाय तीक्ष्ण
ज्वालाय तरुणाय पूर्नेराजते राजमानायाग्नये प्रयः हविर्लक्षणमन्नं गाय सिद्धि स्तोतः प्रवृद्धिं प्रयच्छत इत्यर्थः यः अग्निः
सन्नताभिः प्रियसत्याभिः काभिः वाग्भिः स्तुतः घृतेभिः आज्यैः आहुतोभिहुतश्च सन् सुवीर्यं शोभनवीर्यं पिंशते आश्ले
षयति स्तोभिः संयोजयति तस्मै अग्नये इत्यन्वयः २३ यदि घृतेभिरिति घृतेभिः घृतैः आहुतः अभिहुतः अयमग्निः
यदि यदा अस्मिन्काले वाशीं वाचं उच्चैः ऊर्ध्वं च अवच आवाक्क भरते संपादयति आ असुरः इव रश्मीनां क्षेप्ता सूर्य इव यानि निर्णि
जं आत्मीयं रूपं उपरितनेषु लोकेषु प्रकाशतया उद्भ्रमयति अधस्तनेषु च अवाङ्मुखं गमयति तत् हृत् तं स्तुमः इति शेषः॥
२४ यो हव्यानीति यः मनुर्हितः मनुना प्रजापतिना आहितः देवः द्योतमानोग्निः सुगंधिना शोभनगंधयुक्तेन आस्य
आस्येन हव्यानि अस्मदीयानि हवींषि ऐरयत देवान् प्रति प्रेरयति स्वध्वरः शोभनयज्ञः होता देवानां ह्वाता देवः दीप्य
मानः अमर्त्यः मरणरहितः सः अग्निः वार्याणि वरणीयानि धनानि विवासते परिचरते यजमानाय प्रयच्छतीति शेषः २५
यदग्न इति हे सहसः सूनो बलस्य पुत्र आहुतः घृतैरभिहुतः हे मित्रमहः अनुकूलदीप्तिमन् अग्ने मर्त्यः मरणधर्मा हियत्वं
यदि त्वं अमर्त्यः स्यां तदु यासनयात्वद्रूपमापन्नो भवेयं॥ ॥इति षष्ठस्य प्रथमे त्रयस्त्रिंशो वर्गः॥ २६॥ न त्वा रासीयेति
हे वसो वासक अग्ने त्वा त्वां अभिशस्तये मिथ्यापवादाय न रासीय नाक्रोशये यदि हे संत्य भजनीय पापत्वाय च त्वां न रासीय मे
मदीयः स्तोता च अभिमतवचनेन त्वां नाक्रोशयतु अतएव पापया अमती वा अमतिः शोभनबुद्धिः न ह्रव अपि च दुर्हितः
शत्रुः हे अग्ने अस्माकं न स्यां न भवतु २७ पितुर्न पुत्र इति पितुर्न पुत्रः पितुः पुत्र इव अस्माकं सुभृतः सुष्ठु भृतो अयमग्निः
दुरोणे यज्ञगृहे देवान् आ अभिलक्ष्य नः अस्माकं हविः प्रेतु प्रगमयतु २८ तवाहमिति हे वसो वासक अग्ने वेदिष्ठाभिः अ
तिकतमाभिः देवस्य तव ऊतिभिः रक्षाभिः मर्त्यः मनुष्योहं स्तोता सदा सर्वदा गोषं आसचेय प्रीतिमभिसेवेय २९ तव ३२

331/1915

क्रत्वेति हे अग्ने तव क्रत्वा त्वदीयेन परिचरणरूपेण कर्मणा सनेयं त्वा संभजेयं तव रातिभिः त्वदीयैः हविर्दानैश्च सनेयं तथा
तव प्रशस्तिभिः स्तोत्रैश्च त्वां संभजेयं किं कारणं हे वसो वासक अग्ने मम स्तोतुः प्रमतिं प्रकृष्टबुद्धिं रक्षकं त्वां मित्रत्वामेव आ
हुः ब्रह्मवादिनः कथयंति अतो हे अग्ने दातवे दातुं हर्षस्व त्वं हृष्टो भव हर्षयुक्तः सन् बहुधनं प्रयच्छ इत्यर्थः ३० प्र सो अग्न इति
हे अग्ने त्वोतिभिः रक्षाभिः स यजमानः प्रतिरते प्रवर्धते उत यः विशेषेण सुवीराभिः सुपुत्राभिः वाजधर्मभिः बलानां भ
रणाभिः हे अग्ने त्वं यस्य यजमानस्य सख्यं मित्रत्वं आवरः अभिवृणोषि स तरते इत्यन्वयः॥ ॥इति षष्ठस्य प्रथमे चतु
स्त्रिंशो वर्गः॥ ॥तव द्रप्स इति हे विष्णो सोमेन सिच्यमानाग्ने द्रप्सः द्रवणशीलः नीलवान् शकटनीडे अवस्थानात् तद्वान्
वाशः कांतः ऋत्विजः ऋतौ वसंतकादिकालविशेषे भवः इधानः संदीपयन् एवं भूतः तव सोमः आ ददे तुभ्यं होमाय अध्व
र्युणा आदीयते अपि च त्वं महीनां महतीनां उषासां प्रियः मित्रभूतोऽसि तथा क्षपः क्षपायाः रात्रेः संबधिषु वस्तुषु राज
सि प्रकाशसे ३१ तमागन्मेति सोभरयः ऋषयः वयं अवसे रक्षणाय तमग्निं आगन्म हविर्भिः स्तुतिभिश्च प्राप्ताः अग्नू
मक्कीदृशं सहस्रमुष्कं बहुतेजस्कं स्वभिष्टिं शोभनाभ्येषणं सम्राजं सम्यग्राजमानं त्रादे सस्य वंत्र सदस्युनाम राजर्षेः
तस्य स्तोतव्येन संबंधिनं ३३ यस्य त इति हे अग्ने यस्य ते तव अन्ये अग्नयः वया इव वृक्षस्य शाखा इव उपक्षितः समीपे
निवसंतो भवंति जनानां मनुष्याणां मध्ये अहं तव क्षत्राणि बलानि स्तुत्या वर्धयन् विपः अन्ये स्तोतारः इव द्युम्ना यातमा
नानि अन्यानि नियुवे नितरां प्राप्नोमि त्वत्प्रसादात् लभेयमित्यर्थः ३४ यमादित्यास इति हे अद्रुहः अद्रोग्धारः सुदान
वः शोभनदानाः आदित्यासः अदितेः पुत्राः मघोनां हविष्मतां विश्वेषां सर्वेषां मध्ये यं मर्त्यं यजमानं पारं नयथ आरब्ध
स्य कर्मणः समाप्तिं प्रापयथ स फलं लभत इत्यर्थः ३५ यूयं राजान इति हे राजानः राजमानाः चर्षणीसहः शत्रुभूता
नां अभिभवितारः आदित्याः यूयं मानुषान् अनु इत् यजमानान् अनुलक्ष्य क्षयं तं कंचित् कमपि शत्रुं अभिभवथेति शे

पः हे वरुण हे मित्र हे अर्यमन् नेतारः वयं वः युष्माकं संबंधिनः ऋतस्य यज्ञस्य रथ्यः स्याम नेतारो भवेम ३६ अदान्मे
ति पौरुकुत्स्यः पुरुकुत्सपुत्रः त्रसदस्युः मे मह्यं वधूनां पंचाशतं अदात् दत्तवान् कीदृशः मंहिष्ठः दातृतमः अर्यः स्वामी सत्प
तिः सतां स्तोतॄणां पालयिता ३७ उत मे प्रयियोरिति उत अपि तत्र यदुक्तं मम त्यं प्रयियोः अश्वादिषु श्यामवर्णानां प्रणे
ता प्रकर्षेण नेता मह्यमदात् वः पुनरसावदात् सुवास्त्वाः सुष्ठु निवासायाः नद्याः अधि तुग्वनि तीर्थे अधि एतद्दत्तम्
त्यं सुवास्तुर्नाम नदी तुग्वतीर्थं भवतीति निरुक्तं अग्रतोगामी भवद्वसुः भावयिता बहूनां पूजितलक्षणः दियानां दाना
र्हाणां गवां पतिः ता अश्वगाः एतत्संख्यायुक्ताः॥ ॥इति षष्ठस्य प्रथमे पंचत्रिंशो वर्गः॥ ॥आ गंतेति षड्विंशत्यृचं अष्टमं सूक्तं
कण्वः सोभरिरृषिः प्रथमाद्याः अयुजाः ककुभः द्वितीयाद्याः युजः सतोबृहत्यः मरुतो देवताः १ आ गंतेति हे प्रस्थावा
नः गमनशीलाः कयं आगंत आगच्छत मा रिषण्यत अनागमनेन अस्मान् मा हिंस्त हे समन्यवः समानतेजस्काः स्थिराश्चि
त् स्थिराणि दृढान्यपि पर्वतादीनि यूयं नमयिष्णवः नमनशीलाः कंपयितारः मापस्थात अस्मत्तः अपि सं अन्यत्र मा तिष्ठ
वि त २ वीळुपविभिरिति हे ऋभुक्षणः उरुभासमानानि वासाः रुद्रासः रुद्रपुत्राः मरुतः सुदीतिभिः शोभनदीप्तिकैः वीळु
पविभिः दृढनेमियुक्तैः रथैः आगत आगच्छत हे पुरुस्पृहः बहुभिः स्पृहणीयाः यूयं सोभरियवः नः अस्माकं यज्ञं प्रति
अद्य इदानीं इषा अन्नेन सह आगच्छत आ पूरणः ३ विद्मा हीति रुद्रियाणां रुद्रपुत्राणां शिमावतां कर्मवतां विष्णोः व्या
प्तस्य दृष्टस्य एषणीयस्य शुष्मं उदकस्य मीळ्हुषां सेक्तॄणां मरुतां उग्रं उद्गूर्णं शुष्मं बलं विद्म हि जानीमः खलु ४ विद्वी ३२
पानीति द्वीपानि निद्वीपोः पार्श्वे आपो येषु तानि उदकस्य स्थलानि तानि च वियापतन् अत्यर्थं मरुद्वेगेन विपतंति पृष्ठन् स्था
वरं च अन्यद्वृक्षजातं दुच्छुना दुःखेन युष्मत्त उभे रोदसी द्यावापृथिव्यौ वपिषुः अतः मरुतः स्वागमनजनितेन कंपनेन
याजयंति परीक्षस्व धन्वानि गमनशीलानि च प्रैरत प्रगच्छतेति हे शुभ्रखादयः शोभनायुधाः स्वभानवः स्वायत्तदीप्तयः यूयं

333
191

यत् यद्यपि नयकं पयथ तदा पूर्वोक्तं सर्वं निष्पाद्यत इत्यर्थः ५ अच्युता चिदिति हे मरुतः वः युष्माकं अज्मन् अज्मनि ग
मने सति अच्युता चित् च्यावयितुमशक्याः अपि पर्वतासः गिरयः वनस्पतिः वनस्पतयः अनानदति अभितो भृशं शब्दा
यंते अपि च यामेषु युष्मदीयेषु गमनेषु निमित्तेषु भूमिः पृथिवी च रेजते कंपते॥ ॥इति षष्ठस्य प्रथमे षट्त्रिंशो वर्गः ६
अमाय वइति हे मरुतः युष्माकं अमाय बलाय यातवे यातुं द्यौः द्युलोको बृहत् अंतरिक्षं वि सस्र्यउत्तरा उद्गततरा जिही
ति गच्छति युष्मदागमनात् भीता युष्मदीयमंतरिक्षं स्थानं परित्यज्य उर्ध्वं पलायत इत्यर्थः यत्र यस्मिन् अंतरिक्षे बाहोज
सः बाह्वोजसः बाहुबलयेषां तादृशाः नरः मरुतः त्वक्षसि दीप्तानि आभरणानि तन्षु आभीयेषु शरीरेषु आदेदिशंते आदि
श्यानि घनानि कुर्वंति तद्बृहदंतरिक्षं जिहीत इत्यन्वयः ७ स्वधामन्विति नरः मरुतः स्वधामनु हविर्लक्षणमन्नं अनुलक्ष्य
श्रियं शोभां महीमहत् वहंते धारयंति कीदृशाः त्वेषाः दीप्ताः अमवंतः बलवंतः वृषप्सवः वर्षणरूपाः अह्रुतप्सवः अकुटि
लरूपाश्च ८ गोभिर्वाण इति सोभरीणां ऋषीणां गोभिः शब्दैः स्तुतिलक्षणैः वाणः मरुद्वाणः आ अज्यते प्रकटीक्रियते कुत्र
हिरण्यये रथे कोशे कोशावत् वेष्टिते मध्यदेशे वाद्यते इत्यर्थः अपि च गोबंधवः गोमातृकाः सुजातासः शोभनजन्मानः महा
तः महानुभावाः ते मरुतः नः अस्माकं इषे अन्नाय भोजे भोगाय स्परसे प्रीत्यै च नु क्षिप्रं भवंतु इति शेषः ९ प्रति वइति हे वृषदं
जयः वर्षकेण सोमेन सिंचतः अध्वर्यवः वः यूयं वृष्णो वर्षित्रे मारुताय मरुत्संघरूपाय शर्धाय बलाय हव्या हवींषि प्रतिभ
रध्वं आहवनीयं प्रतिहरत कीदृशाय शर्धाय वृषप्रयाव्णे सेक्तारो गंतारो मरुतो यस्मिन् तस्मै १० वृषणश्वेनेति हे नरः म
रुतः वृषणश्वेन सेचनसमर्थैरश्वैरुपेतेन वृषप्सुना वर्षकरूपयुक्तेन वृषनाभिना वर्षकनाभियुक्तेन रथेन नः अस्माकं
हव्या हवींषि आगत आगच्छत वृथा अनायासेनैव वीतये भक्षणार्थं दृष्टांतः श्येनासोन पक्षिणः श्येनाः पक्षिणः यथा शीघ्र
मागच्छंति तद्वत् शीघ्रमागच्छत इत्यर्थः॥ ॥इति षष्ठस्य प्रथमे सप्तत्रिंशो वर्गः॥ ॥समानमिति एषां मरुतां अंजिरूपाणि

व्यंजकं आभरणं समानं एकविधमेव रुक्मासः सुवर्णमया हाराः विभ्राजंते वक्षस्स्थलेषु तथा बाहुष्वधि अंसेषु ऋष्टयः आ
युधानि दद्यविद्युतति अत्यर्थं द्योतंते १२ त उग्रास इति उग्रासः सर्वकार्येषु उद्यताः वृषणः वर्षितारः उग्रबाहवः उद्गूर्णबाहु
काः ते मरुतः तन्वूषु आत्मीयेषु शरीरेषु न किः पतिरेरक्षणाय न प्रयतं तेन हि कश्चित्तेषां शरीराणि बाधितुं शक्नोति प्रत्य
क्षकृतः हे मरुतः वः युष्माकं रथेषु धन्वनि धनुषि आयुधानि आयोधनानि बाणादीनि च स्थिरा स्थिराणि दृढतराणि सं
ति अत एव कारणात् अनीकेषु अधि सेनामुखेषु श्रियः जयसंपदो युष्माकं भवति १३ येषामर्णइति आर्णनि उदकमिव स
प्रथः सर्वतः विस्तीर्णं त्विषं दीप्तं शंभवताव — नायेषां मरुतां नाम मरुत इति एक इत् एक एव असहाय एव सतत्यजेस्था
तणां भोगाय भवति दृष्टांतः सहः प्रसहनसीलं पित्र्यं पितुरागतं वयोन्न अन्नमिव यथा तत् द्विजं तेन भोगाय भवति तद्वदित्य
र्थः तानिनि उत्तरत्रैकवाक्यता १४ तान्वंदस्वेति हे अंतरात्मन् तान् पूर्वोक्तगुणान् मरुतः वंदस्व प्रणमतानेवोपस्तुहि
यस्मात् धुनीकेनोपपिस्तूणां तेषां मरुतां वयं शेषभूताः स्मः अराणां न अर्पणीं स्वामिनां यथा चरमः सेवकः शेषभूतः त
द्वतः तत्तस्मात् एषां मरुतां दाना दानानि मह्ना महत्वेन युक्तानि अस्माकं भवंति तद्देषामिति द्विरुक्तिरादरार्था १५ सु
भगइति हे मरुतः वः युष्माकं ऊतिषु रक्षासु सनीषु सः स्तोता सुभगः आसेशा भनधनो भवति कदा पूर्वासु व्युष्टिषु अती
तेषु दिवसेषु उतापि च यो वा यश्च मनुष्यः स्तोता नूनं अवश्यं असति युष्माकं भवति स सुभग इत्यन्वयः॥ ॥इति षष्ठस्य
प्रथमे अष्टाविंशो वर्गः १६॥ यस्यवेति हे नरः मरुतः यूयं यस्य वा यस्य च वाजिनः हविष्मतः यजमानस्य हव्या हवींषि प्र १४
तिवीतये भक्षणाय आगथ आगच्छथ स यजमानः हे धूतयः कंपयितारो मरुतः द्युम्नैः अन्नैः उतापि च वाजसातिभिः अन्ना
न्नां संभजनेश्चवः युष्माकं सुम्ना सुखानि अभिनशत् आप्नोति १७ यथा रुद्रस्येति रुद्रस्य ईश्वरस्य सूनवः पुत्राः अ
सुरस्य उदकानां क्षेप्तुः मेघस्य वेधसः विधातारः युवानः नित्यतरुणाः ईदृशाः मरुतः दिवः अंतरिक्षात् आगत्य यथा ये

न प्रकारेण वशंति अस्मान् कामयंते तथैव तेनैव प्रकारेण असत् इदं स्तोत्रं भवतु १८ ये चार्हंतीति सुदानवः शोभनदानाः
ये च यजमानाः मरुतो देवान् अर्हंति पूजयंति ये च मीळ्हुषः सेक्तॄन् मरुतः सन्त प्रशस्तं चरंति हविर्भिः प्रचरंति यजंतिय
तः एवं अतश्चित् अतोपि कारणात् तान् उभयविधान् नः अस्मान् आ अभिलक्ष्य वस्यसा वसीयसा वसुमत्तमेन हृदा
हृदयेन हि युवानः मरुतः उप आ ववृध्वं उपेत्याभिसंभजत १९ यूनऊष्विति हे सोभरे यून नित्यतरुणान् वृष्णः वर्षिष्ठा
न् पावकान् मरुतः नविष्ठया अभिनवया गिरा वाचा स्तुतिरूपया सुशोभनं अभिगाय अभिष्टुहि चकृषत् पुनः पुनः कृ
षन् कृषीवलः इव स यथा सूनः सेक्तॄन् अनुदुहः स्तौतित द्वत् उ पूरणः २० सहायेसंतीति विश्वासु सर्वासु पृत्सु युद्धेषु
स्तोत्रेषु आह्वानशीलेषु या हूषु च ये मरुतः सहाः संति अभिभवितारो भवंति हव्यः ह्वातव्यः मुष्टिहाइव मुष्टिभिः हंतीति
मुष्टिहा मल्लः स एव न संप्रत्यर्थे संप्रति वृष्णे वर्षितॄन् चंद्रान् आह्लादकान् सुश्रवस्तमान् अतिशयेन शोभनयशस्कान् म
रुतो अभि मरुत एव गिरा वाचा वंदस्व स्तुहि॥ ॥इति षष्ठस्य प्रथमे एकोनचत्वारिंशो वर्गः॥ ॥गावश्चिदिति हे समन्य
वः समानतेजस्का मरुतः गावश्चित् गावश्च युष्मान् मातृभूताः सजात्येन समानजातित्वेन सबंधवः समानबंधुकाः स
त्यः ककुभः दिशः प्राच्यादि दिग्भागान् प्राप्य मिथः परस्परं रिहते लिहंति घ पूरणः २२ मर्तश्चिदिति हे नृतवः नृत्यंतः रु
क्मवक्षसः रोचमानमाभरणं रुक्मं वक्षसि येषां ते मरुतः मर्तश्चित् मनुष्योपि स्तोता वो युष्माकं भ्रातृत्वं सखित्वं आ अ
भिमुख्येन उपायति उपगच्छति अतो नः अस्मान् मनुष्यान् स्तोतॄन् अधिगात अधिब्रूत अस्मत् पक्षपातवचना भव
त हि यस्मात् वो युष्माकं आपित्वं बंधुत्वं निध्रुवि नित्यं तराधारयितव्ये सदा सर्वदा अस्ति विद्यते तस्मात् इत्यर्थः २३ मरुत
इति हे सुदानवः शोभनदानाः सखायः समयः सर्पणशीलाः मरुतः नः अस्माकं मारुतस्य भेषजस्य मरुत्संबंधि भेषजं
औषधं यूयं आवहत आनयत २४ याभिः सिंधुमिति हे मरुतः याभिः ऊतिभिः सिंधुं समुद्रं अवथ रक्षथ याभिश्च तूर्वथ

भा॰ष॰ ३५

नो त्वं णांशत्रून् हिंस्थ्याभिः अक्रिविंत् छा जेगेतमापद्रास्य यथ्रयच्छथहे मयोभुवः सुखस्य भावयितारः हेअसश्चद्विषः
अशक्तरावः शत्रुरहिताः शिवाभिः कल्याणीभिरूतिभिः रक्षाभिः नोस्माकं मयः सुखं सूतभावयत २५ यत्सिंधाविति
हे स्कबर्हिषः शोभनयज्ञाः मरुतः सिंधौ एतत्संज्ञे स्यंदनशीले नदे यद्भेषजं अस्ति यत्र असिक्न्यां यत्र समुद्रेषु जलधि
षु यच्च पर्वतेषु भेषजं विद्यते तत्सर्वं भेषजं पश्यंत इति उत्तरयैकवाक्यता २६ विश्वं पश्यंत इति विश्वं सर्वं पूर्वोक्तं भेष
जं पश्यंतः जानंतः यूयं तनूषु अस्मदीयेषु विषयेषु आबिभृथ आहरथ आत्मनेन च तेन नः अस्मान् अधिवोचत अधिब्रू
त विचिकित्सत इत्यर्थः अपि च हे मरुतः न अस्माकं मध्ये आतुरस्य रोगिणः रपः रपः सः पापफलस्य रोगस्य क्षमा क्षांतिः
यथा भवति तथा विकृतं विषाभितं अंगं पुनः इष्कर्त निशेषेण संपूर्णं कुरुत ॥ ॥इति षष्ठस्य प्रथमे चत्वारिंशो वर्गः॥ ॥
॥इति अष्टमे मंडले तृतीयोनुवाकः॥ ॥इति ऋग्भाष्ये षष्ठाष्टके प्रथमोध्यायः॥ ॥चतुर्थेनुवाके दश सूक्तानि तत्र
वयमुत्वामित्यष्टादशर्चं प्रथमं सूक्तं कण्वः सोभरिः ऋषिः अयुजः सतोबृहत्यः अंत्ये तृचे चित्रस्य दानं देवता शिष्टा ऐं
द्र्य सूक्तविनियोगो लैंगिकः १ वयमुत्वामिति हे अपूर्व्य त्रिषु सवनेषु प्रादुर्भूतत्वात् अभिनव इंद्र भरंतः सोलक्षणैरन्नैः त्वां
पोषयंतो वयं वाजे संग्रामे चित्रं विविधरूपं त्वामु त्वामेव अवस्यवः रक्षणमात्मनः इच्छंतः हवामहे त्वां आह्वयामः दृष्टांतः
स्थूरं न यथा व्रीह्यादिभिः गृहपूरयंतो जनाः स्थूरं स्थूलं गुणाधिकं कंचित्पुरुषं वित्तमानं च यथा आह्वयंति तद्वत् २ उपत्वेति
इंद्र कर्मन् अग्निष्टोमादिकर्मणि ऊतये रक्षणाय त्वां उपगच्छामः परोक्षः यः इंद्रः धृषत् शत्रून् अभिभवति युवा तरुणः
उग्रः उद्गूर्णः सः इंद्रः नः अस्मान् प्रति च कामं आगच्छतु प्रत्यक्षः सखायः वयं सानसिं संभजनीयं अवितारं रक्षितारं त्वा
मित् त्वामेव वृमहे वृणीमहे संभजामहे हि प्रसिद्धौ ३ आयाहीति हे अश्वपते अश्वानां स्वामिन् गोपते गवां पालयितः
उर्वरापते सर्वसस्याद्यायाः भूमेः उर्वरायाः स्वामिन्… पते इंद्र इंदवः सोमाः इमे त्वदर्थं अभिषुताः तस्मात् आयाहि आगच्छ आगत्य हे सो ३५

मपते इंद्र सोमं पिब ४ वयं हित्वेति हे इंद्र अबंधवः बंधुरहिताः विप्रासः मेधाविनो वयं बंधुमंतं बंधुभिः देवैः युक्तं त्वा हि
त्वां एव येमिम बंधुत्वेन नियच्छामः तथा सति हे वृषभ कामानां वर्षितः इंद्र ते तव या यानि धामानि शरीराणि विद्यंते तेभिः तैः
विश्वेभिः सर्वैः धामभिः सह सोमपीतये सोमपानार्थं आगहि आगच्छ ५ सीदंत इति हे इंद्र गोश्रीते दध्ना पयसा च मि
श्रिते मदिरे मदकरे विचक्षणे स्वर्गप्रापणशीले त्वदीये मधौ सोमे सीदंतः निवसंतः सदने दृष्टांतः वया यथा पक्षिणो यथा
एकत्र संधीभूय तिष्ठंति तद्वत् सीदंतो ते वयं त्वामभि आभि आभिमुख्येन नोनुमः पुनःपुनः स्तुमः॥ ॥इति षष्ठस्य द्वि
तीये प्रथमो वर्गः॥ ॥अच्छा च त्वेति हे इंद्र अच्छ च अपि च एना एनेन नमसा स्तोत्रेण सह त्वा त्वां वदामसि अभिवदामः किं
तु मुहुः चित् मुहुर्मुहुः किं कस्मात् हेतोः विदीधयः विचिंतयसि किमर्थं हे हरिवः ताश्वन्वे वेइंद्र अस्माकं कामासः पुत्रादि
कामाः संति संतु त्वं दद्विः धनादिदाता खलु तस्मात् वयं संनिधौस्मः भवामः किं च नः अस्माकं धियः कर्माणि च तव
समीपे संतितिष्ठंति तोधनादिलाभार्थं त्वा वदाम इत्यर्थः ७ नूत्ना इदिति हे इंद्र ते तव ऊती ऊत्या रक्षायै वयं नूत्ना इत्
नूतना एव अभूम हे अद्रिवः वज्रवन् इंद्र पुरा पूर्वं वा पराण संपरितो व्याप्तं इति न हि नु विद्मन जानीमः ८ विद्मासखि
त्वमिति हे शूर इंद्र सखित्वं तव सखिभावं वयं विद्म जानीमः उत अपि च भोज्यं अभ्यवहार्यं धनं च विद्महे वज्रिन् वज्रिव
ने न् इंद्र त्वे तावदीये जाते सत्यधने आभिमुख्येन ईमहे वयं याचामहे उतो अपि च हे वसो सर्वस्य वासयितः स्तुशिप्रशो…
भन हनो इंद्र गोमति गवादियुक्ते अस्मिन् सर्वस्मिन् वाजे अन्नेन अस्मान् आ शिशीहि तीक्ष्णीकुरु ९ यो न इदमिति
हे सखायः ऋत्विग्यजमानाः यः इंद्रः पुरा पूर्वं इदमिदं दर्शनीयं तव विद्यमानं वस्यः प्रशस्तं वसु नः अस्मान् प्र आनिनाय
प्रकर्षेणानीतवान् तमु तमेव धनानां नेतारमिंद्रं वः युष्माकं धनलाभार्थं ऊतये रक्षणाय च स्तुषे सोभरिरहं स्तोमि १०
हर्यश्वमिति हर्यश्वं हरितवर्णाश्वोपेतं सत्पतिं सतां पतिं चर्षणीसहं शत्रुभूतानां मनुष्याणां अभिभवितारं सहिष्मस

खलु जनः स्तोतिय जनः अमंदन ततो लब्धधनसन् हृष्टो भवतिय द्वाधनवान् सः इंद्रः शतं गव्यं अश्व्यं अनेकेगव
श्वसधं स्तोतृभ्यः नः अस्मभ्यं तु क्षिप्रं आवयतिआ प्रापयतु ततो लब्धगवादिकाः वयं चैनं स्तुमइति ॥ इतिषष्ठस्य द्वि
तीये द्वितीयो वर्गः ॥ ॥ त्वया हस्विदिति हे वृषभवर्षित इंद्र गोभमः गवादियुक्तस्य जनस्य संखेरुताने युद्धेश्च संतं अ
स्मान् प्रति क्रोधातिशयेन श्वासकारिणं शत्रुं युजा सहायेन त्वया हस्वित् त्वयैव खलु वयं प्रति ब्रवीमहि प्रतिवचनं
कर्मः निराकरिष्यामइत्यर्थः १२ जयेम कारइति हे पुरुहूत बहुभिराहूतेंद्र अस्माकं कारिणः हिंसां कुर्वतः शत्रून्
कारे युद्धे वयं जयेम दूढ्यं दुःध्यः दुर्धियः पापबुद्धीन् अपि अभितिष्ठेम अभिनः स्यास्याम किंच वृत्रं शत्रुं नृभिः मरु
द्भिः सह हन्यामहि स्यामहत्वा शत्रुं श्रुपामच अग्निष्टोमादिकर्मभिश्च वर्धयमहि ततस्त्वं न अस्माकं धियः कर्माणि
प्राविः प्रकर्षेणरक्ष १३ अभ्रातृव्य इति हे इंद्र त्वं जनुषा जन्मनैव अभ्रातृव्यः व्यसपत्नः अनाअनियंतृकः अनापिः
बंधुवर्जितश्च सनादसि चिरादेव भ्रातृव्यादिवर्जितोसियचत्वं आपित्वं बांधवं इच्छसे इच्छसि तत्र युद्धे तु युद्धेनैव युद्धं कु
र्वन् एवं स्तोतॄणां सखाभवसीति १४ नकीरेवंतमिति हे इंद्र रेवंतं धनवंतं दानादिरहितं मानवं सख्याय सखिभावा
यनकिः विंदसे न भजसे स्फराभ्वः स्फरयाव स्तुराः नह्यभेताः नास्तिकाः ते त्वां पीयंति हिंसंति तान्नाश्रयसीत्यर्थः यदा
मानवस्य नदनुंदानादिराहित्यं समुहसि निराकरोषि य श्चत्वं कृणोषि करोषि आदित् अनंतरमेव पितेव सन् तेनहू
यसे १५ मातिअमानुरइति हे इंद्र तेतव स्वभूताः वयं तथा मा भूमय था तावतः त्वादृशाः त्वत्सदृशास्य देवस्य सख्यभू
तासः इंद्रेण सख्यं कुर्मइत्यजानंतः भूता जनाः अमातुरः सोमाभिषवमकुर्वन्तः तेगृहैः पुत्रपौत्रैः धनादिभिश्च सह
जीर्णाः भवंति तथा वयंमा अमातुरी भवाम कथं सचा क्र त्विग्भिः सह स्फुते अभिषुते सोमे वयं तु निषदाम निवासामः १६
॥ इतिषष्ठस्य द्वितीये तृतीयो वर्गः ॥ १६ ॥ मातेगोदत्रेति हे गोदत्र स्तोतॄणां गवादिदानशीलेंद्र ते तव स्वभूताः वयं राध

सोधना निभानिरराममा निगमाम त्वत्तो दानग्रहणा मभवाम किंच ते तव स्वभूता वयं धनं प्रयच्छामः कस्मात्तु चित मा रहाम
हि माग्रहीमः अपितु त्वत्तः एव धनं गृह्णीमः इत्यर्थः अर्यः स्वामी त्वं दृळ्हा चित् दृढान्यपि धनानि प्रमृश प्रकर्षेण अस्मासु स्था
पय किंच अभि आभिमुख्येन आभर आसमंतात्पोषयति तवदामानः दानानि नादभेनक श्चिदपि आदंभितुं शक्यते ॥
१७ इंद्रो वेति अत्र चित्रस्य दानं स्तौति चित्रो नाम राजा सरस्वतीतीरे यागं कृतवान् इंद्रार्थं तत्र मंत्रद्रष्टा ऋषिर्बहुधनला
भात् मत्यं एतावत् धनं कोवा प्रायच्छदिति विकल्पं ते दाशुषे इंद्रायहवींषि दत्तवते मर्त्याय इंद्रो वा घित् इंद्र एव किं खलु एता
वन्मघं महनीयं धनं ददिः प्रायच्छत् वा स्वभगा शोभनधनाः सरस्वती नदी वसु धनं ददिः किं प्रायच्छत् अथवा चित्र एत
न्नामकः हे राजन् त्वं वा इयत् एतावत् धनं मह्यं प्रादादिति १८ चित्रइदिति अनया चित्र एव प्रादादिति निश्चयकामापि
त् सहस्रं सहस्रसंख्याकं धनं अयुता अयुतानि च धनानि च ददत् प्रयच्छत् चित्र इत् चित्रनामैव राजा अन्यके यके
अन्याये न्ये राजकाः इतराजानः एवं सरस्वतीमनु सरस्वत्यास्तीरे तान् सर्वान् याचमानान् अयमेव चित्रराजा ततन
त् सनोतिदृष्टांतः पर्जन्यः इव यथा पर्जन्यः पृथिवीं वृष्ट्या तनोति प्रीणयति तथा हि अयं चित्रः सर्वान् धनैः प्रीणय
तइत्यर्थः ॥ ॥ इतिषष्ठस्य द्वितीये चतुर्थो वर्गः ॥ ॥ आ त्वमकृद्रत्यष्टादशर्चं द्वितीयं सूक्तं कण्वः सौभरिः ऋषिः आ
द्या तृतीय पंचम्यः बृहत्यः द्वितीया चतुर्थी षष्ठ्यः सतोबृहत्यः सप्तमी बृहती अष्टमी अनुष्टुप् नवमी दशमी द्विज्योति
षी एकादशी त्रयोदशी पंचदशी सप्तदश्यः ककुभः द्वादशी चतुर्दशी षोडशी अष्टादश्यः सतोबृहत्यः अश्विनौ देवते ॥
१ आ त्वमकृद्रत्ति हे अश्विनौ दशिष्ठं अत्यंत दर्शनीयं स्वं तं युवयोः रथं ऊतये रक्षणाय अद्य अस्मिन् यागदिने अह्व
ये सूर्यायां त्वयं वरे वरयितुं परं यं युवां अतस्थयुः आआभ्यधःसंरथं आहूयामीति शेषः आपूरणः २ पूर्वायुषमिति

हे सोभरे स्तमतिभिः कल्याणीभिः स्तुतिभिः अश्विरथं स्तुहि विविशिष्टं पूर्वयुषं पूर्वेषां स्तोतॄणां धनादिदानेन पोषकं
स्तहवं स्तुआह्वानं पुरुस्पृहं बहुभिः स्पृहणीयं स्तअं सर्वस्य रक्षकं वाजेषु पूर्व्यं संग्रामेषु अग्रतो गंतारं सच्चनावं
तं सर्वैः भजनवंतं विद्वेषसं शत्रूणां विशेषेण द्वेष्टारं अनेहसं केश्चिदपि अनुपद्रवं रथं स्तुहि इत्यन्वयः ३ इहत्येति
पुरुभूतमा अतिशयेन शत्रूणां भावयितारौ देवा देवौ दाश्वुषः हविर्दत्तवतो यजमानस्य गृहे प्रति गंतारौ रोगमनशी
लौ स्यातां अश्विना अश्विनौ युवां इह अस्मिन् कर्मणि अवसे रक्षणाय नमोभिः हविर्भिः अवर्धिना अवावानो अभिमु
खागच्छंतौ स्तकरामहे वयं स्तुकुर्मः ४ युयोरथस्येति अश्विनौ युवोः रथस्य एकं चक्रं परितो द्यां गच्छति अन्यद्द्वि
तं रथस्य स्वचक्रं ईर्मा इमौ सर्वस्यातयामिन याप्रेरको वां युवां इषण्यति गच्छति हे शुभस्पती उदकस्य पालयितारौ अश्वि
नौ वां युवयोः स्तमतिः कल्याणी मतिः अच्छ आभिमुख्येन अस्मान् आधावतु आगच्छतु दृष्टांतः धेनुरिव यथा नवप्रसू
ता गौः वत्सं प्रति पयोदानार्थं आगच्छति तद्वत् ५ रथोयद्इति हे अश्विना अश्विनौ त्रिवंधुरः वंधुरं सारथिस्थानं त्रिः
प्रकारबंधुरोपेतः हिरण्याभीशुः हिरण्मयाभ्यादिरज्जुः वां युवयोः यः रथः क्ष्मांतः सर्वत्र प्रसिद्धः सन् द्यावापृथिवी द्यावा
पृथिव्योपरिभूषति हे नासत्या अश्विनौ तेन पूर्वोक्तेन रथेन आगच्छतं अगच्छतं।। ।।इति षष्ठस्य द्वितीये पंचमो वर्गः।।
६ दशस्यंतेति हे अश्विनौ पूर्व्यं पुरातनं दिवि द्युलोके स्थितं उदकं मनवे एतन्नामकाय राज्ञे दशस्यंता प्रयच्छंतौ युवा
वृकेण लांगलेन यवं यवनामकं धान्यं कर्षथः पुनश्च तस्मै विलेखनं कुरुथः हे शुभस्पती उदकस्य पालयितारौ अश्विना
अश्विनौ ता तौ पूर्वोक्तलक्षणयुक्तौ वां युवां अद्य अस्मिन् यज्ञदिने सुमतिभिः प्रकर्षेण स्तवीमहि वयं स्तुमः ७ उप
न इति हे वाजिनीवसू अन्नधनवंतौ अश्विनौ ऋतस्य यज्ञस्य पथिभिः मार्गैः नः अस्माकं उपयातं आगच्छतं वृषणा धना
नां सेक्तारौ हे अश्विनौ त्रासदस्यवं त्रसदस्योः पुत्रं तृक्षिं एतन्नामकं एभिः यैः यज्ञमार्गैः महे महते क्षत्राय धनाय जिन्वथः

341
1915

प्रीणयथः एवं तैर्मार्गैः अस्मान् धनादिभिः प्रीणयितुं आगतमित्यर्थः ८ अयं वामिति नरा सर्वस्य नेतारौ हे वृषण्वसू वर्ष
णशीलधनवंतौ हे अश्विनौ वां युष्मदर्थं अद्रिभिः ग्रावभिः अयं सोमः सुतः अभिषुतः तस्मात् सोमपीतये सोमपानार्थं यु
वां आयातं आगत्य च दाश्वुषः हविर्दत्तवतो यजमानस्य गृहे यज्ञस्थाने सोमं युवां पिबतं ९ आहि रुहतमिति हे वृषण्वसू
वर्षणशीलधनौ अश्विना अश्विनौ हिरण्मये हिरण्मयरज्ज्वादियुक्ते कोशे आयुधादीनां कोशस्थाने रमणशीले रथे हि अ
वधारणे युवामेव आरुहतं आरोहणं कुरुतं ततः पीवरीः यावयित्वा इषः अन्नानि युंजाथां अस्मासु योजयतं १० या
भिः पक्थमिति हे अश्विनौ याभिः ऊतिभिः पक्थं एतन्नामकं राजानं अवथः रक्षथः याभिरूतिभिः अध्रिगुं राजानं
च अवथः याभिः ऊतिभिः बभ्रुं राजानं च विजोषिपसं विशेषेण सोमैः प्रीणयंतं ये एतान् सर्वान् पालनैः अवथः ता
भिः नः रक्षणैः मक्षु क्षिप्रं तूयं तूर्णं नः अस्मान् आगतं रक्षणार्थमागच्छतं किंच यत् आतुरं रोगादि सहितं अस्माकं
पुत्रादिकं प्रतिभिषज्यतं भैषज्यं कुरुतं।। ।।इति षष्ठस्य द्वितीये षष्ठो वर्गः।। ।।यदध्रिगावइति अध्रिगावः अधृत
धनाः कर्मसु त्वरमाणाः विपन्यवः मेधाविनः वयं अध्रिगू अधनगमनौ संग्रामे शत्रुवधार्थं त्वयोरेगच्छतौ अश्विना
अश्विनौ युवां अह्नादिवसस्य इदा चित् इदानीमेव प्रातःकाले गीर्भिः स्तुतिलक्षणाभिः वाग्भिः यत् यदा हवामहे युवां
आह्वयामः तदा ताभिः ऊतिभिः अस्मान् आयातमिति उत्तरत्र संबंधः ११ ताभिरायातमिति हे वृषणा वर्षणशीलौ अ
श्विनौ विश्वपक्षसा ज्ञात्मात्मकत्वेन नानारूपं विश्ववार्यं सर्वैः देवैः वरणीयं मे मदीयं हवं युष्मद्विषयमाह्वानं आभि
मुख्येन स्तुताभिः ऊतिभिः उपयातं युवां आगतं याभिः नरा सर्वस्य नेतारौ अश्विनौ इषा हवींषि इच्छंतौ मंहिष्ठा अति
शयेन धनानां दातारौ पुरुभूतमा बहूनां शत्रूणां अभिभवितारौ भवंतौ किविं कूपं प्रति याभिरूतिभिः उदकानि वावृ
धुः अवर्धयत कूपं पूरयित्वा युवां अभ्यावदनः ऋषिः उत्थापितः खलु ताभिरूतिभिः आगतं अस्मद्रक्षणार्थं आगच्छतं

भा॰प॰
४८

१३ ताविदेति नौ संयामि आयुधानि विस्तारयंतौ तौ पूर्व्यौ अश्विना अश्विनौ अह्नां अह्नां इदा चित् इदानीमेव प्रा
तःकाले वंदमानः अभिवादनं कुर्वन् सन् उपब्रुवे तयोः समीपे स्तौमि ततः तौ उ तावेव नमोभिः हविर्भिः ईमहे वयं धा
नादिकं याचामहे १४ ताविद्दोषेति शुभस्पती उदकस्य पालयितारौ रुद्रवर्तनी युद्धे रोदनशीलमार्गौ ता वित् ताववश्वि
श्विनौ दोषा दोषायां रात्रौ तावेव उषसि उषःकाले ता तावश्विनौ यामन् यामनि हवे अनिच सर्वेषु कालेषु वयं अश्विनौ आ
ह्वयामः एवं सति वाजिनीवसू अन्नधनौ हे रुद्रौ उग्रौ अश्विनौ मर्ताय मनुष्याय रिपवे नः अस्मान् परः परस्तात् मा अ
तिरव्यातं मा अभूतं शत्रवे अस्मान् मा कुरुतमित्यर्थः १५ आ सुग्म्यायेति वा अपि च सक्षणी सेवनीयशीलौ अश्विना अ
श्विनौ युवां सुग्म्याय सुखाय पि मर्त्ये सुगम्यं सुखं प्रातःकाले रथेन आवहतं ततः सोभरी सोभरिरहं हुवे युवां आह्वयामि
दृष्टान्तः पितेव यथा मम पिता आजुहाव तद्वदहमाह्वयामि॥ ॥इति षष्ठस्य द्वितीये सप्तमो वर्गः॥ ॥मनोजवसेति
हे मनोजवसा मनोवत् शीघ्रं गच्छंतौ वृषणा धनानां वर्षितारौ मदच्युता शत्रूणां च्यावयितारौ पुरुभोजसा बहूनां भो
क्तारौ अश्विनौ मक्षुंगमाभिः शीघ्रगच्छंतीभिः ऊतिभिः रक्षाभिः पूर्व्यभिः बहुभिः अस्मे अस्माकं अवसे रक्षणाय आरात् अन्
ति च तत् अंतिके एव भूतं भवतं १७ आ नो अश्वावदिति मधुपातमा अतिशयेन सोमस्य पातारौ नरा नेतारौ दस्रा सर्वैः
दर्शनीयौ हे अश्विनौ नः अस्माकं वर्तिः गृहं तत् अश्ववत् अश्वयुक्तं गोमत् गवादियुक्तं हिरण्यवत् सुवर्णादियुक्तं
कृत्वा आ यासिष्टं आ गच्छतं १८ सुप्रावर्गमिति सुप्रावर्गं शोभनप्रवर्जनं यस्य तत् सुवीर्यं शोभनवीर्यं सुष्टु वार्यं शो
भनं यथा भवति तथा सर्वैः वरणीयं रक्षस्विना बलवता पि अनाधृष्टं न भिभवनीयं धनं आ धीमहि त्वतो वयं धारया
मः वाजिनीवसू अन्नधनौ हे अश्विनौ वां युवयोः अस्मिन् आयाने अस्मद्गृहं प्रति आगमने विश्वा विश्वानि सर्वाणि वामा
नि धनानि आ धीमहि वयं लभामहे॥ ॥इति षष्ठस्य द्वितीये अष्टमो वर्गः॥ ॥ईळिष्वेति त्रिंशदृचं तृतीयं सूक्तं अश्व ४८

345
1915

पुत्रः विश्वमना ऋषिः उष्णिक् छंदः अग्निर्देवता १ ईळिष्वा हीति प्रतीव्यं शत्रुषु प्रतिगमनशीलमग्निं हि एवं ईळिष्व
हे स्तोतः स्तुतिभिः स्तोत्रं कुरु किंच चरिष्णुधूमं सर्वतः चरणशीलधूमजालं अगृभीतशोचिषं रक्षोभिः अग्रह्यमाण
दीप्तिं जातवेदसं जातप्रज्ञानं अग्निं यजस्व हविर्भिः पूजय २ दामानमिति उतापि च हे विश्वचर्षणे विश्वस्य ज्ञानेन
द्रष्टः विश्वमनः एतन्नामक ऋषे विस्पर्धसः विगतमात्सर्यस्य यजमानस्य रथानां रथादीनां दामानं दातारं एवंविध
मग्निं गिरा स्तुतिलक्षणया वाचा स्तुपेत्रं कुरु ३ येषामाबाध इति आबाधः शत्रूणां आभिमुख्येन बाधकः ऋग्मि
यः ऋग्भिः अर्चनीयः अग्निः येषां यजमानानां इषः अन्नानि रक्षश्च अन्नादि रक्षांश्च निग्नभे निगृह्णीते निगृह्य
च वह्निः हविषां वोढा स एवाग्निः उपविदा उपवेदनेन एते हवींषि देवार्थं न प्रयच्छंतीत्यत— नेन तेषामेव वसु धनं
विंदते लभते ४ उदस्येति दीदियुषः संदीप्यमानस्य तपुर्जंभस्य तापयितृदंष्ट्रस्य सुधृतः शोभनदीप्तिः गणश्रियः
हविरादानार्थं यजमानगणं श्रयति तस्य अस्य एतादृशस्य अग्नेः अजरं जरारहितं शोचिः तेजः उ — च्छात् उद्गतम
भूत् ५ उदतिष्ठति स्वध्वर शोभनयज्ञ तिहे अग्ने अभिख्या अभिमुखं गच्छंत्या बृहता बृहत्या महत्या भासा दीप्त्या
शुशुक्वनिः दीपनशीलः त्वं स्तवानः स्तोतृभिः स्तूयमानः सन् देव्या द्योतमानया रूपा ज्वालया उत्तिष्ठ तमः परिहारार्थं
उद्गच्छ उ प्रसिद्ध॥ ॥इति षष्ठस्य द्वितीये नवमो वर्गः॥ ६॥ अग्ने याहीति हे अग्ने आनुषक् आनुषक्तं यथा भवति त
था हव्या हव्यानि हवींषि जुह्वानः देवेभ्यः प्रयच्छन् त्वं सुशस्तिभिः शोभनैः स्तोत्रैः सह याहि देवानां हविःप्रदानार्थं गच्छ
यथा त्वं हव्यवाहनः हविषां वोढा देवानां दूतः बभूथ भवसि तथा जुह्वानः इत्यन्वयः ७ अग्निं व इति हे देवाः चर्षणी
नां मनुष्याणां होतारं होमनिष्पादकं पूर्व्यं पुरातनं वः युष्मत्संबंधिनं अग्निं हुवे आह्वयामि आहूय च त्वमग्निं
अया अनया सूक्तरूपया वाचा गिरा गृणे शंसामि किंच वः युष्मदर्थं तमुत्तमं वा अग्निं स्तुषे स्तौमि ८ यज्ञेभिरिति अद्भु

भा.ष.
३९

त ऋतुं बहुविधयज्ञं मित्रं न इव यजमानानां मित्रमिव स्थितं सुधितं हविर्भिः संतर्पितं यम ग्निं ऋतवानियज्ञं प्रतिजनेयजमा
निकपात्सु सामर्थ्येनियज्ञेभिः यज्ञैः सूदयंत अर्ध्ववदियः कामान् क्षारयंत्स्ये वयजमानस्यतमग्निस्तुपासिवध्व मितिउत्तरत्रसं
बंधः ९ ऋतावानमितिहे ऋतायवः यज्ञकामाः यजमानाः ऋतावानं यज्ञवंतं यज्ञस्यसाधनं एनं अग्निं नमसः हविषः पदेरुचा
निगिरा स्तुतिलक्षणया वा वाउपोन्नुन्नुवुः उपासवध्वं १० स्वानइतिसंयतः स्रुगादिभिः नियमिताः नो अस्माकं यज्ञासः
यज्ञाः अंगिरस्तमं अंगिरसां विशिष्टं मग्निमच्छाभिमुखं स्थान च यंतु गच्छतु याग्निः विस्तुमनुष्येषुहोताहोमनिष्पादकः स
न् आसर्वतः यशस्वितमः तम अग्निर्यं स्तिर च्वयः ॥ ॥इतिषष्ठस्यद्वितीयेदशमोवर्गः॥ ॥अग्नेन वस्येइतिअजरजा
जरारहितहे अग्ने इंधानासः दीप्यमानाः बृहतमहांतः स्येते सर्वगताः तव त्वदीयभागाः भाः रस्मयः वृषणः कामानांवर्षिता
रः संतः न विषीयवः बलमाचरंतोभवंतिदृष्टांत अश्वाः इव वृषणः रेतसः सेक्तारा अश्वाः यथाबलमाचरंतोभवंतितद्व
त् १२ स त्वन्म इति ऊर्जो अन्नानांपते स्वामिन् हे अग्ने सः तथाविधः त्वं नः अस्मभ्यं सुवीर्यं शोभनवीर्योपेतं रयिं धनं रा
स्वदेहि नः अस्माकं तोके पुत्रे तनये पौत्रे वर्तमानधनं समत्सु संग्रामेषु च यत् रक्षितव्यं धनं तच्च यावप्रकर्षेण रक्ष आपू
रणः १३ यद्वावविश्पतिरिति विश्पतिः प्रजानां पालयिता शितः हविर्भिः तीक्ष्णीकृतः सः अग्निः सुप्रीतः सुष्टु प्रीतः सन् म
नुषः मनुष्यस्य विशिनिवेशने गृहे यदेयदा स्तुवर्तते तदानीं अग्निः विश्वेत विश्वान्येव तस्य बाधकानि रक्षांसिप्र तिष ३९
यति हिनस्ति उप्रसिद्धौ १४ श्रुष्ट्यग्न इति हे वीर शत्रूणां विनाशयिता विश्पते विशां पालयितः हे अग्ने नवस्य इदानीं क्रिय
माणत्वात् नूतनं मे मदीयं स्तोमस्य स्तोत्रशस्त्रादिकं श्रुष्टि श्रुत्वा मायिनः मायाविनः नक्षसः राक्षसान् तपुषा तापकेन
तेजसा निदह नितरां भस्मीकुरु १५ न तस्येति मर्तः मनुष्यः रिपुः शत्रुः मायया मायितस्य जनस्य नेशीत ईश्वरो न भ
वति यः जनः हाव्यदातिभिः हविषां दातृभिः ऋत्विग्भिः अग्नये दाशात् हवींषि प्रयच्छति तस्य रिपुर्नास्तीत्यर्थः॥ ॥

361
1411

॥इति षष्ठस्य द्वितीये एकादशो वर्गः॥ ॥व्यश्वस्त्वेति उक्षण्युः धनानां सेक्तारं आत्मन इच्छन् व्यश्वः ऋषिः एतन्नामकः ममपि
ता वसुविदं वसूनामालंभकं त्वां त्वां अप्रीणात् धनादिप्राप्त्यर्थं हविर्भिः अतोषयत् तथा वयमपि महोमहत्तेरायेधनायत
मु यथाविधमेव त्वां त्वां समिधीमहि सम्यक् आज्यादिभिः हविर्भिः दीपयेम १७ उशना काव्य इति हे अग्ने काव्यः कविपुत्रः
उशनाः एतन्नामकः ऋषिः मनवे राज्ञे तस्य सरूद इत्यर्थः आयजि आभिस्त्वे नयष्टारं जातवेदसं जातप्रज्ञं त्वां त्वां पुनः त्वाश
न्दः आदरार्थः होतारं होमनिष्पादकम सादयत् नितरां आवेशयत् १८ विश्वेहित्वेति हे अग्ने विश्वे सर्वे देवासः देवाः स
जोषसः संगताः संतः नः अस्माकं हवींषि आनयतीति विचार्य त्वामेव हुतं हविषां वोढारं दूतं अकृत आकार्षुः ततः दे दे
व द्योतमान अग्ने प्रथमः देवानां मुख्यस्त्वं ततः त्वं श्रुष्टी क्षिप्रं यज्ञियः देवानां हविर्दातृत्वेन यज्ञार्हः अभवः स्याः १९ इमं घा
वीर इति वारः कर्मणि समर्थः मर्तः यजमानः अमृतं मरणधर्मरहितं रहितं पावकं पापानां शोधकं कृष्णवर्तनि कृष्णमार्गं
विहाय संमहांतं इमं घ इमं मेव अग्निं दूतं देवानां कृण्वीत अकार्षीत् २० तं हुवेमेति यतस्रुचः गृहीतस्रुचः वयं सुभासं
शोभनदीप्तिं शुक्रशोचिषं दीपनशीलतेजस्कं विशां ईडयं प्रजानां स्वामिनं अजरं जरारहितं प्रत्नं पुरातनं तं तथावि
धमग्निं हुवेम आह्वयामः॥ ॥इति षष्ठस्य द्वितीये द्वादशो वर्गः॥ २१॥ यो अस्मा इति यः मर्तः मनुष्यः हव्यदातिभिः
हविर्दातृभिः ऋत्विग्भिः अस्मै अग्नये आहुतिं अविधत् विदधाति स मनुष्यः भूरि पोषं बहुपोषं धनादिभिः पोषणं वी
रवत् पुत्रपौत्रादियुक्तं यशः कीर्तिं च धत्ते धास्यति तस्मै धनादीनि प्रयच्छतीत्यर्थः २२ प्रथममिति प्रथमं देवानां प्रधा
नभूतं जातवेदसं जातप्रज्ञं पूर्व्यं पुरातनं एतादृशमग्निं यज्ञेषु अग्निष्टोमादिषु हविष्मती सोमादिहविर्युक्ता स्रुक् वृ
नम सा स्तोत्रेण सह प्रत्येति अग्निं प्रतिगच्छति २३ आभिर्विधेमेति विश्वमनो नामकाः वयं ज्येष्ठाभिः प्रशस्यतमाभिः
मंहिष्ठाभिः पूजतमाभिः आभिः सूक्तरूपाभिः मतिभिः स्तुतिभिः शुक्रशोचिषे ज्वलत्तेजसे अग्नये विधेम वरिवरेमव

त यथा व्यश्वः अस्माकं पिता अग्निं स्तुतिभिः पर्यचरत् तद्वत् वयमपि परिचरेम २४ नूनमर्चेति हे वैयश्व व्यश्वस्य पुत्र वि
श्वमनो नामक ऋषे विहायसे महते दम्याय रेभ गृहे अरणीभिः मथ्यमानत्वेन भूवाय अग्नये नूनं संप्रति स्तोमेभिः स्तोमैः अ
र्च स्तुहि दृष्टांतः स्थूरयूपवत् यथा स्थूरयूपो नामा ऋषिः एनमग्निं आनर्च तद्वदर्चेत्यर्थः २५ अतिथिमिति विप्राः यजमा
नाः मानुषाणां मनुष्याणां अतिथिं अतिथिवत्पूज्यं वनस्पतीनां सूनुं अरणीभिः जायमानत्वात् तेषां सूनुं प्रत्नं पुरातनं ए
वंविधमग्निं अवसे रक्षणाय ईळते स्तुतिभिः स्तुवंति ॥ ॥इति षष्ठस्य द्वितीये त्रयोदशो वर्गः॥ ॥२६ महो विश्वा
नितिहे अग्ने महः महतः विश्वान् सर्वान् स्तोतॄन् अभि अभितः त्वं नमसा स्तूयसे तथा बर्हिषि अधि निषत्सि निषीद तथा म
नुष्यसंबंधीनि हव्यानि हवींषि अभि अभितः तानि स्वीकर्तुं निषीद २७ वंस्वानइति हे अग्ने वार्या वरणीयानि पुरुपुरू
णि बहूनि गवादीनि नः अस्मभ्यं वंस्व प्रयच्छ तथा पुरुस्पृहः बहुभिः स्पृहणीयं रायो धनं किंविशिष्टं सुवीर्यस्य शोभनवीर्योपे
तं प्रजावतः पुत्रपौत्रादिसहितं यशस्वतः कीर्तिमत्तद्धनं नः अस्मभ्यं वंस्व प्रयच्छ २८ त्वं वरो इति वरो सर्वैः वरणीय युवि
ष्ठ युवतम हे वसो वासक अग्ने त्वं सुषाम्णे शोभनसामवते शश्वते बहवे जनाय प्रादुर्भूताय स्तोतॄणां सदा सर्वदा रातिं धनादि
कं चोदय प्रेरय २९ त्वं हि सुप्रतूरिति हे अग्ने त्वमेव सुप्रतूः स्तोतॄणां धनादिकं सुष्ठु प्रदाता असि प्रयच्छसीत्यर्थः अत ए
व गोमतीः पश्वादियुक्तानि इषः अन्नानि महः महतः रायः धनस्य मध्ये सानिं दियं धनं वनः अस्माकं त्वं अपावृधि अपावृणु
प्रयच्छेत्यर्थः ३० अग्ने त्वमिति हे अग्ने त्वं यशाः देवानां मध्ये यशस्वी असि भवसि अत एव त्वं ऋतावाना ऋतावानौ सत्यवंतौ २०
संम्राजा सम्यक् राजमानौ पूतदक्षसा शुद्धबलौ मित्रावरुणा मित्रावरुणौ अस्मिन् कर्मणि आवह आहूय प्रापयेण कर्मणि अ
ग्ने मित्रावरुणसहितस्त्वं असीति सूचयति॥ इति षष्ठस्य द्वितीये चतुर्दशो वर्गः॥ ॥ सखायइति त्रिंशदृचं चतुर्थं सूक्तं व्यश्व
पुत्रः वैयश्वनामक ऋषिः उष्णिक् छंदः अंत्यानुष्टुप् इंद्रो देवता अंत्यास्तिस्रः सुषामाख्यस्य राज्ञः पुत्रस्य वरुनाम्नः दानको

347
1915

वताका १ सखायइति सखायः मित्रभूताः हे ऋत्विजः वज्रिणे वज्रवते इंद्राय ब्रह्म स्तोत्रं आशिषामहि वयं आशास्मः तत्र
वः युष्माकं अर्थाय नृतमाय सर्वेषां नेतृतमाय धृष्णवे शत्रूणां धर्षणशीलाय तस्मै इंद्राय अहमेव सु सुष्ठु स्तुषे स्तौमि उ पूरणः॥
२ शवसाहीति हे इंद्र त्वं शवसा बलेन श्रुतः प्रसिद्धः असि भवसि वृत्रहत्येन वृत्रस्य हननेन वृत्रहा इति प्रसिद्धः भवसि
शूर सौर्यवन् हे इंद्र मघोनः मघवतः धनवतः पुरुषान् मघैः त्वदीयैः धनैः अति अतिक्रम्य दाशसि स्तोतृभ्यः अस्मभ्यं प्र
यच्छसि ३ सनः स्तवानइति हे इंद्र सः तथाविधः त्वं स्तवानः अस्माभिः स्तूयमानः सन् चित्रश्रवस्तमं अतिशयेन नाना
विधानोपेतं रयिं धनं नः अस्मभ्यं आभर देहि हे हरिवः अश्ववन् हे इंद्र यः त्वं निरेके चित् निर्गमने एव वसुः वासयिता भवसि
तवायुधनिर्गमनादेव शत्रवः पलायंते खलु किंच त्वं ददिः धनानां दाता भवसि ४ आ निरेकइति हे इंद्र उत अपि च प्रियंप्रि
यतमं निरेकं धनं जनानां स्तोतॄणां अस्माकं आदर्षि विवृतं कुरु विवृत्य च धृष्णो धर्षणशील हे इंद्र स्तवमानः स्तोतृभिः अ
स्माभिः स्तूयमानः सन् धृषता धृष्टेन मनसा सह आभर तद्धनं अस्मभ्यं देहि ५ न ते सव्यमिति हे हरिवः अश्ववन् इंद्र
आसुराः संग्रामे अभिमुख्येन कर्तारः प्रतियोद्धारः गविष्टिषु पणिभिः अपहृतानां गवामन्वेषणेषु निमित्तेषु तव सव्यं हस्तं न वरं
तेन निवारयंति तथा दक्षिणं हस्तं च न निवारयंति किंच परिबाधः परितो बाधमानाः वृत्रादयः आसुराः तव सव्यदाक्षिणहस्तौ
न निवारयंति ॥ इति षष्ठस्य द्वितीये पंचदशो वर्गः॥ ६ ॥ आ त्वा गोभिरिवेति हे अद्रिवः वज्रवन् इंद्र गीर्भिः स्तुतिलक्षणाभिः
वाग्भिः त्वां आ ऋणोमि प्राप्नोमि दृष्टांतः गोभिरिव यथा गोपालः गोभिः व्रजं गोष्ठं गच्छति तद्वत् त्वां स्तुतिभिः प्राप्नोमी
त्यर्थः ततः त्वं जरितुः स्तोतुर्मनः कामं धनादिविषयं आपृण आपूरयस्म ७ विश्वानीति हे वृत्रहंतम अतिशयेन वृत्रस्य
हंतः उग्र उद्गूर्णबल प्रणेतः स्तोतॄणां प्रकर्षेण धनादेः नेतः वसो वासयितः इंद्र नः मम विश्वमनसः एतन्नाम्नः वि
श्वानि सर्वाणि स्तोत्राणि धिया मनसा सु सुष्ठु अधिगहि अधिगच्छ वयंतइति हे वृत्रहन् वृत्रस्य हंतः शूर बलवन् पुरुहू

भा॰ष॰
२१

न बहुभिः आहूतनइंद्रनव्यसः नवतरस्याईस्यस्पृहणीयंराधसः शमादिःसंसाधकं तत्वदीयंअस्यनृसीः इंदंपरिदृश्यमानंध
नं वयंविश्वमलंकमहि ९ इंद्रयथेति हेनतोसर्वस्यां नर्याभिनयावर्तयितःइंद्र तेत्वदीयंशवः बलंयथाअपरीतंअस्तिवा
त्रुभिःअव्याप्तंभवति क्षिप्रसिद्धो नर्यादिपुरुहूतबहुभिःआहूतंद्रादाशुषहविर्दत्तवतेयजमानायरातिःधनादिदानंअम
र्त्यशत्रुभिःअहिंसितंभवति त्वत्तो लब्धं यजमानस्यधनंशत्रवोनहिंसंति १० आवृषस्वेति हे महामहतिशयेन सर्वैः
स्तुत्य शत्रुभिःअहिंसितं भवतित्वत्तो लब्धं यजमानस्यधनंशत्रवो नहिंसंति आवृषस्वा स्वादिरमासिंच सोमंपि
पृशनीयनृतमनेतृतम इंद्रमहेमहतेराधसेशत्रुधनानां साधकाय बलाय बलार्थंआवृषस्व स्वादरमासिंच सोमंपि
बेत्यर्थः हेमघवन्धनवन्इंद्र सोमपानेनमत्तः सन्हदृढा विन्दहत्वा निपरःअवाधितान्यपिशत्रुपुराणिमघत्तयधना
नीलाभायत्वदारय॥ ॥इतिषष्ठस्य द्वितीयेपाउशोवर्गः॥ ११॥ नअन्यत्रेति हेअद्रिवः वज्रवन् इंद्र त्वंधनवान् दाता
चेति अपरिज्ञापनः अस्मदीयानि आशसः आशंसनानिअभिलाषाः त्वत्तः अन्यत्रदेवादौ नूचित्पुराजग्मुः आग
तवन्त तत्फलेनालंतनइदानीं त्वंधनवान् दानशील इति अस्माभिज्ञानं अतएव हे मघवन्इंद्र नवत्वदीयंनतशत्रुपु
रविदारणलब्धंधनंऊतिभिः त्वद्रक्षणैः नःअस्मभ्यं शग्धिदेहि १२ नत्वेति हेनतोनर्तयितः गिर्वणः गीर्भिः स्तुति
भिः वननीय संभजनीयेंद्रराधसे अनापरायधनाययुम्नायद्योतमानाय शवसे बलाय बलवतव तोः त्यंनहिविंदामिनल
सिअंगप्रसिद्धे १३ एंदुमिंद्रायेति हेऋत्विजः इंदुंस्यंदनशीलं सोमं इंद्रायइंद्रार्थंआसिंचत आश्रयणंद्रवणं सिंचनंकुरु
त अभिषुतेत्यर्थः ततः सोम्यंसामममयंमधुमधुकरं सोमरसंपिबातिपिबतुपीत्वाचसः इंद्रःमहित्वनामहत्वेनराधसाअ २१
न्नेन सरूधनादिकं स्तोतृभ्यः प्रचोदयाति प्रकर्षेणचोदयति १४ उपोहरिणामिति हरीणां हरितवर्णानां अश्वानां पतिं पाल
यितारं दक्षंवर्धकं स्वबलं एवंतेमरुतः योजयंतं एतादृशं इंद्रं त्वां उपोअब्रव स्तोत्रं करवाणि अश्वस्य व्यश्वपुत्रस्य स्तव
तः स्तोत्रं कुर्वतः मम संबंधिनीं त्वद्विषया स्तुतिं नूनं संप्रतिश्रुधिशृणु १५ नह्यंगेति हे इंद्र त्वं त्वत्तः त्वत्तः पुरा पूर्वं वीरतरः

347
1915

सामर्थ्यवान् कश्चित् नहिनजज्ञेनजातः खलुअंगप्रसिद्धौ त्वमेव सामर्थ्यवान् जातः इत्यर्थः किंच त्वत्तो पिरायाधनेनसम
र्यः नकिः नकश्चिदस्ति तथा एव याशत्रुपुराणि प्रतिगमनेन त्वत्तोधिको न जातः किंचमंदना स्तुत्या च त्वदधिको न जातः न
पूरणः॥ ॥इतिषष्ठस्य द्वितीये सप्तदशो वर्गः॥ ॥१६॥ एदुमध्वइति हे अध्वर्यो अध्वरस्य नेता ऋत्विक् सदावृधः सर्वदा
वृद्धिमतः मृध्वः मदकरस्य अंधसः सोमलक्षणस्यान्नस्य मदिंतरं अत्यर्थं मादयितृतमं सोमरसमेव आसिंच इंद्रार्थंए
तवाउअयमेवेंद्रःवीरः स्तवते हि स्तोत्रशस्त्रादिभिः स्तूयते खलु तस्मात् आसिंचइतिसमन्वयः १७ इंद्रस्थातरिति हे
हरीणां स्थातः अश्वानां अधिष्ठातः इंद्र ते त्वदीयेपूर्व्यस्तुतिं पूर्वैः ऋषिभिः कृतां स्तुतिं नकिः नकश्चित् शवसा बलेन उदानं
शव्याप्नोति किंच मंदनास्तुत्या त्वदीयां स्तुतिं नकश्चित् अतिक्रामति १८ तंवोवाजानामिति अप्रायुभिः कर्मसुअप्रमत्तैः ना
व्यंदेवंगच्छति एवंविधं मनुष्य सुक्तैः यज्ञेभिः यज्ञैः वावृधेन्यं वर्धनीयं वाजानामन्नानांपतिं स्वामिनं वः युष्मदीयंतंताद
शंइंद्रं श्रवस्यवः वयं अन्नकामाः संतः अहूमहि आह्वयामः १९ एतोन्विति हे सखायः ऋत्विजः तु क्षिप्रं एतो आगच्छतैव कि
मर्थंस्तोम्यंस्तोमार्हं नरं सर्वस्य नेतारं तमिंद्रंस्तवामत्तस्य स्तोत्रं करवाम यः इंद्रः एकः इत् असहाय एव सन् विश्वाः कृष्टीः सर्वाः
शत्रुसेनाः अभ्यस्ति अभिभवति तं स्तवमेति शेषः २० आगोरुधायेति आगोरुधाय गोस्तुतिः रुणद्धीति गोरुधः नगोरुधाय
अगोरुधायगोस्तुतिं प्रज्वणेगविषिस्तोत्राणिइच्छते युक्षाय दीप्यमानायेंद्राय दध्यं दर्शनीयं घृतात् मधुनश्च स्वादीयः स्वादु
तरं वचः स्तोत्ररूपं वाक्यं वोचत ब्रूत॥ ॥इतिषष्ठस्य द्वितीये उष्टादशो वर्गः॥ २१॥ यस्येति यस्य इंद्रस्य नवीर्याणि वीर्याणि वृत्रह
ननादिरूपाणि सामर्थ्यानि अभिता निइयत्तारहितानि भवंतितथायस्येंद्रस्यराधो धनं शत्रुभिः न परिएतवे प्राप्तुं न शक्यं भ
वतिअतएवास्य दक्षिणा धनदानं विश्वं अभि अस्ति सर्वं स्तोतृजनं अभितो भवति दृष्टांतः ज्योतिर्नज्योतिः अंतरिक्षं यथांत
रिक्षं सर्वलोकं पिधाय तिष्ठति तद्वत् स्तोतृजनं धनदानेन पिधत्ते इत्यर्थः २२ स्तुहीति हे विश्वमनः अन्नार्मिकंश्चिदपिअहि

स्यं अत एव वाजिनं बलवंतं यमं स्तुतिभिः स्तोतृभिश्च नियतव्यं एतादृशमिंद्रं स्तुहि दृष्टांतः व्यश्ववत् यथा व्यश्वो नाम त
वपिता इंद्रं अस्तौत् तद्वत् स्तुहीत्यर्थः स्तुतश्चेत् अर्यः स्वामी इंद्रः दाशुषेहविर्दत्तवते यजमानाय मंहमानं पूज्यमानं गयं
धवि विविधं दद इति तस्मात्त्वं धनलाभाय स्तुहीत्यर्थः २३ एवा नूनमिति हे वैयश्व व्यश्वस्य पुत्र विश्वमनः चरणी नाम
नुष्याणां देदिष्टितानां नवानां प्राणानां दशमं दशासंख्यापूरकं एतादृशं अत एव नवं स्तुत्यं स्तुविद्धांसं सर्वे जानंतं चक्रं
भयो भयः कार्येषु सर्वैः नमस्कर्तव्यं एवंविधं इंद्रं एवं नूनं इदानीं उपस्तुहि समीपे स्तुहि २४ वेत्थाहीति हे वज्रहस्त इंद्र
निर्ऋतीनां रक्षसां परिवर्जनं परिवर्जनं हि त्वमेव वेत्थ जानीषे दृष्टांतः अहरहः शुंध्युः प्रकाशकृत आदित्यः प्रतिदिवसं
प्रतिपदामिव पक्षिणामिव स्यादयेन पक्षिण्यं परिवर्जनीयं स यथा करोति तद्वत् त्वमपि इंद्र स्वबलेन प्रकाशमाने सति श
त्रवः पलायनं तेइत्यर्थः २५ तदिंद्रेति हे इंद्र तत् अवः तत् रक्षणं अस्मभ्यं आभर कुरु हे दंसिष्ठ अत्यंतं दर्शनीय इंद्र
कृत्वने कर्म कुर्वते यजमानाय येन पालनं कृथाः तत् रक्षणं आभर किंच कुत्साय कुत्सनामकाय राजर्षये द्विता द्विविधा
द्विः प्रकारेण शिश्नथः श्नथिशब्दं शुष्णं अवधीः तस्मै द्विधं पालनं कार्षीः इत्यर्थः तत् रक्षणं अस्मभ्यं निचोदय अत्यर्थं प्रेरय
॥ ॥इति षष्ठस्य द्वितीये एकोनविंशो वर्गः॥२६॥ नु मुत्वेति हे दंसिष्ठ दर्शनीयेंद्र नव्यं स्तोतृभिः स्तोतव्यं तमुतादृश
मेवात्वां नूनं इदानीं ईमहे किमर्थं सन्यं सेसन्यासार्थं याचामहे इति शेषः एतादृशः त्वं नः अस्माकं विश्वाः सर्वाः अभि
मातीः शत्रुसेनाः सक्षणिः सहनशीलः अभिभवनशीलो भवति २७ य ऋक्षादिति यः इंद्रः ऋक्षात् ऋक्षात् मनुष्यान् क्ष
णोति तस्मात् रक्षसो राक्षसात् अंहसः पापरूपात् उपद्रवात् मुंचत् मुंचति राक्षसः एनं न बाधते किंपुनः हंतीत्यर्थः
वा अपि च यः इंद्रः सप्तसिंधुषु गंगादिनदीषु वर्तमानानां स्तोतॄणां आर्यात् धनादिकं भरयेत् प्रत्यक्षः हे तुविनृम्ण ब
हुधनेंद्र दासस्य उपक्षपयितुं रक्षसः वधः हननसाधनमायुधं नीनमनमय॥ २८ यथा वर इति हे वरो वरुनाम

व राजन् रुशमेषु सुषामेषु षामाख्यं राजानं स्वपितरमुद्दिश्य तस्यां तम लोकप्राप्त्यर्थं सनिभ्यः भिक्षमाणेभ्यः रयिं धनं
यथा पुरा अवहः प्रापितवानसि अतः एवं इदानीं व्यश्वेभ्यः अश्वपुत्रेभ्यः अस्मभ्यं धनमावह हे स्पार्ह शोभन धन
युक्त वाजिनीवति अन्नवति उषः त्वं च अस्मभ्यं धनं प्रयच्छ वरोः वहुधनदानात् तस्यैव स्तुतिः २९ आ नार्यस्येति नार्यस्य
नरो हितो नर्यः तस्यापत्यं नार्यः तस्य सोमिनः सोमवतो यजमानस्य वरोः दक्षिणादानं व्यश्वान् व्यश्वपुत्रान् अस्मान् एतु
आगच्छति किंच स्थूरं स्थूलं शतवत् सहस्रवत् शतसहस्रधनयुक्तं राधः अन्नं च अस्मान् आगच्छतु ३० यत्त्वा पृच्छादि
च्छित पृच्छात् पृच्छति ईजानः इष्टवान् वरुः कुहयाकृते कुहयाकृत इति श्रुतौ तिष्ठतीत्यत दिदृक्षया भिलक्षण प्रवर्तैः जिज्ञासुभिः पुरु
नशत्रूणां आवरकः गोमतीं एतन्नामकां नदीं नद्याः तीरं अवतिष्ठतीति त्वं कथयसि॥ ॥इति षष्ठस्य द्वितीये विंशोव
र्गः॥ ॥तावामिति चतुर्विंशत्यर्चं पंचमसूक्तं व्यश्वपुत्रः वैयश्वनामकः ऋषिः उष्णिक् छंदः दशस्याद्या उष्णिक् गर्भा षड्
सप्तैकादश्या उष्णिकृगर्भा तिततल्लक्षणोपेतत्वात् दशम्येकादशी द्वादशः वैश्वदेव्यः शिष्टामित्रावरुण देवताकाः विनियो
गो लैंगिकः १ तावां विश्वस्येति हे मित्रावरुणौ विश्वस्य सर्वस्य लोकस्य गोपा गोपापितारौ देवादेवौ देवेषु मध्ये यज्ञि
ता याय ज्ञार्हौ तातौ तादृशौ वां युवां हविःप्रदानार्थं यजमानं भजथः अत एव हे विश्वमनः ऋतावानाः सत्यवंतौ पूतदक्षसा शु
द्धबलौ मित्रावरुणौ यजसे हविर्भिः पूजयसि २ मित्रा तनेति सुक्रतुः शोभनकर्मा यः वरुणः मित्रा च मित्रावरुणौ कीदृ
शौ तना तन्वंतिकुमुदादिना तना निधना निवनवार्थे स सारथ्यो नेतारौ सना तु विरादेष सुजाता शोभनजन्मानौ तन
या अदितेः पुत्रौ घृतव्रता धृतकर्माणौ यजस इति पूर्वेण समन्वयः ३ ता मातेति विश्ववेदसा सर्वधनौ प्रमहसा प्रकृष्ट
तजस्कौ तातौ मित्रावरुणौ मही महती ऋतावरी सत्यवती माता देवमाता अदितिः जजान जनयामास किमर्थं असुर्या

भा॰ष॰
२३

यअक्रूराणांहंत्रे ४ महांतेति महांतामहांतौ संम्राजा आसम्यक् दीप्यमानौ अक्रूरा बलवंतौ ऋतावाना सत्यवंतौ मित्रावरु
णाभित्रावरुणौ देवौ हे यजमान लोकशास्त्रादिना महांतं करां पयुंअपोषतः स्वदीप्त्या प्रकाशमानः ५ नयातेति महः महतः शवस
बलस्य नप्याप्तः नपातौ पालयितारौ सर्वस्यवेगस्य सुक्रतू शोभनकर्माणौ सुप्रदानौ प्रसृतधनादिदानौ मित्रा
वरुणौ इषः अन्नस्य पात्यनिवासस्थाने अधिक्षितः अधिवसतः॥ ॥इति षष्ठस्य द्वितीये एकविंशो वर्गः॥ ॥संम्राडा
भूतीति हे मित्रावरुणौ युवां दानुमतीः बहुदानयुक्ताः इषः अन्नानि संयमभ्युः अस्मासु संयच्छतं तथा दिव्याः दिव्यानि दिविभवा
निपार्थिवाः पृथिव्यां भवानि इषः अन्नानि संयच्छतं वृष्टिभावे कथमन्नं लभ्यत इति चेत् तदुच्यते नभस्वतीः उदकव
त्यः वृष्टयः वां युवां आचरंतु उपतिष्ठंतु ७ अधियेति यौ मित्रावरुणौ बृहतः दिवः द्योतमानान् देवान् अधिपश्यतः
दृष्टांतः यूथेव यथा वृषभः गोयूथानि रंतुं अभिअभिमुखं पश्यति तद्वत् स्ववीर्येण क्रूरान् हत्वा देवान् मोदयितुं पश्यतः
इत्यर्थः कीदृशौ ऋतावानासत्यवंतौ संम्राजा आसम्यक् दीप्यमानौ नमसेह वियेहिताहितौ प्रियौ ८ ऋतावानेति ऋतावा
नासत्यावंतौ सुक्रतू शोभनकर्माणौ मित्रावरुणौ साम्नाभ्याय साम्ना अर्यंभिषदतुः न्यसीदतां घृतव्रतौ धृतकर्माणौ
त्रियावलयंतौ क्षत्रं बलं आचातुः आनशाते व्याप्नुतः इत्यर्थः ९ अक्ष्णश्चिदिति अक्ष्णश्चित् चक्षुषोपि पूर्वं गातुवित्तरा
मार्गवित्तमौ अनिरायेन मार्गवित्तमौ मित्रावरुणौ निमिषंतास्त्वेतिमेषयंतौ स्वस्वकर्माणि निधिरा चिरंतनौ अतुल
जिनअयेः तेअवयुः सरेन बहुसा आसतेअसीवनिचित्सतुः पूजितौ भवतुः चित् अवधारणे १० उतनोइतिउत
विश्वेदेवाश्योतनशीला अदितिः मित्रावरुणयोः माता नः अस्माकं रक्षतु नासत्यास्त्यवंतौ अश्विनौ उरुष्यतां रक्षतां इ
दूरावसः अतिशयेन वेगवंतः मरुतः सुरुष्यंतु अस्मान् पालयंतु॥ ॥इति षष्ठस्य द्वितीये द्वाविंशो वर्गः॥ ११॥ तेनोनाव
मिति हे सुदानवः शोभनदानाः मरुतः आरिष्यंतः केनाप्यहिंसिताः ते नाहवाः युयं अस्मदीयां नावं यज्ञियां नावं दिवा

२३

नक्तं च उरुष्यत पालयत न तौ वयं यामुभिः युष्मदीयैः पालनैः निसचेमहि नितरां समवेताः भवेम १२ अघ्नत इति अरिष्यंतः
केनापि अबाधिताः वयं अघ्नते स्तोतॄणां यष्टॄणां वा हिंसकाय सुदानवे शोभनदानाय विष्णवे व्यापकाय एवन्नामकाय देवाय
स्तुतिं कुर्मः प्रत्यक्षः हे स्वपावन् स्वयमेव असहायः संन् संग्रामे याति इति स्वयावान् सिंधोः स्तोतॄन् प्रतिधनानां स्यंदनशील वि
ष्णो पूर्वचित्तये पूर्वं प्रारब्धकर्मणे यजमानाय तदर्थं अश्रुधि अस्माभिः क्रियमाणां स्तुतिं त्वं शृणु १३ तद्वार्ममिति वरिवं गुरु
तरं गोपयत्यं सर्वेषां रक्षकं वार्यं सर्वैः सवनीयं तत् धनरूणीमहे वयं संभजामहे यद्धनं मित्रः सर्वेषां मित्रभूतः वरुणः शत्रू
णां वारयिता अर्यमा सर्वदा गच्छन् एवन्नामका स्त्रयो देवाः पांति पालयंति यद्धनं अस्मदीयस्य धनस्य रक्षकाः भवंतीत्यर्थः
१४ उतनइति उत अपि च अपां उदकानां सिंधुः स्यंदनशीलः पर्जन्यः नः अस्मदीयं तद्धनं रक्षतु तद्देव मरुतश्च पालयंतु अ
श्विना अश्विनौ तद्धनं पालयतां तथा इंद्रः विष्णुश्च मीढ्वांसः कामानां सेक्तारः एते सर्वे देवाः सजोषसः संतः अस्मदीयधनं
रक्षंतु १५ ते हि ष्मेति वनुषः वननीयाः संभजनीयाः नरः नेतारः ते हि ष्म ते खलु देवाः भर्णयः क्षिप्रगमनाः संतः कयस्य
चिनु कस्य चित् शत्रोः अभिमातिं अभिमानं प्रति घ्नंति प्रतिकूलं यथा भवति तथा हिंसंति दृष्टांतः तिग्मं न तीक्ष्णं जवेन ग
च्छन् क्षोदः उदकं अग्रजः स्थितं वृक्षं उन्मूलयति तद्वत्॥ ॥इति षष्ठस्य द्वितीये त्रयोविंशो वर्गः॥ १६॥ अयमेक इति विश्पतिः
विशां पालयिता मित्रावरुणयोः एक अयं मित्रः पुरूणि बहूनि उरूणि च द्रव्याणि इत्था इत्थं विचष्टे स्वतेजसा पश्यति तस्य
मित्रस्य व्रतानि कर्माणि हे देवाः वः युष्मदर्थं अनुचराम सि अनुचरामः कुर्म इत्यर्थः १७ अनुपूर्वाणीति साम्राज्यस्य सा
म्राज्यवतः वरुणस्य पूर्वाणि पुरातनानि ओक्या ओकः गृहं तस्मै हितानि कर्माणि वयं सश्चिम अनुगच्छेम कुर्मः मित्रस्य व्र
ता व्रतानि कर्माणि दीर्घश्रुत् दीर्घश्रुतः अतिशयेन प्रसिद्धस्य सश्चिमेति १८ परियइति यः मित्रः दिवः पृथिव्याः द्यावापृथि
व्योः अंतान् अंतरान् रश्मिना स्वतेजसा परिबभूव परिमिनोति तयोः अंतरान् स्वरश्मिना भासयतीत्यर्थः स एव उभे रोदसी द्या

353
1715

भा·प·
२४

वा पृथिव्यो महित्वा स्वमहिम्ना आपप्रौ आ समंतात् पूरयति उद्यच्छति १९ उदुष्य इति सूर्यः सवितुः सर्वस्य प्रेरकस्य सः मित्रावरुण
श्च दिवः द्योतमानस्यादित्यस्य शरणे स्थाने नभसि ज्योतिः आलोकं तेजः उदयंस्त उद्यच्छति सर्वत्र विस्तारयतीत्यर्थः अग्निर्नृभि
कः अग्निरिव दीप्यमानः समिधानः हविर्भिः समिध्यमानः आहुतः सर्वैः आहूतः सर्वैः आहूतः तिष्ठति उपूरणः २० वचो
दीर्घप्रसद्मनीति हे स्तोतः दीर्घप्रसद्मनि दीर्घविस्तृतं सद्मसदनं यस्मिन् यज्ञे वेवचः मित्रं वरुणं च स्तुहि स च वरुणः गोम
तः पशुमतः वाजस्य अन्नस्य ईशः स्वामि भवति किंतु अविषस्य मरुतः प्रीतिकारिणः पित्वः अन्नस्य दावने दानाय च ईशो
हि समर्थो भवति हि॥ ॥इति षष्ठस्य द्वितीये चतुर्विंशो वर्गः॥ ॥तत्सूर्यमिति सूर्यस्य वार्पनत् वारुणं मैत्रं च तेजः उ
भि रोदसी द्यावापृथिव्यो वष्टि पावस्तोः रात्रौ अहनि च अहः उपक्रवे उपस्तौमित्वं स्तूयमानः वरुणः भोजेषु दातृषु अस्मान्
सदा अभ्युच्चर सर्वदा अभिमुखं प्रेरय दातृषु तेषां दानेषु अस्मान् पुरोभाविनः कुवित्यर्थः २२ ऋज्रमिति उक्षण्यायने
उक्षि नामकस्य वैतरा पूर्वजः अस्य गोत्रापत्य हरयाणे शत्रुजीवितहरणशीलयानेरतादृशो सुषामणि सुषाम्णः पुत्रेव
उक्षि नामकश्चितुवरा पूर्वजः अस्य गोत्राप स्यहरयाणे शत्रुजीवितहरणशीलयानेर तादृशे सुषामणि सुषाम्णः पुत्रे
शीवाजिनि दधाति स निकिम महत् ऋज्रं ऋजुगामिनं रजतं रजतमयं अश्वाभ्यां युक्तं रथं अ सनाम एतेषां मित्रादीनां प्रसा
दात् वयं भक्तवंतो भूम २३ तामे अश्वानामिति ऋषिः प्रतिग्रही तौ अश्वौ हरीणां हरितवर्णानां अश्वानां अश्वसंघानां
मध्ये नितो राजाननितो द्रानो शत्रूणां अत्यंतबाधकौ तौ अपि चक्रत्यानां युद्धकर्मणि कुशलानां च नरवाहसान्नृणां मनु
ष्याणां वोढारौ तानौ अश्वौ मे मह्यं नक्षिप्रं सौषाम्णि नवरुणाददतौ २४ स्मदभीष्वृ इति स्मदभीष्वृ शोभनरश्मियुक्तौ कशा
वं ताक शायुक्तौ विप्राभिधा विनौ मरुः महतः सौषाम्णस्य वरोः संबंधिनौ वाजिनौ शीघ्रगमनवंतौ अर्वतौ अर्वतो द्वावश्वौ
स्व सहयुग्मं यदेव न विश्वपा नवतरथा भतीमत्या स्तुत्या मित्रादीन् स्तवन् असनं विभ्रमनाअहं सम भजे प्रत्यगृह्णी
नमित्यर्थः॥ ॥इति षष्ठस्य द्वितीये पंचविंशो वर्गः॥ ॥युवोरजिति पंचविंशत्यृचं षष्ठं सूक्तं आंगिरसो व्यश्वो वैयश्वा
२४

358
1915

विश्वमना वा ऋषिः षोडश्याद्याः चतस्रः गायत्र्यः विंश्यनुष्टुप् एकविंशी पंचविंशी च गायत्र्यौ शिष्टाः उष्णिहः अश्विनौ देवते १ युवो
रुश्विति हे अतर्दस्रा परे अहिंसितवलौ वृषणाकामानां सेक्तारौ अएव वृषण्वसू वर्षणशीलधनवंतौ अश्विनौ युवोः युवयोः रथः सु
हवे सुष्टु स्तोत्रादिभिः आव्हयामि किमर्थं स्थिरेषु भाष्येषु स्तोत्रेषु मध्ये सधस्तुत्याय सह भवंतौ स्तोतुं तस्मात् युवयोः शीघ्रगत्ये
युष्मद्गमन साधनं रथमेव आह्वयामि उपूरणः २ युवं वराइति हे नासत्या सत्यवंतौ वृषणीकामानां वर्षितारौ वृषण्वसू वर्षण
शीलधनौ अश्विनौ युवं युवां सुषाम्णे सुषामाख्य राज्ञे मनपित्रे अस्मै महेमहते तनेन तस्मै धनं दातुं पुरा यथा आगच्छतं तद्व
तूम पिधनं दातुं अवोभिः पालनैः सह अथाय युवां आयातमिति हे वरौ राजन् एवं ब्रूहीति ऋषिर्वदति ३ तावामद्येति हे वा
जिनीवसू अन्नधनौ अश्विनौ पूर्वाः बहुनि इष अन्नानि इच्छंतौ तौ प्रसिद्धौ वां युवां अद्य अस्मिन् यागदिने क्षपः क्षयायाः अ
तिक्रमे इउपः कालइत्यर्थः तस्मिन् उषः काले हव्येभिः हविर्लक्षणैरन्नैः सह वयं हवामहे आह्वयामः ४ आवां वाहिष्ठ इति हे न
रा सर्वस्य नेतारौ अश्विना अश्विनौ वां युवयोः वाहिष्ठः ओढतमः श्रुतः सर्वत्र प्रसिद्धः रथः आयातु अस्मदीयं यज्ञं प्रति आग
च्छतु तेन रथेन युवां आगत्य तुरस्य क्षिप्रं स्तोत्रं कुर्वतः तस्य स्तोमान् त्रिवृत् पंचदशादि स्तोमान् श्रियेतस्मै ऐश्वर्य प्रदाय उ
यद्रथः जनीतं ५ जुहुराणाविदिति हे वृषण्वसू वर्षणशीलनौ अश्विना नो जुहुराणा वितमाया विनौ पिशात्मन् आ आभि
मुख्येन मन्यथां जानीतं नरस्तः हे रुद्रा संग्रामे रोदनशीलौ अश्विनौ युवं द्विषु वामेव द्विषः द्वेषकारिणः तान् शत्रून् अतिपर्षथः
अतीत्यदत्तं॥ ॥इति षष्ठस्य द्वितीये षड्विंशो वर्गः॥ ॥दस्राहीति दस्रा दर्शनीयौ अश्विनौ कीदृशौ धियं जिन्वाक मणिप्री
णयंतौ मधुवर्णा सर्वेषां मादनशील शारारकौ शुभस्पती उदकस्य पालयितारौ युवां मक्षुभिः शीघ्रगमनैः अश्वैः आनुषाक् अ
नुषक्तं यथा भवति तथा विश्वं हि अस्मदीयं यज्ञमेव परिदीयथः परितः आगच्छतं ७ उपन इति हे अश्विना अश्विनौ विश्व
पुषा सर्वस्य पोषकेण राया धनेन नः सह नः अस्मदीयं यज्ञं उपयातं गच्छतं आगत्य घनमस्मभ्यं प्रयच्छतमिति भावः मघवा
नाधनवंतौ सुवीरौ शोभनसामर्थ्योपेतौ अनयच्युता केनापि च्यावनीयौ न भवतः तौ यज्ञं प्रत्यागच्छतं ८ आमे अस्येति

भा·ष· २२ हे नासत्या अश्विनौ सचनस्तमा अतिशयेन सर्वैः समवेतव्यौ युवां प्रतीत्यं पुनः पुनः विपंतिम स्तयं तिरुद्धां धिदेवाः अत्रेतिप्र
२५ तीत्यः यज्ञः तं अस्य पुरोवर्तिनं मम त्संबंधिनं यज्ञं अद्य अस्मिन् दिने देवेभिः देवैः सार्द्धं आगतं आगच्छतं ९ वयं हि वामिति
उच्यते धनादि सत्कारी आत्मनः इच्छंतौ वयं वां हिधनादीनां प्रत्तारौ युवामिव हवामहे नत्तो भार्यं आह्वयामः दृष्टांतः श्य
व तु यथा अस्माकं पितापुत्रौ मिवत्स त्याधनं अलं भव तद्वत् हे विप्रौ मेधाविनौ अश्विनौ स्तोमे तिभिः अस्माभिः क्रियमाणैः क
ल्याणैः स्तोत्रैः सह इह अस्मिन् यागदिने उपागतं उपागच्छतं १० अश्विनेति हे ऋषयः विश्वमनः अश्विना अश्विनौ देवौ सुष्टुहि
शोभनं स्तुहि ततः तौ अश्विनौ तव स्तोतुः हवं आह्वानं कुवित् बहुवारं श्रवतः शृणुतां ए वंस्तूयास्तौ अश्विनौ नेदीयसः
अंतिकतमान् शत्रून् कृलयातः हिंस्तामस्य उतापि च पणीन् एतन्नामकान् अंगिरोग वामानि त्तृन् अस्करान् अपि हिंस्तां॥ ॥
॥इतिषष्ठस्य द्वितीये सप्तविंशो वर्गः॥ ११॥ वैयश्वेति हे नरा अश्विनौ वैयश्वस्य व्यश्वस्य पुत्रस्य विश्वमनसो मम आह्वानं श्रु
तं शृणुतं उतो पि च मम मदीयं अस्य तत आह्वानं चेदथः जानीथः अथ वरुणः मित्रः मित्रावरुणौ च सजोषसा संगतौ संतौ
अर्यमा एतन्नामको देवश्च मदीय आह्वानं श्रुत्वा मह्यं धनादिकं प्रयच्छतु १२ युवादत्तस्येति हे धिष्ण्या धिषणार्हौ स्तुत्यौ
वृषणा कामानां वर्षितारौ अश्विनौ सूरिभिः सूरिभ्यः स्तोतृभ्यः युवादत्तस्य युवाभ्यां स्तोतृभ्यो यत्प्रदीयते तत् युवादत्तं तस्य तथा
युवानीतस्य युवाभ्यां नीयते प्रत्तं स्तोतृभ्यः तत् युवानीतं धनादिकं अहः अहः अहनि अहनि मह्यं विश्वमनसे युवं शिक्ष
तं प्रयच्छतं १३ यो वां यज्ञेभिरिति यः मनुष्यः वां युवयोः यज्ञेभिः यागैः आवृतः परिवृतः भवति दृष्टांतः अधिवस्त्रा उपरि
निहितवस्त्रा उपरि निहितवस्त्रा वधूः इव अन्येन वस्त्रेण यथाच्छादिता भवति यदा वृतो भवति तदा सपर्यंता अभीष्टप्रदा
नेन तं परिचरंतौ अश्विना अश्विनौ भवं तौ तं मनुष्यं शुभे च कल्याणे मंगले धने कृतवंतौ युवां तं धनादियुक्तं अकार्ष्टां इत्यर्थः
१४ यो वामिति हे अश्विनौ उरुव्यचस्तमं अतिशयेन ग्ररुषु व्याप्तं नृपाय्यं नेतृभ्यां युवाभ्यां पातव्यं सोमं यः मनुष्यः वां युवा
भ्यां तं सोमं दातुं चिकेतति जानाति तस्य वर्त्तिः गृहं अस्मत् विश्वमनसं मा कामयमानौ युवां परियातं सोमपानार्थं

359
1915

आयातं १५ अस्मभ्यं स्विति हे वृषण्वसू वर्षणशीलधनवंतौ अश्विनौ अस्मभ्यं अस्मदर्थं नृपाय्यं नेतृभ्यां पातव्यं सोमं
प्रति वर्त्तिः अस्मदीयं गृहं प्रति सु यातं युवां सुष्टुयातं गिरा स्तुतिलक्षणया वाचा युवां यज्ञं उरुधुः समाप्तिं प्रापयथः दृष्टांतः
विषु द्रुहा इव शरेण यथा व्याधः मृगं अभिलषितं देशं प्रापयति तद्वत् स्तुत्या यज्ञं अवैकल्येन समाप्तिं प्रापयथः इत्य
र्थः॥ ॥इतिषष्ठस्य द्वितीये अष्टाविंशो वर्गः॥ ॥१६॥ वाहिष्ठो वामिति हे नरा नेतारौ अश्विना अश्विनौ हवानां स्तोतॄणां
स्तोत्राणां मध्ये स्तोमो वां वाहिष्ठः युवामतिशयेन व्याप्नुवन् मदीयः स्तोमः दूतः दूतभूतः सन् हुवत्सु वाह्वयतु सोमं मदी
यः स्तोमः युवाभ्यां प्रियकरः अस्तु भवतु १७ यददेति हे अश्विनौ दिवः द्युलोकस्य अदः अमुष्मिन् अर्णवे अपां स्थाने
तु यदि मदथः माद्यथः वा आपि वा इषः युवामिच्छतः यजमानस्य गृहे यदि माद्यथः एवं चेत् हे अमर्त्या मरणधर्मरहितौ अश्वि
नौ मे मदीयं स्तोत्रं श्रुतमित् युवां शृणुतमेव १८ उत स्येति उतापि च श्वेतयावरी श्वेतजलायानी श्वेतयावरी सिंधुः स्यंदमा
ना हिरण्यवर्तनिः हिरण्मयमार्गा च दीनदीनां अन्या सां नदीनां मध्ये वां युवां वाहिष्ठा स्तुत्या अतिशयेन गंत्री भवति स्याए
पापि युवां स्तौतीत्यर्थः १९ स्मदेतयेति हे शुभ्रया वाना शोभनशील गमनवंतौ अश्विना अश्विनौ स्तकीर्त्या शोभनस्तुत्या श्वे
तयाश्वेत जनया धिया धारयित्र्या धनदानेनया पविश्याए तया नद्या स्मत् शोभनं वह्निपथं युवां स्तुतिं प्राप्नुयवां अस्मान् इत्यर्थः
२० युक्ष्वां हि त्वमिति हे वायो रथा सहीरथवहन समर्थौ अश्वैतं हि त्वमेव युक्ष्व संयोजय हे वसो वासयितः स्तोत्राणां पोष्या
योग्यौ अश्वो युवस्व संग्रामे शत्रुवधार्थं मिश्रय हे वायो अतः अनंतरं नः अस्मदीयं मधुमदकरं सोमं त्वं पिब अनए व अस्मा
कं यज्ञेषु सवनात्रिषु सवनेषु आगहि सोमपानार्थं आगच्छ॥ ॥इतिषष्ठस्य द्वितीये एकोनत्रिंशो वर्गः॥ २९॥ तव वायो इति
हे ऋतस्पते यज्ञानां पते त्वष्टुः जामातः ब्रह्मणः जामातः अद्भुत महन् हे वायो त्वदीयानि अवांसि पालनानि आवृणीमहे
वयं अस्मिन् पाश्चपागे संभजामहे २१ त्वष्टुर्जामातरं इति इमे जनासः जनाः वयं त्वष्टुः ब्रह्मणः जामातरं ईशानं सर्वस्य ई

ध्वरं एतादृशं वायुं स्रुतवंतः अभिषुतसोमाः रायः धनं ईमहे याचामहे तेन वयं द्युम्नधनवंतः स्याम इति शेषः २३ वायो याहीति हे वायो दिवः द्युलोकस्य शिवा शिवं कल्याणं आ याहि आगच्छ अतः सुस्वश्व्यं शोभनाश्वसहितं रथं स्रुवह स्रुवह सर्वतो दिक्षु प्र पय इदानीं तेभ्यो पि अश्वो समर्थो भिः महान्त्वं पृथुपक्षसा पृथुपार्श्वद्वय युक्तो रथे स्वकीये वहस्व शत्रुहननार्थं संयोजय
२४ त्वां हि स्रुप्सरस्तममिति हे वायो सुप्सरस्तमं अतिशयेन शोभनरूपवंतं मंहना स्वकीयेन महत्वेन अश्वपृष्ठं सर्वतो व्याप्तपृष्ठं व्याप्त सर्वांगाभिः सर्थः त्वां हितामिव न सद्नेषु यज्ञेषु हूमहे वयं आह्वयामः कथमिव ग्रावाणं न यथा अभिषवार्थं ग्रावाणं स्तुतिभिः आह्वयंति तद्वत् २५ स त्वं न इति हे देव द्योतमान वायो अग्निपः देवानां मध्ये मुख्यः अग्रनीः गंता सिता दृशः त्वं मदसामंदनः स्वयमेव मोदमानः सन् नः अस्माकं वाजान् अन्नानि आपः उदकानि उभयस्मिन् तथा प्रदत्तेस तिधियः अग्निहोत्रादिकं च धिकुरुकार्य इत्यर्थः॥ इति षष्ठस्य द्वितीये त्रिंशो वर्गः॥ ॥अग्निरुक्थ इति द्वाविंशर्चं सप्तमं सूक्तं विवस्वतः पुत्रो मनु ऋषिः प्रथमा तृचो गीयत्रयुजो बृहत्यः द्वितीया चतुर्थ्यादि युजः सतोबृहत्यः विश्वेदेवाः देवताः १ अग्निरुक्थ इति उक्थ्यो स्तोत्रशस्त्रात्मके अध्वरे यज्ञे अग्निः पुरोहितः यज्ञार्थं पुरतः उत्तरवेद्यां निहितो भूत् तथा ग्रावाणश्च सोमाभिषवार्थं पुरतो निहितः बर्हिश्च पुरतो निहितं आसादितं एवं सामग्र्यां सत्यां महतः एकोनपंचाशत् मरुद्गणान् ब्रह्मणस्पतिं एतन्नामकं देवं देवान् इंद्रादींश्च सर्वान् देवान् वरेण्यं भजनीयं अवः रक्षणं ऋचा स्रुक्रूपया स्तुत्या अभि मनुः अहं याचामि २
आ पशुं गासीति हे अग्ने नः अस्मदीये यज्ञे पशुं अग्नीषोमीयं पशुं प्रति आ गासि आगच्छसि तथा पृथिवीं दिव सदनां वनस्पतीन् अरणीरूपान् उषसाउषः कालं नक्तं रात्रिं ओषधीः ओषः सोमः निधीयते येषु इति ओषधयः ग्रावाणश्च एतान् प्रति आगच्छसि नः अस्मदीयानां धीनां कर्मणां प्राविता विश्वे देवा अनेन अग्निना सह यूयं प्रकर्षेण रक्षकाः भवत ३ प्र सू न इति पूर्व्यं पुरातनः पूर्व्यान् पुरातनान् इंद्रादीन् देवान् प्रति क्रियमाणत्वात् यज्ञो पि पूर्व्यः इत्युच्यते तादृशः मुख्यः नः अस्मदीयः

अध्वरो यज्ञः अग्नौ अग्नौ सर्वेषु अन्येषु देवेषु च सुष्ठु प्रैतु प्रकर्षेण गच्छतु देवान् विशिनष्टि आदित्येषु अदितेः पुत्रेषु इंद्रादिषु धृतव्रते धृतकर्मणि वरुणे विश्वभानुषु सर्वतो व्याप्ततेजस्केषु मरुत्सु च प्रैतु ४ विश्वे हि ष्मेति विश्ववेदसः बहुधनाः रिशादसः हिंसकानां शत्रूणां असितारः विश्वे हि ष्म सर्वे खलु देवाः मनवे मनोः वृधे वर्धनाय भुवन् भवंतु ततः हे विश्वविदस सर्वधनाः देवाः अरिष्टेभिः परैः अहिंसितैः पायुभिः पालनैः सह अवृकं स्तेन रहितं धारहित मित्यर्थः तादृशं छर्दिः गृहं नः अस्मभ्यं यंत प्रयच्छत ५ आ नो अद्येति समनसः समानस्काः विश्वे सर्वे देवाः यूयं सजोषसः परस्परं संगताः संतः गिरा प्राप्तव्यतया गतया ऋचा सह अद्य अस्मिन् प्रागदिने नः यष्टुः समस्मात् आगंत आगच्छत अनंत हे मरुतः देवि धात मानि महि महति हे अदिते देवि सदने स्थाने पस्त्ये अस्मदीये गृहे उपविशत॥ ॥इति षष्ठस्य द्वितीये एकत्रिंशो वर्गः॥
अभि प्रियेति हे मरुतः प्रियाप्रियाणि पान्ति वः युष्माकं अश्व्या अश्व्यानि प्रियान् अश्वसंघान् अस्मद्यज्ञं प्रति प्रयाथ प्राप्तयत यूयं अश्वैर्युक्ताः संतः आगच्छतेत्यर्थः अपदे मित्रमिश्रादयः देवाः हव्यः हव्यवाहन योग्या निहवीं पिस्वीकरोतु आगच्छतेत्यर्थः आगत्य च इंद्र वरुणः इंद्रावरुणौ मित्रश्च तुराः संग्रामेश त्रुवधार्थं त्वरमाणाः नरः नेतारः आदित्यासः अदितेः पुत्राश्च नः अस्मदीये यज्ञे बर्हिः आसादिते आसंदंतु प्रविशंतु ७ वयं व इति हे वरुण वरुणादयः देवाः वृक्तबर्हिषः ऋत्विजो वयं आनुषक् स्रुगादिषु अनुषक्तं यथा भवति तथा हितप्रयसः विहितहविष्काः संतः वः युष्मान् हवामहे आह्वयामः कीदृशाः सुतसोमासः अभिषुतसोमाः इद्धाग्नयः आहुतीभिः समिद्धाग्नयो वयं आह्वयामः दृष्टांतः मनुष्वत् मनुर्यथा यज्ञे युष्मान् आजुहाव तद्वत् ८ आ प्र यात मिति हे विश्वे देवाः आप्रयात प्रकर्षेण अस्मदीये कर्मणि आगच्छत हे मरुतः हे विष्णो हे अश्विना अश्विनौ हे पूषन् मरुदादयः देवाः माकीन यामया क्रियमाणया धिया स्तुत्या सह आयज्ञं प्रति आगच्छत किंच प्रथमः देवानां मुख्यः सः इंद्रश्च आयातु वृषा कामानां सेक्ता यः इंद्राय स निष्ठुभिः संभजनंत

359
19.5

दात्मनः इच्छद्भिः स्तोतृभिः वृत्रहा शक्र करस्य हंतेति गणे स्तूयंते ९ विनो देवास इति हे अद्रुहः स्तोतॄणां अद्रोग्धारः दे
वासः मरुदादयः देवाः अच्छिद्रं बाधकरहितं शर्म गृहं तत् नः अस्मभ्यं वियच्छत हि वसवः शत्रूणां प्रवासयितारः मरुदाद
यः दूरात् दूरदेशात् अंतितः अंतिकात् देशात् वा कस्मिंश्चित् आगत्य न चित् कदाचिदपि वरूथं संभजनीयं यं गृहं नाध
षति हिंसनं न करोति तत् गृहं प्रयच्छतेति समन्वयः १० अस्ति हि व इति हे रिशादसः हिंसतां असितारः देवासः देवाः म
रुदादयः वः युष्माकं सजात्यं अस्ति समानजातिभावोस्ति खलु किंच आप्यं आपिः बंधुः तस्य भावः आप्यं स्तोतृषु स्तुत्य
लक्षणेन संबंधात् एवं स्वतिनमनुनाय था स्तोत्रा सह युष्माकं बंधुभावः अस्ति खलु ततः पूर्वस्मै प्रथमभाविने सुवि
ताय अभ्युदयायान्नाय सिनवीयसेन वतराय स्तुत्याय च स्तवाय उपयं मक्षु शीघ्रं नः अस्माकं प्रवोचत प्रकर्षेण ब्रूत
॥ इति षष्ठस्य द्वितीये द्वाविंशो वर्गः॥ ११ ॥ इदा हि व इति हे विश्ववेदसः सर्वधनाः देवाः नमस्युः अन्नमिच्छन्नहं
वः युष्मद्विषयां उपस्तुतिं अन्यामिव अदृष्टपूर्वामिव स्थितां केश्चिदपि अकृतामित्यर्थः तादृशीं उपस्तुतिं इदा हि इदा
नीमेव उपाजा असक्षि उपासजामि करोमीत्यर्थः किमर्थं वः युष्मत्संबंधिनः वामस्य वननीयस्य इद्धा इदानीमेव भक्तये
संभजनाय त्वा भायित्यर्थः १२ उदु ष्य व इति हे स्तुभणीत्यः शोभनस्तुतयः मरुतः वः युष्माकं मध्ये ऊर्ध्वः ऊर्ध्वगंताव
रेण्यः सर्वैः वरणीयः स्यः सः सविता देवः यदा उदस्थात् उत्तिष्ठति असावुद्गतो भवतु तदा अर्थिनः द्विपादः पाद द्वययुक्ताः पु
रुषाः चतुष्पादः पादचतुष्टययुक्ताः अश्वादयः पतत्रिणः पतनशीलाः पक्षिणश्च अन्ये विश्वे स्वस्वकार्येषु निविशंते
उपूरणः देवं देवमिति वयं देव्याद्योतमानया धिया स्तुत्या गृणन्तः स्तुवंतः सन्तः वः युष्माकं मध्ये देवं देवं दीप्यमानं देवं
अवसे रक्षणाय आहुयामः अभिष्टये अभिलषितप्राप्त्यर्थं देवं देवं आहुयामः ततो वाजसातये अन्नलाभाय देवं दे
वं हुवेम आह्वयाम १४ देवासइति समन्यवः समानमनसः विश्वे सर्वे एव देवासः हि यस्मात् मरुदादयः देवाः खलु मन

वरतन्नाम काय ऋषये मत्यं सार्कं सहयुगपत् दवसरातयः धनादिदान सहिताः भवंतु ते देवाः नः अस्माकं अद्य अस्मिन् दिने
तु सर्वेषु दिवसेषु अपरं किंचनः धनदातारो भवंतु तु च अस्माकं पुत्राय वरिवोविदः वरणीयस्य धनस्य लंभयितारः भवंतु १५
प्रवः शासामीति हे अद्रुहः अद्रोग्धारः मरुदादयः उपस्तुतीनां उपस्तोत्राणां संस्थितासां यज्ञे अस्मत्स्थानं प्रति वः युष्मान् प्र
शंसामि प्रकर्षेण स्तौमि हे वरुण मित्र मित्रावरुणौ नं मर्त्यं मनुष्यं धूर्तिः शत्रुभ्यः हिंसा न बाधते यः मनुष्यः वः युष्माकं धा
मभ्यः तेजोभ्यः अविदत् उर्वी पि विदधाति प्रयच्छति १६ प्रसक्षयमिति हे मरुदादयः सः मनुष्यः क्षयं गृहं प्रतिरते प्रकर्षेण
वर्द्धयति स एव मही महांति इषः अन्नानि च विवृर्ध्वयति यः मनुष्यः वराय वरणीयाय धनाय तदर्थं वः युष्मभ्यं दाशति ह
वींषि प्रयच्छति किंच धर्मणः युष्मद्विषयात् कर्मणः सकाशात् सः मनुष्यः प्रजाभिः पुत्रपौत्रादिभिः परिपरितः सर्वतः प्र
जायते प्रकर्षेण विभवति ततः अरिष्टः अन्यैः रहिंसितः सः वः युष्माकं हविः प्रदानात् एधते दानादिभिः वर्धति॥ ॥
इति षष्ठस्य द्वितीये त्रयस्त्रिंशो वर्गः॥ १७॥ ऋतेस इति सः अर्यमादीनां मनुष्यः युधयुद्धात् ऋते विनापि विंदते धनानि लभते
किंच सुगेभिः शोभनगमनैः अश्वैः सह अध्वनः मार्गान् गंतव्यान् याति गच्छति यं जनं अर्यमा मित्रः वरुणः एते देवाः सरा
भयः समानदानाः सजोषसः परस्परं संगताः संतः त्रायंते स्वरक्षणैः पालयंति सः धनादीनि विंदतीत्यन्वयः १८ अज्रे
विदिति हे देवाः अज्रे वितृपरेतन भिभवनीये पि परपुरिन्ये च नं नितरां गमनं अस्मे मनवे कृणुथ पृथक् कुरुत तथा दुर्गि
त अगंतव्ये पि स्थले स्तसरणं शोभनगमनं आ समंतात् कुरुत एवं सति सा एषा अशनिः शत्रूणां तर्दनं आयुधं अस्मात्
सर्वतः गंतुः मनोनुक्षिप्रं परः परस्तात् भवतु पश्चात् सा अशनिः अस्वधंती कांश्चिदपि अहिंसंती विनश्यतु १९ यदद्येति
हे प्रियक्षत्राः प्रीणयितृबलाः देवाः सूर्ये सवितरि उद्यति उद्गच्छति सति अद्य अस्मिन् दिने यत् यदा ऋतं कल्याणं गृहं दय
धारयथ तत् यदा विश्ववेदसः सर्वधनाः देवाः निम्रुचि सूर्यस्य निम्रोचनं सायंकाले धारयथ यद्वा प्रबुद्धि तस्य प्रबोधने प्रातः

भा·प·
२८

कालेय द्यादिवः अन्हः मध्यं दिनेपनेस्तुत्तरेत्र संबंधः २० यद्वाभिपित्वेइति हेअसुराः प्राज्ञाः देवाः यद्वाभिपित्वे अस्मद्यज्ञं प्र
तियुष्माकं अभिप्राप्ताकृतं सत्सप्रभृतंयज्ञंयतेगच्छतेदाशुषेहविर्दत्तवतेयजमानायच्छर्दिः गृहं वियेमप्रच्छतयदिएवयूयं
कुरुयत हिवयंहेवसवः स्तोतॄणांधनादिभिः आच्छादयितारः विश्ववेदसः सर्वधनाः हेदेवाः वः युष्मत्संबंधिनत्रूकल्याणं
गृहंगृहस्थयुष्माभिः दत्तस्यमध्येउप आस्थयामउपतिष्ठमयुष्मान् हविर्भिः पूजयेम २१ यदद्येतिहे विश्ववेदसः सर्वधनाः
देवाः यत्यदाअद्यइदानीं यद्वासूरे सूर्यउदितेसतियद्वामध्यंदिने अद्यआतुविआनिम्लोचनेसायंकालेजुह्वानायअग्नौ
हवींषिजुह्वतेअत एवप्रकृष्टज्ञानाय मनवेएतन्नामकायऋमयेमह्यंवा भवननीयधनंध — दत्ततंवृणीमहइत्युत्तरत्र
संबंधः २२ वयंतद्वइति हेसम्राजः सम्यक्दीप्यमानाः देवाः पुत्रान्युष्माकं पुत्राः इव स्थिताः पुत्राः पथापितृभिः पोष्याः
तद्वत्युष्माभिः पोष्याः वयंबहुयाय्यंबहुभिः भोज्यंवः युष्मत्संबंधितद्वनं अश्याम प्राप्नुयाम येनधनेनवयस्यः वसीयः अ
तिशयेनवसुमत्वंअनशामहेअश्नुयामहेहेआदित्याः अदितेः पुत्राः देवाः बर्हिः कुद्धं नः अस्माभिः दत्तंहविः स्वीकुरुत ततः त
द्धनंआवृणीमहेवयंसंभजामहे॥ ॥इतिषष्ठस्यद्वितीयेचतुस्त्रिंशोवर्गः॥ ॥येत्रिंशतीतिपंचर्चंअष्टमंसूक्तंमनुऋ
षिः गायत्रीछंदः उपांत्यापुरउष्णिक्विश्वेदेवाः देवताः १ येत्रिंशतीतित्रिंशतित्रिंशत्संख्यायाः परः परस्तात्त्रयः त्रयस्त्रिं
शद्वताः इत्यर्थः येदेवासः देवाः बर्हिः अस्मदीययज्ञसंबंधिनिबर्हिषिहविः स्वीकरणार्थंआअसदन्आसीदंतुअहन्अथानंतरं
विदंतेदेवाः अस्मान्हविषांप्रदातॄन् इतिज्ञानंतुततः द्विताद्विः प्रकारंअसनत्अस्मभ्यंधनंपश्वादिकंचप्रयच्छत २
वरुणो मित्रइतिवरुणः मित्रः अर्यमाएतेत्रयोदेवाः स्मद्रातिषाचः स्मत्शोभनं रातिहविः प्रदानंएषांअस्तीतिस्मत्राज २८
यः यजमानाः तान्सचंतेधनादिप्रदानेनसेवंतेतेतादृशाः पत्नीवंतः देवपत्नीसहिताः अग्नयः वषट्कृताः अयासोमस्या
ग्नेविहीत्येवमादिना स्वाहाकृताः स्कहुताइत्यर्थः ३ तेनोगोपाइतितेवरुणादयः देवाः सर्वथासर्वेण विश्वाअनुच

368
1915

रवर्गेण सह अपाच्याः अपाचीप्रतीचीततः नः अस्माकं गोपाः गोपायितारोभवंतु तएवउदक्तनोप्यस्माकं रक्षकाः भवंतुइ
त्याउधरायाः दक्षिणस्याश्चदिशः तथासकअधस्तात् अपिअस्माकंत्रातारोभवंतुकिंचपुरस्तात्प्राच्याः दिशश्चतेदेवाः अ
स्माकं गोपायितारोभवंतु ४ यथावशंतीतिदेवाः द्योतमानाः सर्वदेवाः यथावशंतियथाकामयंतेतथैवअसत्भवति
वएषांदेवानांततकामंनकिः नकश्चिदपिआमिनत्हिनस्तिकथं देवानांअभिलषितथाभवतीतिचेत्तदाहअरावाच
नअदाताअपिमर्त्यः मनुष्यः उग्राझः देवेभ्यः हवींषिप्रयच्छतितस्मात्तेषांकामनंतत्तथाभवत्येवेत्यर्थः ५ सप्तानामिति
सप्तानांमरुतांगणानांसप्तसप्तसंख्याकाः ऋष्टयः आयुधविशेषाः विभिन्नाः संतितथासप्तसप्तसंख्याकानिद्युम्नानि
द्योतमानानिकुंडलादीनिएषांगणानांविभिन्नानिसंतिततः सप्तमरुतानांगणाः सप्तासप्तविधाःश्रियः कल्लाःदीप्ताःअ
धिधिरेपरस्परं अधिदधिरे॥ ॥इतिषष्ठस्यद्वितीयेपंचत्रिंशोवर्गः॥ ॥बभ्रुरेकइतिदशर्चंनवमंसूक्तंमरीचिपुत्रः कश्य
पः वैवस्वतोमनुर्वाऋषिः द्विपदाविराट्त्यक्षराविराजः विश्वेदेवाः देवाः देवताः १ बभ्रुरेकइतिबभ्रुः बभ्रुवर्णः सोमः एकः
एकोदेवः विषुणः विश्वगंचनः स्सनरः स्कथुरात्रीणांनेतायुवाप्रतिदिवसंआविर्भूतत्वात्तरुणः हिरण्ययं हिरण्मयंअंजि
आभरणंकुंडलादिकं स्वशरीरंअक्तेअभिव्यंजयति २ योनिमेकइतिदेवेषुदेवानांअंतः मध्येद्योतनः स्वतेजसादीप्यमानः
मेधिरः मेधावीएवंविधः एकोग्निः योनिंआवनीयादिकंस्थानंआससाद हविः स्वीकरणार्थंआसीदति ३ वाशीमेकइतिदेवे
षुमध्येद्योतमानः निष्कविः निःश्वलस्त्वंनिवर्तमानः एतादृशाः एकस्त्वष्टनामकोदेवः आयसींअयोमयधारांवाशीं
तक्षणसाधनंकुठारंस्वकीयेहस्तेबिभर्तिधारयति ४ वज्रमेकइतिएकः इंद्रः आहितंस्वकीयेहस्तेनिहितं वज्रंआयुधंबि
भर्तिघंतसएवेंद्रः तेनवज्रेणवृत्राणिरक्षांसिजिघ्नतेभृशं हंति ५ तिग्ममेकइतिशुचिः तेजसाः दीप्यमानः उग्रः उद्गूर्णब
लः जलाषभेषजः रोगापनयनेनसुखकरभेषजवान्तादृशाः एकोरुद्रः तिग्मंतीक्ष्णधारंआयुधंपिनाकः तंस्वकीये

भा·प·
२१

हस्तेबिभर्ति ६ पथएकइति एकःपूषानामकोदेवःपथःमार्गान्पापायरक्षति एषःसोयंपूषानिधीनांनिधानान्पृथिव्यां
निहितानिधनानिवेदवेत्तिज्ञात्वास्तोतृणांददातीत्यर्थः दृष्टांतःतस्करोयथाचोरःपथिगच्छतांपुरुषाणांधनहरणार्थंमार्ग
रक्षनिगूढेविहितानिज्ञात्वातदातत्स्वसहायेभ्योयथाददातितद्वत् ७ त्रीण्येकइति उरुगायःबहुभिःगातव्यःएकःअसहा
यःविष्णुःत्रीणिपदानिभुवनानिविचक्रमेपादेनविक्रांतवान् पदत्रयेषुलोकेषुदेवासःइंद्रादयोदेवाःमदंतियजमानदत्तै
हविर्भिःमाद्यंतितानिविचक्रमइत्यन्वयः ८ विभिर्द्वइति द्वाद्वौअश्विनौविभिःगमनसाधनैःअश्वैःचरतःसंचरंतेकिंच
इमेअश्विनौएकयासूर्याख्यसास्वयंवृतयास्त्रियासहप्रसवतः दृष्टांतःप्रवासवयथाप्रवासिनौद्वौपुरुषौएकयास्त्रिया
सहप्रवसतःतद्वत् ९ तदींहुइतिउपमाउपमोपरस्परंस्वकांस्वाउपमानभूतौसंम्राजासम्यक्दीप्यमानौसर्परिशक्तौ
ध्यतहविश्वेद्वांद्वौमित्रावरुणौदिविद्युलोकसदःस्थानंतत्चक्रातेअकार्ष्टां १० अर्चंतएवइति एकेअत्रयःमहिमहत्त्व
सामत्रिवृत्पंचदशादिमन्वतअमन्यंततंदेवअर्चंतिःपूजयंतःएतादृशाःअतादृशाःअत्रयास्तेनोक्तेनसाम्नासूर्यंअरो
चयन्अदीपयन्तएवात्रदेवाः॥ ॥इतिषष्ठस्यद्वितीयेषट्त्रिंशोवर्गः॥ ॥नहिवइतिचतुर्ऋचंदशमंसूक्तंआद्यागाय
त्रीद्वितीयापुरउष्णिक्तृतीयाबृहतीचतुर्थीअनुष्टुप्मनुर्वैवस्वतःऋषिःविश्वेदेवादेवताः १ नहिवइति हेदेवासःदे
वाःवःयुष्माकंमध्येअर्भकःनह्यस्तिशिशुर्नास्तिखलुतकुमारकःकुमारोपिनास्तिविश्वेसर्वेदेवाःयूयंसतांमहांतइत् २१
महतामहांतःएव २ इतिस्तुतासइति हेरिशादसःहिंसकानांअसितारःहेमनोयज्ञियासःमनुनामकस्यममयज्ञार्हादि
वाःयेयूयंत्रयश्चत्रिसंख्याकाःत्रिंशाच्चत्रिंशत्संख्याकाःत्रयस्त्रिंशद्देवतास्थभवथअभूततेयूयमितिइत्थंमननप्रकारेण
स्तुतासोअभवथयथामनुनास्तुताअभवथइत्थंस्तुतायूयंहविषिकामयध्वं ३ तेनस्त्राध्वमिति हेदेवाःतेयूयंनःअ
स्मान्त्राध्वंरक्षथःत्रायध्वंतेयूयंअवतधनादिप्रदानैःअस्मान्रक्षततउतएवदेवाःनःअस्मान्अधिवोचतधनादि

305
1915

भवत्विति यूयंब्रूत किंचहेदेवाःमानवात्पित्र्यात्सर्वेषांमनुःपितातस्मात्आगतात्परावतःदूरात्पथःमार्गात्नःअस्मा
न्माअतिनयतकिंतुदूरंअधिएतव्यातिरिक्तःविप्रकृष्टःमार्गोस्तितस्मादधिकमित्यर्थःतस्मात्मार्गात्अपनयत ४
येदेवासइति हेदेवासःदेवाःयेयूयंइहअस्मदीययज्ञेस्थनहवींषिआदातुंभवथउतापिचविश्वेसर्वेवैश्वानराःविश्वानर
यज्ञःतस्मिन्प्रादुर्भूताःसप्रथःसर्वतःप्रसिद्धंशर्मसुखंतत्अस्मभ्यंयच्छततथागवेअश्वायस्वस्वंप्रदत्त॥ ॥इतिषष्ठ
स्यद्वितीयेसप्तत्रिंशोवर्गः॥ ॥इतिअष्टमेमंडलेचतुर्थोनुवाकः॥ ॥पंचमेनुवाकेद्वादशसूक्तानितत्रयोजयातीतिअष्टाद
शर्चंप्रथमंसूक्तंवैवस्वतमनुःऋषिःनवमीचतुर्दशीअनुष्टुभौयंवदश्यायाश्चतस्रःपंक्त्यःदशमीपादनि॥ वृत्तत्रयःस
प्तकाःपादनिवृत्तइतितल्लक्षणंशिष्टाःगायत्र्यःआद्याश्चतस्रःयज्ञस्तौतियजमानप्रशंसादेवताकाःपंचम्यादिदंपतीदेवता
काःशिष्टाःदंपत्योःआशिषाप्रतिपाद्यतेअतस्तद्देवताकाः १ योयजातीतियःयजमानःसकृत्यजातिपाकंकरोतिसः
देवेभ्यःलब्धधानादिकःसन्यजातइतपुनरभीष्टप्राप्तयेदेवेभ्योहवींषिप्रयच्छत्येवतथासएवयजमानःसुनवच्चसो
माभिषवंकरोतिश्चसएवपचातिचपुरोडाशादिकंपचतिचसयजमानःइंद्रस्यब्रह्मेत्ब्रह्माणिइंद्रसंबंधीनिस्तोत्राण्ये
ववाकनात्पुनःपुनःकामयते २ पुरोळाशंइतियःयजमानःअस्मैइंद्रायपश्चपुरोळाशंतथाआशिरंतृतीयसवनेगो
क्षीरेणमिश्रितंसोमंररतेप्रयच्छतिशक्रःसमर्थःसःइंद्रःतंयष्टारंपात्इतरक्षत्येव ३ तस्यद्युमानितितस्ययजमान
स्यदेवंजूतःदेवैःइंद्रादिभिःप्रेरितःद्युमान्दीप्तिमान्रथःअसत्भवतिआगच्छतिततःतेनरथेनाभित्रियाअमित्रिय
न्शत्रुभिःकृतान्विश्वासर्वान्बाधान्बन्वन्हिंसन्सएवभूत्सुवत्पुत्रादिभिःअभ्येभ्यवर्धते ४ अस्यप्रजावतीइति
प्रजावतीपुत्रादियुक्तंअसश्चंतीअगमनशीलंधेनुमतीगोयुक्तंरक्षाअन्नंअस्ययष्टुगृहे दिवेदिवेदुहेदेवैःदुह्यतेयादं
पतीतिहेदेवासःदेवाःसमनसासमानमनस्कौययोदंपतीस्तनुतःसोमाभिषवंकरुतःयोदंपतीततस्ते अभिषुतसो

मं आधावतश्च दशापवित्रेण शोधयंतः तथा नित्यया नित्यसंबंधनेन अशिरा आश्रपणेन गोक्षीरेण संयुतं सोमं यौ प्रयच्छतः
तौ अन्नादी निप्राप्नुतः इति उत्तरत्र संबंधः॥ इति षष्ठस्य द्वितीये अष्टत्रिंशो वर्गः॥६॥ प्रतिप्राशव्यामिति तौ दंपती प्राश
व्यान् अन्नादीन् प्रतीतः प्रतिगच्छतः सा च स च समंचा समीचीनौ संगतौ बर्हिः यज्ञं आशाते आनशाते नन्वद्रव्यैः व्याप्नुतः त
स्मात् तौ यशरीरौ भार्यापती वाजेषु देवैः दत्तेषु अन्नेषु न वापतः न गच्छतः सर्वदा अन्नसहितौ तिष्ठतामित्यर्थः ७ नदेवानामि
ति एतौ दंपती देवानां इंद्रादीनां अपिह्नुतः अपलापं न कुरुतः कथं स्वमतिं युष्मदीयां शोभनां मृतिं न जुगुक्षतः नाच्छादनमि
च्छतः किंतु स्तुतिं कुरुतः किंच बृहत् महत् श्रवः अन्नं विवासतः युष्मभ्यं प्रयच्छतः ८ पुत्रिणाते ति पुत्रिणा पुत्रवंतौ तत्रापि
कुमारिणा षोडशवर्षदिशायपुत्रवंतौ हिरण्यपेशसा हिरण्मयैः आभरणैः अलंकृतरूपौ उभाउभौ तौ दंपती विश्वमायुः
सर्वमायुष्यं वि अश्नुतः व्याप्नुतः ९ वीतिहोत्रेति वीतिहोत्रा वीतिहोत्रौ वीतिः प्रियकरः होत्रः यज्ञः ययोः तौ कं स्वस्वप्रदं हवि
रूपमन्नं दशस्यंता देवेभ्यः प्रयच्छंतौ रुतद्वस रुतधनौ पात्रेषु उपयुक्तधनौ इत्यर्थः एवंविधौ दंपती अमृताय अमरण
य संतानाभिवृद्धये रोमशं रोमवंतं वृषणं ऊधः योनिं च संरुतः संयोजयतः मैथुनं अनुष्ठितः ततः स्वपुत्रादिकौ तौ देवेषु
दुवः स्तुत्यन्नदानरूपां परिचर्यां कृणुतः कुरुतः १० आशर्मेति यष्टारो वयं पर्वतानां फलपुष्पसहितलतादिभिः युक्ता
नां यत् शर्म सुखं नदीनां च तीरैः मुनिभिः अनुष्ठितं यत् सुखं तत् आवृणीमहे संभजामहे स वा भुवः देवैः सहितस्य विष्णोः
शत्रुहननलक्षणं यत् सुखं तदपि वयं आवृणीमहे हविःप्रदानेन देवैः सह धर्तामिद् इत्यर्थः॥ ॥इति षष्ठस्य द्वितीये एकोन
चत्वारिंशो वर्गः॥ ३१॥ ऐतु पूषेति रयिः धनानां दाता भगः सर्वैः भजनीयः सर्वधातमः सर्वेषां धारयितृतमः पूषा एतन्ना
मको देवः स्वस्तिमत्तमः एतु अस्मान् प्रति आगच्छतु ततः मार्गरक्षके पूषण्यागते सति उरुः विस्तीर्णः अध्वा मार्गः स्वस्त
ये अस्माकं अविनाशाय भवतु १२ अरमतिरिति अनर्वणः शत्रुभिरनतव्यस्य देवस्य द्योतमानस्य पूष्णः विश्वः सर्व

स्तोता जनः मनसा भक्त्या आमतिः पर्याप्तस्तुतिर्भवति न यादिआदित्यानां अदितेः पुत्राणां देवानां दानं अनेहः इत् अपापमेव
खलु तस्मात् अन्नादि प्राप्तये स्तोता जनः पूषणं स्तौतीत्यर्थः १३ यथा न इति मित्रः अर्यमा वरुणः एते त्रयो देवाः नः अस्माकं
गोपा गोपायितारः पथा संति भवंति ऋतस्य सत्यभूतस्य यज्ञस्य पथ्याः पंथानः सुगाः एषां सुगमनाः भवंतु तेरागत्यास्मान्
यज्ञ मार्गे स्थापयंत्वित्यर्थः १४ अग्निं वइति हे देवाः वः युष्माकं पूर्व्यं मुख्यं देवं दीप्यमानमग्निं च सुनां प्राप्तये गिरा स्तुतिलक्ष
णया वाचा ईळे अहं स्तौमि किंच सपर्यंतः युष्मान् परिचरंतो मनुष्याः पुरुप्रियं बहूनां अभिमतदानेन प्रीतयितारं क्षेत्रसा
घं संक्षिपंति निवसंति कर्मकरणार्थमत्रेति क्षेत्रो यज्ञः तस्य साधकं अग्निं वसु प्राप्तये स्तुवंति दृष्टांतः मित्रं न यथा सुहृदं
स्तुवंति तद्वत् १५ मक्षु देववत इति देववतः देवाः यष्टव्यतया यस्य संति स देववान् तस्य रथः देवैर्दत्तः मक्षु शीघ्रं दुर्गमं
मार्गमपि प्रविशाति वा उपमानवाची यथा शूरः योद्धा कासुचित् पृतनासु प्रविशाति तद्वत् यः देवानां मनः इयक्षति
स्तुतिभिः पूजयितुमिच्छति स यजमानः अयजनः यागं अकुर्वतो जनान् अभि भवत् इत् स्वसामर्थ्येनाभिभवत्येव १६
न यजमानेति हे यजमान यः हविर्भिः देवानां मनः इयक्षति स त्वं न रिष्यसि विनष्टो न भवसि यः सुन्वानः सोमाभिषवं कु
र्वन् तेषां मनः इयक्षति स त्वमपि न रिष्यसि हे देवयो देवान् कामयमानः यः देवानां मनः नमसा इयक्षति तादृशः त्वमपि न रि
ष्यसि एवं देवानां मनः यः यजमानः यष्टुमिच्छति स अयज्वनः यागं अकुर्वतो जनान् अभि भुवत् इत् १७ नकिष्टमिति यः य
जमानः देवानां मनः इयक्षसि यष्टुमिच्छति तं न किः न कश्चिदपि न शत्रुः स्वकीयेन कर्मणा न व्याप्नोति किंच स यष्टा न प्रयोष
त् स्वस्मात् स्थानात् पृथक्कृतो न भवति किंच न योषति पुत्रादिभिः धनाधनादिभिश्च न विभक्तो भवति स यजमानः अ
यजनः अभि भुवत् इत् १८ असदत्रेति यः यजमानः देवानां मनो यष्टुमिच्छति अत्र यस्मिन् यजमाने सुवीर्यं शोभनवीर्यो
पेतं पुत्रादिकं असत् भवत्येव उत अपि च आश्वश्व्यं गमनाश्वसंघयुक्तं त्यत् तत् धनादिकं तस्मिन् यजमाने भवति देवानां

मा नो यष्टा हविर्भिः इयक्षति यष्टुमिच्छति स यष्टा अयश्वनः सर्वान् अभिभवन् इत् अभिभवत्येव॥ ॥इति षष्ठस्य द्वितीये
चत्वारिंशो वर्गः॥ इति ऋक्संहिताष्टके द्वितीयोऽध्यायः॥ ॥प्रकृतानीति त्रिंददर्चं तृतीयं सूक्तं कण्वः मेधातिथिः ऋषिः गा
यत्री छंदः इंद्रो देवता १ प्रकृतानीति हे कण्वाः ऋजीषिणः ऋजीषवतः सोमस्य कृतानि कर्माणि इंद्रस्य गाथया इंद्रस्य वाचा
देवस्य मदे संजाते सति प्रवोचत प्रब्रूत २ यस्त्वंद्रिमिति यः इंद्रः उग्रः ते जस्वी सः अपः उदकानि रिणन् प्रेरयन् स विंद
एतन्नामकं शत्रुं अनर्शनिं एतन्नामकं पिप्रुं एतन्नामकं दासं एतन्नामकं अहीशुवं एतन्नामकं च वधीत् जघान न्यर्बुद
स्येति हे इंद्र त्वं महतो महतो अर्बुदस्य मेघस्य वष्मार्णं उदकस्य वारकं विष्टपं स्थानं नितिर विद्ध्यतत्त्साभिद्दं पौंस्यं प्रतं च कृषे
च कृषे ४ प्रतिश्रुतायेति हे स्तोतारः वः युष्माकं श्रुताय श्रुतीनां श्रवणाय रक्षणाय च धृषतं शत्रून् धर्षंतं तं क्षिप्रं स्तुह
नु मिंद्रं प्रति हुवे आह्वयामि तूर्णिं तारयितारं उदकं गिरिरथि मेघं प्रति नृहुवे ५ स गोरश्वस्येति हे शूर इंद्र सः प्रसिद्धः त्वं मंदानः मो
दमानः गोः अश्वस्य व्रजं निवासस्थानं सोमिभ्यः सोमार्हेभ्यः पुरं च शत्रूणां नगरीमिव विदर्षसि विदृत्य द्वारं करोषि॥ ॥
इति षष्ठस्य तृतीये प्रथमो वर्गः॥ ॥यदिमदेति हे इंद्र मे मम स्तुतं अभिषुत सोमं उक्थ्यं स्तोत्रं वा यदि रारणः रमसे चनः
अन्नं यदि दधसे मत्यं प्रयच्छसि तर्हि आरात् दूरात् स्वधा अन्नेन उपआगहि उपागच्छ ७ वयं घेति हे गिर्वणः गीर्भिर्वन
नीयेंद्र तोपितवा पिबवयं घ खलु स्तोतारः स्मसि भवामः हे सोमपाः सोमस्य पातः इंद्र त्वं नः अस्मान् जिन्व प्रीणय ८ उत नू
इति उत अपि च हे मघवन् धनवन् इंद्र संरराणः संरममाणः त्वं अविक्षितं अक्षीणं पितुं अन्नं नः अस्मभ्यं आभर आ
हर तेतव वसु धनं भूरि अधिकं हि ९ उत न इति उत अपि च हे इंद्र नः अस्मान् गोमतः गोभिः नः कृधि कुरु अश्विनः अश्वयुक्ता ३३
न् कृधि हिरण्यवतः धनिनश्च कृधि इडाभिः अन्नैश्च संरभेमहि १० बृहदुक्थमिति उतये लोकस्य रक्षणाय स्वप्रकरस्नं
प्रसृतबाहुमाणं अवसे लोकस्य पालनाय साधुकृण्वंतं साधु कुर्वंतं बृहदुक्थं मरुत्स्तोत्रं इंद्रं हवामहे हृयामः॥ ॥

इति षष्ठस्य तृतीये द्वितीयो वर्गः॥ ११ ॥यः संस्थ इति यः प्रसिद्धः इंद्रः संस्थे संग्रामे शतक्रतुः बहुकर्मा भवति अपि च आ
त् अनंतरं इंद्रः शत्रुवधादिकं कृणोति करोति चित् एव अप मिंद्रः वृत्रहा वृत्राणां हंता भवति किं च जरितृभ्यः स्तोतॄणाम
र्थं पुरूवसुः बहुधनो भवति न स्वार्थमित्यर्थः १२ स नः शक इति सः शक इंद्रः नः चित् अस्मान् अपि आशकत् शक्तान्
करोतु अपि च इंद्रो दानवान् विश्वाभिः सर्वैः ऊतिभिः पालनैः अंतराभरः अंतरा हरः छिद्राणामापूरक इत्यर्थः १३ यो राय इति
यः इंद्रः रायः धनस्य अवनिः पालकः महान् सर्वोत्तमः सुपारः शोभनाचरणश्च भवति यश्च सुन्वतः सोमाभिषवं कुर्वतः य
जमानस्य सखाभिसो भवति तमिंद्रं अभिगायत अभिष्टुवत १४ आयंतारमिति आयंतारं सर्वतो नियामकं महि महांतं
पृतनासु संग्रामेषु स्थिरं अचलं श्रवाजिनं श्रवसो जेतारं ओजसा बलेन भूरेः बहोर्धनस्य ईशानं ईश्वरं अभिगायत १५
न किरस्येति अस्य इंद्रस्य सुकृतानां शोभनानां शचीनां कर्मणां नकिः न कश्चित् नियंता नियामकः अयमिंद्रो न दादिति नि
प्रयच्छती निनकिर्व स्तानकश्चित् वदति किंतु सर्वेपि जनाः अयं प्रदाता द्रव्यस्येव ब्रवीतीत्यर्थः॥ ॥इति षष्ठस्य तृतीये तृती
यो वर्गः॥ १६॥ न नूनमिति ब्राह्मणोपि सोमं प्राश्नुवंतिते ब्राह्मनः तेषां सोमं सुन्वतां ब्रह्मणां ब्राह्मणानां ऋणं देव ऋणं न
नूनमस्ति न खलु विद्यते किं च अप्रजाः अपि स्तार्णधिनेन सोमः न पर्येन पाषते १७ यन्य इति हे उपगातारः यन्येद्दृत स्तत्यस
र्वेंद्रः तस्मिन् सामानि उपगायत हे होतारः यन्ये तस्मिन् इंद्रे उक्थानि स्तोत्राणि शंसत हे अध्वर्यवः यन्येद्दृत तस्मिन् नेवइं
द्रे ब्रह्मा अन्नानि कृणोत कुरुत जुहुत १८ पन्य आददिरदिति यः वाजी बलवान् शतावीराणां शतानि सहस्राणि सहस्राणि च
आददिरत् अभिमुख्येन दारयति सोमामिंद्रः शत्रुभिरघृतः पन्यः स्तुत्यो भवति यज्वनः विधिनेश्ववतो यजमानस्य वृधः व
र्धयिता च भवति १९ विषूवृदिति हे इंद्र आहुव आकात्म्यः कृष्टीनां मनुष्याणां स्वधाः हवींषि अनु स्तु सुष्टुवि च द्वितीयः अ
नुपूरणः सुतानां अभिषुतान् सोमांश्च पिब २० पिब स्वधैनवानामिति हे इंद्र स्वधैनवानां स्वधेन वान् स्वभृतधेनोः संब

भिनः सोमान्न धेन्वा श्रीणातीत्यर्थः उतापि च यः सोमः तुभ्यं उदके सचासंसृष्टः तमपि सोमं पिब ५ तापि च यः सोमः तव त्वदी
यः त्वामुद्दिश्य गृहीतः सोयं त्वया तव्य इति शेषः॥ ॥इति षष्ठस्य तृतीये चतुर्थो वर्गः॥२१॥अतीही ति हे इंद्र मनुषा विणं क्रोधे
न सोमं सुत्वंतं अतीहि अतिगच्छ तितथा उपारणे ब्राह्मणाः उपेत्य यस्मिन् देशे न रमंते स उपारणः तस्मिन् देशे सु सुवासंसु
न्वंतं अतीहि इमेरातं ब्राह्मणोपद्रवरहितं देशे अस्माभिः दत्तं इमं सुतं सोमं पिब २२ इहि ति स्म इति हे इंद्र धेनाः अस्मदी
यास्तुतीः जेषयाकशात्यः अपश्यत सत्वं परावतः दूरात् तिस्रः अग्र पृष्ठ पार्श्व दिशाः इहि गच्छ अपि च पंच जनान्मनुष्या
न् अतिइहि अतिगच्छ २३ सूर्यो रश्मिमिति हे इंद्र सूर्यो यथा रश्मिं किरणान् विसृजति तथा मत्यं धनं विसृज अपि च मे म
दीयाः गिरः स्तुतयः सध्यक् सहत्वां आपश्च तु निम्नं आ यो न यथा निम्नं देशं आपः सह सरिगच्छंति तद्वत् इत्यर्थः २४ अ
ध्वर्यवा निति हे अध्वर्यो शिप्रिणे हनूमते वीराय शूरायेंद्राय सोमं तु क्षिप्रमे वा सिंच सुतस्य सुतं सोमं पीतये पानाय च आ
भर हरस्व २५ य उद्र इति यः उद्रः उदकार्थ फलिगं मेघं भिनत् अभिनत् सिंधून् अपश्च अंतरिक्षात् न्यक् अर्वाक् अवासृ
जत् यश्च गोषु पक्वं पयः धारयत् सः इंद्रः इत्यर्थः॥ ॥इति षष्ठस्य तृतीये पंचमो वर्गः॥ ॥२६॥अहन्वृत्रमिति ऋचीषमः
दीप्तसमः इंद्रः वृत्रं असुरं अहन् जघान तथा और्णवाभं एतन्नामकं अहीशुवं एतन्नामकं च शत्रुं अहन् तथा हिमेन तु
षारेण अर्बुदं मेघं अविध्यत् २७ प्रवउग्रायेति हे उद्गातारः वः यूयं उग्राय उद्गूर्णाय निष्टुरे शत्रून् निस्तरते अषाळ्हाय
शत्रूणां अभिभवित्रे प्रसक्षिणे प्रसहनशीलायेंद्राय देवत्तं देव प्रदत्तं ब्रह्म स्तोत्रं प्रगायत २८ यो विश्वानीति अंधसः
अद्यमानस्य कर्माणि मदे संजाते विश्वानि सर्वाणि व्रतानि कर्माणि सोमस्य यो इंद्रः देवेषु अभिचाकशीति ज्ञापयति तस्मै इंद्राय देव
तं ब्रह्म गायतेत्यर्थः २९ इहत्येति इह यज्ञे सतो प्रसिद्धौ सधमाद्या सहमाद्यंतौ हिरण्यकेश्या हिरण्यकेश्यौ हरी एतन्नाम
कौ अश्वौ हितं हितकरं प्रियः सोमरूपमन्नं अभि अभिलक्ष्य वोल्हां इंद्रं वहतां प्रापयतां इति ३० अर्वाचं त्वेति हे पुरुष्टु

391
1915

त इंद्र त्वा त्वां प्रियमेधस्तुता हरी अश्वौ सोमपेयाय सोमपानार्थं अर्वाचं अस्मदभिमुखं वक्षतः वहतः॥ ॥इति षष्ठस्य तृती
ये षष्ठो वर्गः॥ वयं घेति एकानविंशत्यर्चं तृतीयं सूक्तं कण्वः मेधातिथिः ऋषिः बृहती छंदः षोडश्याद्याः तिस्रः गायत्र्यः एकोन
विंश्यनुष्टुप् इंद्रो देवता १ वयं घत्वेति हे वृत्रहन् इंद्र त्वा वयं घ वयं खलु सुतावंतः सोमम भिषुतवंत अपोन आप इव प्रणव
म भिगच्छंतः पवित्रस्य सोमानां प्रस्रवणेषु वृक्त बर्हिषः स्तीर्णबर्हिषः स्तोतारश्च त्वां पर्यासते उपासते २ स्वरंतीति हे वसो
वासयितः इंद्र त्वा त्वां सुते अभिषुते सोमे निरेके निर्गमने नरो नेतारः स्वरंति शब्दायंते अपि च इंद्रः सुतं सोमं प्रति तृषाणः तृष्य
न् स्वर्द्धीव स्वभ्रूत शब्द इव वंसगा वननीयगमनः वृषभः इव शब्दं कुर्वन् कदा ओकः स्थानं आगमः आगच्छेदिति ३ कण्वेभि
रिति हे धृष्णो धर्षक इंद्र कण्वेभिः कण्वान् उद्दिश्य सहस्रिणं सहस्रसंख्याकं वाजं अन्नं आदर्षि दारिदेहि मघवन् धनवन् विवर्ष
णिवद्रूपवत्पिशंगरूपं गोमंतं गोभिर्युक्तं वाजमन्नं मक्षु शीघ्रं ईमहे याचामहे वा मिति शेषः ४ पाहि गायेति हे मध्यातिथे पाहि सोमं पिब अंधसः पीतस्य सोमस्य मदे तस्मै इंद्राय गाय स्तोत्रं च पठ यः इंद्रः हर्योः अश्वयोः संमिश्लः
रथे संमिश्लयिता स्तोतॄणां सोमि सचा सहयः इंद्रो वज्री पस्य रथः हिरण्ययः ५ यः सुषव्य इति यः सुषव्यः शोभनसव्यहस्तः
यश्च सुदक्षिणः यश्च इनः ईश्वरः यश्चापि सुक्रतुः सुप्रज्ञः सहस्रा सहस्राणि यश्च आकरः कर्तयिश्चापि शतामघः बहु
धनः यश्च पूर्भित् शत्रुपुरां भेत्ता यश्च आरितः स्तोमान् प्रसृतः प्राप्तः स इंद्रः गणे अस्माभिः स्तूयते॥ ॥इति षष्ठस्य तृती
ये सप्तमो वर्गः॥६॥ यो धृषित इति यः धृषितः शत्रूणां धर्षयिता यश्चावृतः शत्रुभिः आवृतः यश्चापि श्मश्रुषु युद्धेषु श्रि
तः अस्ति भवति यश्चापि विभूतद्युम्नः प्रभूतधनः यश्च च्यवनः सोमानां च्यावयिता यश्चापि पुरुष्टुतः बहुस्तुतः सन्
इंद्रः क्रत्वा कर्मणा शाकिनः शक्तस्य यजमानस्य गौरिव यथा च गौः पयसो दोग्ध्री तथा कामानां दोग्धा भवति ७ क ईं वेदे
ति सुते अभिषुते सोमे सचा कत्विजा सह सोमं पिबंतं ईं एनमिंद्रं को वेद वेत्ति न कोपीत्यर्थः कत् किं वा सयः अन्नं दधे धा

भा-घ-
३२

रयति योपमिंद्रः शिप्रिन्तमान् अंधसा सोमेन मंदानः ७० जसा बलेन पुरः शत्रुपुराणि विभिनत्ति ८ दानामृगइति मृगः
शत्रूणां अन्वेषकः वारणः गजः दानानमदजलानां वपुरुत्रा बहुषु यज्ञेषु चरथं चरणशीलमदं दधे इंद्रो धारयति प्रत्यक्षकृते
इंद्र त्वा त्वां नकिः नियमत् न कश्चित् नियच्छति सुते सोमे आगमः आगच्छ महान् हि त्वं ओजसा बलेन सर्वतश्चरसि ९ यउग्र
इति यः उग्रः उद्गूर्णः सन् अनिष्टृतः शत्रुभिः अनिस्तीर्णः स्थिरः अचलः रणाय युद्धाय संस्कृतः शास्त्रैः अलंकृतः सः इंद्रः मघ
वा धनवान् यदि स्तोतुः हवं आह्वानं शृणवत् शृणोति तर्हि अन्यत्र न याति न गच्छति किंतु आगमत् तत्रैवागच्छति १० सत्य
मित्था इति हे उग्र इंद्र त्वं सत्यं इत्था इत्थं वृषभः कामानां वर्षकः एवासि वृषजूतिः वृषभैः सेक्तृभिः प्रेरकैः प्रेरितः नो अस्माकं आवृतः शत्रु
भिः अपरिवृतः श्रोताः सि हिंसकः एव श्रुणिविषः शृण्वसि परावति दूरे देशे अर्वावति समीपे वृषभः अश्रुतः अश्रूयथाः
॥ ॥इति षष्ठस्य तृतीये अष्टमो वर्गः॥ ॥११॥ वृषणस्त इति हे मघवन् ते तव अभीशवः रश्मयः अश्वरशनाः वृषणः वर्षिता
रः हिरण्ययी हिरण्मयी कशा पि वृषा रथो पि वृषा वर्षिता हरी अश्वावपि वृषणा वर्षितारौ हे शतक्रतो बहुप्रज्ञ इंद्र त्वं च वृष
वर्षिता १२ वृषा सोता इति हे वृषन् वर्षितः इंद्र ते तव सोता अभिषवकर्ता वृषा वर्षिता सन् सुनोतु सोमं अभिषुणातु हे ऋजी
षिन् ऋजुगमन इंद्र आभर अस्मभ्यं आहर हरीणां अश्वानां आभिमुख्येन हि स्थात इंद्र त्वा त्वां नदीषु उदकेषु वृषणं वर्षि
तारं सोमं वृषा वर्षिता दधन्वे धारितवान् अभिषवार्थं १३ एंद्रयाहीति हे शविष्ठ बलवत्तम इंद्र सोम्यं सोमात्मकं मधु अ
मृतं पीतये पानाय आयाहि आगच्छ किमर्थं मघवा धनवान् सुक्रतुः केके मां अयमिंद्रः गिरः स्तुतीः ब्रह्म स्तोत्राणि उक्था
नि शस्त्राणि च ना अच्छ आभिमुख्येन शृणवत् शृणोति अतः आगमनमित्यर्थः १४ वहंतु त्वेति हे रथेष्ठ हे शतक्रतो बहुप्रज्ञ इंद्र
रथेष्ठा रथस्थं अर्यं ईश्वरं त्वा त्वां रथयुजः रथयुक्ताः हरयः अश्वाः अन्येषां सवनानि संति तानि तिरश्चित् तिरस्कु
र्वंतः सवनानि अस्मदीयानि सवनानि आवहंतु १५ अस्माकमद्येति हे महामह महत्साम पिमहीं अद्य अंतमं अंतिक ३२

तमं अस्माकं मेध्यातिथीनां स्तोमां धिष्व धारय हे सुदक्ष दीप्त सोमपाः इंद्र ते तव मदाय सवनासवनानि अस्माकं शंतमानि
तमानि संतु भवंतु॥ ॥इति षष्ठस्य तृतीये नवमो वर्गः॥ ३४॥ नहि षइति यः वीरः शूरः अस्मान् आनयत् स इंद्रः ते तव शास्त्रे
शासनेनो हिरण्यति न रमते मम अपि शासनेन रण्यति अन्यस्या पि शासनेन रण्यति किंतु रक्षण एव रमत इत्यर्थः १७ इंद्र
श्चिद्घेति यः मेध्यातिथेः धनप्रदाता प्लायोगिरासंगः स पुमान् सन् स्त्री अभवत् तदा य दिंद्रः उवाच तदिदमाह इंद्रश्चित् घ इंद्रः
खलु तद् अब्रवीत् स्त्रियाः मनश्चित्तं अशास्यं पुरुषेण शासितुमशक्यं उतो अपि च स्त्रियाः क्रतुं प्रज्ञां रघुं लघुं अह आह १८
सप्ती चिद्घेति सप्ती चिद्घ इंद्रस्य अश्वावपि स्वलु मदच्युता सोमं प्रतिगंतारौ इंद्रस्य वरथे मिथुना मिथुनौ वहतः एवं तत्रा
वं मेव वृष्णः इंद्रस्य रथस्य धूः उत्तराः श्रेष्ठा उत्तरा भवति १९ अधः पश्यस्वेति एवमंतरिक्षात् आगच्छन् रथस्थः इंद्रः स्त्रि
यं संतं स्वस्मात् पुंस्त्वमिच्छं प्लायोगिं उवाच तदिदं हि हे प्लायोगे त्वं स्त्री सती अधः पश्यस्व एषः स्त्रीणां धर्मः उपरि मा पश्यस्व पाद
कौ पादावपि संतरा संश्लिष्टौ यथा भवतः तथा हर यथा पुरुषो विश्लिष्ट पादनिधानो भवति तथा त्वया स्त्रिया न कर्तव्यमित्य
र्थः अपि च ते कशप्लकौ गुल्फौ मा दृशन् पुरुषाः न पश्यंतु स्त्रियो हि आगुल्फात् अभिसंवीताः भवंति हि इत्यर्थः हि यस्मात् का
रणात् ब्रह्मा सन् स्त्री बभूविथ॥ ॥इति षष्ठस्य तृतीये दशमो वर्गः॥ ॥एंद्रायाहीति अष्टादशर्चं चतुर्थं सूक्तं काण्वः नी
पातिथिः ऋषिः अनुष्टुप् छंदः षोडश्याद्यास्तिस्रः गायत्र्यः बृहत्यौ चेषः अंगिरसो गोत्रो प्रन्नाः सरूपसंख्याकाः आयदिंद्रश्चे
त्यादीनां तासां तिसृणां ऋषयः इंद्रो देवता १ एंद्रयाहीति हे इंद्र कण्वस्य सुष्टुतिं शोभनां स्तुतिं हरिभिः अश्वैः उप आयाहि हि
वो धुलोकं अमुष्य अमुष्मिन् इंद्र शासनो शासनि विभक्तिव्यत्ययः तत्र वयं सुखं आस्महे हे दिवावसो कांतरु विधिकं दृ दिवं स्वर्ग
ययथ गे २ आत्वाया वेति हे इंद्र त्वा त्वां इह यज्ञे ग्रावा सोमाभिषुवपाषाणः सोमी सोमवान् वदन् शब्दं कुर्वन् घोषिणध्व
निनासह आगच्छतु सिद्धमन्यत् ३ अत्राविनेमिरिति अत्र अस्मिन् यज्ञे एषां अभिषवग्राव्णां नेमिः सोमलतां विधून्वन्

ति विशेषेण कंपयति उरां मेषिं वृकोन वृकइव० ४ आत्वाकण्वाइतिहे इंद्र त्वां त्वां इह यज्ञे कण्वाः अवसे रक्षणाय वाजसात
ये अन्नस्य प्राप्त्यर्थं च आहं वंते अभिमुख्येन ह्वयंते० ५ दधामितिइतिहे इंद्र ते तुभ्यं सुतानां सुतान् सोमान् दध्यामि प्रय
च्छामि वृष्णोनयथावायवे पूर्वपाय्यं यज्ञमुखे पेयं प्रयच्छतितद्वत् अहं प्रयच्छामीत्यर्थः॥ ॥इतिषष्ठस्य तृतीये एकादशो व
र्गः॥ ६॥स्मत्पुरंधिरितिहे इंद्र स्मत्पुरंधिः स्वर्गकुद्वीनः अस्मान् आगहि तथा विश्वतः धीः सर्वजगतो धारकः त्वं नः
अस्माकं ऊतये रक्षणाय आगहि आगछ० ७ आमोयाहीतिहे महे महतेमतेम हावुद्धे सहस्रोति सहस्ररक्षणे शतमघ
वहुधने इंद्र त्वं नः अस्मान् आयाहि आगछ० ८ आत्वाहितेतिहे इंद्र त्वां देवत्रदिवानां मध्ये ईड्यः स्तुत्यः होतादिवानांम
ह्वाता अग्निः मनुर्हितः मनुष्यगृहेषु निहितः आवक्षत् वहतु ९ आत्वामदच्युतेतिहे इंद्र त्वां मदच्युता मदच्युतौ शत्रू
णां मदस्य च्यावयितारौ हरी अश्वौ श्येनं श्येनाख्यं पक्षिणं पक्षेव आ लायपक्षाविव आवक्षतः आवहतां० १० आयाही
तिहे अर्य ईश्वर त्वं आपरि सर्वतः आयाहि आगछ सोमस्य पीतये तव पानार्थं सोमं स्वाहा स्वाहाकरोमि० ११ इतिष
ष्ठस्य तृतीये द्वादशो वर्गः॥ १२॥आनोयाहीतिहे इंद्र त्वं नः अस्माकं इह यज्ञे उक्थेषु शस्त्रेषु रण्यमानेषु उपश्रुति स
मीपे आयाहि आगछ अस्मान् रणय आवः० १२ सरूपैरितिहे इंद्र संभृताश्वः पुष्टाश्वः त्वं सुसंभृतैः सरूपैः समानरूपैः
अश्वैः नः अस्मान् सुस्तुत आगहि आगछ० १३ आयाहीतिहे इंद्र त्वं पर्वतेभ्यः आयाय हि आगछ समुद्रस्य अंतरिक्ष
स्य विष्टपः विष्टपात् च आभ्यायाहि० १४ आमो गव्यानीति० हे शूर इंद्र त्वं नः अस्मभ्यं सहस्रा सहस्राणि गव्यानि गो हि
तानि अश्व्यानि अश्वहितानि रर्दूहि आविकृणु० १५ आनः सहस्रशाइतिहे इंद्र त्वं नः अस्मभ्यं सहस्रशः सहस्रधा आयु
तानि शतानि च अमांष्टानि वसून्याभर आहर० १६ आयदिंद्रइति वसुरो चिषः वसुदीप्तयः वयं सहस्रं अस्माकं नेता
इंद्रस्य ओजिष्ठं वलवत्तरं अश्व्यं अश्व्यात्मकं पशुं वयम् यदा आददहि पारावतादारभ्य हितदायेइतिउत्तरत्र संबंधः १७ ३४

यऋज्राइति ये ऋज्राः ऋजुगामिनः वातरंहसः वायुसदृशवेगाः अरुषासः आरोचमानाः रघुष्यदः रघुस्यंदमाना अ
श्वाः सूर्य इव यथा सूर्यः तथा भ्राजंते १८ पारावतस्येति पारावतस्य रातिषु दत्तेषु द्रवच्चक्रेषु आशुषु प्रतिगृहीतेषु स
त्सु वने सु मध्ये आतिष्ठं वसुरोचिषां सहस्रं वदति॥ ॥इतिषष्ठस्य तृतीये त्रयोदशो वर्गः॥ ॥अग्निनेंद्रेणेति चतुर्विंश
र्चं पंचमं सूक्तं श्यावाश्वः आत्रेयः ऋषिः उपरिष्टाज्ज्योतिः छंदः द्वादशाकाः त्रयः पादाः चतुर्थपादस्याष्टाक्षरत्वात् यतो
ष्टकः ततो ज्योतिरिति तल्लक्षणं द्वात्रिंशी पंक्तीः त्रयो विंशी महाबृहती चत्वारोऽष्टका जागतश्चमहाबृहतीति तल्लक्षणं
चतुर्विंशापंक्तिः अश्विनौ देवते १ अग्निनेंद्रेणेतिहे अश्विना० नौ अग्निना इंद्रेण वरुणेन विष्णुना आदित्यैः रुद्रैः वसु
भिश्च सवाभुवा सहभूतौ उषसा सूर्येण च सजोषसा संगतौ युवां सोमं पिबतं २ विश्वाभिरितिहे वाजिनावलिनौ अ
श्विना अश्विनौ विश्वाभिः सर्वाभिः धीभिः प्रज्ञाभिः भुवनेन भूतजातेन दिवा द्युलोकेन च पृथिव्या च अद्रिभिश्च सवाभु
वा सहभूतौ सजोषसा उषसा सूर्येण च संगतौ सोमं पिबतं ३ विश्वैर्देवैरितिहे अश्विनौ विश्वैर्देवैः त्रिभिः एकादशैः त्र
यस्त्रिंशैः इह यज्ञे अद्भिः मरुद्भिः भृगुभिश्च सचाभुवा सहभूतौ युवां सजोषसा उषसा सूर्येण च सोमं पिबतं ४ जुषेथां
यज्ञमितिहे अश्विनौ यज्ञं जुषेथां सेवेथां मम महवस्य हवं वोधतं जानीतं इह यज्ञे विश्वा सर्वाणि सवनानि अवगछ
तं प्राश्नुतं इषं अन्नं नो आवोऌहं प्रापयतं० ५ स्तोमं जुषेथामितिहे देवौ अश्विनौ युवां इह अस्मिन् यज्ञे स्तोमं जुषेथां से
वेथां पुत्रे शव यथा युवानौ कन्यानां कन्यानां आह्वानं सेवेते तद्वत् विश्वा विश्वानि सवनानि आगछतं० ६ गिरो जुषेथां
मितिहे देवौ अश्विनौ नः अस्माकं गिरः स्तुतीः जुषेथां सेवेतां तथा अध्वरं यज्ञं च जुषेथां इह यज्ञे विश्वानि सवनानि अवग
छतं प्राश्नुतं०॥ ॥इतिषष्ठस्य तृतीये चतुर्दशो वर्गः॥ ७ ॥हारिद्रवेवेतिहे अश्विना० नौ युवां सुतं अभिषुतं सोमं उप
यतथः हारिद्रवेव यथा हारिद्रवो पक्षिणो वनावनानि जलानि उपपतथः तद्वत् हृदि स्यथः महिषेव यथा पिपासितौ महिषौ

भा॰ष॰
३५

उदकादि उपगच्छतः तथास्तुतं सामं अवगच्छ यस्य उषसा सूर्येण च सजोषसा संगतौ त्रिवर्तिः त्रिमार्गियातं च इत्यूरणः
८ हंसाविवेति हे अश्विनौ युवां हंसाविव यथा हंसौ अध्वगौ द्रव यथा च पाथिकौ उदकं गच्छतः तथा वेगेन स्तुतं सोमं प
तयः॰ ९ श्येनाविवेति हे अश्विनौ युवां श्येनाविव यथा श्येनौ गगनं गच्छतः तथा वेगेन स्तुतं सोमं रुध्य दातयजमानार्थं
तपः गच्छतः॰ १० पिबतं चेति हे अश्विना॰ नौ युवां सोमं पिबतं च तणुतं च तप्यतं च पानार्थं आगच्छतं च सोमपीत्ता ते सो
सं नौ युवां अस्मभ्यं प्रजां च धत्तं धारयतं द्रविणं धनं च धत्तं सजोषसा सूर्येण च संगतौ नः अस्मभ्यं ऊर्जं बलं धत्तं अश्वो
पुरणौ ११ जयतं चेति हे अश्विनौ युवां जयतं शत्रूंश्च जयतं पस्तुतं स्तोतॄंश्च प्रचावतं अस्मांश्च प्ररक्षतं १२ हतं चेति
हे अश्विनौ युवां शत्रूंश्च हतं उत अपि च पतनं मित्रिणः मे आयुक्तांश्च गच्छतं॰॥ ॥इतिषष्ठस्य तृतीये पंचदशो वर्गः॥१५॥
मित्रावरुणवंतेति हे अश्विनौ उत अपि च युवां मित्रावरुणवंता मित्रावरुणयुक्तौ धर्मवंता धर्मयुक्तौ मरुत्वंता मरुद्भिः यु
क्तौ च जरितुः स्तोतुः हवं आह्वानं गच्छथः आगच्छथं उषसा सूर्येण आदित्यैश्च सजोषसा संगतौ यातं गच्छतं १४ अंगिर
स्वंतेति उत अपि च हे अश्विनौ युवां अंगिरस्वंतौ अंगिरोभिः युक्तौ विष्णुवंता विष्णुना च सहितौ मरुत्वंता मरुद्भिश्च सहितौ
मे रेजेतुः मम स्तोतुः आह्वानं गच्छतं॰ १५ ऋभुमंतेति हे अश्विना॰ नौ ऋभुमंता ऋभुसहितौ वृषणा कामानां वर्षितारौ वा
जवंता अन्नयुक्तौ मरुत्वंता मरुत्वंतौ च मे स्तोतुः आह्वानं गच्छतं॰ १६ ब्रह्मजिन्वतमिति हे अश्विना॰ नौ युवां ब्रह्म ब्राह्म
णं जिन्वतं प्रीतयतं उत अपि च धियः कर्माणि जिन्वतं हतं च रक्षांसि अमीवा राक्षसांश्च सेधतं उषसा सूर्येण च संगतौ
यजमानस्य सोमं पिबतमित्यर्थः १७ क्षत्रं जिन्वतमिति हे अश्विनौ युवां क्षत्रं क्षत्रियं जिन्वतं उत अपि च नृन् मनुष्यान् जि
न्वतं॰ १८ धेनूर्जिन्वतमिति हे अश्विनौ धेनूर्जिन्वतं उत अपि च विशः वैश्यांश्च जिन्वतं॰॥ ॥इतिषष्ठस्य तृतीये षोडशो व
र्गः॥ अत्रेरिवेति हे अश्विनौ मदच्युता शत्रूणां मदस्य च्यावयितारौ युवां सुन्वतः सोमाभिषवं कुर्वतः श्यावाश्वस्य मम पिता
महस्य अत्रेरिव पूर्व्यां स्तुतिं मुख्यां स्तुतिं शृणुतं उषसा सूर्येण च सजोषसा संगतौ तिरोअह्न्यं सोमं पिबतं तिरोहितं पू ३५

र्वस्मिन्नहनि अपरेद्युः प्रातराश्विनो यागइति २० सर्गांइवेति हे अश्विनौ श्यावाश्वस्य सुन्वतः मम स्तुतीः शोभनाः
स्तुतीः शृणुतं सर्गान् इव आभरणानि यथा तथा आसनि उपसृजतं॰ २१ रश्मीं इवेति हे अश्विनौ मदच्युता शत्रूणां म
२ दस्य च्यावयितारौ युवां सुन्वतः श्यावाश्वस्य मम अध्वरान् रश्मीन् इव यथाश्च प्रग्रहान् तद्वत् उपयच्छतं उपगच्छतं॰ २२
अर्वाग्रथमिति हे अश्विनौ वां स्तोयं रथं अर्वाक् अवस्युः रक्षणकामोहं श्यावाश्वः वां कुर्वे हयामि दाश्वुषे हवींषि प्रयच्छते म
ध्यरत्नानि धत्तं धारयतं २३ नमोवाक इति हे अश्विनौ नरा नेतारौ युवां विचक्षणस्य हवनशीलस्य नमोवाके प्रस्थिते नमो
वाकेन नमस्कारायप्राप्ते सनमोवाकः तस्मिन् अध्वरे यज्ञे ते ये सोमपानाय आयातं॰ २४ स्वाहाकृतस्येति हे अश्विनौ देवौ
युवां स्तृतस्य अभिषुतस्य स्वाहाकृतस्य कृतस्वाहाकारस्य अंधसः सोमस्य तृपतं तृप्यतं॰॥ ॥इतिषष्ठस्य तृतीये सप्तदशो वर्गः॥
अवितासीति सप्तर्चं षष्ठं सूक्तं अर्चयो श्यावाश्वः ऋषिः शाक्वरी छंदः षट्पंचाक्षरा शारी छंदः श्यावाश्वे निसप्तमी महापं
क्तिः षट् अष्टकावा महापंक्तिरिति लक्षणं इंद्रो देवता १ अवितासीति हे शतक्रतो इंद्र सुन्वतः सोमाभिषवं कुर्वतः वृक्त
बर्हिषः तीर्णबर्हिषः यजमानस्य अविता रक्षिता असि भव सि मदाय मदार्थं सोमं पिब हे सत्यते सतां पते इंद्र ते तुभ्यं भा
गं स्तरवकारं अधारयन् सर्वदेवाः अकल्पयन् तं भागं विश्वाः पृतनाः शत्रूणां सर्वसेनाः उरुबर्हज्रयः वेगं च संसहा
नः सम्यक् अभिभवन् अप्सुजित् अप्सु जेता मरुत्वान् च सन् पिब २ प्रावः स्तोतारमिति हे मघवन् स्तोतारं प्राव प्ररक्ष
त्वां चाव सोमपानेन रक्षसि॰ ३ ऊर्जो देवानीति हे इंद्र त्वं देवौ ऊर्जा अन्नेन हविषा अवसि रक्षसि चाम पि ओजसा बलेन अ
वसि॰ ४ जनितादिवइति हे इंद्र त्वं दिवः द्युलोकस्य जनिता जनकोसि पृथिव्याश्च जनितासि॰ ५ जनिता स्वानामिति हे
इंद्र त्वं अश्वानां जनिता जनकोसि गवां च जनितासि॰ ६ अत्रीणामिति हे अद्रिवः वज्रवन् इंद्र अत्रीणां स्तोमं मरुत्स्वधि
पृ जितं कुरु॰ ७ श्यावाश्वस्येति हे इंद्र त्वं सुन्वतः सोमाभिषवं कुर्वतः श्यावाश्वस्य मम स्तुतिं कर्माणि कृण्वतः कुर्वतः अ

त्रेः यथा अम्भृणोः अम्भोधीः तथाम्भृणु अपिवत्त्वमेकइत्त्वएक एवन्तषात्येयुद्धे ब्रह्माणि स्तोत्राणि कामैः वर्धयन्त्त्रसदस्युं
पुरुकुत्संपुत्रं प्राविथरक्षिथ॥ ॥इतिषष्ठस्यतृतीये अष्टादशोवर्गः॥ प्रेदंब्रह्मेति सप्तर्चं सप्तमं सूक्तं आत्रेयः श्यावाश्वः
ऋषिः आद्याद्यापंचादेशोक्षरा अतिजगती शिष्टाः षडुष्टकाः महापंक्तयः इंद्रोदेवता १ प्रेदं ब्रह्मेति हे शचीपते इंद्र
वृत्रतूर्येषु संग्रामेषु इदं ब्रह्म इमान् ब्राह्मणान् विश्वाभिः सर्वाभिः ऊतिभिः रक्षाभिः प्राविथ प्ररक्षसत्वं तः सोमा
भिषवं कुर्वतः यजमानांश्च प्राविथ अपिचहे अनेद्य अनिंद्यवज्रिवः वज्रिवन्वृत्रहन् इंद्र माध्यंदिनस्य सवनस्य सं
बंधिनः सोमस्य सोमं पिब २ सेहानउग्रेति हे शचीपते कर्मपते उग्र उद्गूर्णद्रुअभिद्रुहः अभिद्रोग्धाः पृतनाः सेनाः से
हानः अभिभवन् सर्वैः पालनैः ब्राह्मणान् प्राविथेत्यर्थः० ३ एकराडिति हे शचीपते इंद्र अस्यभुवनस्य एकराट्
एकएवराजासन्राजसि भ्राजसे० ४ सस्थावानेति हे शचीपते इंद्र त्वमेकः इत् एकः एव स्थावाना समानौ तिष्ठंतौ स
इमौ लोकौ भूस्वर्गलोकौ पवयसि पृथक्करोषि० ५ क्षेमस्यचेति अपिचहे शचीपते इंद्र त्वं च सर्वस्य जगतः क्षेमस्य प्र
युतश्च प्रायोग त्वं च योगक्षेमयोः इत्यर्थः ईशिषे ईश्वरो भवसि० ६ क्षत्रायत्वमिति हे शचीपते इंद्र त्वं क्षत्राय जगतो ब
लाय भवसि अवसि आश्रितान्रक्षसि त्वं नाविधकेनापि न रक्षसे० ७ श्यावाश्वस्येति हे इंद्र रेभतः स्तुवतः श्यावाश्व
स्य मम स्तुतिं कर्माणि कृण्वतः अत्रेः यथा अम्भृणोः तथा शृणु अपिचन्तषात्ये एव क्षत्राणि बलानि कामैः वर्द्धयन्युद्धे
त्वमेक इत् त्रसदस्युं प्राविथ॥ ॥इतिषष्ठस्यतृतीये एकोनविंशोवर्गः॥ ॥यज्ञस्यहीतिदशार्चं अष्टमं सूक्तं श्यावाश्वः
ऋषिः गायत्री छंदः इंद्राग्नी देवता यज्ञस्येति हे इंद्राग्नी सत्याभुवौ युवां यज्ञस्य ऋत्विजा ऋत्विजौ रथभवथः हि
वाजेषु युद्धेषु कर्मसु च उपतिष्ठंतौ इंद्राग्नी तस्य मम स्तुतिं बोधतं जानीतं २ तोशासेति हे इंद्राग्नी तोशासा शत्रून्
हिंसंतौ रथयावाना रथेन गच्छंतौ वृत्रहणा वृत्रस्य हंतारौ अपराजिता केनापि अपराजितौ तस्येतं मां बोधतं ३
इदं वामिति हे इंद्राग्नी वां युवां उद्दिश्य नरः नेतारः अद्रिभिः ग्रावभिः मदिरं मदकरं मधु सोमाख्यं इदं अमृतं अधु

क्षन् अपूरयन्० जुषेथामिति हे सधस्तुती सहभूतस्तुतीन राने तारौ इंद्राग्नी यज्ञं जुषेथां सेवेथां इष्टये यागाय स्तुतं
अभिषुतं सोमं च आगतं आगच्छतं ५ इमा जुषेथामिति हे इंद्राग्नी नरा नेतारौ युवां येभिः येः सवनेः हव्यानि उद्दिधुः
वहथः तानि इमा इमानि सवनानि जुषेथां सेवेथां आगतं च ६ इमामिति हे इंद्राग्नी मानेनारौ युवां मम गायत्र
वर्तनिं गायत्रमार्गां इमां सुष्टुतिं शोभनां स्तुतिं जुषेथां आगतं च० ॥ ॥इतिषष्ठस्यतृतीये विंशोवर्गः॥ ॥७ प्रातर्याव
भिरिति हे जेन्यावसू जेतारौ वसुधनौ इंद्राग्नी प्रातर्यावभिः देवेभिः देवैः सह सोमपीतये सोमस्य पानाय आगतं आग
च्छतं ८ श्यावाश्वस्येति हे इंद्राग्नी युवां सुन्वतः सोमाभिषवं कुर्वतः यजमानस्य श्यावाश्वस्य मम अत्रीणां ऋत्विजां हवं आह्वा
नं सोमस्य पानाय शृणुतं ९ एवावामिति हे इंद्राग्नी वां युवां यथा मेधिराः प्राज्ञाः एवं कुर्वत आह्वतवंतः अहं ऊतये रक्ष
णाय सोमस्य पीतये आह्वः ह्वयामि० १० आहमितिया भ्यां ययोः इंद्राग्न्योः अर्थं गायत्रं साम ऋच्यते स्तूयते तयोः सरस्व
तीवतोः स्तातिमतोः इंद्राग्न्योः संबंधी अवः रक्षणं अहं आवृणे॥ ॥इतिषष्ठस्यतृतीये एकविंशोवर्गः॥ ॥अग्निमस्तो
षीति दशार्चं नवमं सूक्तं एवः नाभाकः ऋषिः षडुष्टका महापंक्तिश्छंदः अग्निर्देवता १ अग्निस्तोमेषीति ऋग्मियं ऋग
र्हं अग्निं आ स्तोषि स्तौमि अपिचाग्निं यजध्यै यष्टुं इळा स्तुत्या स्तोमि इत्यर्थः अपिचाग्निर्नः अस्माकं विदथे यज्ञे देवान्
हविर्भिः अनक्तु कविः क्रांतदर्शी उभयावापृथिव्योः अंतः दूत्यं हविर्वहनादिलक्षणं दूतकर्म चरति अन्यके शत्रवोपि
समे सर्वे नभंतां अग्निना हिंस्यंतां २ न्यग्नेनव्यसेति हे अग्ने तनूषि अस्माकं मंगेषु नव्यसा नवतरेण वचः वचसा स्तो
त्रेण एषां शत्रूणां शंसं शंसनं निर्दह सत्यर्थः अराव्णां हविः अप्रयच्छतां अरातीः शत्रून् श्वनिदह अपिच विश्वाः सर्वे अर्यः
अभिगच्छतः आमूरः आमूरा अरातीः शत्रवः इतो युद्धं तु गच्छंतु ३ अग्ने मन्मानीति हे अग्ने तुभ्यं त्वदर्थं आसनि आ
स्यकं घृतं न यथा स्रुक्स्रुवकरं घृतं जुह्वति अन्ये तद्वदहम पितवास्य मन्मानि मननीयानि स्तोत्राणि जुह्वे जुहोति सत्वं दे

सा॰ प॰ ३७

वेषु देवानां मध्ये प्रविविक्षि । हि अस्मदीयः स्तुतीः जानीहि अपि च त्वं पूर्व्यः प्रत्नो ऽसि शिवः सखा कर्ता असि विवस्वतः दूतस्त्वम
सि ४ तत्तदग्निरिति यथायथा पाप यत्नं अन्नं कृपयाति स्तोतृभिः याच्यते तत्तत् अन्नं अग्निः दधे धत्ते स्तोतृभ्यः
प्रयच्छति अपि च ऊर्ज अहुतिः अन्नेनाहूयमानो ऽग्निः वसूनां हविषां वासकानां यजमानानां शं चयोः शंतिनि मित्रं योः
विषयोगजनितं चमयः सुखं दधकरोति विश्वस्यै देवहूत्यै सर्वस्यै देवानां ह्वानाय च भवति यकश्च नापि देवीय हि
हूयते अग्निरेव सर्वं करोतीत्यर्थः ५ स चिकेतेति सः अग्निः सहीयसा अभिभावुकेन चित्रेण नानाविधेन कर्मणा ज्या
यारेण चिकेत ज्ञायते सः अग्निः शश्वतीनां बह्वीनां देवतानां होता ह्वाता दक्षिणाभिः पशुभिश्च आभीवृतः परिवृतः
प्रचीव्यं प्रसेतव्यं शत्रुं भिनोति च गच्छति च० ॥ ॥ इति षष्ठस्य तृतीये द्वाविंशो वर्गः ॥ ६ ॥ अग्निर्जातेति देवानां जाता जा
तानि जन्मानि अग्निः वेद वेत्ति मर्तानां मनुष्याणां च अपीच्यं गुह्यं अग्निः वेद सः अग्निः द्रविणोदाः धनस्य दाता नव
यसा नवतरेण हविषा स्वाहुतः सम्यक् हुतो ऽपि द्वारा धनस्य द्वाराणि व्यूर्णुते च० ७ अग्निर्देवेष्विति देवेषु मध्ये ऽग्निः
संवसुः संवसति सो ऽग्निर्यज्ञियासु यज्ञार्हासु विक्षु प्रजासु संवसुः किं च सो ऽग्निः पुरु बहूनि काम्या कर्माणि भूमेव यथा
भूमिर्विश्वं पुष्यति तथा मुदा मोदेन पुष्यति देवेषु मध्ये देवो ऽग्निः यज्ञियः यज्ञार्हश्च भवति० ८ यो अग्निरिति यः अ
ग्निः सप्तमानुषः सप्तहोता विश्वेषु सर्वेषु सिंधुषु नदीषु श्रितः त्रिपस्त्यं त्रिस्थानं मंधातुः यौवनाश्वं मांधातुर्दस्युहं
तमं शत्रूणां हंतारं यज्ञेषु पूर्व्यं मुख्यं तमग्निं वयमागन्म० ९ अग्निस्त्रीणीति कविः क्रांतदर्शी अग्निः त्रीणि विधातूनि
त्रिबंधनानि पृथिव्यादीनि विदथा वेदनीयानि स्थानान्याक्षेति आवसति अपि च सो ऽग्निर्दूतः देवानां विप्रः प्राज्ञः प ३७
रिष्कृतः अलंकृतः स नः इह यज्ञे त्रीन् एकादशान् त्रयस्त्रिंशत् देवान् यक्षत् च यजतु नः अस्मान् विप्रयत्न च कामैः पू
रयंतु च० १० त्वं नो अग्न इति हे पूर्व्य अग्ने त्वं एव आयुषु मनुष्येषु नः अस्माकं वस्वः धनस्य राजासि देवेषु पित्वं एकः

एव इरज्यसि शोभसे अपि च त्वां स्वसेतवः तव स्वभूतसेतवः परिष्कृतः परिस्रवंत्य आपः परियंति परिगच्छंति ॥ ॥
इति षष्ठस्य तृतीये त्रयोविंशो वर्गः ॥ ॥ इंद्राग्नी युवमिति द्वादशर्चं दशमं सूक्तं नाभाकः ऋषिः द्वितीया षट्पंचाशदक्ष
राशक्वरी द्वादशी त्रिष्टुप् शिष्टाः महापंक्तयः इंद्राग्नी देवते १ इंद्राग्नी इति हे इंद्राग्नी सहंता शत्रून् अभिभवंतौ युवं यु
वां नः अस्मभ्यं रयिं धनं सक्षथः दत्तं येन रयिणा समत्सु संग्रामेषु दृल्हा चित् दृढानि अपि वीलु शत्रुबलानि अभि
वनेव यथाग्निः वनानि वातेइत वातेनेव अभिभवति तथा सहिषीमहि अभिभवाम आपूरणः २ नहि वामिति हे इं
द्राग्नी वां युवां न वव्रथामहे वयं धनं न याचामहे अथ हि अपि तु हि शविष्ठं अतिशयेन बलिष्ठं नृणां नरं ते नृणामपि ने
तारं इंद्रमित् इंद्रमेव याचामहे सः इंद्रः नः अस्मान् अर्वता अश्वेन कदाचित् वाजसातये अन्नलाभाय आगमत् मेध ज
सातये यज्ञभजनाय गमत्० ३ ता हि मध्यमिति तौ तौ प्रसिद्धौ इंद्राग्नी भरणी संग्रामाणां मध्यं अधिक्षितः अधिनिव
सतो हि प्रसक्षः हे नराने नाभाकवित्वता कवित्वेन कवी क्रांतकर्माणौ पृच्छमानाकविभिः पृच्छमानौ तौ उत्तावेव इंद्राग्नी
युवां सख्याय तसख्यत्वमिच्छंत यजमानाय धीनं तत् कृतं कर्म समश्नुतं० ४ अभ्यर्चेति हे नभाकवत् इंद्राग्नी यजसा
याः गिरा स्तुत्या च अभ्यर्च अभिपूजय ययोः इंद्राग्न्योः विश्वं सर्वमिदं जगत् तिष्ठति ययोश्च उपस्थे इयं द्यौः मही मह
ती पृथिवी च द्यावापृथिव्यौ उभे वसु धनं बिभ्रतः धारयतः ५ प्र ब्रह्माणीति ब्रह्माणि स्तोत्राणि इंद्राग्निभ्यां नभाक
वत् प्र इरज्यत नाभाकः प्ररयंति ययोः इंद्राग्न्योः सप्तबुध्नं सप्तमूलं जिह्मवारं परिहितद्वारम् अर्णवं अपोर्णुतः तेजोभिः
आच्छादयतः तयोर्मध्ये ओजसा बलेन इंद्रः ईशानः ईश्वरो भवति० ६ अपि वृश्चेति अपि च हे इंद्र पुराणवत् आजो
यथा व्रततिं यथा वल्याः गुप्तितं निर्गता शाखां वृश्चति तथा शत्रूणां वृश्च छेदय दासस्य दासनामकस्य शत्रोः बलं
दंभय नाशय धराक्तः वयं नाभाकाः अस्मदासस्य संभृतं तत् वसु इंद्रेण सह तु नाविभजेमहि० इति षष्ठस्य तृतीये चतुर्वि

भा.प.
४८

शो वर्गः॥ ७॥ यदिंद्राग्नी इति यत् यदा इमे जनाः तनाधनं न गिरा स्तुत्या च इंद्राग्नी विह्वयंते विशेषेणाह्वयंति तेषु मध्ये वयं
नाभाकाः एतन्यतः एतना मिथ्यंतः अस्माकेभिः अस्माकीनैः नृभिः मनुष्यैः सार्धं त्वा मशत्रून् अभि भवेम वनुष्यतः स्त
ति मिथ्यंतः शत्रून् वनुयाम वस्तकम ८ या नु श्वेताविति यानु यौ एव इंद्राग्नी श्वेतौ श्वेत वर्णौ सत्वगुणोपेतौ इत्यर्थः अवः अ
धस्तात् द्युभिः दीप्तिभिः दिवः उपाब्रवातः तयोः इंद्राग्न्योः उ हानाः हविर्भिः तः यजमानाः व्रतं कर्म अनुयंति अपि च सी
इमौ इंद्राग्नी यान् प्र सिस्रतुः सिंधवः सिंधून् बंधात् अमुंचतां ९ पूर्वीष्टइति हे इंद्र हे वज्रिन् स्तनो प्ररपितः इं
द्राग्नि च स्य प्राणयितुः वस्वः दीपकस्य वारः स्याम एवः धनानि उपयच्छन्तः तत्तव तात् उपमा तयः उपमाना ग्निपूर्वैः बहूनि
ऊतानि च प्रशस्तयः पूर्वीः बह्व्यः प्रशस्ताः नः यो धियः अस्मद्वुद्धयः नु क्षिप्रं साधंत साधयंतु १० तं शिशीतेति हे स्तारः
तात्वेषं दीप्तं सत्वानं संभक्तारं धनानां ऋग्मियं ऋग्भिः स्तोतव्यं तमिंद्र स्तुत्यैकीभिः शिशीत संस्कुरुत उतो चित् अपि च
यः इंद्रः ओजसा बलेन शुष्णस्य एतन्नामकस्यासुरस्य आंडानि अपत्यानि भिनत्ति अभिनत् सः सर्वतीः दिव्यानि अपः
सलिलानि जेषत् जयतु ११ तं शिशीतेति हे स्तोतारः स्वध्वरं सुयज्ञं सत्यं अविनाशं सत्वानं संभक्तारं ऋत्वियं ऋतौ
प्राप्तव्यं तमिंद्र शिशीत स्तुतिभिः संस्कुरुत प्रत्यक्षः उतो नु चित् अपि च यः इंद्रः आरुजे पर्वतं प्रति गच्छति शुष्णस्य आ
ण्डा आंडानि अंड जातानि च भिनत्ति भिनत्ति सर्वतीः दिव्यानि अपः सलिलानि अजेः अजैषीः १२ एवेंद्राग्निभ्या
मिति एव एवं याभ्याम् इंद्राग्निभ्यां पितृवत् नभाकवत् मंधातृवत् यौवनाश्व मांधातृवत् अंगिरस्वत् अंगिरा वत् नवीयः ३८
नवतरं अवाचि नाभाकेन मया पाठितौ इंद्राग्नी त्रिधातुना त्रिपर्वणा शर्मणा गृहेण अस्मान् नाभाकान् यातं रक्षतं
वयं रयीणां धनानां पतयः स्याम भवेम॥ इति षष्ठस्य तृतीये पंचविंशो वर्गः॥ ॥अस्मा उ षु इति दशर्चमेकादशं सूक्तं
नाभाकः ऋषिः महापंक्तिः छंदः वरुणो देवता १ अस्मा ऊ षु इति हे स्तोतः सुप्रभृतये प्रकृष्ट बंधनाया स्मै वरुणाय वि

दुष्टरेभ्यः विद्वत्तरेभ्यः मरुद्भ्यः अर्च स्तुहि यः वरुणः धीता कर्मणा मानुष्याणां पश्वः पशून् गाइव रक्षति यथा गोपालः
गाः रक्षति नहु तन भं २ तमू षु इति तमृत्नं भवं वरुणं समन्या सामान्या गिरा स्तुत्या स्व भिष्टिभिः पितॄणामन्मभिः स्तोमैश्च
अभिष्टिभिः नाभाकस्य ऋषेः प्रशस्तिभिः स्तोत्रैश्च अभिष्टिभिः सिंधूनां नदीनां उपसमीप उदये उदृच्छति यश्च सप्तस्वसा
सप्तम्यमः इति वाग्भिः निरूप्यंते तं वरुणं अभिष्टौमि ३ स क्षप इति स वरुणः क्षपः रात्रीः परिषस्वजे परिष्वजते अपि
च दर्शनीयः सः वरुणः उस्रः सरणशीलः सन् विश्वं मायया कर्मणा परि परितः निदधे निदधाति किं च तस्य वरु
णस्य व्रतं कर्म वेनाः कामयमानाः प्रजाः तिस्रः उषः प्रातर्माध्यंदिनं सायं च अन्ववर्धयन् अनु वर्धयंति ४ यः ककुभ
इति यः वरुणः पृथिव्यां अधि उपरि दर्शतः दर्शनीयः सन् ककुभो दिशः निधारयः निधारयति स वरुणः माता निर्माता
तस्य वरुणस्य पूर्व्यं प्रत्नं पदं स्वर्गाख्यं स्थानं सत्तं अस्माभिश्च सर्पणीयं तद्वरुणस्य केतं अपि च स हि स एव इर्य ई
श्वरः सन् गोपा इव गोपाल इव पशून् अस्मान् रक्षति ५ यो धर्तेति यः वरुणः भुवनानां धर्ता धारयिता यश्च उस्राणां
देव्यपिच्छन्नमृतानां रश्मीनां अपीच्या अपीच्यानि अंतर्हितानि गुह्यानि गुह्यानि निगूढानि हितानि नामानि वेद जानाति
स वरुणः कविः प्राज्ञः सन् काव्या काव्यानि कविकर्माणि पुरु बहूनि रूपं द्यौरिव पुष्यति ६॥ ॥इति षष्ठस्य तृतीये षड्विंशो व
र्गः॥ ६॥ यस्मिन्विश्वानीति यस्मिन्वरुणे विश्वानि सर्वाणि काव्या कविकर्माणि चक्रे नाभिरिव प्रधारयुः स्यचक्रे नाभिस्त
या श्रितानि त्रितं भुवः स्वः त्रिस्थानं वरुणं जूती जवेन क्षिप्रं सपर्यत हे मदीयाः जनाः परिचरत यथा गावः स्वरुपयितुं यु
ञ्जते तथास्माकमप्रियाः गाः अश्वान् युञ्जते नः सपत्ना युञ्जंति किमर्थं व्रजे गोष्ठे गावः यथा गावः संयुञ्जते अतस्त
दुपद्रवराहित्याय वरुणं परिचरतेत्यर्थः ७ य आस्वत्क इति यः वरुणः आसु दिक्षु अत्कः व्याप्तः सन् आशयं जायते तो व
र्तते यः वरुणः तिस्रः शुभ्राः वरुणो विश्वा सर्वाणि परिजातानि परितो भूतानि धामानि पुराणि भर्म्मार्शन् विनाशयत अस्य वरुण

स्य पुरा गंयरथस्य पुरस्तात् विश्वसंवेदिवाः प्रतंकर्मअनुगच्छंती त्यर्थः ८ स समुद्र इतियस्मादाय्यः समुद्रवंतिसवरुणः स
मुद्रः अपां अः अंतर्हितः तुरः क्षिप्रः द्यामिव यथा आदित्यः द्यांरोहतितथा नाकं रोहति अपिचयत्त्वयः वरुणः आस्कद्दिक्ष
प्र ना भ्याय नुः दानं निदधेदधातिसवरुणः मायाः आस्कराणां मायाः अर्चिना अर्चिष्यतापदीप्तेजसा आस्तृणात् समं
तात् छिनत्ति नाकं स्वर्गं अरुहत् अरुहति ९ यस्यश्वेतेतियस्यवरुणस्य अधिक्षितः अंतरिक्षे अधिविश्रुतानिश्वेतानि श्वे
तानिविचक्षणानि तानि सितिरश्मिभिः द्यामंतरिक्षं भूमीः त्रिस्रः त्रीणिति स्रुणा अधिस्थितानिपप्रतुः प्रथयंति तस्यवरु
णस्य सदः स्थानं ध्रुवं अचलमिति किंच सवरुणः सप्तानामिश्वनांइरज्यति ईश्वरो भवति १० यः श्वेतानितियः वरु
णः निर्णिजः आत्मीयान् रश्मीन् दिवाश्वेतान् अधिचक्रे अधिकरोति तथा रात्रौ कृष्णान् चक्रे सवरुणः अनुव्रताक
र्माणि लक्ष्मीकृत्य उभयविधकर्मानुगुणं पूर्व्यं धाम अंतरिक्षं ममे निर्ममे अपिचयः स्कंभनेन अंतरिक्षेणयोजनआदि
त्याय याधारयति तद्यांरोदसी द्यावापृथिव्यौ अधारयत् विधारयतिसवरुणः इत्यर्थः ॥ ॥इतिषष्ठस्य तृतीये सप्त
विंशो वर्गः ॥ ॥अस्तभ्नादितिपंचर्चं द्वादशं सूक्तं अर्चनाकृषिः काण्वः नाभाको वा अथास्त्वंत्रिष्टुभः वरुणदेवत्यः
द्वितीयस्तथः अनुष्टुप् विश्वेदेवताकः १ अस्तभ्नात् द्यामिति विश्ववेदाः विश्वधनः असुरः बलवान् वरुणः द्यांअ
स्तभ्नात् तथा पृथिव्याः वरिमाणं अमिमीत चचक्रे एवं निर्मितानि विश्वा सर्वाणि भुवनानि संम्राट् भूत्वा आसीदत् तु
च अधिअतिष्ठत् चएतानि हस्य स्य वरुणस्य व्रतानि तानि विश्वेत बहूनि संति २ एवावंदस्वेति हे स्तोतः बृहंतं महांतं ३०
वरुणमेववंदस्व स्तुहि अमृतस्य गोपां गोपयितारं धीरं प्राज्ञं वरुणं नमस्यनमस्कुरुच्च सवरुणः नः अस्मभ्यं त्रिवरूथं त्रि
स्थानं शर्म गृहं वियंसत् प्रयच्छतु उपस्थे उपस्थाने वर्तमानान् नः अस्मान् द्यावापृथिवी द्यावापृथिव्यौ पातं रक्षतां
३ इमां धियमिति हे देव धातमान वरुण इमां धियं इदं कर्म शिक्षमाणस्य अनुतिष्ठतः मम क्रतुं प्रज्ञानं दक्षं च संशि

शाधि तीक्ष्णीकुरु पया नावाय ज्ञरूपया विश्वा सर्वाणि दुरितानि दुरितानि अतितरेम तां सुतर्माणं सुष्ठु तारयित्रीं यज्ञरूपां
नावं अधिरुहेमपवपं आरुहेम ४ आवां ग्रावाण इति हे नासत्या सत्यवंतौ अश्विनौ नो वायुवां सोमपीतये सोमस्य पाना
य विप्राः प्राज्ञाः ऋत्विजः ग्रावाणः सोमाभिषवपाषाणाः अध्वीभिः कर्मभिः स्व स्वव्यापारैः अचुचवुः अभिगच्छंति ५ यथा
वामितिहे नासत्यासत्यवंतौ अश्विना अश्विनौ वां विप्रः प्राज्ञः अत्रिः यथा गीर्भिः स्तुतिभिः सोमपीतये अजोहवीत् तथा
हमपि जोहवीमि ६ एवा वामिति हे नासत्या सत्यवंतौ इंद्राग्नी वायु वां यथा मेधिराः प्राज्ञाः हुवंत आहूवंतः एव एवं अ
हं ऊतये रक्षणाय सोमपीतये चाह्वयामि ॥ ॥इतिषष्ठस्य तृतीये अष्टाविंशो वर्गः ॥ ॥इति अष्टमे मंडले पंचमो नुवा
कः ॥ षष्ठे नुवाके षट् सूक्तानि तत्र इमंविप्रस्येति त्र्यृचं द्वाद्वृचं प्रथमं सूक्तं अंगिरसः विरूपः ऋषिः गायत्री छंदः अ
ग्निर्देवता १ इमं विप्रस्येति इमं अस्मदीयाः स्तोमासः स्तोतारः विपस्यमध्यविनः वधसः विधावुः अस्त तय ज्वनः अहि
सितय जमानस्य अग्नेः गिरः स्तुतीः इरते प्रेरयंति २ अस्मैत इति हे जातवेदः जातधन विचर्षणे विद्रष्टः अग्ने अस्मप्र
तिहर्यतप्रयच्छतं तनुभ्यं सः शुभितिं शोभनां स्तुतिं जनामि अंगिरसां हं जनयामि ३ आरोकाइवेति हे अग्ने तवतिग्माः ती
क्ष्णाः त्विषः दीप्तयः आरोकाइव आरोचमानाः प्रत्याषः इव अद्भिः दंतैः वनानि आरण्यानि बप्सति भक्षयंति द्यइतु अ
हतित्रयपृक्ष ४ हरयइति हरयः हरणशीलाः वातजूताः वातप्रेरिताः धूमकेतः धूमध्वजाः अग्नयो उपद्यवि अं
तरिक्षे पृथक्पृथक् पतंतं गच्छंति ५ एते त्ये इति एते त्ये एते अग्नयः पृथक् पृथक् इत्यासः अभिरोत्रिभिः समिद्धाः
संतः उषसामिवकेतवः उषसो प्रज्ञापका इव संअदृक्षत सम्यक् दृश्यंते ॥ ॥इतिषष्ठस्य तृतीये एकत्रिंशो वर्गः ॥ ॥
कृष्णारजांसीति जातवेदसः अग्नेः प्रयाणे पतः पततः रजांसि पांसव कृष्णा कृष्णानि भवंति कदा क्षमिक्षभायां
४. यत् यदा अग्निः राधति शुष्कोनवनस्पतीन् निरुणद्धि ७ धासिं कृण्वान इति अग्निः ओषधीः धासिं अन्नं कृण्वानः

भा॰ प॰ ४० कुर्वन् वपन् भक्षयन् न वायति न शाम्यति पुनश्च तरुणीः ओषधीः अपि यन् गच्छन् भवति भक्षयितुमिति शेषः ८
जिह्वाभिरिति अग्निः जिह्वाभिः अर्हज्वालाभिः एवनं नमत वनस्पती अचेतनं नयन् अर्चिषा तेजसा अजरणा भवन् ज्व भस्मनुत्यंभव
लन्नेव वनेषु रोचते प्रकाशते ९ अप्स्वग्न इति हे अग्ने यस्य तव अप्सु सधिः प्रवेशस्थानं सत् ओषधीः अनुरुध्यसे अनु
रुणद्धि पुनश्च तासां भूमिष्ठानां गर्भे सन् जायसे प्रादुर्भवसि १० उदग्न इति हे अग्ने तव घृतात् आहुतं जुह्वः होमसा
धनभूतायाः स्रुवः संबंधि सानं निशिशानं तद्दर्चिः उत्तरोचते प्रकाशते॥ ॥इति षष्ठस्य तृतीये त्रिंशो वर्गः॥ ११ ॥उक्षान्ना
इति उक्षान्नाय उक्षाः अन्नं अदनीयं हविर्यस्य स उक्षान्नः तस्मै वशान्नाय वशाभाय वशान्नाय यस्यासौ वशान्नः तस्मै साम
पृष्ठाय सामधते पृष्ठाय वेधसे विधात्रे कामानां अग्नये स्तोमैः विधेम परिचरेम १२ उत त्वेति उतापि त्वा हे होतः देवानामा
ह्वातः वरेण्य वरणीय प्रशान्ते त्वां वयं आंगिरसः नमसा अन्नेन हविषा समिद्धिश्च ईमहे याचामहे १३ उत
त्वेति उतापि त्वा हे भृगुवन्मनुष्वत् आहुत अग्ने त्वां भृगुवत् यथा भृगुः तथा मनुष्वत् यथा च मनुः तथा अंगिरस्वत् अंगिरोवच्च
हवामहे १४ त्वं ह्यग्न इति हे अग्ने विप्रः मेधावी सन् विद्यमानः सखा च त्वं विप्रेण सता साधुना सख्या अग्निना स्वरूपेणस
मिध्यसे १५ स त्वं विप्रायेति हे अग्ने सः प्रसिद्धः त्वं विप्राय मेधाविने दाशुषे हविषां प्रदात्रे यजमानाय सहस्रिणं अपरि
मितं रयिं धनं वीरवती इषं पुत्रपौत्रादिसहितं अन्नं च देहि॥ ॥इति षष्ठस्य तृतीये एकत्रिंशो वर्गः॥ १६॥ अग्ने भ्रात
रिति हे अग्ने भ्रातः यजमानानां भ्रातृवत् सहस्कृत सहसा बलेन कृत रोहिदश्व लोहितवर्णाश्व शुचिव्रत प्रशुद्धकर्म
न् अग्ने मे आंगिरसस्य ममेदं मं स्तोमं जुषस्व सेवस्व १७ उत त्वेति उतापि त्वां हे अग्ने त्वां मम आंगिरसस्य स्तुतः स्तुत ४०
यः वाश्रय वाशनशीलाय वत्साय प्रति अर्हत यष्यः कामयमानाय दोग्धुं गोष्ठं गाव इव यथा गावः प्रविशन्ति तथा आश
तां प्राप्नुवंति १८ तुभ्यं ता इति हे अंगिरस्तम अंगिरसां श्रेष्ठ अग्ने तुभ्यं विश्वाः सर्वाः ताः प्रसिद्धाः सुक्षितयः प्रजाः का

मय आत्मनः कामसिध्यर्थं पृथगिरं निय च्छंति १९ अग्निं धीभिरिति मनीषिणः मनसः ईश्वराः मेधिरासः मेधाविनः विप
श्चितः प्राज्ञाः यजमानाः धीभिः कर्मभिः अद्मसद्याय अन्नस्य भजनाय अग्निं हिन्विरे प्रीणयंति २० तं त्वाम ज्येष्विति हे
अग्ने वाजिनं बलिनं वह्निं हविषां वोढारं होतारं देवानामाह्वातारं तं प्रसिद्धं त्वां अज्मेषु गृहेषु अध्वरेषु यज्ञं तन्वानाः
विस्तारयंतो यजमानाः ईळते स्तुवंति॥ ॥इति षष्ठस्य तृतीये द्वात्रिंशो वर्गः॥ ॥२१ पुरुत्रेति हे अग्ने त्वं हि यतः अ
नुप्रभुः पुरुत्रा बहुषु देशेषु विश्वाः सर्वाः विशः प्रजाः सदृङ् समानदर्शी असि अतः त्वां समत्सु संग्रामेषु हवामहे
ह्वयामः २२ तमीळिष्वेति यः अग्निः घृतैः सह आहुतः विश्वा सर्वाणि यष्वर्नि अस्माकं इमं हवं आह्वानं श्रृणवत् शृणोति त
मग्निं ईळिष्व स्तुहि तं त्वा वयमिति हे अग्ने जातवेदसं जातधनं द्विषः शत्रून् अपघ्नं तं हिंसंतं श्रृण्वंतं अस्मदीय माह्वा
नं श्रृण्वंतं त्वां वयं आंगिरसाः हवामहे २४ विशां राजानमिति विशां प्रजानां राजानमीश्वरं अद्भुतं महांतं धर्मणां क
र्मणामध्यक्षं अनुसंधातारं अग्निमग्निं ईळन्तो भिस्तुसन् वाग्भिः श्रवत् अस्मदीयां स्तुतिं शृणोतु २५ अग्निमि
ति विश्वायवेपसं सर्वगतवल्लमग्निं वाजिनं बलिनं मर्यं न मनुष्यमिव हितं सप्तिं न अश्वमिव वाजयामसि स्तुतिभिः ह
विर्भिश्च बलिनं कुर्मः॥ ॥इति षष्ठस्य तृतीये त्रयस्त्रिंशो वर्गः॥ २६॥ घ्नन् मृध्राणीति हे अग्ने त्वं मृध्राणि हिंसकान्
द्विषः द्वेष्टॄन् अपघ्नन् हिंसन् विश्वहा सर्वदा रक्षांसि च दहन् तिग्मेन तीक्ष्णेन तेजसा दिदीहि दीप्यस्व २७ यं त्वा ज
ना सइति हे अंगिरस्तम अग्ने यं त्वां जनासः जनाः मनुष्वत् यथा मनुः तथा इंधते दीपयंति स त्वं मम मदीयं वचः स्तुतिं बोधि
बुध्यस्व २८ यदग्न इति हे अग्ने यत् यः त्वं दिविजाः दिविभवः असि अप्सुजाः वा अंतरिक्षजातश्च भवसि स
हस्कृत सहसा बलेन कृत मथ्यमानत्वात् तं त्वां गीर्भिः स्तुतिभिः हवामहे ह्वयामः २९ तुभ्यं घेति हे अग्ने तुभ्यं घ इत्
त्वदर्थमेव तं इमे यादृश्यमानाः जनाः विश्वाः सर्वाः सुक्षितयः प्रजाश्च धासिं अन्नं हविः अत्तवे अदनाय पृथक्

क्विवंतमपरं यंति ३० तं घ इत्यादीति हे अग्ने तं यत्त्वदर्थमवस्वनुवयं साध्याः सुकर्माणः संतः विश्वा विश्वानि अह्ना अहानि
नक्षत्ताः दुःस्थादस्वर्दुर्गम्नं दुःखं नयाः रुपितव्यानितरंतः स्याम भवेम ॥ ॥इति षष्ठस्य तृतीये चतुस्त्रिंशो वर्गः॥ ३४ ॥
अग्निं मंद्रमिति मंद्रं मादनं पुरुप्रियं बहुप्रियं शीरं शयनशीलं पावकशोचिषं पावकदीप्तिमग्निं हृद्भिर्मनोहरैः
मंद्रभिर्मादनैः स्तोत्रैः इमहे त्वया चामहे ३२ स त्वमग्न इतिहे अग्ने विभावसुः दीप्तिधनः सः प्रसिद्धः त्वं सन्नुद्यन्
सूर्यो न यथा सूर्यस्तथा रश्मिभिः शाइन्न् बलं कुर्वन् तमांसि जिघ्नसे नाशयसि ३३ तं ते सहस्वइति हे सहस्वः बलवन्
अग्ने तव यद्दुत्सनोपदस्यति नापक्षीयं तदातृं दातव्यं वार्यं वरणीयं चवसुधनं त्वं नः इमहे याचामहे॥ ॥इति षष्ठ
स्य तृतीये पंचत्रिंशो वर्गः॥ ॥समिधाग्निमिति त्रिंशदृचं द्वितीयं सूक्तं आंगिरसः विरूपः ऋषिः गायत्री छंदः अग्निर्देवता
१ समिधाग्निमिति हे ऋत्विजः अतिथिं अतिथिवत्प्रियं अग्निं समिधा दुवस्यत परिचरत घृतैः आज्यैः बोधयत च अ
स्मिन् समित्याग्नौ हव्या हवींषि आजुहोतन आजुहुत च २ अग्ने स्तोममिति हे अग्ने मम आंगिरसस्य मम स्तोमं स्तोत्रं जुष
स्व सेवस्व अनेन मन्मना मननीयेन स्तोत्रेण वर्धस्व च नः अस्माकं सूक्तानि प्रति हर्य कामयस्व च ३ अग्निं दूतमिति दूतं द
वानां हव्यवाहं हविषां वोढारं च अग्निं पुरो दधे पुरस्करोमि उप ब्रुवे उपस्तौमि च सः अग्निः इह यज्ञे देवान् आसादयतु
आसादयतु ४ उत्ते बृहंत इति हे दीदिवः दीप्ताग्ने समिधानस्य समिध्यमानस्य ते तव बृहंतः महांतः शुक्रासः ज्वलंतः
अर्चयः उदीरते ५ उप त्वेति हे हर्यत कामयमाना अस्मदीयाः घृताचीः घृतमंचत्यः जुह्वः स्रुचः त्वां उपयंतु नः अस्मा
कं हव्यानि जुषस्व सेवस्व च॥ ॥इति षष्ठस्य तृतीये षट्त्रिंशो वर्गः॥ ३६॥ मंद्रं होतारमिति मंद्रं मादनं होतारं देवा
नामाह्वातारं ऋत्विजं ऋतौ यष्टव्यं चित्रभानुं चित्रदीप्तिं विभावसुं दीप्तिधनमग्निं ईळे स्तौमि सः अग्निः श्रवत् अस्मदी
यां स्तुतिं शृणोतु च ७ प्रत्नं होतारमिति प्रत्नं पुराणं होतारं देवानामाह्वातारं ईड्यं स्तुत्यं जुष्टं प्रीतं कविक्रतुं क्रांतकर्मा

णं अध्वराणां यज्ञानां अभिश्रियं अभिश्रयितारं अग्निं ईळे स्तौमि ८ जुषाण इतिहे अंगिरस्तम अंगिरसां श्रेष्ठाग्ने इमाइ
मानि अस्मदीयानि हव्यानि हवींषि आनुषक् आनुषक्तं यथा भवति तथा जुषाणः सेवमानो भव ऋतुथा काले काले यज्ञं
च नय ९ समिधान इतिहे सत्यं सत्यजन शोचिः शुक्र ज्वलद्दीप्तत्वं समिधानः समिध्यमान एव दव्यं देवसंबंधिनं
जनं चिकित्वान् जानन् इह यज्ञे आवह १० विप्रं होतारमिति विप्रं मेधाविनं होतारं देवानामाह्वातारं अद्रुहं अद्रोग्धा
रं धूमकेतुं धूमध्वजं विभावसुं दीप्तिधनं यज्ञानां केतुं प्रज्ञापकमग्निं ईमहे अभीष्टं याचामहे॥ ॥इति षष्ठ
स्य तृतीये सप्तत्रिंशो वर्गः॥ ३७॥ अग्ने नि पाहीति हे सहस्कृत बलेन कृत देव दीप्ताग्ने शोषतः हिंसकान् नः अस्मान् प्र
ति निपाहि प्रतिरक्ष स्वपूरण इषः द्विषः शत्रूंश्च भिंधि विदारय १२ अग्निः प्रत्नेन इति कविः क्रांतकर्माग्निः प्रत्नेन पु
राणेन मन्मना मननीयेन स्तोत्रेण स्तां स्वकीयां तन्वं तनुं शुंभानः शोभयन् विप्रेण मेधाविना स्तोत्रा वावृधे प्रवृद्धो भव
ति १३ ऊर्जो नपातमिति ऊर्जः अन्नस्य नपातं पुत्रं पावकशोचिषं शोधकदीप्तिमग्निं स्वध्वरे अहिंस्ये अस्मिन् यज्ञे
आहुवे आह्वयामि १४ स नो मित्रमह इति हे मित्रमहः मित्राणां पूजनीयाग्ने स त्वं शुक्रेण ज्वलनेन शोचिषा तेजसा
देवैः सह बर्हिषि यज्ञे आसत्सि आसीद १५ यो अग्निमिति यः मर्तः मनुष्यः दमे गृहे अग्निं देवं तन्वः धनस्य प्राप्त्यर्थ
मिति शेषः सपर्यति परिचरति तस्मै इत् तस्मा एव वसु धनं दीदयत् सः अग्निः प्रयच्छति॥ ॥इति षष्ठस्य तृतीये
अष्टत्रिंशो वर्गः॥ ३८॥ अग्निर्मूर्धेति मूर्धा देवानां श्रेष्ठः दिवः द्युलोकस्य ककुत् उच्छ्रितः पृथिव्याः पतिः अयमग्निः
अपां रेतांसि स्थावरजंगमात्मकानि भूतानि जिन्वति प्रीणयति १७ उदग्न इति हे अग्ने तव शुचयः निर्मलाः शु
क्राः शुक्लवर्णाः भ्राजंतः दीप्यमानाः अर्चयः प्रभाः तव ज्योतींषि तेजांसि उदीरयते प्रेरयंति १८ ईशिषे इति हे अग्ने
मर्पतिः स्वर्गस्य स्वामित्वं वार्यस्य वरणीयस्य दात्रस्य दातव्यस्य धनस्य ईशिषे हि ईश्वरोसि त्वं शर्मणि सुखे निमित्तत्व

स्तोतारस्त्वां भवेयं १९ त्वामग्न इति हे अग्ने त्वां मनीषिणः मनसः ईश्वराः स्तोतारः स्तुतिभिः स्तुवंतीति शेषः किं च त्वाम्
एव वित्तिभिः कर्मभिः हिन्वंति प्रीणयंति तेन अस्माकं गिरः स्तुतयः त्वामेव वर्धंतु वर्धयंति २० अदब्धस्येति हे अग्ने अद
ब्धस्य केनापि अहिंसितस्य स्वधावतः बलवतः दूतस्य देवानां रंहतः देवान् स्तुवतः तव सख्यं सदा वयं वृणीमहे ॥
॥ इति षष्ठस्य तृतीये एकोनचत्वारिंशो वर्गः ॥ २९ ॥ अग्निः शुचिव्रततम इति शुचिव्रततमः अतिशयेन शुद्धकर्मा वि
प्रः मेधावी शुचिः शुद्धः सन् एव कविः क्रांतकर्मा शुचिः शुचिर्वा आहुतः अग्निः रोचते प्रकाशते २१ उत त्वेति उत
अपि च हे अग्ने त्वा त्वां मम धीतयः कर्माणि गिरः स्तुतयश्च विश्वहा सर्वदा वर्धंतु वर्धयंतु किं च अस्माकं सख्यस्य स
ख्यं सखित्वं स्तुत्वा आदिकं बोधि बुध्यस्व २२ यदग्ने स्यामिति हे अग्ने यदि अहं त्वं वसुधनः स्यां भवे भवेयं त्वं वा यत्
वा स्याम् अहं दरिद्रः स्तोतारः स्युः भवेयुः तव आशिषः आशासनानि इह अस्मिन् द्विषि सत्याः सत्यानि स्युः भवेयुः २४ वसुर्व
सुपतिरिति हे अग्ने त्वं विभावसुः दीप्तिधनः वसुपतिः वसुः वासयिता असि भवसि यस्मात् अतो वयमपि ते तव सुम
तौ अनुग्रहबुद्धौ स्तुत्वा कं सुखं यथा तथा स्याम भवेम २५ अग्ने धृतव्रतायेति हे अग्ने धृतव्रताय धृतकर्मणे ते तुभ्यं
वाश्रासः वासनशीलाः गिरः मम स्तुतयः सिंधवः नद्यः समुद्रायेव यथा समुद्राय तथा ईरते ते ॥ ॥ इति षष्ठस्य तृतीये च त्वा
रिंशो वर्गः ॥ २८ ॥ युवानमिति युवानं नित्यतरुणं विश्पतिं विशां पतिं कविं क्रांतकर्माणं विश्वादं सर्वस्य हविषो नारं
पुरुवेपसं बहुकर्माणं मन्मभिः मननीयैः स्तोत्रैः शुंभामि शोभयामि २७ यज्ञानामिति यज्ञानां रथ्ये नेत्रे तिग्मजंभाय ती ४२
क्ष्णज्वालाय वीळुपे बलवते अग्नये स्तोमैः स्तोत्रैः इयं आंगिरसात् इषम स्तुतिं कनुमिश्चिम २८ अयमग्न इति हे पावक शो
धक संत्य भजनीय अग्ने त्वे अपि त्वय्यपि अयं अस्मदीयः जनः जरिता स्तोता स्तुतु भवतु तस्मै जरित्रे मृळय सुखय मुसाद
य २९ धीरो हीति हे अग्ने त्वं धीरः असि भवसि खलु अद्मसत् हविषि सीदन् विप्रो मेधावी जागृविः प्रजानां हितकर

ण जागरणशीलो असि सदा त्वं दीदयसि परि दीप्यसि च ३० पुराग्न इति हे वसो वासक कवे क्रांतकर्मन् अग्ने दु
रितेभ्यः पापेभ्यः पुरा स्रिधेभ्यः हिंसकेभ्यश्च पुरा यद् दुरितानि स्रिधश्च अस्मान् हिंसितुम् उद्युंजते ततः प्रागेव त्वं नः
अस्माकं आयुः प्रतिर वर्धय ॥ ॥ इति षष्ठस्य तृतीये एकचत्वारिंशो वर्गः ॥ ॥ आ घा ये इति द्विचत्वारिंशदृचं तृतीयं सू
क्तं काण्वः त्रिशोकः ऋषिः गायत्री छंदः इंद्रो देवता १ आ घा ये इति ये ऋषयः आ घा अभिमुख्येन खलु अग्निं इंधते दीप
यंति येषां च युवा नित्यतरुणः इंद्रः सखा भवति आनुषक् आनुपूर्व्येण बर्हिः स्तृणंति २ बृहन्निदिति येषां ऋषीणां इ
ध्मः बृहन् इत् महान् खलु भरिषत् चरिष्णु स्तोत्रं स्वरुश्च पृथुः महान् ३ अयुद्ध इद्विति तपु अंतभृतः कश्चित्
अयुद्धः एव प्राक् आयोद्धा एव सन् युधा रत्नं योद्धृभिः मदैः वा वृतं शत्रुं सत्वभिः आत्मीयैः बलैः शूरः सन् आ जति न
मयति ४ आ बुंदमिति जातः उत्पन्नः वृत्रहा इंद्रः बुंदं इषुं आ ददे आदाय च उग्राः उद्गूर्णबलाः के के च प्र शृण्विरे वीर्येण वि
श्रुताः इति स्वमातरं विपृच्छत् अप्राक्षीत् ५ प्रति त्वेति हे इंद्र त्वा शवसी बलवती माता प्रतिवदत् अवोचत् तेयः शत्रुः त्वं
आ चक्रे कामयते स गिरौ पर्वते आप्तः न दर्शनीयः गज इव योधिषत् योधयतीति इति षष्ठस्य तृतीये द्विचत्वारिंशो वर्गः ॥
॥ ६ ॥ उत त्वमिति उतापि च हे मघवन् इंद्र त्वं शृणु अस्मदीयां स्तुतिं ते तव नः यत् यं वष्टि कामयते यः स्तोता तं तस्य वक्षि त
स्मात् त्वं वह असि किं च त्वं यत् स्थिरं दृढं करोषि तत् वीळु दृढमेव सर्वत्र भवति ७ यदाजिमिति यत् यदा आजिं स्तुत्
युद्धं क्रतु इंद्रः स्वश्वयुः कल्याणं अश्वमिच्छन् आजिं युद्धं उपयाति तदा रथीतमः अतिशयेन रथी भवति रथीनां सर्वो
त्तमश्च सपतो तिशेषः ८ विश्वा विश्वा इति हे वज्रिन् वज्रवन् इंद्र त्वं विश्वाः सर्वाः अभियुजः अभियोक्त्रीः प्रजाः यथा
विष्वक् भवंति तथा स्तुवि वृह कुरु ततः अस्माकं स्तुश्रवस्तमः स्तुत अतिशयेन अन्नवान् भव ९ अस्माकमिति यमिंद्र धृ
तयः हिंसकाः न धूर्वंति न हिंसंति स इंद्रः अस्माकं मातये अभीष्टलाभाय स्तुतये रथं कल्याणं रथं पुरः कृणोतु पुरस्करोतु १०

भा॰ष॰
८२

घ्न्यासतइतिहदाशंको द्रूयाचमानावयंतेतव द्विषः द्विषन्नुपरिवृज्यामनापगछेम किंतु तेतव गोमतः पशुमतः दावने अ
भीष्टदानाय अपरंपर्यात्तं गमेमतं गछेमेव॥ ॥इतिषष्ठस्यतृतीये त्रिचत्वारिंशोवर्गः॥१३॥ शनैश्चिदितिहे अद्रिवः वज्र
न् इंद्र वयंशनैः चित्तमदं मद्यंतं गा गछतः अश्वावंतः अश्ववंतः शतग्विनः बहुधनाः विचक्षणाः वोढव्यं वहंतः अनेह
सः उपद्रवरहिताश्च संतः गमेमेदितिसंबंधः १२ ऊर्ध्वाहीतिहे इंद्र ते तव अरित्रः स्तोतृभ्यः सहस्रासहस्राणि शता
शतानि चर्ऊर्ध्वा उर्ध्वानि मुख्यानि सृजन्तानि साधनानि दिवेदिवे अन्वहं विमंहते यजमानः प्रयछति हिपूरणः १३
विद्माहीतिहे इंद्र त्वा त्वां धनं जयं धनानां जेतारं हि वित्रिदिरत्नानामपि शत्रूणां आरुजं अभिमुख्येन भोक्तारं आ
दारिणं आदर्तारं च यथा गययगृह उपद्रवेभ्यः रक्षकं च विद्मजानीम १४ ककुहंचिदिति हे कवे क्रांतकर्मन् धृष्णो आधर्षकइंद्र
यत् यदा पणिंपणिनामानं त्वा त्वां आ आभिमुख्येन इमहे अभीष्टं याचामहे तदा ककुहं उन्नतं त्वा त्वां इंद वधित् सोमाः
अपिमदंतु मादयंतु १५ यस्तेरेवानितिहे इंद्र मघवन् धनदानाय ते तुभ्यं यः पुमान् रेवान् धनवान् सन् अदाशुरिः अ
दानशीलः प्रममर्ष अभ्यस्यति तस्य पुंसः वेदः धनं नः अस्मभ्यं आभर आहर॥ ॥इतिषष्ठस्यतृतीये चतुश्चत्वारिंशो
२ वर्गः॥१६॥ इमउत्वेतिहे इंद्र त्वा त्वां सोमिनः अभिषुतसोमाः सखायः इमेउ इमे एव खलु अस्मदीयाः जनाः पुष्ट्यावंतः संभृ
तपासाः यथा पशुं पशुमिव विचक्षते विपश्यंति १७ उतत्वाबधिरमितिउत अपिच हे इंद्र अबधिरं अनुभूत श्रोत्रं दिं
पअत एव श्रुत्कर्णः श्रवणपरकर्णं संतं त्वा त्वां वयं त्रिशोकाः इह यज्ञे ऊतये रक्षणाय दूरात् हवामहे हृयामः १८ यच्छुश्रू ८२
या इति हे इंद्र यत् यदि इमं अस्मदीयं हवं आह्वानं शुश्रुयाः शृणुयाः तर्हि दुर्मर्षं शत्रूणां दुःसहं बलं च क्रियाः कुर्याः उता
पि च नः अस्माकं अंतमः अंतिकतमः आपिः बंधुः भवेः १९ यच्चिद्धितइति अपि चित् अपि च हे इंद्र ते तुभ्यं यत् यदा हि
व्यथिः दारिद्रेण व्यथिता जगन्वांसः गंतारो वयं अमन्महि विद्युमः तदानः अस्माकं गोदा इत् गवादातैव भव आभिर्निर्बोधि

बुध्यस्व २० आत्वारंभमितिहे शवसाः शवसस्पते बलस्य पते इंद्र त्वा त्वां वयं जिव्रयः क्षीणाः वृद्धाः रंभं न दंडमिव रर भारभा
महे अपिच त्वा त्वां सधस्थे यज्ञे उश्मसि कामयामहे आह्वयं पुरणं॥ ॥इतिषष्ठतृतीये पंचचत्वारिंशोवर्गः॥२१॥ स्तोत्रमिंद्रा
यतियं इंद्रं युधियुद्धे नकिः वृण्वते केपिन वारयंति तस्मै सत्वने दानशीलाय पुरुनृम्णाय बहुधनाय इंद्राय स्तोत्रं गायत प
ठत २२ अभित्वेतिहे वृषभ इंद्र त्वा त्वां सुते सोमे अभिषुते सति सुतं अभिषुतं सोमं पीतये पानाय अभिसृजामि तृंपत्
व्यमदं मदकरं व्यश्नुहि च २३ मात्वामूराइतिहे इंद्र त्वा त्वां मूराः मूढाः मनुष्याणां अविष्यवः पालकाः मा आदभन् मा हिं
संतु उपहस्वानः उपहसनपराश्च मा भवंतु ब्रह्मद्विषः ब्राह्मणान् द्विषन्मा कीं वनः मा भजेथाः २४ इहत्वेतिहे इं
द्र त्वा त्वां इह यज्ञे गोपरीणसा गव्येन पयसा समिश्रितेन सोमेन महे महते राधसे धनाय मदंतु मनुष्याः मदयंतु त्वं च त्वं सो
मं यथा गौरः मृगः सरः पिबति तथा पिब २५ यावृत्रहेति वृत्रहा इंद्रः परावति दूरे या यानि सना सनातनानि नवानि च
धनानि चुच्युवे प्रच्यावितवान् ता तानि धनानि संसत्सु यज्ञेषु प्रवोचत प्रब्रूते विद्वज्जनः॥ ॥इतिषष्ठस्यतृतीये षट्च
त्वारिंशोवर्गः॥१६॥ अपिबदितिइंद्रः कद्रुवः कद्रुनामकस्य ऋषेः संबंधिनं सुतं अभिषुतं सोमं अपिबत् पीतवान् सह
स्रबाहुसहस्रबाहो शत्रौ च अहन् इति शेषः अत्र अस्मिन् अवसरे पौंस्यं इंद्रस्य वीर्यं अदेदिष्ट अदीप्यत २७ सत्यंत
दिति तुर्वशे राज्ञि यदौ च यदुनामके च राज्ञि तत् प्रसिद्धं यागादिलक्षणं शमिकर्म सत्यं परमार्थं विदानः जानन् त
योः प्रीत्यर्थं अह्नवाय्यं अह्नवाय्यनामकं तयोः शत्रुं तुर्वणे संग्रामे व्यानट् व्याप्तवान् २८ तरणिंवइतिहे अस्मदीयाः पु
रुषाः वः युष्माकं जनानां पुत्रपौत्रादीनां तरणिं तारकं त्रदं शत्रूणां तर्दयितारं गोमतः पशुमतः वाजस्य अन्नस्य दातारं
च इंद्रं समानमु साधारणमेव प्रशंसिषं स्तौमि २९ ऋभुक्षणमितिऋभुक्षणं महांतं तुग्र्यावृधं उदकस्य वर्धयितारं इंद्रं
सोमे सचा स्तोत्रेण सह सुते अभिषुते सति उक्थ्येषु शास्त्रेषु वर्तवे धनं वरितुं प्रशंसामीति शेषः न संभ्रमस्यर्थे ३० यः कृंत

दितिपः इतूयः एवंइः यान्यंउदकनिर्ममनद्वारं एथुविस्तीर्णगिरिमेघंत्रिशोकाय त्रिशोकनामर्ष्ये यनिकृंतन्व्यच्छिन्
तसर्गाभ्यः गमनवद्भाः उदकेभ्यः निरंतरं निर्गमनायगातुंमार्गमिमार्गमित्यर्थः करोतातिशेषः॥ ॥इतिषष्ठस्यतृतीय
सप्तचत्वारिंशोवर्गः॥३१॥ यदधिषइतिहेइंद्र मंदानोमोदमानस्त्वं यत्र मवत्सरदधिषधारयसियच्चमनस्यसिपूजय
सियरपिचभइतदुपरूसिप्रयच्छस्येवनत्सर्वं माकः किंमांकार्षीः अस्माकंकृतवानेव किंच अस्मान्नमुच्यकस्वप ३२
दभ्रं चिदितिहेइंद्रत्वावतः त्वत्सदृशस्य दभ्रं चित् अल्पमपिकृतं कर्म अधिक्षमिक्षमायां अधीनिसप्तम्यार्थानुवादः श्र
ण्वविश्रुतंभवतिहितथासतितनतवमनोजिगातुमपिगच्छतु ३३ तवेदुताइतिउतापिचहेइंद्रत्वंनः अस्मान्यताया
मिर्मृळयासिसखयसिताः सुकीर्तयः तवेतउतवेवासनव्यंवयुउतअपिचताः प्रशस्तयः स्तनयश्च तवेवभवेयुः ३४
मानएकस्मिन्नितिहेऋरइंद्रनः अस्मान्एकस्मिन्आगसिअपराधेमावधीः माहिंसीः द्वयोः आगसोः अपिमाव
धीः उतापिचत्रिषुआगःस्वपिमाहिंसीः भूरिषुसंख्यातिष्वतिआगःसुमावधीः ३५ बिभयाहीतिहेइंद्रत्वावतः त्व
त्सदृशात् उग्रात्उद्गूर्णात् अभिप्रभगिणः शत्रूणांअभिप्रहर्तुः दस्मात्पापांउपक्षपितुः कृतोघदः शत्रुकृता
हिंसांसहतः अहंबिभयाहि॥ ॥इतिषष्ठस्यतृतीयेषट्त्रिंशोवर्गः॥३६॥ मासख्युरितिहेप्रभूवसोप्रभूतध
नेंद्रतनवसख्युःभूनेवृद्धंमाआविदेमाविदयामिपुत्रस्यापिभूनंमाविदतनवमनः अस्मासआवर्तनवत् आवर्तनवत्
भुभवनुपुनः सुखंकरोतुइत्यर्थः ३७ कोनुमर्याइतिकः खलुहेमर्याः मनुष्याः अभिधितः अनाकृष्टः इंद्राद
मरवायंप्रतिजहाकः जघानकोवाअस्मत्अस्मत्तः भीतः ईषितेपलायतेइतिअब्रवीत्इंद्रएवएतादृशस्यवचनस्यव
क्ताइतिअभिप्रायः ३८ एवारइतिहेश्वघ्नकामानांवर्षकइंद्रएवारएवाराःनामकस्मिन्तस्मिन्सुतेअभिपुतेसोमेस
तिश्वघ्नीवबृनिधनानिअसिन्वन्अवघ्नन्श्वघ्नीवकितवइवससोमः त्वामेवप्राप आवयः दृश्यमानाः सर्वदेवाः नि

वाताःजघांसुरवाः संतः आचरन्निर्गताः ३९ आतइतितनयस्कसमुद्रयाकःयाणर्याववायुनामंत्रेणयुज्यमानोप्ता
एतादृशीअश्वाआप्कणेअस्मदभिमुखौयातुं इस्ताभ्यांकाकर्षामित्यर्थः यतुयस्मात्त्वंब्रह्मभ्यः इतब्रह्मणेभ्यः एवइंद्र
धनंददः ददासि ४० भिंधिविश्वाइतिहेइंद्रत्वंविश्वाः सर्वाः द्विषःद्वेष्ट्रीःशत्रुसेनाः अपभिंधिविधारयबाधःहिंसित्रीःतः
मृधःसंग्रामान्परिजहि हिंस्यतः तासांस्पार्हस्पृहणीयंतप्रसिद्धंवसुआभर अस्मभ्यंआहर ४१ यद्वीळाविति हेइंद्रत्वया
चवीळौदृढेपरेःकृपयंतुमत्स्ययतधनंपराप्रतनत्यस्त्वंयच्च स्थिरस्वयमचलपराप्रतंयसापिपशीनेविमर्षकेनक्षम
पराप्रतंततस्पार्हवसुआभर ४२ पस्यतइतिहेइंद्र यस्यतत्वपादस्यदत्तंभूरबहुलंस्यबहुलयतधनंविश्वमानुषः
सर्वःमनुष्यःवृदतिजनानितत्स्पार्हस्पृहणीयंवसुआभर॥ इतिषष्ठस्यतृतीयएकोनपंचाशोवर्गः॥ ॥इतिऋग्भाष्य
षष्ठाष्टकतृतीयोध्यायः॥ ॥षष्ठतृतीयमध्यायव्याख्यायश्रीमतीसुतः श्रीसायणार्यःसंगत्यचतुर्थव्याकरोत्यर्थः १
तत्रत्वावइतिद्वयाश्चंदशर्चंचतुर्थसूक्तंअश्वपुत्रःवशःऋषिःआद्याश्चनस्त्र गायत्र्यःतत्राद्यायादनिवृत्तत्रयःसप्तकाः
पादनिवृत्तदयानांगामदश्चवदिशापंचमीककुप् अष्टकाद्वादशाष्टकःपादश्रूपनत्वान्मध्यमश्चेत्ककुबितिहितलु
क्षणंनभिदमितिपष्ठीगायत्रीसप्तमीबृहतीअष्टमीअनुष्टुपनवमीसतोबृहतीअयुजोजागतोसतोबृहतीसृक्तंदश
मीगायत्रीएकादशीबृहतीद्वादशीविपरीतासतोबृहतीप्रथमतृतीययोः द्वादशाक्षरत्वातीद्वितीयतृतीययोः द्वादशाक्ष
रावयुजोचत्वविपरीतत्वकत्वात्त्रयोदशीचतुर्विंशत्यक्षराद्विपदाचतुर्दशीपिपीलिकमध्याबृहतीत्रयादशाक्षराव
युजोचनदशकयोर्मध्यअष्टकःपिपीलिकमध्याइत्युक्तत्वात्पंचदशीककुभ्ककुशिरात्रिष्टुभजागतचतुष्काःककुभ
कुशिराइत्युक्तत्वात्षोडशीविंशीविषमपदाबृहतीनवकाष्टकादश्यपिनाविषमपदेयुक्तत्वात्एकविंशीद्वाविंश्यौ
पंक्तीत्रयोविंशीगायत्रीचतुर्विंशीपंक्तिःपंचविंशीसप्तविंश्योबृहत्योपङ्क्तिःषड्विंश्यष्टाविंश्योसतोबृहत्योएकोनत्रिंशीगायत्री

त्रिंशी विंशात्यक्षरा द्विपदा विराट् एकत्रिंशी उष्णिक् द्वात्रिंशी पंक्तिः त्रयस्त्रिंशी गायत्री आसमेवत्त्वित्याद्यश्च तस्त्रः क
नानपुत्रस्तत्पर्यन्त अतः एवमुष्य सादनस्य दानं देवताकाः अग्नेर्वायवित्यादीनां च तस्रणां द्वात्रिंश्याश्च वायुर्देवता अ
नादिष्टपरिभाषया शिष्टा इंद्रदेवताकाः १ त्वावन इति हे पुरूवसो बहुधनेंद्र प्रनेतः कर्मणां यारं प्रकर्षेण प्रापयितः
इंद्र त्वावतः त्वत्सदृशस्य तव स्वभूताः वयं स्म सि स्मः हे हरीणां एतत्संज्ञिकानां अश्वानां स्यातः अधिष्ठातः २ त्वां हि
सत्यमिति हे अद्रिवः वज्रवन् इंद्र त्वां सत्यं निश्चयं इषां अन्नानां दातारं विद्म जानीमः तथा रयीणां धनानां दातारं
विद्म ३ आ यस्येति हे शतमूते अपरिमितरक्षण शतक्रतो बहुकर्मयुक्तेंद्र यस्य ते महिमानं कारवः स्तोतारः गीर्भिः
स्तुतिभिः गृणंति स्तुवंति स्वामित्वं आ पुरणः ४ सुनीथ इति सः मर्त्यः मनुष्यः यजमानः सुनीथः सुयज्ञः भवति
यं अभिद्रुह्यं यजमानं मरुतो देववाः पांति रक्षंति अद्रुहः अद्रोहकर्तारः तथा अर्यमा पाति च मित्रः पाति स एवं भवतीति
५ दधान इति आदित्यः जूतः आदित्यप्रेरितः आदित्यानुगृहीतः यजमानः गोमत् गोभिरुपेतं अश्ववत् अश्वैरुपेतं सु
वीर्यं शोभनवीर्यं पितं पुत्रं दधानः धारयन् एधते वर्धते सदा सर्वदा किंच पुरुस्पृहा बहुभिः स्पृहणीयेन राया धनेन सदा
एधत॥ ॥इति षष्ठस्य चतुर्थे प्रथमो वर्गः॥ ॥६ तमिंद्रमिति तं प्रसिद्धं इंद्रं दानं देयं रायः धनं ईमहे याचामहे कीदृश
मिंद्रं शवसानं बलमाचरंतं अप्रतीतं अभिरूं ईशानं सर्वस्य स्वामिनं ७ तस्मिन् हीति तस्मिन्निंद्रे ऊतयः गंत्र्यः विश्वाः सर्वाः
अभीरवः सचाः सहायभूताः मरुद्रूपाः सेनाः संति तमिंद्रं स्रुतयः सर्पणशीलाः हरयः अश्वाः पुरूवसुं बहुधनं बहुध
नप्रदमिर्त्यर्थः तं मदाय सुतं अभिषुतं सोमं प्रति आ विहंतु आगमयंतु हि पूरणः ८ यस्ते मद इति हे इंद्र ते तव यः मदः वरे
ण्यः वरणीयः यश्च मदः संग्रामे शत्रुहंतमः शत्रूणां अतिशयेन हंता यश्च आददिः आदाता स्वाधनं नृभिः नृभ्यः शत्रुभ्य
श्च यश्च एतनासु संग्रामेषु दुष्टरः अनभिभाव्यः तस्मै मदाय हृष्टं पोवहं त्विति ९ यो दुष्टर इति हे विश्ववार विश्वैः वर

णीयेंद्र वाजेषु पुंदुष्पुषः तव दुष्टरः दुःखेन तरितुं शक्यः तरुता शत्रूणां तारकः श्रवाय्याः श्रवणीयः अस्ति भवति हे वसो वा
सक हे शविष्ठ अतिशयेन बलवन्निंद्र स त्वं नः सवना अस्माकं सवनानि आ गहि आगच्छ वयं च गामंतिवृजं गर्भं गच्छेम
१०गव्यो षु ण इति हे महामह महाधनेंद्र गव्याः अस्माकं गवामिच्छया उत अपि च अश्वया अश्वेच्छया रथया रथेच्छया च
नः अस्माकं गाः दातुं यथा पूर्वं यथास्माकं यागं गवादिदानाय वरिवस्य मित हूदधापि सुस्तुवरिवस्य परिवस्य परिच आ
गच्छ स्यर्थः॥ ॥इति षष्ठस्य चतुर्थे द्वितीयो वर्गः॥ ॥११ नहि त इति हे शूर इंद्र ते तव राधसः धनस्य अंतं सत्रा सत्यं नहि वि
दाम्नि न लभे खलु यस्मादेवं तस्मात् हे मघवन् धनवन् अद्रिवः वज्रवन्निंद्र नः अस्माकं नू चित् क्षिप्रं मवदशास्यं देहि द
त्तं त्वं धनं किंच वाजेभिः वाजैः अन्नैः धिय अस्मदीयानि कर्माणि आ विय रक्ष १२ य ऋष्व इति यः इंद्रः ऋष्वः दर्शनीयः
श्रावयत्सखा श्रावयत्सखाय ऋत्विनः यस्य सतो दराः श्रावयत्सखा पुरुष्टुतः बहुभिर्यजमानैः स्तुतः यः इंद्रः सः विश्वे
त सर्वाणि अपि जनिमा जन्मानि प्राणिनां वेद जानाति तं तविषं बलवंतमिंद्रं विश्वे सर्वेऽपि अध्वर्यादयः यतस्कृचः स्वीकृ
तहविष्काः संतः मानुषमं वधिनः युगायुगान् कालान् सर्वेषु कालेषु हवंते आह्वयंति स्तुवंति १३ स नो वाजेष्विति सः पुरु
वसुः बहुधनः मघावा धनवान् वृत्रहा शत्रूणां हंता इंद्रः नः अस्माकं वाजेषु संग्रामेषु अविता रक्षिता पुरस्तात् पुरतो
वर्तमानः भुवत् भवतु १४ अभि व इति हे उद्गातारः वः यूयं अंधसः सोमस्य मदेषु उपास्यमानेषु सत्सु वीरं शत्रूणामभी
रयितारं नाशकं विचनसं विशिष्टप्रज्ञं श्रस्यं सर्वत्र श्रूयमाणं शाकिनं शाकं ईदृशमिंद्रं महीमहत्सा गिरा स्तुत्या वचः वाक्
युष्मदीया यया यत्प्रकारेण प्रवर्तते गाय आ त्रिष्टुभा वा तथा गायत स्तुतिं कुरुत १५ ददी रेक्ण इति हे पुरुहूत बहु
भिः आहूतं द्रव्यं तत्त्वमस्य शरीरापरेक्णः धनं ददिः दाता भवसि दान्तं क्षिप्रं अधुना नीथ्यं एवं प्रति वाक्यं योज्यं तथा व
सुधनपुत्रादिभ्यः ददिः दाता भवत यावा जेषु संग्रामेषु वाजिनं अन्नवंतं रथिं ददिः॥ ॥इति षष्ठस्य चतुर्थे तृतीयो वर्गः॥ ॥

४५.

॥१६॥ विश्वषामितिद्वे विश्वषां सर्वेषां वसनां धनानां इरज्यंतं ईशानामस्यनर्यमः वारकस्यरूपयतः पुरुकृत्ययतः
शंतां मामहांसं अभिप्रवितारं स्तनवतइतिशेषः सत्वं नूनं क्षिप्रं इदानीं अथ अनितिचित् अनंतरमपि धनं प्रयच्छत्यर्थः
१७ महः स्रवइति हे इंद्र महः महतः वः तंवत्यर्थः अत्यंपनबहु अरंगमाय अरंगमनं अस्मद्दूपयंइच्छामितद्यर्थमी लं
यसत्र गम्यगमनशीलायपज्ञं प्रतिल्वं मताय देवायस्तवा मरुतां स्तमइत्यर्थः कैनयज्ञेभिः यजमानसाधनैः हवि
र्भिः यद्वा स्वगीर्भिः स्तुतिभिः हे देव विश्वमनुषां विश्वेषां मनुष्याणाय दृणांइयक्षसि एतेरिज्यसमरुतां संबंधीत्वं
किंच त्वा तां नम सानम स्कारेण गिरा स्तुत्यावगाय स्तव १८ यषाजयंतइतियमरुतः गिराणां मघानां स्तुतिभिः प्रस
वद्भिः अन्यमिः बलकरैः उदकैः सहपातयंतपातंतिगच्छंति एषा मरुतां महिषणीनां प्रभूतधनिनां यज्ञं कुर्म इति श
षः कत्वा वनु विषणीनां बहुधनीनां स्मकं सुखं तेः कतं अध्वरं यज्ञं प्रप्रा भुपाम १९ प्रभंगमितिदुर्म तीनां शत्रूणां
प्रभंगं प्रकर्षण भंजकं वा पाचा मंह इतिशेषः हे इंद्र शविष्ठ अतिशयेन बलवन् स्तत स्वं अस्मभ्यं रयिं धनं पुष्यं पोष्यं
आभर आहरदेवा स्यन्मतं वादयंतीधनं भरयंतीमतिर्यस्य सः तादृशं देव किंच हे चोदयन्मते उक्तार्थं ज्येष्ठं धनं आ
भर २० सनितः सुसनितरिति हे सनितः संभक्तः सुसनितः सुष्ठु संभक्तः उग्र उद्गूर्णबल चित्र चायनीय चेतिष्ठासंते
चतितः सूनृत सत्य प्रासहा प्रसत्यसंम्राट् सर्वस्य स्वामिन् त्वं सहुरि सहनशीलं सहंतं पुत्रादियुक्तं भुज्यं भोजयिता
रं पूर्व्यं प्रवृद्धं मुख्यमित्यर्थः ईदृशं धनं वाजेषु संग्रामेषु आभरेतिशेषः॥ ॥इतिषस्य चतुर्थे चतुर्थो वर्गः॥२३॥ आस ४६
एतितिएतु आगच्छतु सः यः अदेवः मनुष्यः वशः ईवत् गमनवत् गवादि लक्षणं पूर्तं पूर्णं आददे स्वीकृतवान् इत्यर्थः
यथा चित् येन प्रकारेणाय स्मात् वा वशः एतत्संज्ञकः अश्व्यः अश्वपुत्रः पृथुश्रवसि एतन्नामके राज्ञि कानीते कानीन
पुत्रे कन्यायाः पुत्रे अस्याः उषसः व्युषी व्युष्टौ आददे आदत्ते तेन प्रकारेण आयातु यस्मात् कारणात् आयातीति अश्वः

श्वं तं २२ षष्टिं सहस्रेति सः अश्वः आगत्य श्वं तं अश्वस्य अस्य संबंधिनः षष्टिं सहस्रा सहस्राणि अयुता अयुतानि च आ
सनं अभजं उष्ट्राणां विंशतिं शता शतानि च आसनं श्यावीनां श्यावर्णानां च उवानां दश शता शतानि च आसनं त्री अरु
षीणां त्रीणि आरोचमानानि स्तुभ्यानि ककुहः श्यापाश्वादिस्थानानि या सां तादृशीनां शतानि दश गवां दश सहस्राणि आ
सनं २३ दश श्यावा इति दश शत शस्याः काः श्यावाः श्यावर्णाः आशवः अश्वाः नेमिं रथनाभिं निवावृतुः निवर्तयांतिर
यं वहंतीत्यर्थः ईदृशास्ते कृधद्रयः प्रवृद्धवेगाः वीतवारासः कांतबलाः आशवः मथ्राः मथनशीलाः २४ दानासइति
पृथुश्रवसः कानीतस्य सुराधसः शोभनधनस्य तस्य दानासः दानाः दत्तानि धनानि इमानि स च पृथुश्रवाः पूर्वमुक्ता
नि हिरण्ययं हिरण्मयं रथं च ददत् प्रयच्छतमंहिष्ठः ऽतिशयेन दाता सूरिः सर्वस्य प्रेरकः अभूत् अभवत् वर्षिष्ठं प्रवृद्धाश्र
वः कीर्तिं अकृत अकरोति २५ आनो वायो इति हे वायो त्वं नः अस्मान् प्रत्यायाहि आगच्छ किमर्थं महे महते तनेधनाय
मखाय मरुतां यागाय प्राज्ञसंख्यायचतु भम्पं प्रदातुमित्यर्थः वयं हि वयं खलु ते भूरिदावन् प्रभूत धनदात्र च कृमस्तु
तिं मघश्चित् न दानामिव तदागमनानंतरमेव च कृपम हि महताधनदावने दात्रे॥ ॥इतिषष्ठस्य चतुर्थे पंचमो वर्गः
२६ यो अश्वेभिरितियः पृथुश्रवाः अश्वेभिः अश्वैः वहते गृहं वस्तवसतिउस्ताः गाः ताभिः गच्छतीत्यर्थः त्रिसप्तति
तामागवां संख्यातुक्ता सा च संख्या विशेष्यते सप्ततीनां त्रिः सप्तउक्त संख्याका भिर्गोभिरश्वश्च यागच्छति सः पृथुएभिः
सोमेभिः सोमसद्भिः ग्रावभिश्चहे सोमपाः सोमस्यपातः वायो शुक्रपूतपा दीप्तपूतस्य सोमस्यपातः दानाय तुभ्यं
सोमं दातुं सोमयुक्तो भवतीतिशेषः २७ योमइममितियः पृथुश्रवाः मेमत्यं इमं पुरं तोवर्तमानं चित्र चायनीयं गवाश्वा
दिकं दावने दानाय त्मना आत्मना स्वबुध्यैव अमंदत अमंदत आमाय च स ऋतुः शोभनकर्मा राजा स कृतनाप सकृ
तकर्ता वायअरदु अक्षनहूपस्कृत्वानिच एतत स्यराज्ञो ध्यक्षाः तपु अमंदत चित् उपृणा २८ उत व्यस्य पृषाति उ

५ नापि चक्र च व्यवहत. अस्मत्पत्ययपृ पितारां उग्र: अध्याड् अद्यंसा नंतदवायाप्याघ तस्मा: घृतवतपुड़: सरा जा अस्थपि
त अस्य प्रापितं जपितं त: गां त: उरु: उ पतं तनाप्यानां तं मुंनपितं च नज समापदात ततं अन्नं अश्वा दि भाना त
दूरं पु नाद ध्यंत तत तव वानुप्रत्नादि त्यर्थ. नृपृण: २० अथ प्रिय मिति अय अधुनाऽपि गायधना दिप्रयपि त्रा
तप्रियपश्च द्यं अभ्वानामिव अश्वानामिव उत्सन्नणां गवां सहस्राणापरित्वप दिसहस्र संख्या. क. प्रियप्र तं आसनं
तस तं ३० गावानय पमिति गावान गावड वता: यथा संगव पृथं उपयं तिउपगच्छंति तदू तव धयः छिन्नमुष्का: वृष
भा: एषुगव्बमाद ता. मामामुपयं तसमांपंप्रानुवातिव धयइ तिपुनरुक्तिरादरार्थी ३१ अधयदिति अप अधपतय
दा वाय ध वार्यमाणं प्रयमाणइ त्यर्थ: तादनागणउद्घसं च उच्छूानतां उच्छूापना तं अविकृदत अस्माभ्यं प्रदानाय आ
नुदाच अथ अपित अस्मदर्थमव विन्नवृश्च तवर्णतु गायृधपु विंशा तिं ता तानानि च अविकृदत ३२ ज्ञातदासड़ान
जयविप्र. मधावांवश: जनाद्धव च्यंथण त.नामकदासतन. क्षगवाश्वादीनां नाकृगवाद्वि अधिकृतेरा ज अस्माक. त
दिश्य नन तादि जा द्द क्रि.दानगवाश्वादानां ज्ञात अपरिमितं द्वापात तवस्य भूतनाः त्स्ता ताय: इस जनाः वयमित्यर्थः
आत्मन: एवपरोक्षत्वनवाद: त्वयानुगच्छतत्वात इदगापा: इद्दण ष्क्षिता: सं दति तथादेव गोपा: मदंति ३३ अधस्पति
अथ अधुनाऽप्याअपायण पापाग ऽाप्रदतामदां मदतां प्रतांचां अस्मदभिमुखां अश्व्यं अश्वयुक्तं वरां मां प्रतिमा अ ४३
धिक. क्षा भरणा मतीं विनापतन्वां कन्यां मां प्रति अनयं तां त्यर्थः॥ ॥इति पञ्चमस्य चतुर्थपञ्च वर्ग:॥ ॥मदंवइत्यष्टा
दशर्चं त्रमस त्रं आप: त्रित: कृपि: पञ्चकामहापंक्ति. छंद. आद्या श्व याद्रार्च: आदित्यंदवताका: यच्चगो ष्ठित्याद्या
पंचर्च: उषाद्देवताका: आदित्यदवताकास्व १ मदिवइति दवकणंदमित्रपननरूप अर्यमणापलक्षणं देवकणादय
सदतांव. युष्माकं अव. रक्षणं महिमद्दतव. स्मद्दाशुअउद्विदर्चयजमानाय अस्मै . कि चंदआदित्या. यंयजमानंद्रुः

दाम्भुः सकाशात् अभिरक्षपञ्चं एनं यजमानं अघं पापनशात् न सा प्राप्नोति कुत: वः युष्माकं ऊतयो रक्षणानि अवृद्धसः अ
यायानि अनुपद्रवाणि च कुतसः युष्माकं रक्षणानि सऊतयः शोभन लक्षणानि पुनरुक्तिरादरार्था २ विदा देवा इति
हे देवा: आदित्यासः आदित्याः यूयं अघानां दुःखानां अपाकृतिं अपाकरणं विद् जानीथ यस्मादेवं तस्मात् वयः पक्षिणः
यथापक्षाप क्षोउपरि स्वशिशु कानां उपरि कुर्वंति स्थावयत द्रुत अस्मे विअस्मासु शर्म सुखं यच्छत कुरुत अने० ३
व्यस्मे अधीति हे आदित्या: यूयं अस्मे अधि अस्मासु नतु युष्मासु एव असाधारणं यत् शर्म अस्ति तदित्यर्थः तवयान
यक्षापक्षिण: शिशुकानां पक्षोपरि यथा तथा वियंततन विशेषेण प्रापयत हे विश्ववेदसः सर्वधनाः युष्मान् विश्वानिस
र्वाणि वरूथ्या वरूथं गृहं तद्धितानि धनानि मनामहे याचामहे० ४ यस्मा अरासतेति यस्मै मनुष्याय क्षयं निवासं जी
वातुं जीवन साधनं मन्नं च पचेतसः पकृष्टमनस: अरासत प्रयच्छंति तस्मै यजमानाय तदर्थं इमे आदित्या: विश्वस्य
यत सर्वस्यापि प्रपक्षु: मर्ता: मनुष्यस्य धनिकस्य राय: धनस्य ईशते स्वामिनो भवंति अपत्यस्य प्रदातुं० ५ परिणइति
परिवृणा नम परिवर्जयंतु न: अस्माकं अघानि पापानि दृष्टांत: दुर्गाणि दुर्गमनान् प्रदेशान् यथा परिवर्जयंति तद्वत्
इंद्रस्य शर्मणि स्याम भवेम वयं उतापि च आदित्यानां अवसि रक्षणे च स्याम इतपुरण:॥ ॥इति षष्ठचतुर्थो सप्तमो वर्गः॥
६ परिह्वृंतेति परिह्वृताइतपरिपीडितं मेव तयो नियमादिना प्राण युक्तो जनः युष्मा दत्त स्य युष्माभिर्दत्तं धनं वायति
गच्छति हे देवा: आशवः शीघ्रगमना: आदित्या: यूयं यजमानं अहंतन प्राप्नुथ: स: अदभ्रं अनल्पं धनं वायतीति संबंध:
७ नतं तिग्मं चिदिति तं मनुष्यं तिग्मं च तीक्ष्ण मव संतं त्यम: आयुधं न द्रासत् कुत्सितं न गच्छति न हिनस्तीत्यर्थः तथा
तं जनं गुरु: अभिप्रवृद्धं अपरिहार्यं दु: खं न द्रासत् हे आदित्यास: आदित्याः सप्रथ: समान प्रथना: यूयं अस्मा उपस्म
यजमानाय शर्म सुखं अराध्वं आदन० ८ युष्मे देवा इति हे देवा: आदित्या: युष्मे युष्माकं भयं अपि स्मसि अपि भवं मयुष्म।

भो॰प॰
४८

भिः पिहिताः स्मेत्यर्थः दृष्टांतः पुष्यं तदेवस्पष्टयति वर्मस्कस्ववंचपुपथा सवंति तद्वत् यूयं नः अस्मान् महः महतः एनसः पा
पात् उरुष्यत रक्षत तथा पूर्वं अस्मान् अर्भात् अल्पादपि एनसः उरुष्यत ९ अदितिर्न इति अस्मान् अदितिः देवमा
ता उरुष्यतु रक्षतु तथा दितिः शर्म सुखं यच्छतु अदितिर्विशेष्यते या माता निर्मात्री यस्य मित्रस्य रेवतः धनवतः अर्यम्णः व
रुणस्य च सा नः उरुष्यत्विति १० यद्देवा इति हे देवाः आदित्याः यत् शर्म सुखं शरणं शरणीयं यद्भद्रं सर्वैः भजनीयं यत्
अनातुरं रोगरहितं यत् त्रिधातु त्रिगुणं यत् वरूथ्यं वरूथं गृहं तदर्हं शर्म सुखं तत् अस्मासु वियंतन वियच्छत ॥ ॥
॥इति पष्ठस्य चतुर्थे अष्टमो वर्गः ॥११॥ आदित्या अव हि इति हे आदित्याः यूयं अव हि ख्यत अवपश्यत अधस्तात् स्थाना
न् अस्मान् दृष्टांतः कूलात् इव कूलस्थाः स्वस्थाः स्थिताः इत्यर्थः यथा कूलस्थः पुरुषः अयोगतमुदकं जिज्ञासुः तत्रस्थं म
नुष्यं विलोकयितुं अवाक् पश्यति तद्वत् तथा कृत्वा ऋतार्थं शासनप्रदेशं अर्वतः अश्वान् यथा प्रापयंति अश्वरक्षकाः
तद्वत् नः अस्मान् सुसंस्कयथानं अनुनेषथ अनुनयथ ११ शुभ्रं भद्रमिति हे आदित्याः इरुम्भ मो भद्रं कल्याणं सुखं र
क्षस्विनं बलवंतं अस्मद्द्वेष्टृं नभवत्विति शेषः अवये अस्मान् हिंसितुं अवगच्छतेन भवतु तथा उपयंत् उपगच्छतेन भवतु
उत न दक्षस्यगवं च भद्रं अस्मदीयं भवतु किं च धनवं च प्रस्तिकाय भद्रं भवतु वीराय अस्मत्पुत्रादिकाय भद्रं भवतु की
दृशाय वीराय श्रवस्यते अन्नमिच्छते १३ यदा विरिति हे देवासः देवाः आदित्याः परा वि यत् पापमा विर्भूतमस्ति दुष्कृतं
यदपि अंतर्हितमस्ति विश्वं तत् उभयं आरे नित मयि मा भूत् किंतु अस्मदारे दूरो धानेन स्थापयत १४ यच्चगावीति
हे दिवा दुहितः उषोदेवते यच्च गोषु अस्मदीयासु दुःष्वप्न्यं अनर्थसूचकं दुःस्वप्नं यच्च दुःष्वप्न्यं अस्मे अस्मासु स्त हे उषः पापमि
मित्रं पश्यामः इत्यर्थः तत्सर्वं हे विभावरि उषोदेवि आप्त्याय त्रिताय परावह दूरे परिहर १५ निष्कं वा घेति हे दिवा दुहि
तः उषः निष्कं वा घ आभरविशेषं वा कृणवते कुर्वते स्वर्णकाराय यत् दुःष्वप्न्यं हे स्वर्णकारेण निर्माण समये दृष्टमित्य

र्थः पूरणः वा अथवा स्त्रजं मालां यं कृण्वते मालानिर्माण समये यत् दुःष्वप्न्यं दृष्टं सर्वं तदुभयविषयं दुष्वप्नं आप्त्याय पु
त्रिताय वर्तमानं यदिद मिपरिहर आवयं त्रिताय विरूपा नाम स्पर्थः ॥ ॥इति पष्ठस्य चतुर्थे नवमो वर्गः ॥१३॥ तदन्नायेति
तदन्नाय तदपगाय गरावस्थायां भाष्यं तन्न प्रसिद्धं मधुपाय सादिस्व भाग तदवान्नय प्रस्ः तादशाय प्रस्वक्षणां जनवत्स्य
भागिभाकुमित्यर्थः तथा देपस तद्देवाः कर्मविदितं आग्रदवस्थायां क्रियते तदेव कर्म स्वप्नस्यसः तत्कर्मता दशाय तभा
गं दुःष्वप्न्यं भागं उपसंदपश्चात् भुर्वन त्रिताय द्वितायच पूरणः वरुणो देविदुः स्वप्नं अनकर्म विषयं यत् अन्यत्र भाषय
१७ यथाकलामिति यथा कलां कालांतरे दशाः नाइंसन्नयंति यथा च शफं अश्वादिकं अनवदानाईं संनयंति तथा
ऋणं ऋणं सन्नयंति एवं एवं दुष्वप्न्यं सर्वं आप्त्ये वर्तमानं सन्नयाम सिसन्नयामः १८ अजैष्मेति वयं त्रिताः अद्य अजैष्म
जयम असनाम संभजाम च स्वसं भूवं अनागसः अपापाः अभूम भविमः उषः यस्मात् दुःस्वप्न्यात् अभैष्म भीता स्म
तत् अपोच्छतु अपगच्छतु ॥ ॥इति पष्ठस्य चतुर्थे दशमो वर्गः ॥ ॥स्वादोरभक्षीति पंचदशर्चं पष्ठं सूक्तं कण्वः प्रगाथः
ऋषिः त्रिष्टुभं यं चमो जगती सोमो देवता ३ स्वादोरभक्षीति अहं प्रगाथः सुमेधाः शोभनप्रज्ञः स्वाध्यः स्वाध्यापनः सुक
र्माधियावा विन्नं स्य अतिशयेन पृणांसमानस्य स्वादोः स्वादनीयस्य पयसः अन्नस्य अन्नं सा भक्षि आ
श्रययद्वा विश्वे देवाः मर्त्याः ऊताप्यिमर्त्यासः मर्त्याः मधुब्रुवंत मनार्दमतदितिशब्दयंत अभिसंचर
तिप्राप्नुवंति तद्वं अभक्षीति २ अंतश्च प्रागा इति सोमत्वं अंतश्च प्रागाः हृदयस्य अंतर्गच्छति गत्वा च अदितिरदीनास्व
... सः ... पवमान ... सोमत्वं इंद्रस्य सख्यं जुषाणः सन्मानः आर्थ
प्रगाम्य ... धुरमिव गय अस्मान् ... अनुगच्छसि ... अमृतं अमरणं ...
... कृतः अमृताः ... ज्योतिः ज्योतमानं स्वर्गं अगन्म अविदाम ज्ञानवंत देवान

भा·ष·
४१

याम् तान् अस्मान् न्मंहदानीं अरातिः शत्रुः किं कृणवत् कुर्यात् किमु किं वा मर्त्यस्य हृदानीं मनुष्यस्य मधूर्त्तिः
हिंसकः किं कृणवत् कुर्यात् ४ शं नो भवेति हे इंद्रो सोमाः अस्माभिः पीतस्त्वं नः अस्माकं हृदे हृदयाय शं सुखं आप
वहत्थान पितावत् सूनवे बालकाय यथा सुखाय भवति सखेव यथा सखा सख्ये सुशेवः सुसेवो भवति तद्वत् त्व
मपि भव किं च हे उरुशंस बहुभिः शंसनीय सोम धीरः धीमांस्त्वं नः अस्माकं जीवसे जीवनाय आयुः आयुष्यं प्र तारीः
प्रवर्द्धय ५ इमे मा पीता इति इमे पीताः यशसः यशस्कराः उरुष्यवः अस्माकं रक्षाकामाः सोमाः गावः गोविकारभू
ताः वध्रः रथं नरथमिव तावथा रथांगपर्वकमनाहः संदधाति तद्वत् मां पीतः सोमाः पर्वसु सन्नं त्रंतु किं च ते सोमाः मां
मां विस्रसः विस्रसनात् चरित्रात् पादात् रक्षंतु ता अपि च मामां स्नामात् व्याधेः सकाशात् इंदवः यव यतुरप कुर्वंतु॥ ॥
॥इति षष्ठस्य चतुर्थे एकादशोवर्गः॥ ६॥ अग्निं न मेति हे सोमपीतः त्वं मामंथितं मथितमग्निमिव संदिदीपः संदीपय
प्रचक्षय चक्षकाय संपुरुषेणेन अस्मान् वस्यसः अतिशयेन वसुमतः कृणुहि कुरु यथा अधुनाहि खलु ते त्वां हे
सोम मदे मदाय मन्ये सोमेन गवा सतिरेवान् इव धनवान् इहेदिवं प्र स पुष्टिं अस्माकं पोषणं अच्छ प्र आ पवस्व अभिगच्छ
॥ ७ इषिरेणेति इषिरेण इच्छावता मनसा सुतस्य ते अभिक्षुक्तां भक्षीमहि पित्र्यस्येव पितृसंबंधिनः रायः धनस्येव पु
त्राभिव पित्र्यं धनं यथा पोषिणे मनसा उपभुंजते तद्वत् सोम राजन् स्वामिन् नः अस्माकं आयूंषि प्र तारीः प्रवर्द्धय
वासरानि अहानि सूर्य इव सर्वस्य पोषणेन प्रवर्द्धयति तद्वत् ८ सोम राजन्निति हे सोम राजन् नः अस्मा
न् स्वस्तिऽअविनाशाय मृळय सुखय वयम स्वःतः त्वदीया व्रतस्य त्वसंवत्सः सब्रताः स्मः त्वमस्य तं सकीयत्वं विद्धि किंचानीहि किं च
हे इंद्रो दक्षः प्रवृद्धः अस्मत् शत्रुः अलति गच्छति तु तापि च मन्युः क्रोधः कुत्सो वा मतिना हरा स्तोमय विध सुअर्यः अ
सुकामं यथा कामं न्न अस्मान्मा पराः आपरादि हि ९ त्वं हि न इति हे सोम देव नः अस्माकं तन्वः अंगस्य गोपा हि र

म

४०

क्षिता खलु अतोगात्रे गात्रे सर्वेषु अंगषु न्नचक्षाः नृणां कर्मनेता णंदः अविनिषस्य निषीद स्थितः यदि अपि ते नव व्रता
नि वर्तितानि वयं प्रमिनाम हिंस्मः तथापि हे देव सः वस्य श्रेष्ठः नः अस्मान् सुपस्यान्शोभन सख्यास नमृळ सुखय
५० कदृदरेण ति अरूपगा पोत्र हृद्रेणउदरा बाधकेन सोमनसख्याम चयसंग ख्यसंगतो भवामि यः सोमः पीतः
सन् मामभीतः न रिष्येत् नाहिंसात् हे हर्यश्व इंद्र सोमस्य भक्षे इंद्रस्य कौत्सं सोमस्य इंद्र स्वामिकत्वान् न विरुद्धः यः अ
स्मे अस्मासु नि धायि निहितोऽभूत् तस्मै सोमाय प्रतिरं आयुः चरंचिर कालावस्थानं मिंद्र मपि याचे॥ ॥इति ष
ष्ठस्य चतुर्थे द्वादशोवर्गः॥ १२॥ अप त्या इति त्याः ताः अनिराः धेरयितु मशक्याः अमीवाः बलवत्यः पीडाः अपास्थुः अप
गच्छंतु याः तमिषीविः बलवत्यः पीडाः अस्मान् निनिनरां अत्र सन्कंपयंति तथा अभेषुः त्यजंतु अपराधकारणमा
दतस्मात् सोमाः विहायाः महान् सन् अस्मान् आ अरुहत् प्राप्तवान् यत्र यस्मिन् सोमपीते आयुः आयुष्यं प्रतिरंतव
र्धयंति मनुष्याः तं सोमं आगन्मेति १२ यो न इंदुरिति हे पितरः यः इंदुः हृत्सुपीतः सन् अमर्त्यः मृतिरहितः सन् आ
विवेश मर्त्यान् नः अस्मान् तस्मै सोमाय हविषा विधेम परिचरेम अस्य सोमस्य मृळीके सुखे सुमतौ च अनुग्रहबुद्धौ
च स्याम भवेम १३ त्वं सोम पितृभिरिति हे सोम त्वं पितृभिः सह संविदानः संगच्छमानः द्यावापृथिवी द्यावापृथि
व्यौ आ ततंथ तस्मै विस्तारयसि तस्मै सोमाय हविषा विधेम परिचरेम वयं रयीणां धनानां पतयः स्याम भवेम १४
त्रातार इति हे त्रातारः देवाः नः अस्मान् अधिवोचत अधिवचनं कुरुत किं च नः अस्मान् निद्राः स्वप्नः मा तर्द्ध्व
नः मा प्रबवन् बाधितुं तापि च जल्पिः निंदकः मा निंदतु वयं सोमस्य प्रियासः प्रियाः स्याम विश्वह सर्वदा अरुहः सुवी
रासः शोभनपुत्राः सन्तः विदथं यज्ञं आवदेव अभिमुख्येन वदेम १५ त्वं नः सोम इति हे सोम त्वं नः अस्माकं विश्वतः सर्व
स्मात् अन्येषां वयोधाः अन्नदातासि यास्य स्वर्वित् स्वर्गलंभकः नृचक्षाः सर्वमनुष्यद्रष्टा त्वं अस्मान् आविश हे इंदो च

भा.प.
५०

तिभिः सह प्रयमाणः सन् सजोषाः गंतारो मरुतः तैः सहितः सन् पश्चात् तात् उत वा पुरस्तात् च याहि रक्ष॥ ॥इति षष्ठस्य
चतुर्थे चर्योदशो वर्गः॥ ॥इति अष्टमे मंडले षष्ठो ऽनुवाकः॥ ॥सप्तमेनुवाके दश सूक्तानि तत्राग्न आयाहीति विंशत्यृचं प्र
थमं सूक्तं प्रगाथपुत्रः भर्गऋषिः प्रथमा तृतीयादि आयुजो बृहत्यः द्वितीया चतुर्थ्यादि युजः सतो बृहत्यः अग्निर्देवता
१ अग्न आयाहीति हे अग्ने अग्निभिः यष्टव्यैः सह आयाहि आगच्छ तदर्थं होतारं देवानामाह्वातारं त्वा त्वां वृणीमहे त्वां आ
गतं प्रयता ध्वर्युहस्ताभ्यां नियता हविष्मती घृतवती या जिष्ठ सां बर्हिः बर्हिष्यासदे आसाद्य आ सर्वतो नक्तु २ अच्छा
हि त्वेति हे सहसः सूनो बलस्य पुत्र अंगिरः अंगिरसां मध्ये एकः त्वा त्वां अध्वरे याग गच्छ अभिप्राप्तुं स्रुचः चरंति अतः
ऊर्जः अन्नस्य नपातं रक्षकं घृतकेशं प्रदीप्तकलत्रस्थानीयज्वालं पूर्व्यं पुरातनं अग्निं यज्ञेषु अस्मदीयेषु ईमहे स्तो
भिः पूरणः ३ अग्ने कविरिति हे अग्ने कविः मेधावी त्वं वेधाः विधातासि पालनां हे पावक शोधक होता देवानां आ
ह्वाता यक्षः पष्टव्यः असि हे शुक्र दीप्त मंद्रः मोदनीयः यजिष्ठः यष्टृतमस्त्वं अध्वरेषु यज्ञेषु विप्रभिः मेधाविभिः ऋत्वि
ग्भिः मन्मभिः मननीयैः स्तोत्रैः ईड्यः स्तुत्योसि ४ अद्रोघमिति अद्रोघं अद्रोग्धारं प्रजिह्य विष्ठ युवतम अजस्र आ
वह काम् शातः अस्मदर्थं कामयमानः देवान् किमर्थं वीतये हविर्भक्षणाय हे वसो वासक अग्ने स्कधिता स्कनिहितानि
प्रयांसि अन्नानि अभि आगहि आगहि अभिगच्छ आगत्य च धीतिभिः स्तुतिभिः हितः निहितः सन् मंदस्व ५ त्वमित्
सप्रथा इति हे अग्ने त्रातः रक्षकः ऋतः सत्य भूतः कविः क्रांतप्रज्ञ त्वमित् त्वमेव सप्रथाः सर्वतः पृथुः दीदिवः दीप्यमा
नः असि त्वमसि हे समिधान समिध्यमान देव दीप्त त्वां विप्रासः मेधाविनः वेधसः विधातारः आ विवासंति परिच
रंति॥ ॥इति षष्ठस्य चतुर्थे चतुर्दशो वर्गः॥ ॥६॥ शोचा शोचिष्ठेति हे शोचिष्ठ अतिशयेन शोचयितः अग्ने शोच
दीप्यस्व दीदिहि दीपय अस्मान् विशे प्रजायै स्तोत्रे मयः सुखं रास्व देहि त्वं महान् असि त्वं देवानां संबंधिनि शर्मन् श

५०

र्मणि सुखे मम सूरयः स्तोतारः मेधाविनः संतु भवंतु शत्रुषाहः शत्रूणां अभिभवितारः स्वग्नयः शोभनाग्नयः संतु
७ यथा विदिति अग्ने क्षामि क्षमायां वर्तमानं दह अतसं शुष्कं काष्ठं यथा चित् येन प्रकारेण संजूर्वसि सम्यक् दहसि त
थः एव एवं दह हे मित्रमहः मित्राणां अस्माकं पूजकः यः अस्मध्रुक् अस्माकं द्रोग्धा कश्च कश्चित् दुर्मन्मा दुर्मतिः चेत
ति कामयेत अस्मान् द्रोग्धुं तं दहेति ८ मा नो मर्तायेति नः अस्मान् मर्ताय मरणधर्माय तद्वै शत्रवे रक्षस्विने बल
वते मा रारधः वशमानय तथा अघशंसाय पापशंसकाय मा रीरधः हे यविष्ठ युवतम अस्रेधद्भिः अहिंसकैः तर
णिभिः तारकैः शिवेभिः सुखकरैः पायुभिः पालनैः नः अस्मान् पाहि रक्ष ९ पाहि न इति हे अग्ने नः अस्मान् एकया
ऋचा गिरा पाहि रक्ष उत अपि च द्वितीयया ऋचा पाहि पालय पाहीति सः भिः गीर्भिः ऊर्जां अन्नानां पते स्वामिन् तथा
पाहि च तसृभिः गीर्भिः हे वसो वासक अग्ने १० पाहि विश्वस्मादिति हे अग्ने विश्वस्मात् सर्वस्मात् रक्षसः अराव्णः
अदातुः शत्रोः शात् पाहि रक्ष अस्मान् वाजेषु संग्रामेषु नः अस्मान् प्राव प्रकर्षेण रक्ष स्म पूरणः हि यस्मात् नेदिष्ठं आ
सन्नं आपिं बंधुभूतं त्वामित् त्वामेव देवताजये यज्ञाय यज्ञसिध्यर्थं वृधे वर्धनाय नक्षामहे व्याप्नुमः॥ ॥इति ष
ष्ठस्य चतुर्थे पंचदशो वर्गः॥ ११॥ आ नो अग्न इति हे अग्ने पावक शोधक वयोवृधं अन्नस्य वर्धकं शंस्यं शंसनीयं र
यिं धनं नः अस्मभ्यं आहर रति शेषः आ हरस्व च हे उपमाति उप अस्मत्समीपे माति निर्धनमिति उपमातिः तादृश अग्ने
नः अस्म भ्यं स्पृहणीति स्पृहणीयया शोभननयनेन पुरुस्पृहं बहुभिः स्पृहणीयं स्वयशस्तरं असंतस्वभूतकीर्तिधनं
रास्व देहि १२ येन वंसामेति येन धनेन पृतनासु संग्रामेषु शर्द्धतः वेगं कुरुतः अर्यः अरीन् शत्रून् आदिशः आ
दिशत्न् शास्त्रभक्षस्तन् तरतः वंसामहि साम तं धनं देहि हे शचीवसो प्रज्ञया धारा सयितः धनं वासः प्रसिद्धस्त्व
न्तः अस्मान् यर्ध वर्धय अस्मदीपन प्रयसा हविषा वसु विदः वसुनां लंभकानि धियः कर्माणि अस्मदीयानि जि

न्वप्रीणय १३ शिशानइतिअयमग्निःशृंगेशिशानःतीक्ष्णीकुर्वन्वृषभोयथादविध्वत्कंपयतिशिरःएवंशृंगस्थानी
याःज्वालाःशिशानःतीक्ष्णीकुर्वन्दविध्वत्कंपयतिशिरःअस्याग्नेर्हनवोनहनवइवहनुस्थानीयाःज्वालाःतिग्माःन
प्रतिधृषेप्रतिधर्षितुंअशक्याःयःअग्निःसुअंभःसुदंष्ट्रःसहसोयहुःसहस्वःपुत्रःअस्यहनवःइत्यर्थः १४ नहिते
इतिहेवृषभवर्षकअग्नेतेतवजंभासःजंभाःदंतस्थानीयाःज्वालाःनहिप्रतिधृषेप्रतिधर्षितुंअशक्याःयत्यस्मात्
विनिष्ठसेविविधंगच्छसिप्रवर्धसेइत्यर्थःहेहोता।होमनिष्पादकसत्वंहविःनःअस्मद्दत्तंसुहुतंकृधिकुरुनःअस्मभ्यं
वार्याविरणीयानिपुरुचबहूनिवंसददि १५ शेषेवनेष्वितिहेअग्नेवनेषुवर्तमानयोःमात्रोःअरण्योःशेषेस्वपिषिवर्त
सेत्वांतथाभूतंमर्तासःमनुष्याःअध्वर्याद्यःमथनेनोत्पाद्यसमिंधतेपश्चात्प्रबुद्धःसन्अतंद्रःअनलसःसन्
हविष्कर्तोयजमानस्यहव्यानिवीषिवहसिदेवान्प्रतिआदित्अनंतरमेवदेवेषुमध्येराजसिदीप्यसे॥ ॥इतिषष्ठस्य
चतुर्थेषोडशोवर्गः॥१६॥ सप्तहोतारइतिहेअग्नेतमितत्तमेवत्वांसप्तहोतारःहोत्रकाःईळतेस्तुवंतिकीदृशंत्वांसु
जंत्येसुत्यागअभिमतप्रदंमियेधंअहमंअक्षीणंप्रवृद्धंकिंचअद्रिंमेघंतपसातापकेनशोचिषातेजसाविभिन्नत्सि
हेअग्नेजनान्अस्मान्अतिअनीस्यप्रतिष्ठप्रगच्छहविरादायदेवान्प्रति १७ अग्निमग्निमितिहेदेवाःअग्निमग्निंवीप्सा
आदरार्थाअग्निमेववोहेयजमानाःवयंवःयुष्मदर्थंहुवेमआह्वयामःकीदृशावयंवृक्तबर्हिषःछिन्नदर्भाःछिन्नप्रयसः
वयामासादितहविष्काःकीदृशम्ग्निंशश्वतीषुबह्वीषुभूमिषुवर्तमानंहोतारंहोमनिष्पादकंअध्रिगुंअधृतगमनं
किमर्थंचर्षणीनांमनुष्याणांअर्थायअग्नौतस्मिन्समिद्धेदृष्टिलाभात्प्राण्युपकारसिद्धंप्राप्यर्थत्वं १८ केतेनशर्मन्निति
हेअग्नेतुभ्यंचिकित्वनाविकितुषाअनेनहोत्रादिशासहयजमानःकेतेनप्रज्ञापकेनस्तोत्रेणयजतेइतिशेषःकुत्रसु
षामशिशोमनरथंतरादिसामोपेतेशर्मन्शर्मणिसुखसाध्येनयज्ञेअनोहेअग्नेइषण्ययाइच्छयास्वापयानःअस्मभ्यं

पुरुरूपंनानारूपंनेदिष्ठंअंतिकतमंवाजंअन्नंउतयेरक्षणायआभरआहर १९ अग्नेजरितरितिहेअग्नेदेवजरितः
स्तोतःस्तुत्यइत्यर्थःविश्पतिःप्रजानांपालकःरक्षकःराक्षसानांतेपानःसंतापकोसिगृहपतिःयजमानगृहस्यपाल
कश्चत्वंमहान्अतिशयेनपूज्योसिदिवःद्युलोकस्यपायुःपातादुरोणयुःयजमानस्यगृहस्यमिश्रयिताअप्रोषिवान्
सर्वदावर्तमानःइत्यर्थःतादृशस्त्वंमहान॥सीत्यन्वयः २० मानोरक्षइतिहेआघृणीवसोदीप्तिधननःअस्मान्रक्षो
राक्षसादिःमाविशीत्सर्वतोनप्रविशतुतथायातुमावतांयातुधानानांयातुःपीडामाविशीत्हेअग्नेअनिरांअन्नाभावंदा
रिघ्रक्षुधंक्षपितारंरक्षस्विनःबलवतिरक्षांसिपरागथूतिक्रोशाद्ययान्देशात्परस्तात्एतदुपलक्षणंदूरदेशाअ
पसेधपरिहरअंतराश्रुतत्वात्यानिक्षांसिनपाह्यंत्विति॥ ॥इतिषष्ठस्यचतुर्थेसप्तदशोवर्गः॥ ॥उभयंशृणुदिस्य
ष्टादशर्चंद्वितीयंसूक्तंप्रगाथःभार्गःऋषिःअयुजोबृहत्यःयुजःसतोबृहत्यःइंद्रोदेवता १ उभयंशृणवदितिउभयं
स्तोत्रात्मकंशस्त्रात्मकंचउभयविधंइदंवचःनःअवकिअस्मदभिमुखंइंद्रःशृणवत्शृणोतुश्रुत्वाचसत्राच्याअस्मा
कंसहीचत्याधियायुक्तःसन्मघवाधनवान्शविष्ठःअतिशयेनबलवान्आगमत्आगच्छतुसोमपीतयेसोमपाना
य २ तंहिस्वराजमितितंहितंखलुइंद्रंस्वराजंस्वयमेवराजमानंधिषणेद्यावापृथिव्यौवृषभंवृष्टेःवर्षकंनिष्टतक्ष
तुःसममवस्कुरतुःतंहितमेवदृंआजसंबलायनिष्टतक्षतुःउतयस्मादेवंतस्मात्हेइंद्रउपमानांउपमानभूतानांअ
न्येषांदेवानांमध्येप्रथमःमुख्यःसन्निषीदसिबृयांसोमकामंहिखलुतेमनः ३ आवृषस्वेतिहेपुरुवसोबहुधनं
इंद्रत्वंआवृषस्वआसिंचस्वकिंसुतस्यांधसःसुतंसोमंजठरेहरिवअश्ववन्इंद्रत्वांहिआहिजानीमःखलुकीदृशं
धृष्णुंसंग्रामेषुसासहिंअभिभवितारंशत्रूणांआकृष्टंचित्केरप्यधर्षणीयंदधृषणिंअन्येषांधर्षकं ४ अप्रामि
सत्यतिहेअप्रामिसत्यअहिंसितसत्यमघवन्धनवन्इंदंतथेदसत्तथैवभवतिहेइंद्रकृत्वाकर्मणाप्रज्ञानेन

यत्र यथा अन्नेन प्रकारेण वशाः कामयः हे शिप्रिन् हनुमन् इंद्र अवसा रक्षणेन निमित्तेन वाजं अन्नं सनेम संभजेम
वयं त्वया तदनुग्रहात् कीदृशा वयं मरुत्वता शा घेमेव यं नः शत्रून् गच्छंतः अभिभवंतः हे अद्रिवः वज्रवन् इंद्रेति ५
शग्ध्यू षुइति हे शचीपते इंद्र शग्धि देहि अभिमतं विश्वाभिः सर्वाभिः ऊतिभिः रक्षकैः मरुद्भिः सह हे शारभगं न भा
ग्यमिव यशसं यशस्विनं वसुविदं धनस्य लंभकं त्वां अनु चरामसि अनु चरामः परिचराम इत्यर्थः उग्रुहि पूर
णाः॥ ॥इति षष्ठस्य चतुर्थे अष्टादशो वर्गः॥ ॥पौरो अश्वस्येति हे इंद्र त्वं अश्वस्य पुरुकृत् पुरयिता असि भव सि त
थाग वां पौरः पुरुकृत् हे देव हिरण्ययः हिरण्मयशरीरस्त्वं उत्सः सदृशासि हे हि इंद्र त्वत्तापि वर्तमानं दानं अस्मद्विषयं न
कि परिमर्षितं न कश्चिन् हिनस्ति अतः यद्यत् याभिया चामि तत् आभर आहर मत्स्विहि पूरणः ७ त्वं हीति हे इंद्र
त्वं हि खलु सामर्थ्यात् ददातीति गम्यते अत एहि आगच्छ आगत्य च अस्मभ्यं मगं धनं विदाः लभस्व दत्स्व किमर्थं च रखेद
विमक्षणायकं मुत्तये अस्माकं वसु दानाय हे मघवन् इंद्र गविष्टयगाः इच्छंतं मत्स्व उद्धा धृषस्व उत्सिंचस्व देहि गाः इति
विमक्षणायक मुत्तपे अस्माकं वसुदानाय हे मघवन् इंद्र गविष्टय ... ८ त्वं पुरु सहस्राणि हे इंद्र त्वं पुरुपुरूणि बहूनि
शेषः तथा हे इंद्र अश्वमि ष्टये अश्वेषणवते मत्यं अश्वान् उद्धृषस्व ८ त्वं पुरु सहस्राणि हे इंद्र त्वं पुरुपुरूणि बहूनि
सहस्राणि शतानि च यूथा गवादि यूथानि दानाय यजमानविषयाय मंहसे अनुमन्यसे परोक्षः पुरंदरं शत्रूणां पुराणां
दारयितारमिंद्रं अवसे रक्षणाय पगायंतः स्तुवंतः विप्रवचसः विविधप्रकृष्टवचनाः वयं आ अभिमुखं चकृम ९ अ
विप्रो वेति अविप्रः विप्रः मेधावी अस्तुती कुशलो वा हे इंद्र यत्ते तव वचः तवस्तुतिं अविधत् कुर्यात् त्वा स्तोता इत्यर्थः सः
स्तोता त्वायात्वाया ध्यासाधनेन प्रमंदते प्रकर्षेण मोदते हे शतक्रतो बहुकर्मन् प्राचामन्योप्राचीन क्रोध अप्रतिह
त क्रोध अप्रतिहत क्रोधः इत्यर्थः हे अहंसन संयामि अहं इत्यालनामहत्वं प्रकाशयन् यः शत्रुं संभजतेस तुयो कता
दृत्रोंद्र १० उग्रबाहुरिति उग्रबाहुः उद्धूर्णभुजः म्रक्षकृत्वा वधकर्ता शत्रूणां पुरंदरः पुराणां दारयितेंद्रः यदि महवम्र
पुवत् न हि वस्त्यवः वसुकामाय यं वसुपतिं बहुधनस्वामिनं शतक्रतुं अपरिमितप्रज्ञं इंद्रं सोमैः हवामहे आह्वया
म॥ ॥इति षष्ठस्य चतुर्थे एकोनविंशो वर्गः॥१९॥ नपापास इति वयं इंद्र पापासः पापाः ब्रह्मचर्यव्रतादिरहिताः न म
नामहे न मन्यामहे तथा अरायासः अधनाः न म नामहे न अस्त्रुवः अज्वलनाः अनग्नयः न मनामहे कृतव्रतेनियमा
दिपुण्यादानवंतो ग्निसहिताः तं स्तुमः इति ऋषिरात्मनमाहयदि तयस्मादेवकारणात् नु इदानीं वृषणं वर्षकमिंद्रं स
ते सामं अभिषुंत सवा सहिताः सखायं कृणवामहै कुर्मः १२ उग्रंयुयुज्मेति उग्रं इंद्रं युयुज्म योजयाम कीदृशमिंद्रं पृत
नासु संग्रामेषु सासहिं शत्रूणामभिभवितारं ऋणकातिं ऋणमृतस्तुतिं यस्मै स्तुतिः ऋणवत् अवश्यं क्रियते अदाभ्यं
केनापि अहिंस्यं यः इंद्रः श्रमं वित बहुधन्वेषु श्रमणशीलं मेव वाजिनं बलवंतं अश्वं रथीतमः रथस्वामी देवः वेद वेत्ति
गृह्णाति तद्दत्तु सनिता धनसंभजनाः इंद्रः वाजिनं हविष्मतं यमित्त यमेव जनं बहूनां यजमानानां मध्ये न शात् व्याप्नोति
तमिंद्रमिति उपूरणः १३ यत इंद्र त्रितिहे इंद्र यतो हिंसकात् भयामहे वयं ततो नो अभयं कृधिकुरु हे मघवन् श
ग्धि शक्तो भव सि नः अस्मभ्यं अभयं कर्तुं तव तत्तते ऊतिभिः रक्षणैः रक्षकैः पुरुषैः किं च वि जहि द्विषः अस्मद्द्वेष्टॄन् वि
जहि मृधः अस्माद्धिंसकान् १४ त्वं हि राधस्पत इति धनस्वामिन् त्वं हि त्वं खलु महः महतः राधसः धनस्य क्षयस्य च गृह
स्य च वर्धयिता असि हि खलु सामर्थ्यादेवं लभ्यते कस्य विधतः परिचरतो यजमानस्य तं तादृशं त्वां वयं हे मघवन् इं
द्र गिर्वणः गीर्भिः वननीय सुतावंतः अभिषुतसोमाः हवामहे आह्वयामः १५ इंद्रस्पल्तु तत्तिअयमिंद्रः स्पट् सर्वस्य द्र
ता उत ऐवृत्रहा वृत्रहंता परस्पाः परपालयिता नः अस्माकं वरेण्यः वरणीयः सः इंद्रः नः अस्माकं पुत्रमिति शेषः रक्षिष
त् रक्षतु चरमं अल्पपुत्रं रक्षिषत् समध्यमं पुत्रं रक्षिषत् सः नः अस्मान् पश्चात् रक्षिषत् नः पुरः पुरस्तात् रक्षित॥
॥इति षष्ठस्य चतुर्थे विंशो वर्गः॥ ॥२०॥ त्वं नः पश्चादितिहे इंद्र त्वं नः अस्मान् पश्चात् भागः पुरः पूर्वभागः अधरात्

भाष·
५२

अधोभागः एतत उपरिभागस्योपलक्षणं उत्तरात् उत्तरभागात् एतत् दक्षिणस्यापि उपलक्षणं किं बहुना विश्वतः सर्वस्मा
त् प्रदेशात् निपाहि हे इंद्र देव्यं भयं अस्मत् अस्मत्तः आरे दूरे कृणुहि कुरु अदेवीः आसुरीः हेतीः आयुधानि आरे कृणुहि
दूरे कुरु १७ अद्याद्येति अद्याद्य अहरहः श्वःश्वः श्वस्वः रक्षते पापं रच परस्मिन् तत्तत्परेहनि च त्राः स्वहः सत्यते सतांपा
लक विश्वा सर्वाणि अपि अहा अहानि सर्वेष्वपि अहःसु नः अस्मान् जरितॄन् स्तोतॄन् रक्षिषः रक्षसि तथा दिवा नक्तं
च रक्षिषः १८ प्रभंगी शूर इति अयं मघवा इंद्रः प्रभंगी प्रभंजनशीलः शूरः तुवीमघः प्रभूतधनः संमिश्लः सम्यक्
मिश्रयिता किमर्थं वीर्याय वीर्यकरणाय कं पूरणः एवंमहानुभावोभवति प्रत्यक्षः हे इंद्र तत्तव उभा उभौ बा
हू वृषणा वर्षकौ कामानां रुशंता तत्कृतो बहुप्रज्ञयायो वज्रं आयुधानि मिमिक्षतुः परिगृह्णीतः॥ इतिषष्ठस्य चतुर्थे एकवि
शोवर्गः॥ ॥प्रोअस्मा इति द्वादशर्चं तृतीयं सूक्तं कण्वः प्रगाथः ऋषिः पंचपदा पंक्तिः सप्तम्याद्यास्तिस्रो बृहत्यः इंद्रो देव
ता १ प्रोअस्मा इति अस्मै इंद्राय उपस्तुतिं उपेत्य क्रियमाणां स्तुतिं प्रोभरत प्रकर्षेण संपादयत हे ऋत्विजः यद्यपि अ
यमिंद्रः जुजोषति सेवते तर्हि भरतेति सोमिनः सोमप्रियस्यंद्रस्य स्वभूतं मा हितं महत् वयः अन्नं सोमलक्षणं उक्थैः
शस्त्रैः वर्धंति वर्धयंति भद्राः स्तुत्याः खलु इंद्रस्य रातयः दानानि २ अयुज इति अयुजः असहायः असमः असदृशः
नृभिर्देवैः एकः मुख्यः अपास्यः उपक्षयितुं मरात्र्यः पूर्वीः कृष्टीः प्रजाः अतिप्रवावृधे अतिप्रवर्धते किंच विश्वा सर्वाणि
जातानि इदानीमुत्पन्नानि ओजसा बलेन अतिप्रवृधे भद्राहि इंद्रस्य रातयः ३ अहितेनेति अयंजीरदानुः क्षिप्रप्र
दानः इंद्रः अहितेन चित् अयोजितेन अपि रितेन च अर्वता अश्वेन सिषासति संभक्तुमिच्छति तत् तस्मात् हे इंद्र वीर्या
णि सामर्थ्यानि कारिष्यतः तव महत्त्वं प्रवाच्यं स्तुत्यमित्यर्थः ४ आयाहीति हे इंद्र आयाहि आगच्छ इंद्र अस्मिन् यज्ञे ते
तव कृणवाम किं ब्रह्माणि परिवृढानि स्तुतिलक्षणानि कर्माणि कीदृशानि वर्धनाउत्साहवर्धकानि येभिः येः कर्मभिः हे दा ५२

विष्व अतिशयेन बलवन् इंद्र त्वां चाकनः कमयसे किं भद्रं कर्तुं कं श्रवस्यते अन्नमिच्छते स्तोत्रे ५ धृषतश्चिदिति हे
इंद्र धृषत चित् धृष्टादपि धृषत धृष्टं मनः कृणोषि अस्य तं दृष्टं करोषि यस्मात् त्वं ताभिः मदजनकैः सोमैः सपर्यत
पूजयतः नमोभिः नमस्कारैश्च प्रतिभूषतः अलंकुर्वतः यजमानस्य अभिमतं दिशसि इति शेषः ६ अवचष्ट इति अ
यमिंद्रः ऋचीषमः ऋचा स्तुत्यः समः तथा परिच्छिन्नः सन् अव चष्ट पश्यति अनुग्रहेणास्मान् दृष्टांतः मानुषः मनुष्यः
अवतान् अवटान् कूपादिप्रदेशान् इव गत्वा च तु दशी तथ तथा तद्वत् दक्षस्य प्रवृद्धस्य सोमिनः यजमानस्य युजं यु
ज्यं आत्मनं सखायं कृणुते करोति तस्याभिमतं साधयतीत्यर्थः॥ ॥इति षष्ठस्य चतुर्थे द्वाविंशो वर्गः॥ ७॥ विश्वं त इ
ति हे इंद्र तत तव वीर्यं सामर्थ्यं क्रतुं प्रज्ञां च अनु अनुसृत्य विश्वे सर्वे देवाः ददुः दधुः धारयंति तादृशः त्वं गोपतिः अ
पतिः भुवः भवसि हे पुरुष्टुत इंद्र त्वं विश्वस्य पतिः भवसीति समन्वयः ८ गृणेतदिति हे इंद्र तत्तव तत् श्रावः बलं उपमं
अंतिकं देवतातये यज्ञार्थं गृणे स्तवयत् यस्मात् दृशा वीपतं वृत्रं ओजसा बलेन हंसि तस्मात् तत् श्रावः गृणे ९ समनेव
ति समनेव समानमनस्का योषिदिव साय था वपुष्यतः वपुरिच्छतः पुरुषान् कृणवत् करोति स्वंशान् एवमायमिंद्रः व
मानुषा मनुष्यान् युगा युगानि कालान् संवत्सरायनर्तुमादीन् विदत् लभयति तत् युगनिर्माणात्मकं कर्म इंद्रः चेतनं स
र्वस्य ज्ञापकं कृतवानिति शेषः अथ अपएवं कृत्वा श्रुतः सर्वत्र ख्यातो भवत् १० उज्ज्ञातमिति हे इंद्र त्वा उत वावृधु
उर्ध्वं हुंति सोमं नतं तव शावः बलं त्वां उद्धर्षयति स्तुत्यादिनाप अश्वात् तत्तव क्रतुं प्रज्ञां स्वनु कर्त्तां उद्धर्षयंति भूरि आत अ
ति० ११ अहं चत्वमिति हे वृत्रहन् इंद्र त्वं च अहं च संयुज्याव संगतो भवावकि यदवधिः स निश्यः अवित यावता कालेन
धनानि लभ्यंते तावत्कालं नो संगतयो श्वाव योः हे अद्रिवः वज्रवन् शूर इंद्र अरातीवा अदानो पि जनः वदत्तधन

स्य अनुमंसते अनुमंतिं करोति १२ सत्यमित्थेति चपंप्रगाथाः तमिंद्र सत्यमित् सत्यमेव स्तवाम नानृतं असत्यं न स्तवा
मम सुत्यस्य इंद्रस्य संबंधी असुन्वतः अयष्टुर्वधो महान् भवति भूरि ज्योती पिब हून् सोमान् स्कन्वतः अभिषवं कु
र्वतः यजमानस्य इंद्र कृतः अनुग्रहः महान् भवतीत्यर्थः व पूरणः ०॥ ॥इति षष्ठस्य चतुर्थे त्रयो विंशो वर्गः॥ ॥सपूर्व्य इ
ति द्वादशर्चं चतुर्थं सूक्तं प्रथमा चतुर्थी पंचमी सप्तम्यष्टम्यौ अनुष्टुभः अन्या त्रिष्टुप् शिष्टाः यज्ञ्यः अंत्यायाः देवाः देवता
शिष्टाः एषाः १ सपूर्व्य इति सपूर्व्यः मुख्यः इंद्रः महानां पृथ्वानां यज्ञमामानां क्रतुभिः कर्मभिः निमित्तभूतैः वेनः कां
तः तेषां हविः कामयमानः आन जे आगच्छति पस्त्यं इंद्रस्य द्वारा द्वाराणि भागुया निश्चियः कर्माणि देवेषु मध्ये पिता सर्वेषां
पालको मनुरानजे भाय २ दिवो मानमिति दिवः द्युलोकस्य मानं निर्मातारं इंद्रं नो त्सरन् नोत्सन्जंतुके सोमपृष्ठा
सः सोमस्य धारः सोमाभिषवकर्तारः अद्रयः ग्रावाणः किंच उक्थाउक्थशस्त्राणि ब्रह्म च ब्रह्माणि स्तोत्राणि शंस्या शंस
नीयानि भवंतीति शेषः ३ स विद्वानिति स विद्वान् इंद्रः अंगिरोभ्यः तेषामर्थाय गाः पणिभिरपहृताः पिहिताः अपाव
र्णात् उत्सारितवान् तत्तु तादृशं अस्य पौंस्यं पुरुत्वं सामर्थ्यं स्तुषे स्तौमि ४ स प्रत्नथेति सः इंद्रः प्रत्नथा प्रत्नवत् पूर्वस्मि
न् काले यथा तद्वत् इदानीमपि कविवृधः मेधाविनां स्तोतृणां वर्धयिता वाकस्य स्तोतुः वक्षणिः वोढा शिवः सुखकरः अ
र्कस्य अन्नस्य स्तोमस्य होमनिर्होमेसः अस्माभिः निमित्तभूतेषु अवसे रक्षणाय गंतु गच्छतु ५ आहू नुतेति आत् उ अन
तरमेव नु अद्य हे इंद्र ते तव क्रतुं कर्म अनुक्रमेण अनुषंतीति संबंधः अनुक्रमेण अनुष्टुवंति के स्वाहा वरस्य स्वाहा
न आः पते रग्नेर्यत्र्यवः यष्टारः सदंपे अग्ने यागं कुर्वत इत्यर्थः तादृशाः अर्काः अर्चयितारः स्तोतारः श्वात्रं क्षिप्रं अनुपतस्त
वंतीति अभिप्रायः किमर्थं गोत्रस्य दावने धनस्य दानाय ६ इंद्रे विश्वानीति अस्मिन् इंद्रे विश्वानि सर्वाणि वीर्या वीर्याणि
सामर्थ्यानि कृतानि कर्त्वानि कर्तव्यानि च वर्षंत इति शेषः यमिदं अर्काः स्तोतारः अध्वरं अहिं स किं विदुः जानंति तस्मिन्

इंद्र इति॥ ॥इति षष्ठस्य चतुर्थे चतुर्विंशो वर्गः॥ ॥७ यत्पांचजन्यपेति यत् यदा पांचजन्यया निषादपंचमाश्चत्वारो
वर्णाः पंचजनाः तत्र भवया विशा प्रजया इंद्रे घोषाः स्तुतयः असृक्षत असृज्यंत तदानीं अयमिंद्रः अस्तृणात् हिनस्ति
शत्रून् बर्हणा स्वमहत्त्वेन तादृशः सः इंद्रः अर्यः स्वामी विपः मेधाविनः स्तोतुर्मम नस्य पूजायाः सत्कारस्य क्षयो निवा
सो भवति ८ इयमु त इतीइयं इदानीं क्रियमाणा अनुष्टुतिः अनुकूला स्तुतिः तेतव स्वभूता कुतः तानि प्रसिद्धानि चत्वा
धारीनि पांस्यापुत्स्तानि च रूप अतः तेइत्यर्थः हे इंद्र चक्रस्य रथाधारस्य वर्तनि मार्ग भावः पारक्षः अथास्मद्यज्ञगमना
यरक्षकाचक्रमार्गबाधा यथा न भवति तथा रक्षसीत्यर्थः उपूरणः ९ अस्य वृष्ण इति अस्य वृष्णः वर्षितुः इंद्रस्य
दानविधिप अन्ने लब्धे सति जीवसे जीवनाय उरु विस्तीर्णं क्रमिष्टं पदनिधानं करोति स वेलोकः तथा कृत्वा यवं न पश्वः
कामावयं दक्षत्विजः युष्माभिः सहिताः दक्षपितरः दक्षः अन्नं तस्य पितरः पालकाः स्वामिनः स्याम किमर्थं मरुत्वतः भ
जसे तु ष्टं स्वरं इंद्र क्रत्विभिः मंत्रैः नोनुम अतिशयेन स्तुमः हे इंद्र स्तते न त्वया युना सहाय भूते जनेषामजये मशात्रून्
हृतो संग्रामाहूने सजोषाः अस्मत्समान प्रीतिश्वयः इंद्रः शंसंति शंसपवते स्तवते स्तोत्रं कुर्वते च यजमानाय पन्नाः ब
लवान् धायि गच्छति स इंद्रः श्च इमे इंद्र ज्येष्ठा देवाः अस्मान् अवंतु रक्षंतु॥ ॥इति षष्ठस्य चतुर्थे पंचविंशो वर्गः॥ ॥
उत्वा मंदंत्विति द्वादशर्चं पंचमं सूक्तं प्रगाथः ऋषिः गायत्री छंदः इंद्रो देवता १ उत्वा मंदंत्विति हे इंद्र त्वा तां स्तोमाः स्तुतयः
उत् उत्कृष्टं मंदंतु मादयंतु कृणुष्व कुरु राधः अन्नं हे अद्रिवः वज्रवन् इंद्र अस्मभ्यं किंच ब्रह्म द्विषः ब्राह्मणद्वेष्टॄन् च अ

मा·प
५५

वजहि २ य इंद्र पणीनिति पणीन् लुब्धान् अराधसः अधनान् हि तान् केवलधनान् प्रदायादेन अतिक्रम्य निनित
रां वाध स्ववात्वांक श्चिन्क श्चिद पि देवो अरो मनुष्यो वा प्रतिप्रतिनिधिः सदृशः नत्वस्ति खलु अतस्त्वं महानसि ३ त्व
मीशिष इति हे इंद्र त्वं सुतानां अभिषुतानां सोमानां इत् ईशिषे ईश्वरो भवसि तथा त्वं असुतानां वल्याकारेवर्तमानानां च
ईशिषे त्वं जनानां सर्वेषां राजा भवसि ४ एहि प्रेहीति हे इंद्र एहि आगच्छ तथा प्रेहि प्रागच्छ दिव द्युलोकात् किं क्षयः नि
वासं किं कुर्वन् आघोषयन् कुर्वन् किमर्थं चर्षणीनां मनुष्याणां अर्थाय उभे रोदसी द्यावापृथिव्यौ आपृणासि आपूर
यसि तेजसा ५ त्यं चिदिति हे इंद्र त्वं त्यं चित् तं पर्वतं गिरिं मेघं शतवंतं शतोदकवंतं सहस्त्रिणं अपरिमितं वृष्टिं स्तोतृ
भ्यः अर्थाय विरुरोजिथ वज्रेण विरुज ६ वयमुत्वेति हे इंद्र वयं त्वां दिवा अहनि सुते सोमे अभिषुते हवामहे आह्व
यामः तथा वपन्नकह वामहे आहूतः आगत्य अस्माकं कामं आपृण आपूरय उ पूरणः॥ ॥इति षष्ठस्य चतुर्थे षड्विंशो
वर्गः॥७॥ कस्य वृषभ इति स्यः सः वृषभः वर्षिता युवा नित्यतरुणः तुविग्रीवः अनानतः कदाचिदपि अनवनतः इंद्रः
क्व कुत्र वर्तत इति को जानाती त्यर्थः कः ब्रह्मा स्तोता तं त्वां सपर्यति पूजयति ८ कस्य स्विदिति कस्य स्वित् स्वित विचिकित्सा
यां कस्य सवनं वृषा वर्षिता इंद्रः जुजुष्वान् प्रीयमाणो वगच्छति कः को वा यजमानः इंद्रं आचके आ जानाति स्तोतुं स्वित्तु उपूर
णः ९ कं ते दाना इति ते तव दानाः यजमानैः दत्ताः असक्षत सेवंते हे वृत्रहन् इंद्र कं कीदृशं त्वां उक्थ्ये द्युम्ने सुवीर्या शो
भनवीर्याणि स्तोत्राणि असक्षत क उ स्वित् अंतमः अंतिकतमो भवति यूहं कं पूरणः १० अयं त इति अयं सोमः ते त्वद ५५
र्थं पूरुषमनुष्येषु मध्ये मानुषे जने मधि स्यते तेन सुतं सद्यि आगच्छ आगत्य च प्रद्रव प्रद्रवसमीपं तथा स्तुत्वा पिब तं सो
मं ११ अयं त इति अयं अस्माभिः अभिषुतः सोमः ते त्वां मदितमः मादयितृतमः अयं अधि आश्रितः कुत्र शर्मणावति
कुरुक्षेत्रस्य जघनार्धं मवि चारं तपोपि तेसर सित त्सरः कुत्र वर्तत इति उच्यते — षोमायां एतन्नामिकायां तथा सा

कुत्र वर्तत इत्युच्यते आर्जीकीये एतन्नामके देशे एवं उक्तप्रकारेण अत्यंत दूरदेशे वर्तते यः सोमः प्रियः स एवायं
अभिषुतं पिबेति उत्तरत्रान्वयः १२ तमद्येति तं पूर्वमंत्रे उपवर्णितं चारुं चारणशालि सोमं महे महते राधसे अस्माकं ध
नाय तव धनंदये शत्रूणां धर्षणशीलाय मादाय पिबेहि इंद्र तदर्थं द्रवगच्छ शीघ्रं सोमपात्रं प्रति तदर्थं इदानीं एहि आगच्छ
॥ ॥इति षष्ठस्य चतुर्थे सप्तविंशो वर्गः॥ ॥यदिंद्र प्रागिति द्वादशर्चं षष्ठं सूक्तं प्रगाथः ऋषिः गायत्री छंदः इंद्रो देवता
१ यदिंद्र प्रागिति हे इंद्र त्वं नृभिः अस्मदीयैः अध्वर्यादिभिः प्राग्वा अपाग्वा उदग्वा न्यग्वा यत् यतः कश्चित् हूयसे अ
तः तूयं तूर्णं आशुभिः शीघ्रगामिभिः अश्वैः आयाहि आगच्छ २ यद्वा प्रस्रवणा दिति यद्वा अथवा दिवः द्युलोकस्य प्र
स्रवणे अमृत निष्यंदनस्थाने मादायसे माद्यसि यद्वा स्वर्णरे स्वर्गनयने वा स्व लोके आ न्यस्य यागदेशे माद्यसि यद्वा अं
धसः अंधः अन्नं तेन तत्कारणमुदकं लक्ष्य स तस्य समुद्रे समुंदनाया दानस्य ते अंतरिक्षे माद्यसि तत्र तत्र वर्तमान
मपि हुवे इत्युत्तर संबंधः ३ आ त्वा गीर्भिरिति हे इंद्र त्वा त्वां गीर्भिः स्तुतिभिः हुवे आह्वयामि कीदृशं त्वां महां महांतं उ
रुं प्रभूतं किमर्थं सोमस्य पीतये पानाय आह्वाने दृष्टांतः भोज सेभोगाय गामिव ४ आ ते इंद्रेति हे इंद्र ते तव महिमानं
महात्म्यं रथं बिभ्रतः धारयंतः हरयः अश्वाः आवहंतु तथा हि देव ते महः तेजः रथे बिभ्रतः आवहंतु ५ इंद्र गृणीष इ
ति हे इंद्र त्वं गृणीषे उ स्तूयसे इदं देहि इदं कुर्विति तथा स्तुपेउ स्तूयसे च कीदृशस्त्वं महान् गुणैः प्रवृद्धः उग्रः उद्गूर्णबलः
ईशान कृत् ऐश्वर्य कर्ता तादृशस्त्वं एहि आगच्छ आगत्य च नः सुतं सोमं पिब ६ सुतावंत इति सुतावंतः अभिषुतसो
मवंतः प्रयस्वंतः चरुपुरोडाशादि अन्नवंतः च वयं त्वा त्वां हवामहे आह्वयामः किमर्थं इदं नः अस्मदीयं बर्हिः बर्हिषि
यज्ञे आसदे आसादनाय॥ ॥इति षष्ठस्य चतुर्थे अष्टाविंशो वर्गः॥ ॥७ यच्चिद्धि इति हे इंद्र त्वं यच्चिद्धि यस्मात् खलु
शश्वतां बहूनां यजमानानां साधारणोसि भवसि तत्पूरणः हि प्रसिद्धौ तं तादृशं साधारणं त्वां वयं हवामहे आह्वयामः

इतरेभ्यः पूर्वमिति भावः ८ इदं ते सोम्यमिति हे इंद्र ते तव दर्थं इदं सोम्यं सोमसंबंधि मधु अधुक्षत अद्रिभिः ग्रावभिः
अभिषव साधनेन अभिषुतवंतः के नरः अस्मदीया अध्वर्य्वादयः हे इंद्र तन्मधु जुषाणः प्रीयमाणः सन् पिब ९ विश्वाः
अर्य इति हे इंद्र अर्यः स्वामी त्वं विपश्चितः सर्वान् स्तोतॄन् अतिख्यः अतिक्रम्य पश्यतदर्थं तूयं क्षिप्रं आगहि आगत्य
च अर्यः स्वामी त्वं विश्वान् विपश्चितः सर्वान् स्मिन् अस्मासु बृहत् श्रवः अन्नं धेहि १० दातामइति हिरण्यवीनां हिरण्य
वीतानां पृषतीनां अश्वानां राजा इंद्रः मे दाता भवतु हे देवाः मघवा इंद्रः मा रिषत् रिष्टो मा भवतु ११ सहस्रे पृषतीना
मिति अहं पृषतीनां गवां सहस्रे अधिः उपरिस्थापितं बृहत् पृथु विस्तृतं चंद्रं आह्लादकं शुक्रं निर्मलं हिरण्यं आददे
स्वीकरोमि इंद्रेणानीतं १२ नपात इति नपातः अरक्षितस्य दुर्गहस्य दुःखं गाहमानस्य मे मम संबंधिनः जनाः सह
स्रेण अपरिमितेन इंद्रदत्तेन गवादि धनेन नक्षराधसः क्षधनाः संतः देवेषु प्रीतेषु इंद्रः प्रीतः इत्यर्थः अवः अन्नं अक्र
त अलभंतेत्यर्थः॥ ॥इति षष्ठस्य चतुर्थे एकोनत्रिंशो वर्गः॥ ॥तरोभिर्व इति पंचदशर्चं सप्तमं सूक्तं प्रगाथपुत्रः क
लिः ऋषिः प्रथमा तृतीयाद्ययुजो बृहत्यः द्वितीयाचतुर्थ्यादियुजः सतो बृहत्यः पंचदशी तु अनुष्टुप् इंद्रो देवता १
तरोभिर्व इति हे ऋत्विजः वः यूयं तरोभिः वेगैः अश्वैः उपेतं विदद्वसुं इंद्रं सबाधः बाधासहिताः ऊतिये रक्षणाय बृहत्
साम एतत्संज्ञं गायंतः संतः परिचरतेति शेषः कुत्रस्थः सोमे अभिषुत सोमके अध्वरे यज्ञे सोमयागे अहं च तमिंद्रं
हुवे आह्वयामि किमिव भरं न भरं भर्तारं कुटुंबपोषकं कारिणं हितकरणशीलं हूयंति पुत्रादयः तद्वत् २ नयं दुध्रा इ
ति यं सुशिप्रं इंद्रं दुध्राः दुर्धराः असुरादयः न वरंते न वारयंति संग्रामे तथा स्थिराः देवाः न वरंते किंच मुरः मरणस्व
भावा मनुष्याः न वरंते अंधसः अन्नस्य सोमस्य मदे मदाय सोमपानजनिताय आदृत्य शशमानाय शंसमानाय स्तु
वते अभिषवं कुर्वते जरित्रे स्तोत्रे वयः दाता भवति किंउ कथ्यं स्तुत्यं धनं सः इंद्रः जयतीति उत्तरत्र संबंधः ३ यः शाक इ
ति यः शाकः इंद्रः स्तोतॄणां मृक्षः शोधकः यश्च अश्व्यः अश्वकुशलः यः वाजी अः अद्भुत अश्वः हिरण्ययः हिरण्मयशरी
रः स एवं अश्वार्यभूतः इंद्रः वृत्रहा गव्यस्य गोसमूहस्य कीदृशस्य उर्विस्य बहुलस्य अपावृतिं अपवरणं परं जयतीति कंपय
तीत्यर्थः ४ निखातं चिदिति निखातं चित् भूमौ खातं खास्यापितं सपि संभृतं संगृहीतं यागदानादिकं कृत्वा इंद्र शं पुरु
बहु वसु धनं उद्दिदयति उपसच दाशुषे हविर्दात्रे यजमानाय एवं यः देवः करत् करोति स वज्री सुशिप्रः सुहनुः हर्यश्व
इति हरितवर्णाश्वयुक्त इंद्र एव करोति केनोपाधिना क्रत्वा कर्मणा यागेनोपाधिना यथा वशात् येन प्रकारेण प्रकामयंते तथा
स एव करोति ५ यद्वावंथेति हे पुरुष्टुत बहुभिः स्तुत इंद्र शूर विक्रांत नृणां स्तोतॄणां सकाशात् पुरा पूर्वं चित् इदानीमपि य
द्वा वंथ अचीकमथ नंदं वचवयं तुरं तत्पूर्णां तेनु भ्यं हे इंद्र संभरामसि संभरामः किंच तत् यज्ञं यागयोग्यं हविः उक्थं शस्त्र
वचः वाक्यं तव प्रियतमं हविः स्तोत्रं संभरामइत्यर्थः॥ ॥इति षष्ठस्य चतुर्थे त्रिंशो वर्गः॥ ॥६ सचा सोमे ष्विति हे पुरुहू
त बहुभिराहूत वज्रिवः वज्रवन् धृक्षद्धृमन् सोमपाः सोमस्य पातः त्वं सोमेषु अभिषुतेषु मदाय सचा सह भवेति शेषः
त्वमित् त्वमेव ब्रह्मकृते स्तोत्रकर्त्रे स्तुवते च काम्यं कमनीयं वसु धनं देष्टः दाता मोक्षु वः भव सि हि पूरणः ७ वयमे
नमिति वयं यजमानाः एनं वंद्रं वज्रिणं इदा इदानीं ह्यः श्व इह अत्र अपीपेम अप्यायपाम सोमेन तस्मै उत तस्मै एव अ
द्य अत्र समना संग्रामार्थं सुतं अभिषुतं सोमं भर हरहे अध्वर्य्वादयः नूनं इदानीं श्रुते स्तोत्रे श्रुते सति आभूषत आ
गच्छतु ८ वृकश्चिदिति वृकश्चित् स्तेनोपि वारयिता सर्वस्य सन् अपि उरामाथिः शत्रूणां मार्गे गच्छतां मथिता सन् अ
पि अस्येंद्रस्य वयुनेषु मार्गेषु आभपति आनुकूल्यमेव भजते अतो वहिः स्तोपि इंद्रस्यानुकूलो भवतीत्यर्थः सत्वं इमं स्तो
मं जुजुषाणः घोषमाणः आगहि आगच्छ हे इंद्र चित्रया धिया कर्मणा स्तुतिलक्षणेन निमित्तेन प्रप्रकर्षेणागहि ९
कदून्वस्येति अस्येंद्रस्य कदू नु किं नु खलु पौंस्यं पौरुषं अकृतं अनावारितमस्ति केनोनुकं केन खलु श्रोमतेन श्रपणा ५६

येनपुंस्त्वेन श्रयंते अयं त्वष्टा मनुषः परि जन्म प्रभृति क्रियमाणैः सामर्थ्यैः श्रुश्रुवे श्रूयते १० कदू महीरितिकदु उकदा
खलु अस्येंद्रस्य तविषीः बला निमहीः महांति अधृष्टाः अधृष्टा नि आसन् कदू कदा नु खलु वृत्रघ्नः वृत्रहंतुः इंद्रस्य न ग्यं
अस्तृतं अहिंसितं आभरत इदिह शेन हि विधेन लन इंद्रः विश्वान् सवनिविक ताठान् एककार्षापणं कणिकाय प्रयच्छन् द्वा
विति शब्देन च नाटयंती तिविक नाठाः तान् अहदृशः अहः शब्देन तदु सादकः आदित्यो भिधियो भवति तं पश्यंती ति अहः
दृशः ननु सर्वे सूर्यं पश्यंति को वातिशय इति उच्यते इंद्रे घनन्म निसूर्यं पश्यति जन्मांतर लुब्धकाः अंधेतमसि मग्ना तिइंद्र न
शानपणीन पणि सदृशान स्पृद्रकत्यान कर्तोत्मचा पारणे व अभिभवतीति शेषः॥ ॥इति षष्ठस्य चतुर्थे एकत्रिंशो वर्गः॥
॥३१॥ वयंघेतिहि इंद्र वयं घ खलु ते तव अपूर्व्यन्निहितनानि भ्रह्माणि स्तोत्राणि प्रभरामसि संभरामपुरूतमासः बहुत
माः वयं कृत्विग्य जमानाः हे वज्रहन्त वृत्रस्य हंतः पुरुहूत बहुभिराहूत वज्रिवः वज्रव न्निंद्र किमिव भृतिं न भृतिमिवतां
यथा नियमेन प्रयच्छंति तद्वत नियमेन प्रदान तात्पर्यति द्वष्टान्त लमविरुद्धं ३२ पूर्वीश्चिदितिहितु विकूर्मिन् बहुकर्म
न् इंद्र त्वत्पिपूर्वीः बहूनि आशासः आशंसनानि स्थितानि चिद्धित या उतयः रक्षाश्च त्वपि अवस्थितानि लब्धुं ह्वयंते आ
ह्वयंति स्तोतारो ऽन्ये अत्तः अर्थः अरेः सवना सवनानि तिरश्चित तिरस्कृत्य अस्मत्सवनानि अभिलक्ष्य हि वसो वासकेंद्र आ
गहि आगच्छ अतो हे शविष्ठ अतिशयेन बलवन्न मे हवं स्फधि स्फणु ३३ वयं घेति हे इंद्र वयं घ वयं खलु ते तव स्वभूताः अ
तः त्वे इत्त त्वय्येव विप्राः मेधाविनः स्तोतारः अपि स्मसि अपि संभावनायां त्वद्धीनाः स्म इत्यर्थः हे पुरुहूत इंद्र त्वदन्यः कश्च
न हे मघवन्न मर्डिता सुखयिता नास्ति उद्धिपूरणो ३४ त्वं नो अस्मा इति हे इंद्र त्वं नः अस्मान् अस्याः अमतेः दारिद्र्यात्मि
कायाः उतापि च क्षुधः अभिशस्तेः निंदायाश्च सकाशात् अवस्पृधि अवमोचय किंचत्वं नः अस्मभ्यं तव उतीउत्या चित्र
याधिया विचित्रेण कर्मणा शिक्षदेहि अभिमतं हे शविष्ठ बलवन्न गातुवित मार्गज्ञ उपायज्ञस्त्वं ३५ सोमस्य हुइति सो

मः सुतः अभिषुतः वः युष्माकं संबंधि अस्तिन भवतु एवं द्वायदिकलयः कलिनरुषीः ज्ञाततयः पुत्राश्वात्र संबोध्यंते यू
यं मा बिभीतन भीताः मा भवत एष ध्वस्मा ध्वंसकाः राक्षसादिः अपदयुग च्छति अपगच्छति एवइंद्र सामर्थ्यात्स्वयं घ स्व
यमेव एषः अपायाति पुनरुक्तिर्दार्ढ्याया॥ ॥इति षष्ठस्य चतुर्थे द्वात्रिंशो वर्गः॥ ॥त्यान्नुक्षत्रियानिति एकत्रिंशर्चं अष्टमं सूक्तं
सम दास्यस्य समहरतो मीनस्य पुत्रः मत्स्यः ऋषिः यद्वा मित्रावरुणयोः पुत्रः मन्यः अथवा बहवो मत्स्याः जालनद्धाः संतः बं
धनमोक्षाय आदित्यमस्तुवन्त त एव ऋषयः गायत्री छंदः आदित्यो देवता १ त्यान्नु क्षत्रियानिति त्यान्तान क्षत्रियान्
आ क्षत्रिया त्यान् आदित्यान् अदित्यं देवताकान् अवः रक्षणं याचिषामहे कीदृशान् सुमृळीकान् सुष्टु सुखयितृन् अभि
मर्द्य अभिष्टये अभिगमनाय मत्स्यपक्षे जालनिर्गमनं इतरपक्षे अभिमतमितिविवेकः २ मित्रोन इतिमित्रः वरुणः अर्य
मा आदित्यासः आदित्याः नः अस्मान् अतिपर्षत अतिनयंतु तमथा विदुः येन प्रकारेण दुःसहं जानंति तथा ऽतिपर्षन्निइ
तरपक्षे अंहतिपापं अतिपर्षदिति ३ तेषहीति तेषां आदित्यानां हि खलु चित्रं चायनीयं उक्थ्यं स्तुत्यं वरूथ्यं धनं अस्ति दा
शुषे हविर्दीत्रे अरं कृते अलंकर्त्रे पायाप्तिकारिणे यजमानाय दातव्यं धनमस्तीति ४ महीव इतिहे वरुणहे मित्र हे अ
र्यमन्न वः युष्माकं महतां यः अवः रक्षणं महि महत् दाश्वुषे हविर्दात्रे करणीयमस्ति अतः अवांसि रक्षणानि आवृणी
महे ५ जीवान्न इति हे आदित्यासः आदित्यानः अस्मान् जीवान्न इदानीं जीवतः सतः अभिधेतन अभिधावत अभि
धावनं कुरुत पुरा हन्मान हननात् पुरा मृतेः पूर्वं कत्कर्कस्य हिरु वनश्रुतः आह्वानश्रोतारः आह्वानं श्रुत्वा हर्षीघ्रमागच्छ
तेति॥ ॥इति षष्ठस्य चतुर्थे त्रयस्त्रिंशो वर्गः॥ ॥यद्वः श्रांतायेति श्रांताय कर्मणः स्कन्ना अभिपुण्वते यजमानाय दा
तव्यं यद्वरूथं वरणीयं धनं वः युष्माकं अस्ति पर्छर्दिः गृहं अस्ति तेन हूपेन अस्मान् प्राणपिताः नः अस्मान् अधिवाचत अ
धिवचनं कुरुत ७ अस्ति देवा इति हे देवाः अंहोः हनुः पापशीलस्य उरु अस्ति महत्या पमस्ति अनागसः अयाप स्यरत्नं

रमणीयं सुकृते श्रेयः आदित्याः अद्रुं तेन सः अभ्रतपापाः अतो अस्मद् भिमतं कुरुतेतिभावः ८ मा नः सेतुरितिनः
अस्मान् सेतुः बंधको जालः मासिषत् मा बध्नातु नः अस्मान् महे मरुते कर्मणपरिवृणक्तु परिवर्जयतु जालात् कः इंद्रः
तद्दंद्र एक्कृतःवशी सर्वस्य वशीकर्तासि परिवृधाक्तु हिपूरणः ९ मा नो मृच्चेति हे अविष्यवः रक्षितुमिच्छंतः देवाः नः अस्मा
न् वृजिनानां हिंसकानां रिपूणां मृचाम् चिः हिंसाकर्मा हिंसकेन जालेन मा भिप्रमृक्षत अभिमर्शनं उपरि जालस्य प्र
रणं मा कुरुत १० उत त्वामिति उत अपि च हे महि महे अदिते देवमानः देवि त्वां अहिमत्स्य पक्षमत्स्य प्रमुखः अरुं उपब्रु
वे उपसंस्तोमि कीदृशां सुमृळीकं सुष्ठु सुखयित्रीं किमर्थं अभीष्टये अभिमताप्तौ ॥ इति पष्ठस्य चतुर्थे चतुस्त्रिंशो वर्गः ॥ ॥
॥३४॥ पर्षि दीनेति हे अदिते आ पर्षि सर्वतः पालयसि दीने क्षीणे गभीरे उदके उग्रपुत्रे उग्रपुत्राः यस्मिन् तस्मिन् उदके
जिघांसतः हिंसतः जालं नः तोकस्य अस्माकं तनयस्य तनयमा कीः स्वितृ मेव हिंसाकरोतु १२ अनेहान इति अनेहः अ
पापान् नः अस्मान् हे उरुव्रजे विस्तीर्णगमने हे उरु विउरु त्वं विप्रसर्तवे अभिसरणाय रुधि कुरु कस्मै तोकाय पुत्राय म
त्स्याय जीवसे तस्य जीवनाय १३ ये मूर्धान इति ये मूर्धानः सर्वेषां मूर्धस्थानीयाः क्षितीनां मनुष्याणां अदब्धासः अहिं
सकाः स्वयशसः स्वायत्तकीर्तयः व्रता व्रतानि अस्मदीयानि कर्माणि रक्षंते पालयंते अद्रुहः अद्रोग्धारः संतः १४ ते न आ
स्न इति हे आदित्यासः ते यूयं नः अस्मान् वृकाणां वृकाणां हिंसकानां आस्नः आस्यात् सकाशात् मुमोचत विमोचनं कुरु
त स्तेनं बद्धमिव हे आदिते त्वं च मोचय अस्मानिति १५ अपो षु ण इति हे आदित्याः इयं शरुः हिंसिका असितिः जालिकेरि
ता अजघ्नुषी अहंसंती सती अस्मान् अस्मत्तः सुसुष्ठु अपेतु अपगच्छेत्व तथा नः दुर्मतिः अजघ्नुषी अस्मत्तः अपग
च्छतु ॥ ॥ इति षष्ठस्य चतुर्थे पंचत्रिंशो वर्गः ॥ ॥ शश्वद्धि व इति हे सुदानवः सुदानाः आदित्याः वः युष्माकं ऊतिभिः रक्षा
भिः वयं पुरा नूनं हि इदानीमपि शश्वत् सर्वदा बुभुज्महि १७ शश्वंतं हीति हे प्रचेतसः प्रकृष्टमायाः देवाः शश्वंतं बहु

मपि प्रतियंतं चित् प्रतिगच्छंतमपि शत्रुं एनसः पापस्य कर्तारं जीवसे जीवनाय अस्माकं कृणुथ कुरुत अस्मत्तो वियुक्तमिति
शेषः १८ तत्सु न इति तत् बंधनं नः अस्माकं सुसुष्ठु नव्यं स्तुत्यं समसेसं भजनाय भवतु अस्माकं मोचनेन स्तुत्यं भवतु इ
त्यर्थः हे आदित्याः अदितेः पुत्राः हे अदिते तत् दनुग्रहात् यत् मुमोचति मुंचति अस्मान् बंधकसाधनं पूर्वं यद्भवति बंधक
त्वात् आसात् तद् देवयुष्मदनुग्रहात् मुंचतु दृष्टांतः बंधत् बद्धमिव बद्धं पुरुषं बंधात् यथा विमुंचति तद्वत् १९ नास्मा
कमिति हे आदित्यासः युष्मत्कर्तृकः ततरः वेगः अस्माकं नास्ति यः वेगः बंधकात् जालात् अतिष्कदे अस्माकं अतिष्क
नाय प्रभवति अतो यूयं अस्माकं मृळत सुखयत तत्तत् तादृशं तरः कुरुत इत्यर्थः २० मा नो हेतिरिति हे आदित्याः नः अस्मा
न् विवस्वतः विवस्वत्पुत्रस्य यमस्य हेतिः आयुधम् तादृक् कृत्रिमा क्रियया निष्पन्ना शरुः हिंसका असितिः पुरा पूर्वं नु इदानीं
मर्वधात् इत्यर्थः नरसः इदानीं जीर्णान् मा वधीत् मा हिंस्यात् २१ वि षु द्वेष इति हे आदित्यासः द्वेषः द्वेष्टृन् सुसुष्ठु विवृहत
उन्मूलयत नाशयतेत्यर्थः तथा अहतिं पापां विवृहत तया संहितं जालं चिवृहत तथा रपः पापं सर्वं विषक् विषूचीनं वि
वृहत ॥ ॥ इति षष्ठस्य चतुर्थे षट्त्रिंशो वर्गः ॥ ॥ इति ऋग्भाष्ये षष्ठाष्टके चतुर्थोध्यायः ॥ ॥ ७॥५९ ॥ आ त्वेत्येनविं का
शार्चं नवमं सूक्तं प्रियमेधः ऋषिः आद्या चतुर्थ्य सप्तमी दशम्यः अनुष्टुभः शिष्टा गायत्र्यः इंद्रो देवता अंत्या पल्कवः ऋ
क्षाश्वमेध पादानं देवताकाः १ आ त्वा रम्भमिति हे इंद्र त्वां त्वां आवर्तयामसि आवर्तयामः किमर्थं ऊतये अस्माकं रक्षणा
य सुम्नाय सुखाय च किमिव रथं यथा सुखाय चावर्तयंति तद्वत् कीदृशं त्वां तुविकूर्मिं बहुकर्माणं ऋतीषहं हिंसकाना
मभिभवितारं हे शविष्ठ अतिशयेन बलवन् सत्पते सतां पालक इंद्र त्वां इति अन्वयः २ तुविशुष्मेति हे तुविशुष्म प्रभूत
बल तुविक्रतो बहुकर्मन् शचीवः बहुकर्मपित सते पूजनीयेंद्र विश्वया विश्वव्याप्तेन महित्वना महित्वेन आपप्राथ
आपूरितवान् असि विश्वानित्यर्थः ३ यस्य त इति महः महतः यस्य ते तव हस्ता हस्तौ महिना महीनौ क्षमायं नं पृथिव्यां

सर्वतो व्याप्तवंतं हिरण्ययं हिरण्मयं वज्रं ईयतुः परिगच्छतः सर्वदास्मकं भयनिवारणायेति भावः ४ विश्वानरस्येति
विश्वानरस्य विश्वान् शत्रून् प्रत्यृतस्य अनानतस्य शत्रूणां अप्रह्वस्यैव सः बलस्य पतिं स्वामिनं इंद्रं हे मरुतः वः युष्मा
कं चर्षणीनां सेनिकानां एवैः गमनैः तथा रथानां ऊतीः ऊतिभिः गमनैश्च सह हवे आह्वयामि ५ आभिष्टय इति हियजमानाः
युष्माकं अभीष्टये साह्ययार्थं सदा वृधं सर्वदा वर्द्धयंतं स्ववकान् इति शेषः यं स्वमीळ्हेषु संग्रामेषु नरः नेतारः मनुष्याः ना
ना बहुप्रकारं हवंते आह्वयंति ऊतये रक्षार्थं तं हुवे इति शेषः॥ ॥इति षष्ठस्य पंचमे प्रथमो वर्गः॥ ६॥ परोमात्रमिति प
रोमात्रं मात्रं दूरदेशः ततः परस्तात् वर्तमानं अपरिमितस्वरूपं तथापि ऋचीषमं स्तुत्या समं विषयीकरणं इंद्रं परं मंध्य
यं उग्रं उद्गूर्णबलं सूराधसं शोभनधनं ईशानं चित् ईश्वरं वंकेषां वसूनां अस्मभ्यं प्रदेयानां गवादि धनानां एवं महत्वानु
भावमिंद्रं हुवे इति शेषः ७ तंतमिदिति तंतमित् तमेवेंद्रं तं प्रतिचोदाभिः प्रेरयामिः स्तुतिभिः तयै सोमपानाय ततः लो
कोभः महेमहते राधसे धनाय प्रभूतधनलाभार्थं यः नृतुः पालस्य नेतादिवः पूर्व्यः पूर्वे भवायज्ञमुखस्थाः अनुष्टुति अ
नुक्रमेण क्रियमाणां स्तुतिं कृष्टीनां मनुष्याणां ऋत्विजां संबंधिनीं शेष इष्टश्वा तं तुनं चोदामिति संबंधः ८ नयस्यत इति हे श
वसावलवन् इंद्र यस्य ते तव सख्यं मर्त्यः मरणधर्मा मनुष्यः नाशः नव्या प्नोति तेशवांसि बलान्यपि न किः नैव नशत्
व्याप्नोति ९ त्वोतास इति हे इंद्र त्वोतासः त्वया रक्षिताः त्वायुजा त्वया सहायेन अप्स्व स्नातुं स्नानादि व्यवहारं कुर्वन् सूर्ये
उदिते एतस्य संग्रामेषु हे वज्रिवः वज्रवन् इंद्र महद्धनं जयेम शत्रून् संग्रामे जित्वा तेषां धनं लभेमेत्यर्थः॥ १०॥ तंत्वाय
ज्ञेभिरिति तं स्तुत्यत्वेन प्रसिद्धं त्वां यज्ञेभिः यागसाधनैः सोमादिभिः ईमहे याचामहे तमेवेंद्रं गीर्भिः स्तुतिभिः ईमहे
याचामहे गिर्वणस्तम स्तुतिभिः वननीयतमेंद्र तं त्वामिति समन्वयः हे इंद्र त्वं यथा चित् आविथ येन प्रकारेण रक्षयमां
चित् पुरुणः कुत्सं वाजेषु संग्रामेषु कीदृशं मां पुरुनाय्यं बहुप्रज्ञं बहुस्तुतिमित्यर्थः॥ ॥इति षष्ठस्य पंचमे द्वितीयो वर्गः॥

यस्यते स्वादिति हे अद्रिवः वज्रवन् इंद्र यस्य स्तुत्यत्वेन प्रसिद्धस्य ते तव सख्यं स्वादु अतीवानुभवार्हं किं च ते प्रणीतिः
प्रणयनं धनादीनां स्वाद्वी स्वादु स्फूर्जकं तथा त्वद्विषयः यज्ञश्च वितंतसाप्यः विशेषेण तंतनीयः १२ उरुण इति हे इंद्र
त्वं नः अस्माकं तन्वे आत्मनाय उरु प्रभूतं धनं कृधि कुरु तः तनेयोशाय उरु कृधि तथा क्षपाय निवासाय उरु कृधि नः
अस्माकं जीवसे जीवनाय यंधि प्रयच्छाभिमतं १३ उरुं नृभ्य इति हे इंद्र नृभ्यः अस्मदीयेभ्यः मर्त्येभ्यः उरु हितं मनाम
हे याचामहे तथा गवे एतदुपलक्षणं अश्वादिकाय उरुं तथा रथाय उरुं पंथानं मार्गं मनामहे तथा देववीतिं यज्ञं मनामहे
१४ उपमेति मामा प्रियमधुं यज्ञं प्रसर्पतः पद् एतत्संख्याकाः नरः नेतारः राजानः सोमस्य पीतस्य हृष्या रूपेण स्वा
दुरातयः स्फूयमीगाः हे दानाः सतः द्वा द्वा द्वौ द्वौ पितृ पितृ रूपेण युग्मो भूत्वा मामुपतिष्ठंति तेषां युग्मानां नामतत्तरत्रा
स्पष्टीक्रियंते १५ ऋज्राविंद्रोत इति इंद्रोते एतन्नामके अतिथिग्व नाम्नः राज्ञः पुत्रे अतिथिग्वाय ऋज्रौ ऋजुगामिनौ अ
श्वौ आददे स्वीकृतवान् अभीततया ऋक्षस्य स्तनविऋक्षनाम्नः पुत्रे अन्यस्मिन् राजनि रोहिरिवर्णौ अश्वौ आददे तथा
आश्वमेधस्य अश्वमेधस्य राज्ञः पुत्रे राजनि रोहितारोहितवर्णौ अश्वौ अददं ननु अनुक्रमण्यां उभयोरेव दानप्रशंसा
रूपत्वमुक्तं त्रयाणां दानं कथं इंद्रोतस्क निरासः तयोर्यज्ञादिक्षयागत्य तयोर्दानं हि स्वास्वामिनां प्रेरितः दत्तवान्
अश्वौ अतस्तद्दानं प्रासंगिकमिति॥ ॥इति षष्ठस्य पंचमे तृतीयो वर्गः॥ ॥१६॥ सुरथानिति अतिथिग्वे इंद्रोते सुर
थान् शोभनरथोपेतान् अश्वान् आददे आर्क्षे ऋक्षपुत्रे स्वभीश्वन् अश्वान् आददे आश्वमेधे पुत्रे सुपेशसः सुरू
पान् अश्वान् शोभनालंकारान् आददे १७ षळश्वानिति अतिथिग्वे इंद्रोते पूतक्रतौ शुद्धप्रज्ञे तस्मिन् वधूमतः
वधूभिः वरवाभिः तद्धतं षट् अश्वान् सचा ऋक्षाश्वमेधयोः पुत्राभ्यां दत्तेन अश्वादि धनेन सह आसनं लब्धवान्
स्मि १८ एषु चेतदिति एषु ऋज्रेषु ऋजुगामिषु अश्वेषु अंतः मध्ये आचेतत् आज्ञायत का कैः रूपण्वती वपर्कीयु

मश्वैः न द्वती अरुषी आरोचमानाः स्वभीषुः शोभनप्रग्रहा शावतीदत्तावउवा शायते १० नयुष्मेति देवाअ बंधवः अन्नाप्रदाः
राजानः युष्मेयुष्मासु मर्त्याः मनुष्यः अवद्यनिमित्तः नेतुमिथुः नाधिदीधरत् चनैवोपपद्यते खलु अतो अनिंद्याः यूयमिति
दातॄणां स्तुतिः॥ ॥इतिषष्ठस्यपंचमचर्पविर्गः॥ ॥प्रप्रवइत्यष्टादशर्चं दशमं सूक्तं प्रियमेध ऋषिः द्वितीयाचतुःसप्तकौष्णि
क्चतुर्थ्यष्ट्याः त्रिस्त्रः गायत्र्यः एकादशीषाउश्यापंक्तिः शिष्टाः अनुष्टुभः अपादिंद्रइत्यर्धर्चः वैश्वदेवः वरुणइहेत्याद्य सुये
अर्धर्चाः वरुणदेवताकाः शिष्टाः ऐंद्राः १ प्रप्रवइति हे अध्वर्य्वादयः वः यूयं त्रिष्टुभं स्तोमत्रयोपेतं इषमन्नं प्रपूरणः
प्रभरतेति शेषः कस्मै मंदवीराय मोदीरान् हर्षयति समद्वीरः तस्मै इंद्रव इंद्रयसचेंद्रो वः युष्मान् मेधसातये यज्ञसंभ
जनाय पुरंध्या बहुप्रज्ञया कर्मणा आ विवासति अभिमतफलयोजनेन सत्करोतीत्यर्थः २ नदंवइति ॐदतीनां उषसां न
दं उत्सादकं योषु वतीनां मिश्रयंतीनां नदीनां नदं शब्दयितारं वा युष्मदर्थं आह्वयामि अध्न्यानां वः पतिं आह्वये प्रत्यहे क्षेय
जमानत्वं धेनूनां गवां इषुध्यसि अन्नमिच्छसि ३ ता अस्येति ताः प्रसिद्धाः सूददोहसः सूदइति कूपनाम तत्सदृशदोहनाः प्र
श्नयः पृश्निवर्णाः गावः अस्येंद्रस्य सोमं श्रीणंति मिश्रयंति आशिरेण कदा त्रिषु त्रिषु सवनेषु गावो विशेष्यंते देवानां जन्मन् ज
न्मस्थानि दिवः आदित्यः आरोचने अनेनद्यौ विशेष्यते तस्मिन् स्थाने विशः निविशंत्यः यज्ञार्थोपयुक्तानां गवां पु प्राप्तिः प्रसिद्धा
४ अभिप्रेति गोपतिं गवां स्वामिनं इंद्रं अभिप्रार्च प्रकर्षेण पूजय गिरा स्तुत्या यथा विदे सत्यपा स्वात्मनं स्तुतप्रकारं जानाति तथा
कीदृशमिंद्रं सत्यस्य यज्ञस्य सत्सु पुत्रं सत्पतिं सतो यजमानानां पालकं ५ आहरय इति हरयः हरितवर्णाः अश्वाः अरुषीः आ
रोचमानाः अधिबर्हिषि बर्हिष्यास्तृते आसस्त्रिरे आसृजंतु यत्र यस्मिन् बर्हिषि स्थितमिंद्रं अभिसन्नवामहे अभिसंस्तु
मः॥ ॥इतिषष्ठस्यपंचमेपंचमोवर्गः॥ ॥इंद्राय गाव इति इंद्राय गावः आशिरं अश्रयण साधनं पयः आदिकं मधु मधुरं दु
दुहे दुहते कीदृशाय वज्रिणे वज्रयुक्ताय इंद्राय तत् यदा उपह्वरे समीपे वर्तमानं मधु सोमरसं सीं सर्वतः विदत् लभते तदा ७

उद्यदिति यत् यदा ब्रध्नस्य विष्टपं सूर्यस्य स्थानं गृहं इंद्रश्चाहं च उभौ उद्गच्छाव उद्गच्छावः तदानीं मध्वः मधुरं सोमरसं पी
त्वा सचेवहि संसृष्टौ भवेव कुत्र सख्युः पदे सर्वेषां सखिभूतस्य आदित्यस्य त्रिसप्ते द्वादशमासाः पंचर्तवस्त्रय इमे लोका
आसावादित्य एकविंशः तादृशे एकविंशे स्थाने सचेवहीति ८ अर्चतप्रेति हे अध्वर्य्वादयः यूयं इंद्रं अर्चत पूजयत स्तुत्या
प्रार्चत प्रकर्षेणार्चत इंद्रमेव हे प्रियमेधासः प्रियमेधसंबंधिनः तत् अन्वाः यूयं अर्चतेंद्रं पुत्रकाः पुत्राः अपि अर्चंतु इंद्रं उ ता
पि च पुरं न धृष्णु यथा पुरं धर्षणशीलं अर्चंति तादृशं इंद्रं अर्चमयंत ९ अवस्वरातीति गर्गरः वाद्यविशेषः युद्धे अवस्वरा
ति अभयं शब्दयति गोधा हस्तघ्नः परिपद्यते सति स्वगतं सन निम्नशं पिंगा पिंगवर्णा ज्या परिचिनिष्क्रदत् परिस्कंदते यस्मा
देवं युद्धसंनद्धः अतः इंद्राय ब्रह्म कर्म स्तुति लक्षणं उद्यतं भवत्विति शेषः १० आयत्पतंतीति यत् यदा एन्यः शुभ्रवर्णाः न
द्यः आयतंति आगच्छंति सर्वतः प्रवहंति कीदृश्यः सुदुघाः सुदोहाः अनपस्फुरः अप्रतिरुद्धाः अतादृश्यः तदा अपस्फुरं अत्यं
तं प्रवृद्धं सोमं इंद्राय पातवे पातुं गृभायत ग्रहणं कुरुत॥ ॥इतिषष्ठपंचमेषष्ठोवर्गः॥३४॥ अपादिंद्र इति इंद्रः अपात् अ
पिबत् सोमं अग्निरप्यपिबत् विश्वेदेवाः अपि अमत्सत तृप्ताः अभवन् सोमपानेन वरुण इत् वरुणोपि इह अस्मिन् याग
गृहे क्षयत् निवसतु सोमपानार्थं निवसंतं वरुणं आपः अभ्यनूषत अभितिष्टुतु किमिव वत्सं स्वीयं संशिश्वरीः संशिश्वर्यः
संगच्छमानाः गावः इव तायथा धावंत्यः हंभारवं कुर्वंति तद्वत् १२ सुदेवो असीति हे वरुण देवत्वं सुदेवः असि यस्य सुदेव
स्य ते तव काकुदं समुद्रारव्यं सप्त सिंधवः गंगाद्याः सप्तनद्यः अनुक्षरंति जिह्वायां सर्वदा स्रवंतीत्यर्थः तत्र दृष्टांतः सूर्म्यं सुषिरामिव
यथा सूर्यं प्रतिरश्मि जालं तद्वत् १३ योव्यतीनिति यः इंद्रः व्यतीन् विविधगमनान् सुयुक्तान् सुधुरश्चेसं बध्यान् अश्वा
न् दाश्रुषे हविर्दात्रे यजमानाय गंतुं प्राप्तुं उप अफाणयत् उपगमयति यदा एवं करोति तदिदानीमेव तक्वः यज्ञगमनशी
लः नेता फलस्य नायकः इंद्रः वस्कः उदकं उत्सादयतीति शेषः यः इंद्रः उपमा उपमानभूतः अमुच्यत अस्तु रादिभिः मुक्ता

भवति १४ अतीदु शक्र इति अयमिंद्रः शक्रः शक्तः सन् अतिइत् ओहते अतिक्रम्य गच्छत्येव संग्रामे निरोधकान् शत्रू
न् अयमिंद्रः किंच विश्वाः द्विषः सर्वान् शत्रून् अतिउ अतिक्रम्य गच्छति कनीनः कमनीयः परः मेधानां परस्तात् वर्तमानः इंद्रः
ओदनं मेघं भिनत् भिनत्ति वृक्णुर्यं कीदृशा गिरा माध्यमिकया वाचा वास्तनित लक्षणया पच्यमानं वज्रं निघोषिण ताउ प्रमा
नमित्यर्थः १५ अर्भको न इति अयमिंद्रः पित्रे मात्रे सयथा धितिष्ठति तद्दूत अर्भकोन अल्पशरीरः कुमारकः कुमारकइ
व नवं स्कत्यं रथं अधितिष्ठत् अधितिष्ठति स इंद्रः महिषं महांतं मृगं मृगवत् इतस्ततो धावंतं विमुक्तं बहुकर्मणिं मे
घं पक्तारं पचति वृक्ष्यभिमुखं करोतीत्यर्थः १६ आतू सुशिप्रेति हे सुशिप्र सुहनो हे दंपते गृहस्वामिन् त्वं रथमातिष्ठ की
दृशं हिरण्ययं अथ तवारोहणानंतरं अहं अथारुह्य उभौ संगच्छेवहि पुनः कीदृशं रथं पक्षं दीप्तं सहस्रपादं
बहुपादं अरुषं आरोचमानं स्वस्तिगां कुशलगमनं अनेहसं अपापं १७ तं घेमित्थानमिति तं घ इत्थं खस्वीमिन मिंद्रं इत्था
अनेन प्रकारेण नमस्विनः स्तुतिवंतः अध्वर्य्यादयः स्वराजं स्वयं राजमानं उपासंते तथा कृत्वा अर्थं चित्त अरणीयं धनं स
धितं स्थाम्यापि तं अस्येंद्रस्य संबंधिनं प्राप्नुवंतीति शेषः कदा यत् यदा एतवे अस्येंद्रस्य गमनाय दावने हविर्दानाय आ
वर्तयंति स्तुतयः तदेत्यर्थः १८ अनु प्रत्नस्येति एषां देवानां इंद्रादीनां प्रत्नस्य पुराणस्य ओकसः स्थानस्य पुराणस्था
नं प्रियमेधासः प्रियमेधाः अश्वाः शत अनुप्राप्ताः कीदृशाः पूर्व्याभिः पूर्वां प्रयतिं प्रदानं अनुलक्षीकृत्य वृक्तबर्हिषः स्तीर्णदर्भाः
हितप्रयसः आसादितसोमादिहविष्काः॥ ॥इति षष्ठस्य पंचमे सप्तमो वर्गः॥ ॥इति अष्टमे मंडले सप्तमोनुवाकः॥ ७॥
अष्टमेनुवाके एकादश सूक्तानि तत्र यो राजेति पंचदशर्चं प्रथमं सूक्तं पुरुहन्मा ऋषिः आद्यानतीयापंचम्यो बृहत्यः द्विती
या चतुर्थी षष्ठ्यः सतोबृहत्यः सप्तम्याद्याः षट् बृहत्यः त्रयोदशी पुरउष्णिक् आद्य द्वादशकाद्या अष्टका आद्यश्चेत् पुरउष्णि
गिति लक्षण इंद्रो देवता १ यो राजेति यः इंद्रः चर्षणीनां मनुष्याणां राजा स्वामी रथेभिः रथैः याता गंता अध्रिगुः अधृत

गमनः अन्यैः विश्वासां एतनानां सर्वेषां संग्रामाणां तरुता ताकरः यश्च ज्येष्ठः गुणैर्ज्यायान् यश्च वृत्रहा वृत्रं हतवान् तंम
हा भागं इंद्रं गृणे स्तौमि २ इंद्रं तं शुंभेति हे पुरुहन्मन् महर्षे त्वं तमिंद्रं शुंभ हविः प्रदानादिना अलंकुरु किमर्थं अवसे रक्षणा
य एवं आत्मा स्वमात्मानं संबोध्य ब्रवीति यस्य तव विधर्तरि विधारके इंद्रे हिता हितमास्ते ओण्यं अनोण्यं शत्रून् हंतु उग्रं च
अनुग्रहाय अनोण्यं स्वं हस्ताय करायहन्ननाय शत्रूणां दर्शतः दर्शनीयः महः महान् वज्रः प्रतिधायि प्रतिनिहितो भवति
दिवः प्रकाशाय सूर्यनि सूर्यइव ३ नकिष्टमिति तं जनं अन्यः मर्षको जनः कर्मणा हननादिव्यापारेण न किर्नशत् नैव व्या
प्नोति यः इंद्रः चकार इंद्रमेवानुकूलं यज्ञैः साधनैः कीदृशमिंद्रं सदावृधं सर्वदा वर्धकं विश्वगूर्तं सर्वैः स्तुत्यं सर्वैः स्तुत्यं संम
हीतं अधृष्टं अन्यैः धृष्णुमोजसं धृषबलं ४ आषाल्हं युधमिति आषाल्हं असोढं उग्रं उद्गूर्णबलं एतनासु शत्रुसेनासु सा
सहिं अभिभवितारं स्तोमि यस्मिन् इंद्रे जायमाने महीः महसः उरुज्रयः बहुवेगाः धेनवः गावः समनोनवुः समस्ता
वन् अपि द्यावः द्युलोकाः क्षामः पृथिव्यश्च समनोनवुः तत्रत्याः सर्वप्राणिनः नमंत इत्यर्थः ५ यद्याव इंद्र ते इति हे इंद्र ते
तव प्रतिमानार्थं यत् यदि द्यावः द्युलोकाः स्युः न थापिनाश्नुवंति उतापि च भूमीः भूम्यः तव विशायशातं शतं स्युः तथापिना
श्नुवंति हे वज्रिन् त्वां सहस्रं सूर्याः अगणिता अपि सूर्याः अनु न जातं नानुभवंति न प्रकाशयंति द्रस्यर्थः किं बहुना जातं
पूर्वमुत्पन्नं त्वं नाश्नुवंति तथा रोदसी द्यावापृथिव्यौ नाश्नुवाते॥ ॥इति षष्ठस्य पंचमे अष्टमो वर्गः॥ ६॥ अप प्राथेति हे
शविष्ठ बलवन् मघवन् धनवन् वृषन् अभिमतवर्षक इंद्र त्वं आपप्राथ आपूरयसि ज्या प्राप्तिकानि विश्वा सर्वाणि व
स्वावर्षकाणि वलानि शत्रुसंबंधीनि केन साधनेन महिना महता शवसा बलेन अध तथा कृत्वा अस्मान् गोमति व
हुभिर्गोभिः युक्ते वज्रे शास्त्रसंबंधिनि निमित्ते सति अस्मान् अव रक्ष हे वज्रिन् वज्रयुक्ते इंद्रैः साधनैः चित्राभिः नानाविधैः
ऊतिभिः रक्षणैः ७ न सीमदेव इति हे इंद्र यो घोनित्यं इ यः अदेवः इंद्रास्य देवरहितो मर्त्यः मरणधर्मा सीं सर्वं इषं अन्नं

यन्न प्राप्नोति स मर्त्यः अस्येंद्रस्य एतस्यावित्तु एतत्वर्णाविश्वो भवतः अभिमंतदेशगमनाय एतशो अश्वो युसो जंतयो
जयति रथयज्ञं गंतुपश्वइंद्रः हरी अश्वो युसो जंतेतन्नप स्तोति स न प्राप्नोति समन्वयः ८ तं वो मह इति हे ऋत्विजः
महः महांतः वः यूयं तं महाय्यं पूज्यं इंद्रं दानाय सक्षणिं सचमानं परिचरत स्त्रिद्यापः यः इंद्रः गाधेषु उदकेषु हव्यो स्ति आ
ह्वातव्यो भवति यश्च आरेषु गतेषु निम्नेषु उदकेषु हव्यो स्ति तथा वाजेषु संग्रामेषु जयाय हव्यः आह्वातव्यः अस्ति भ
वति ९ उदू षुण इति हे वसो वासयितः शूर इंद्र त्वं नः अस्मान् सु सुष्ठु उत् उ महः शास्व उन्महः शास्व उत्थापयत किमर्थं महे
महते राधसे अन्नाय तथा हे शूर मघवन् इंद्र उत् उ महः शास्व महे महते मघवत्तये धनदायत्त थाउन्महः शास्व हे इंद्र महे
महते श्रवसे कीर्त्यै १० त्वन्न इंद्रेति हे इंद्र ऋतयुः यज्ञकामस्त्वं नः अस्मान् त्वानिद्रः त्वायः निंदति स यज्जनमेव निंदति त
स्मात् अपथुः सकाशात् निनित्तरां तं पसि प्रीणयसि तस्य धनमपहरसीति भावः एवं संतर्प्य हेतु वित्तः प्रभृत धनसं
त्वं तव ऊर्वीः मध्ये अस्मान् वसि ष्व उरुभ्यां आच्छादय रक्षार्थं दासयुप क्षयितारं अस्मद्द्वेषिणं हथैः हननैः नि शिश्नथः
मारयसि॥ ॥इति षष्ठस्य पंचमे नवमो वर्गः॥३३॥ अन्यव्रतमिति हे इंद्र अन्यव्रतं व्यतिरिक्तकर्माणं अत एव अमानुषं
मानुषाणां इंद्रयाजिनां अप्रियं अयज्वानं अयष्टारं अदेवयुं अदेवकर्मिणं स्वः स्वर्गात् अवदुधुवीत अवाक्ष्येदित्य
र्थः कः स स्वापर्वतः तव सखीभूतः पर्वतः ऋषिः यद्यपि अन्यं देवं इष्ट्वा स्वर्गं प्राप्नोति सः तथापि पातयति ऋषिः न केव
न लं भूनेमात्रं अपि सुघ्नाय सुष्ठुहंतुं अम संवदस्युं उक्तलक्षणं पर्वतः प्ररयतीति शेषः अतः इंद्रमेवावश्यं यजध्वमिति शे
षः ११ त्वन्नः इंद्रेति हे शविष्ठ बलवत्तर इंद्र त्वं नः अस्मभ्यं दावने प्रदानाय आ सां गवां एताः गाः हस्ते गृभाय गृहाण गृह
णि हस्तांतः धानानां न धानाः भ्रष्टयवाः यथा संगृह्णाति तद्वत् गृहाण कीदृशः त्वं अस्मयुः अस्मान् कामयमानः गृहीत्वा
च अस्मयुः स न द्विसंगृभाय पुनर्द्विवारं संगृहाण १२ सखाय क्रतुमिति हे सखायः अध्वर्य्यादयः क्रतुं कर्म इंद्र संबंधि

नं इच्छत कर्तुं शारस्य हिंसकस्येंद्रस्य कथा कथं राधाम साधयाम किंउपस्तुतिं स्तोत्रं यः इंद्रः भोजः शत्रूणां भोजयिता सूरिः
प्रेरकः अहृयः अनवनतः शत्रूणामिति॥१४॥ भूरिभिरिति हे इंद्र समह समान पूजस सर्वैः पूजितेत्यर्थः भूरिभिः बहुभिः ऋ
षिभिः अतींद्रियज्ञैः ऋत्विग्भिः वृहिष्मद्भिः यागवद्भिः स्तविष्यसे स्तूयसे यतः यः इंद्रः इत्थं एकं एकमित् एकं एव बहून्त्वत्सा
न्स्तोतृभ्यः परादद प्रायच्छसि हे शार हिंसक॥१५॥ कर्णगृह्येति अयं मघवा इंद्रः त्रिभ्यः हिंसकेभ्यः सकाशात् शौरदेभ्यः
शूराश्वं तं देवाः यो द्वारश्च शूरदेवाः तेषां हिता शौरदेवाः युद्धं तत्संबंधिन्यः गाः शत्रून् जित्वा ताः वत्सं न वत्ससंहिताः
अस्मभ्यं कर्णगृह्य कर्णे गृहीत्वा आनयत् आनयतु सूरिः प्रेरकः स्वामी वृषा तं वृषानाय अजां यथा सआनयति करग्र
हीत्वा तद्वदिति॥ ॥इति षष्ठस्य पंचमे दशमो वर्गः॥ ॥त्वं नो अग्न इति पंचदशर्चं द्वितीयं सूक्तं रुद्री पुरुमीह्ळो ऋषी त
तयोरन्यतरो वा आदितो नव गायत्र्यः दशमी द्वादशी चतुर्दश्यः बृहत्यः एकादशी त्रयोदशी पंचदश्यः सतो बृहत्यः अग्नि
र्देवता १ त्वन्नो अग्न इति हे अग्ने त्वं नः अस्मान् महोभिः पूजाभिः पाहि रक्षकस्य महोभिः विश्वस्याः बहुविधात् आरा
तेः आरातेः सकाशात् पाहि त्वमेव मर्त्यस्य नंदत्वा उतापि च द्विषः त्वेषुः मर्त्यस्य मर्त्यात् सकाशात् पाहि २ नहि मन्युरिति
हे प्रियजात अग्ने वः तव पौरुषेयः पुरुषसंबंधी मन्युः क्रोधः नेशे न ष्टेवा धितुं दिवाचराः खलु पुरुषाः अतो दिवा न वहानिः
नास्तीति भावः अपराक्षिचराः रक्षःप्रभृतयः तेभ्यः पिपीउ नास्ति पुच्छते त्वमित् त्वमेव खलु क्षपावान् असि रात्रौ त्व
ग्निर्विशेषणं तनसी भवति ३ स नो विश्वेभिरिति हे अग्ने सः स्तुत्यः त्वं नः अस्मभ्यं विश्वेभिर्देवेभिः धनं प्रयच्छसि हे ऊ
र्जोनपात् बलस्य नपात् भद्रशोचे स्तुत्यप्रकाश रयिधनं विश्ववारं सर्वैः वरणीयं देहि ४ न तमग्न इति हे अग्ने तं स्तोता
रं अरातयः दूषिणः रायः रयिवंतः न युवंत नपृथक् कुर्वंति यदा यं दाश्वांसं हविर्दातारं मर्त्यं यजमानं त्रायसे पालयसे ५
यंत्वं विप्रेति हे अग्ने विप्र प्राज्ञ त्वं यमर्त्यं मेधसातौ यज्ञस्य संभजने हिनोषि प्रेरयसि धनाय गवादि धनलाभाय

भा.ष.
६२

सम्यजमानः नवो नीउस्यारक्षणेन गोषु गंता भवति गोमान् भवतीत्यर्थः॥ ॥इति षष्ठस्य पंचमे एकादशो वर्गः॥ ॥ ६
त्वं रयिमिति हे अग्ने त्वं दाशुषे हविर्दत्तवते मर्त्याय यजमानाय रयिं धनं पुरुवीरं बहुभिः वीरैः युक्तं प्रयच्छसि अतो नः अ
स्मान् अपि वस्यः वसीयः धनं अच्छ अभिप्राप्तुं प्रणय प्रापय ७ उरुष्याण इति हे जातवेदः जातवेद्य अग्ने नः अस्मा
न् उरुष्य रक्ष माप रादाः मा परादेहि अस्मान् कस्मै अघायते पापमिच्छते दुराध्ये दुर्विचिंतकाय हिंसाबुद्धये मर्त्याय
मनुष्याय ८ अग्ने माकिरिति हे अग्ने देवस्य ते तव रातिं दानं कश्चित् अदेवः मर्त्यादिः माकिर्युयोत् नमे वष्टयकुक रो
तु त्वं वस्त्रां धनानां ईशिषे ईश्वरो भवसि दातुं ९ स नो वस्व इति हे ऊर्जो नपात् बलस्य अन्नस्य पुत्र सखे वसो वासका
ग्ने सः प्रसिद्धस्त्वं जरितृभ्यः स्तोतृभ्यः नः अस्मभ्यं माहिनस्य वस्वः महतो धनं उपसमीपं मासि निर्मासि प्रयच्छसीत्यर्थः
१० अच्छा न इति अच्छ अभिमुखं यंतु गच्छंतु नः अस्माकं गिरः स्तुतयः कं शीरशोचिषं अशनशील ज्वालं दर्शनीयं अ
ग्निं तथा यज्ञासो यज्ञाश्च अस्मदीयाः नमसा हविषा आज्यादिलक्षणेन अच्छ अभिमुखं गच्छंतु कीदृशं पुरुवसुं प्रभूत
धनं पुरुप्रशस्तं बहुस्तुतं किमर्थं ऊतये अस्माकं रक्षणाय॥ ॥इति षष्ठस्य पंचमे द्वादशो वर्गः॥ ॥११॥ अग्निं सूनुमिति
हे अग्ने सहसः सूनुं बलस्य पुत्रं जातवेदसं जातधनं वार्याणां वरणीयानां गवादिधनानां दानाय गिरा शंयं त्विलस्नुवर्त
तियः अग्निः अमृतः अमरणधर्मा देवेषु भवति समर्त्येषु आ मनुष्येषु चा भूत् अभवदिति एवं द्वितां द्विधं भवति देवेषु अम
तत्वं अस्य प्रसिद्धं मनुष्येषु कीदृशः विशि विक्षु यजमानरूपासु प्रजासु होता होमनिष्पादकः मंद्रतमः मादयितृतम
श्च भवति अत्यर्थं स्तुतिसमन्वयः १२ अग्निं व इति हे यजमानाः युष्माकं देवयज्यया देवयागेन निर्देवयागार्थं अग्निं स्तो
मीति शेषः तथाग्निं अध्वरे यागे प्रयति प्रकर्षेण गच्छति प्रवृत्ते सति स्तोमि तथाग्निं धीषु स्तुतिषु प्रथमं इतरदेवेभ्यः
मुख्यं स्तोमि तथाग्निं अर्वति आगतेभ्यः स्तोमि यद्वा विघ्नपरिहारार्थं तथाग्निं क्षेत्राय क्षेत्रसंबंधिने साधसे साध ६२

433
110

त्र नाय क्षेत्रलाभाय स्तोमि यज्ञांते क्षेत्रलाभरूपाय फलाय च स्तोमि १३ अग्निरिषामिति अग्निः देवः सख्ये समानख्या
नायनः मह्यं इषां अन्नानि ददातु यः अग्निः वार्याणां धनानि ईशे ईष्टे स ददातु तितिनं बवाग्निं तोके पुत्रार्थं तनये नप्त्र्यार्थं
च शश्वत बकुधनं ईमहे याचामहे कीदृशमग्निं वस्कं वासकं संतं सर्वदा वर्तमानं तनूपां अंगानां पालयितारं १४ अग्नि
मीळिष्वेति हे पुरुमीळ्ह बहुसेक त्वं अग्निं अवसे रक्षणाय ईळिष्व स्तुहि गाथाभिः मंत्ररूपाभिः वाग्भिः कीदृशं शीरशो
चिषं शयनस्वभावरोचिषं तथा अग्निं रायेधनाय ईळिष्व श्रुतं एनं नरः अन्येपि यजमाना स्तुवंति तस्मात् स्तुहीत्यर्थः
अग्निः छर्दिः गृहं याच स्वतिएवं स्तुदीतिः पुरुमीळ्ह श्रुत १५ अग्निं द्वेष इति द्वेषः द्वेष्टून् योतवे पृथक् कर्तुं अग्निं गृणी
मसि गृणीमः स्तुमः तथा अग्निं शं सुखं स्वस्य योः मिश्रयणाय च दातवे धनं दातुं गृणीमसि सः अग्निः विश्वासु सर्वासु विक्षु
प्रजासु अवितेव रक्षितेव राजेव ऋधूणां ऋषीणां नः अस्माकं वस्तु वासको देवः हव्यः आह्वातव्यः भुवत् भवतु॥ ॥इति
षष्ठस्य पंचमे त्रयोदशो वर्गः॥ ॥हविष्कृणुध्वमिति अष्टादशर्चं तृतीयं सूक्तं प्रगाथपुत्रः हर्यतः ऋषिः गायत्री छंदः
अग्निर्देवता हविषो वा देवताः १ हविष्कृणुध्वमिति हे हविष्कर्तारः यूयं हविः कृणुध्वं शीघ्रं यजः आगमत् आजगाम य
मग्निः अध्वर्युः पुनर्वननेसंभजते कीदृशो अस्य हविषः प्रशासनं प्रदानं विद्वान् २ नितिग्ममिति हे ताकृ चिकृ अभि
सर्वतः तिग्मं ती ष्णं अंस्तुं तमग्निं निषादत निषीदत कीदृशो होता अस्याग्नेः सख्यं मनो अधियजमानेजुषाणः ३ अंत
रिछंतीति तं रुद्रं दुःखस्य द्रावयितारं अग्निं जनेय जमानार्थं मनीषया स्वप्रज्ञानेन परः परस्तात् पुरोदेशे अंतः आयत
नमध्ये इच्छंति स्थापयितुं तेएव पश्चात् स संस्थयन मग्निं जिह्वया स्तुस्यागृभ्णंति गृह्णंति अंगुलिभिः ४ जाम्यतीतप
इति वयोधाः अन्नस्य दाताग्निः मध्यमस्थानः आभि भ्रुशं सर्वं अतिरि च्यवर्तमानं धनुः अंतरिक्षं अतितपे अतितपति
सच वयोधाः अन्नस्य दाता अग्निः वनं उदकं अरुहत् आरोहति विमोकाय तदर्थं जिह्वया ज्वालया शपदं मेघं अवधात् तं

ति चा ५॥ चरवत्सइ तिवत्सः वत्सवत् चरन् धावमानः रुशन् श्वेतो भवन् इह अस्मिन् लोके निदातारं निरोधकं न विं
दत्तेन लभते किंतु स्तोतवे स्तोतुं अंन्यं अन्यं स्तोतारं स्वयंवेति कामयते॥ ॥इतिषष्ठस्यपंचमेचतुर्दशोवर्गः॥६॥उ
तो न्विति उ तो पिच नु क्षिप्रं अस्यादित्यस्य यत् महान् महस्यमुक्तं अश्वावत् संवद्अश्ववत् बृहत् महत् स्थलं योजनं
दृश्यते तदेवाहरय स्पदामा द्दशेदृश्यते तदादुहंतीति उत्तरत्र संबंधः ७ दुहंतीति सप्त ऋत्विजः एकां धर्मं दुहंति
तेषां मध्ये द्वौ द्वौ अध्वर्युप्रयाचान्यान् उपसृजतः प्रयोजयतः के ते पंच यजमानं ब्रह्माणं होतारं आग्नीध्रं प्रस्तोतारमिति
कुत्र सिंधोः कस्याश्चित् नद्याः तथैव चापं ऋषिर्यजनित्र आधिस्वरे स्वरोपेते ओश्रावयेत्यादिशब्दवति तस्मिन्नित्य
र्थः ८ आदशभिरिति विवस्वतः परिचरतः यजमानस्य आदशभिः अंगुलीभिः याचितः सन् इंद्रः कोशं मेघं दिवः अं
तरिक्षसंबंधिनं अचुच्यवीत् व्यदारयत् इत्यर्थः केन त्रितात्रिप्रकारवर्तवितास्वेदयारश्मिना ९ परि त्रिधातुरिति
अयमग्निः त्रिधातुः लोहितशुक्लकृष्णभेदेन त्रिवर्णः जूर्णिः वेगवान् नवीयसी नवीयस्या ज्वालया अध्वरं प्रकर्षेण एति
गच्छति होतारः होमनिष्पादकाः अध्वर्य्वादयः मध्वा आज्यादिना परिअंजते १० सिंचंतीति नमसा नमनेन अवतंम
हावीरं उच्चाचक्रं उपरिस्थितचक्रं परिज्मानं परिणत्याभंनी चीनवारं भूतद्वारं अक्षितं अक्षीणं ईदृशं क्षीराघर्मशेषयु
क्तं आहवनीयस्योपरि नमनेन सिंचति॥ ॥इतिषष्ठस्यपंचमे पंचदशो वर्गः॥ ॥११॥अभ्यारमिति अद्रयः आद्रीय
माणाः अध्वर्य्वादयः अभ्यारभित अभिगम्यैव निषिक्तं अतिरिक्तं मधुपुष्करे प्रवृद्धे उपयमनीपात्रे सिंचंति अग्निहोत्रा
र्थं भवतस्य महावीरस्य विसर्जने विसर्जनसमये होमानंतरं खलु महावीरं आसद्यां आसादयंति १२ गाव उपेति हेगा
वः घर्मदुघाः यूयं अवतं महावीरं प्रति उपावत उपागच्छत यज्ञस्य घर्मयागस्य साधनभूतेरक्षद्वार ध्रुदेमही महतीप
यसा उपावतं उपगच्छतं अपिबास्य उभा उभौ कर्णा कर्णस्थानीयौ हिरण्ययाहिरण्मयौ हि स्वर्णरजतमयौ इत्यर्थः १३ ६४

आसक्त इति सक्तं दुग्धं गोपयसि श्रियं श्रयणं आजं पयः आसिंचतहे अध्वर्यवः कीदृशमा अंशोरस्याः द्यावापृथिव्याव
भिश्रियं अभिश्रयंतं अग्निसंयोगात् तावत्सर्यंतं भवद्वमित्यर्थः स्वेच वा नान्तरं रसा रसे आजेयप सिद्धपभंवर्षकमग्नि
दर्धीतस्यापयत १४ ते जानतेति ते ताः गावः जानत ज्ञातवत्यः किं स्व स्वकीयं ओकं निवासं महावीरं तत्र दोग्धुं आ
गमन् इत्यर्थः तदेवाह वत्सासः वत्साः मातृभिः जननीभिः सह यथा संगच्छंति तद्वत् जामिभिः बंधुभिः सहिताः
गावः मिथः प्रत्येकं न संतं संगच्छंते महावीरं १५ उप स्रक्केष्विति महावीरस्य स्रक्केषु बप्सतः ज्वालया भक्षयतः अग्नेः
धरुणं इंद्राग्न्याः धारकं दिवि अंतरिक्षे उपकृण्वते उपकुर्वंते यदाग्नि महावीरं दहति तदा तस्योपरि उभयविधं क्षीरं
असृाचयंतीत्यर्थः एवं महावीरं आसिच्य इंद्रं अग्न्या अग्नेव स्वः स्वर्गं गच्छं आज्यं अन्नं नमः अन्नं योजयंतीति शेषः॥ ॥
॥इतिषष्ठस्यपंचमे षोडशो वर्गः॥१६॥अधुक्षदिति अरिः अरणशीलः वायुः सूर्यस्य सप्तरश्मिभिः साधनैः पीयुषीं
अप्याययतां इषं अन्नं ऊर्जं रसं च सप्तपदी सर्पणस्वभाव पादा माध्यमिका वाचं घर्मधुग्रूपेणावस्थितां अक्षे धुक्तदुग्ध
वान् १७ सोमस्येति हे मित्रावरुणा॰णौ सूरे सूर्ये उदिता उदिते सोमस्य सोमं आददे स्वीकरोति तत्तत्र हेतुं तत्स्वीकारे रू
पं कं आतुरस्य अस्मदादेः भेषजं औषधं हितकरमित्यर्थः १८ उतो न्वस्येति एवं मानेसोभिउ तोपिच अस्य सोमधातुः
दुर्वत स्य प्रदानं कामयमानस्य ममय सदं निधान्यं हविषां निधानां ईं उत्तरवेदिलक्षणं तत्रास्थिता अग्निः द्यांपरिपरि
तः जिह्वया ज्वालया अतनत आमीनातु शीघ्रं॥ ॥इतिषष्ठस्यपंचमे सप्तदशोवर्गः॥ ॥उदीराथामित्यष्टादशर्चं चतु
र्थसूक्तं आत्रेयः गोपवनः ऋषिः सप्तवध्रीवर्गायत्रीछंदः अश्विनौ देवते १ उदीराथामिति हे अश्विना अश्विनौ ऋता
यते यज्ञमिच्छते मर्त्याय मदर्थं उदीराथां उद्गच्छतं तदर्थं हे वं आह्वानं प्राप्तुं युंजाथां योजयतं रथं अश्वैः वायुवयोः अवः
अवः रक्षणं अंति अंतिके सतत्वर्तमानं भूतु भवतु २ निमिषश्चिदिति निमिषश्चित् निमेषादपि जवीयसा अतिशय

वेगेनरथेनआयातंआगच्छतंअस्मद्यज्ञंहे अश्विना॰ नौ अंति: ३ उपस्तृणीतमिति अत्रये महर्षये असुरैः अग्नौ
प्रक्षिप्तायतस्यहितार्थंघर्मंअग्निदाहकं हिमेनोदकेनउपस्तृणीतउपस्तीर्णवंतौयुवांहेअश्विना॰ नौ अंति॰ ४ कुहस्थ
इतिहेअश्विनौयुवांकुहक्वस्थःभवथः इदानींकुहकुत्रजग्मथुः गच्छथः श्येन्याकुहक्वाश्येनेवश्येनौइवशीघ्रपतनौ
संतौपेतथुःपतथः एवंअर्चिनस्यस्वभावोरूपयासंनिहितौभवतमितिशेषः अंति॰ ५ यदद्येतियत् यस्मात् तनिर्धा
र्यतेअतोअद्यास्मिन् कालेकर्हिचित् कस्मिन् अपिदेशेकर्हिकस्मिन्नपिकालेइमंहवंअस्मदीयमाह्वानंशुश्रूया
तंशृणुयातं॰॥ ॥इतिषष्ठस्यपंचमेअष्टादशोवर्गः॥ ॥६॥ अश्विनेतिहेअश्विना॰ नौ यामहूतमायहे सुखतमौ
नेदिष्ठं अंतिकतमं आप्यंप्राप्तव्यं यामि प्राप्नोमि अंति॰ ७ अवंतमितिहेअश्विना॰ नौ युवं युवां अत्रये अभ्यागारेदत्व
मानाय अवंतं रक्षंतं गृहं कृणुतं कृतवंतौ॰ ८ वरेथे इति हे अश्विनौ वल्गुमनोहरं ददतं स्तुवते अत्रये आतपः आतपा
त् ओष्मात् अग्निं वरेथे आवरयंतं अंति॰ ९ प्रसप्तवध्रिरिति सप्तवध्रिः महर्षिः हे अश्विनौ युवयोः आशसा आशंसने
न स्तुत्या मंजुषा न्निर्गत्य अग्नेः धारां तस्यां मंजूषायां प्रआशायत अशायत स निरोधिकां धारां दग्धवान् इत्यर्थः अंति॰
१० इहागतमितिहे वृषण्वसू वर्षणधनौ अश्विनौ इह अस्मिन् यज्ञे यज्ञे आगतं आगच्छतं तदर्थं मे मम इमं हवं शृणुतं अं
ति॰॥ ॥इतिषष्ठस्यपंचमे एकोनविंशोवर्गः॥ ११॥ किमिदितिहे अश्विनौ वां युवयोः रथगमनाय पुराणवत् पुराणयोः
अतिवृद्धयोरिव तद्वाहनरतोः इव शंसंति पुनःपुनरागच्छतमिति शस्यते किमिदं यथा केलेवृद्धः जीर्णः बहुवारमाहू
तो पिनागच्छति तद्वत् युवामपि एवं अनागमात् ब्रवीमि अंति॰ १२ समानंवामितिहेअश्विना॰ नौ वां युवयोः परस्परं स
जात्यं समानजातित्वं समानं एकमेव उभयोरपि अश्वरूपायाः सूर्यपत्न्याः उत्पत्तेः सजात्यं तथा युवयोः बंधुः बंधुकः स
तः समानः एकएव अंति॰ १३ यो वां रजांसीति हे अश्विना॰ नौ वां युवयोः यः रथः अस्ति स रथः रजांसि लोकाः रोदसा द्या

६५

437/1915

वापृथिव्योः च वियातिविशेषेणगच्छति अस्तस्तेनरथेन शीघ्रमागच्छतमितिशेषः अंति॰॥ १४॥ आगोगव्येभिरितिहेअश्वि
नौ नः अस्मान् गव्येभिः सहस्रैः गोसमूहैः अश्व्यैः अश्वसमूहैश्च उपगच्छतं॰ १५ मानोगव्येभिरितिहे अश्विनौ नः गव्ये
भिः आ अश्व्यैश्च सहस्रसंख्याकैः मा अस्मान् अतिस्यतं मानिवारयतं अंति॰ १६ अरुणप्सुरितिहे अश्विनौ उषाः अ
रुणप्सुः शुभ्रवर्णा अभूत् भवति न केवलं स्वयं ज्योतिः तेजः अकः करोति सर्वतः ऋतावरी सत्यवती उषाः अंति॰ १७ अश्विना
स्विति स्वविचाकशत् अत्यंतं दीप्यमानः सूर्यः वृक्षं परशुमान् इव स यथा शाकलयति तद्वत् तमो निवारयतीतिशेषः यस्मादे
वं तस्मात् अश्विना॰ नौ आइईपदि इति शेषः अंति॰ १८ पुरंनेतिहे धृष्णो धर्षक सप्तवध्रेत्वं कृष्णया कर्षयाविशाप्रवेशयंत्या
पेटिकया बाधितः त्वं नतो निर्गत्य तामेव आरुजपीडय दृष्टांतः पुरं न यथा पुरं शत्रुः पीडयति तद्वत् अश्विनोः स्तुतिहात् एवं
स्वयं स्वात्मानं प्रेष्यति॥ ॥इतिषष्ठस्यपंचमे विंशो वर्गः॥ ॥विशो विशोव इति पंचदशर्चं चतुर्थं सूक्तं गोभवनः ऋषिः प्रथ
मा चतुर्थी सप्तमी दशम्यः आनुष्टुभः त्रयोदश्याद्यास्तिस्रः आनुष्टुभः शिष्टा गायत्र्यः अग्निर्देवता अंत्यास्तिस्रः श्रुतर्वनाम्नः
राज्ञः दानस्तुतित्वाद्दानदेवताकाः विशोविशोव इति हे अन्ये ऋत्विजः यजमानश्च वः यूयं वाजयंतः अन्नमिच्छंतः विशोवि
शः सर्वस्याः प्रजायाः अतिथिं पूज्यं पुरुप्रियं अग्निं स्तुत्या परिचरतेति शेषः अहं च वः युष्मदर्थं दुर्ययु हा हितं वचः स्तोत्रं ऋषस्य
मुखस्य लाभाय के साधनैः मन्मभिः मननीयैः स्तोत्रैः २ यं जनास इति यमग्निं जनासः जनाः यजमानाः हविष्मंतः संतः मित्रं
न मित्रमिव आदित्यमिव सर्पिरासुतिं सर्पिरासूयते हूयते यस्मिन् तादृशं प्रशंसंति स्तुवंति प्रशस्तिभिः स्तुतिभिः स्तुवइति
शेषः ३ पन्यांसमिति पन्यांसं अतिशयेन स्तोतारं साधु कृतमिति यजमानं स्तुवंतं जातवेदसं जातधनं स्तुव इति शेषः यः
अग्निः देवतातिदेवतानौ यज्ञेउ घ्यानिहव्यानि हवींषि दिवि ऐरयत प्रेरयति दिवि देवेभ्यः ४ आगन्मेति वृत्रहंतमं पापानां
अतिशयेन हंतारं ज्येष्ठं प्रशस्यं आनवं मनुष्यसंबंधिनं तेषां हितकारिणं अग्निं आ अगन्म आगतवयं यस्याग्नेः अनीके ज्वा

भा॰ष॰
६६

ला संघर्षहत महान् आर्क्ष ऋक्षापुत्रः श्रुतर्वानाम राजा एधते वर्धते कर्मकरी। नी स्यर्थः। तमग्निमागन्मेति समन्वयः पंच
मी अमृतमिति अमृतं अमरणं जातवेधसं जातधनं तमा स्थितिरो दश्वतिं नाशयंतमित्यर्थः घृताहवनं घृतमाहूयते यत्र तं
ईड्यस्तुत्यं ईदृशं आगन्मेति संबंधः॥ ॥इति षष्ठस्य पंचमे एकविंशो वर्गः॥ ६॥ सबाधइति हे मे सबाधः बाधसहिताः अ
ध्वर्य्वादयः यं अग्निं हव्येभिः हविर्भिः ईळते स्तुवंति कीदृशाः जनाः जुह्वानासः यागं कुर्वाणाः यतस्रुचः धृतस्रुग्दंडाः तमा
गन्मेति समन्वयः ७ इयंत इति हे अग्ने इयं दानीं क्रियमाणा नव्यसी नवतरा मतिः स्तुतिः ते तव स्वमृता अस्मत् अस्मासु
आ अधापि धृता ऽमृत्वयं तव स्तुतिं कुर्म इत्यर्थः हे मंद्र मोदमान सुजात शोभन जानन सुक्रतो शोभन कर्मन् अमूर अ
मूढ दस्म दर्शनीय अतिथे अतिथिवत् पूज्य इत्यग्नेर्विशेषणानि ८ सा त इति हे अग्ने सा अस्माभिः क्रियमाणा स्तुतिः
शं तमा अत्यंतं सुखकरा च निष्ठा अतिशयेनान्नवती ते तव प्रिया भवतु तया स्तुत्या सुष्टुतः सुष्टु स्तुतः सन् वर्द्धस्व प्रवृद्धो
भव १० सा द्युम्नैरिति सा अस्माभिः क्रियमाणा स्तुतिः द्युम्नैर्द्योतमानैः अस्मभ्यं प्रदेयैः द्युम्निनी अन्नवती श्रवसि पूर्वस्मिन्
विद्यमाने ऽन्ने पुनरपि बृहत् महत् श्रवः अन्नं उप उपदधीत पुनात उपरि धारयतु कुत्र वृत्रतूर्ये संग्रामे शत्रोः संबंधिन मिति
यावत् ११ अश्वमिद्गामिति गां गंतारं अश्वमित् अश्वमिव अश्वमिव तं यथा स्तुवंति तथेत्यर्थः रथप्रां रथानां अस्मदीयानां
पूरयितारं धनैः तथा त्वेषं दीप्तं अग्निं सपर्यति सतोपालकं इंद्रं न इंद्रमिव इमं स्तुष्टय मनुष्याः परिचरंतेति शेषः यस्याग्नेः बले
न श्रवांसि अन्नानि तूर्वयप्राप्नुत यायन्यं च यत् स्तुत्यं धनमस्ति तदपि तूर्वथ॥ ॥इति षष्ठस्य पंचमे द्वाविंशो वर्गः॥ ॥ ६६
यं त्वा गोपवन इति हे अग्ने यं त्वा तां गोपवनः ऋषिः गिरा स्तुत्या च निष्टं अतिशयेनान्नप्रदातारमकरोत् सः तादृशः हे अंगिरः
सर्वत्र गंतः पावक शोधक त्वं गोपवनस्य ऋषिः शृणु १२ अयं त्वा जनास इति हे अग्ने यं त्वां जनासः जनाः वाजसातये अ
न्नस्य लाभाय सबाधः निर्बधिरुपबंधोपेताः संतः ईळते स्तुवंति सत्वं वृत्रतूर्ये वैरिनाशनाय बोधि बुध्यस्व १३ अहं हुवान

437
115

इति अहं ऋषिः हुवानः हूयमानः आर्क्षे ऋक्षपुत्रे श्रुतर्वणि एतन्नाम्नि राजनि मदच्युति शत्रूणां मदस्य च्यावयितरि स्तुत्
विनां स्तुकाविनः ऊर्णायवः स्तुकः केशसंघातः तद्वंतां शार्द्धीसी वउक्षितानि लोमानीव तानि यथ स्युः शंसति तद्वत् मृक्षा मृक्षा
णि केशवंती निशीर्षाशीर्षाणि शिरांसि येषां चतुर्णां श्रुतर्वण्णा प्रदत्तानां अश्वानां शिरांसि उन्नतानीति शेषः १४ मां चत्वार
इति मां शविष्ठस्य अतिशयेनान्नवतः श्रुतर्वणः राज्ञः संबंधिनः चत्वारः आशवः अश्वाः द्रवित्नवः गमनशीलाः सुरथा सः
शोभनरथाः प्रयोन्ने चाशूनां संबंधिनं अभिवक्षन् अभिवहंति वयः तुग्र्यं न भुज्युं यथा अश्विभ्यां प्रेरिताः चत्वारो नावः स्व
गृहं प्रापयन् तद्वदिति १५ सत्यमित्त्वेति हे महे महते नदि परुष्णि एतन्नाम्नि के त्वा तां सत्यमित् सत्यमेव अवेदं दिशं आ
दिशामि वदामि नद्याकरेण संबोध्य आपः संबोधयति हे आपः इति अस्मात् शविष्ठात् बलवत्तमात् श्रुतर्वणादधिकः कश्चित् अ
श्वदाता तरः अश्वानां दातृतमः मर्त्यः नास्ति परुष्ण्याः तीरे राज्ञो ऽश्वमेधप्रतिग्रहात् तां संबोध्य ब्रूते॥ ॥इति षष्ठस्य पंचमे
त्रयोविंशो वर्गः॥ ॥युक्ष्वा हीति षाडशर्चं पंचमं सूक्तं आंगिरसः विरूपाक्ष ऋषिः गायत्री छंदः अग्निर्देवता १ युक्ष्वा हीति हे अग्ने
देवहूतमान् देवानां आह्वातृतमान् अश्वान् युक्ष्व योजय रथेरथी रिव यथा रथी स्वाश्वान् इष्टदेशगमनाय योजयति तद्वत्
तथा स्तत्वा होता त्वं पूर्व्यः मुख्यः सन् निषदः उपविश च हि पूरणे २ उत न इति हे देव अग्ने उत अपि च नः अस्मान् अच्छ वाचः अ
भिब्रूयः सम्यगनुशिष्टवंत इति तथा विदुष्टरः विद्वत्तमान वोचः तथा कृत्वा विश्वा सर्वाणि वार्या वरणीयानि धनानि दिवसंबं
धीनि अस्मत् सत्यानि कृधि कुरु अस्मासु ३ त्वं ह यदिति हे अग्ने यविष्ठ्य युवतम सहसः सूनो बलस्य पुत्र आहुत सर्वतो हुत त्वं
यत् यदा ह खलु ऋतावा सत्यवान् यज्ञियः यज्ञार्हश्च भुवः भवति तदा वार्याणि श्रत्कुर्विति संबंधः ४ अयमग्निरिति अयमग्निः
शतिनः सहस्रिणश्च उक्तसंख्योपेतस्य वाजस्य अन्नस्य पतिः स्वामी धा शिरोवत् उन्नतः श्रेष्ठः कविः मेधावी रयीणां धनाना
मधिपतिरिति शेषः तद्धनमस्मभ्यं प्रयच्छ इत्यर्थः ५ तं नेमिमिति हे अंगिरः त्वं सहूतिभिः समानाह्वानैः अन्यैः देवैः सहं नदीयः

भा.प.
६७

अंतिकतमं आनमस्वयज्ञं आनमयकृपमवः यथानमिरंयंतद्वत्॥ ॥इतिषष्ठस्यपंचमेचतुर्विंशोवर्गः॥६॥ तस्मैनूनमितिद्वे विरूप एतन्नामक महर्षेत्वं तस्मै प्रसिद्धाय अभिद्यवे अभिगत तत्स्येयरणोवर्षकाय अभयेनित्ययासत्तिरहितयावाचामत्रंरूपयासुष्टुतिं नूनंइदानीं चोदस्व स्तुहि इत्येवऋषिः स्वात्मानंब्रवीति ७ किमुष्विदितिजस्याग्नेः अपाकचक्षसः अनल्पचक्षसोग्नेः सेनया ज्वालारूपयागोषु निमित्तेषु कमुष्वित्कं खलुपणिंस्तरामहेअभिभवेम८ मानोदेवानामितिदेवानांसर्वेषां विशः प्रजाः तानपरिचारकान् नः अस्मान् माहासीत अग्निः मापरित्यजतु प्रस्नातीः उस्राः इवपयःक्षरंतीःगावः इवपायथानमुचंति कृशां अल्पंस्ववत्सं अघ्याः गावः यथानहास्कः नपरित्यज्यंति तद्वत् ९ मानः समस्येति समस्यसर्वस्यपरिद्वेषसः परितोद्विषतः दूढ्यः पापबुद्धेः अंहतिः हननं नः अस्मान् मावधीत् माहिंस्यात् नावंन उर्मिः समुद्रतरंगः इवसयथा नांपीडयतितद्वत् मावधीत् इत्यर्थः॥१०॥ नमस्तइतिहेअग्नेदेवते तुभ्यंनमो गृणंति नमस्कारशब्दं उच्चारयंतिकिमर्थं ओजसे बलायकेक्रुष्टयः मनुष्याः यजमानाः अतोहमपि गृ—मास्यर्थः तथाअमैः बलैः अमित्रंशत्रुं अर्दयनाशाय॥ ॥इतिषष्ठस्यपंचमेपंचविंशोवर्गः॥११॥ कुवित्सुनइतिहेअग्नेत्वंनः अस्माकं गविष्टये गवामिषणाय कुवित्बहुरयिंधनं संवपिषः संप्रापय उरुकृतु उरुं नः अस्मान् स्कस्कृधु उरुक्रुधिकरु १२ मानोअस्मिन्नितिनः अस्मान् अस्मिन् महाधने संग्रामे मापरावक् मापरित्याक्षीः भारभृत् यथा भारवाही यथाभारं अंतेपरित्यजति तद्वत् सर्वगं शत्रुभ्यः सहाच्छिद्यमानं रयिंधनं संजय अस्मदर्थं १३ अन्यमस्मदितिहेअग्नेत्वदीयाइयंदुच्छुनाबाधकसंहतिः अस्मदन्यं स्तोतारं भियेभयाय सिषक्तुसेवतां त्वं च नः अस्माकं अमवत् बलोपेतं शावः वेगं वर्धवर्धय संयामि १४ यस्याजुषदितियस्यनमस्विनः नमस्कारवतः अदुमुखस्य अदुष्टयागस्य शमीकर्म अजुषत् असेवत तं घेत्तमेव यजमानं संयामि अग्निः वृधावति विशेषेण्णाछतिअतोनमोयुक्तः अदुर्मखाश्च भवेमेतिभावः १५ परस्याइतिहेअग्नेपरस्याः अन्यापाः अधिसंवतः सेनायाः अस्मान्

६७

461
1915

अस्मदीयान् अभि अभिमुखं आसर्वतः तरतारयंवैरीसेना अस्मद्भटैः पराभवयेत्यर्थः यत्रेषु अस्मदीयपरिजनमध्ये अहं अस्मि स्वामी तान् अवरक्ष १६ विद्माहीतिहेअग्नेपितुः पालकस्यते तव अवसः अवः रक्षणं पुरायथातथा तथा अधेदानीं अपि इतिविद्मवयं अतः ते तव सुम्नं सुखं ईमहे याचामहे॥ ॥इतिषष्ठस्यपंचमेषड्विंशोवर्गः॥ ॥इमंनुमायिनमितिद्वादशर्चंषष्ठं सूक्तं कुरुसुतिर्नाम काण्वः ऋषिः गायत्री छंदः इंद्रोदेवता १ इमंनुमायिनमिति इमं मायिनं प्रज्ञावंतं ओजसा स्वबलेन ईशानं सर्वस्य स्वामिनं मरुत्वंतं मरुद्भिः तद्वंतं न संप्रत्यर्थं इदानीं इंद्रं वृत्रशत्रूणां छेदनाय हुवे आह्वयामि २ अयमितिअयमिंद्रः मरुत्सखा मरुद्युक्तः वृत्रस्य व्यभिनत् व्यच्छिनत् शिरः वज्रेण शतपर्वणा शतसंधिना ३ वावृधानइति अयमिंद्रः वावृधानः वर्धमानः मरुत्सखा मरुत्सहायः वृत्रं मेघं वैरयत् व्यदारितवान् किंकुर्वन् सृजन् इंद्रियाः अंतरिक्षसंबंधिनः अपः सृजन् ४ अयंहेति अयंह खिलुइंद्रः येनवैयेन खलु मरुत्वता मरुद्भिः युक्तेन इंद्रेण इदं स्वः स्वर्गाख्यं स्थानं जितं किमर्थं सोमपीतये सोमपानाय ५ मरुत्वंतमिति मरुत्वं मरुद्भिः तद्वंतं ऋजीषिणं अभिषुतशेषः ऋजीषः सचतत्तयस्यवनेपुनः स्तूयते तद्वंतं ओजस्वं तं शरीरस्य दृष्टं विरप्शिनं महांतं एवं महानुभावं इंद्रं गीर्भिः स्तुतिभिः हवामहे आह्वयामः ६ इंद्रप्रत्नेनेति मरुत्वं तं इंद्रं प्रत्नेन पुराणेन मन्मना मननीयस्तोत्रेण हवामहे अस्य सोमस्य पीतये पानाय॥ ॥
॥इतिषष्ठस्यपंचमे सप्तविंशोवर्गः॥७॥ मरुत्वाँइंद्रेतिहेमेमीढ्वः फलस्य सेक्तः शतक्रतो बहुकर्मन् इंद्र त्वं मरुत्वान् सोमं पिब अस्मिन् यज्ञे हे पुरुष्टुत बहुभिराहूत ८ तुभ्येदिंद्रेतिहे अद्रिवः वज्रवन् इंद्र मरुत्वते तुभ्यं तु तुभ्यमेव सोमासः सुताः अभिषुताः सोमाः ते च उक्थिनः शस्त्रवंतः हृदा मनसा भक्त्या हूयंते त्वदर्थं ९ पिबेदिंद्रेतिहे इंद्र मरुत्सखा त्वं सुतं अभिषुतं सोमं पिबेत् पिबैव किमर्थं दिविष्टिषु अस्माकं अभिगमनेषु पीतस्य च ओजसा बलेन सोमपानजनितेन मंदेन वज्रं शिशानः तीक्ष्णीकुर्वन् शत्रून् जहीतिभावः १० उत्तिष्ठन्निति हे इंद्र त्वं पीत्वी त्वा ओजसा बलेन सह उत्तिष्ठन् उत्तिष्ठन् शि

सा·ष·
६८

प्रेहन्न अविपयः अकंपयः मदाविशादिति भावः किं पात्वाचमूचम्वोः अधिषवणफलकयोः स्रुतं सोमं ११ अनु त्वेति हे इंद्र
ऋक्षमाणं शत्रून् विलिखंतं त्वां तौ उभे रोदसी द्यावापृथिव्या अनुकूलमपेतां अनुकूल्यमपेतां स्फ हा अभवः भव सितदा १२
अष्टापदीमिति अष्टापदीं अष्टाभिः दिग्भिः विदिग्भिः प्राप्तां नवस्रक्तिं उपरिस्थिते नादित्येन आस्कंदिक्ष्व्यां धाकृतस्पृशं
वाचं स्तुतिं अहं परिपूणति इंद्रात् तन्वं तनुं व्यूनां संतीपरिममे न्यूने यथा करोमीत्यर्थः कर्त्रेनि स्वरूप स्तुत्या विषयीक
र्तुं अशक्यत्वादिति भावः॥ ॥इति षष्ठस्य पंचमे अष्टाविंशो वर्गः॥ ॥जज्ञान इत्येकादशर्चं सप्तमं सूक्तं कण्वः पुरुसुतिः ऋ
षिः आद्यानवगायत्र्यः दशमी बृहती एकादशी सतोबृहती इंद्रो देवता १ जज्ञानो न्विति अयं इंद्रः जज्ञानः नु जायमान
एव शतक्रतुः बहुकर्मा इति इत्थं मातरं स्वजननीं विपृच्छत् तिकिमिति के उग्राः उद्गूर्णबलाः लोके के ह श्रण्विरे श्रूयंते यु
णः के विश्रुताः इत्यर्थः २ आदीं शवसीति इंद्रः पृच्छति शवसी माता आत् अनंतरमेव ई एनमिंद्रं अब्रवीत् किं औणवाभं
अहीशुवं एतन्नामानौ असुरौ तिष्ठतः ते उक्ताः अन्ये च तादृशाः हे पुत्र ते मया निष्टुरः निस्तारणीयाः संत्विति ३ समित्ता
निति तान् अनन्याउक्तान् वृत्रहा इंद्रः समित् संहैव आखिदत् खेदनं नामाकर्षणं खिरथे च कस्य नाभौ अरान् इव आ
रात् चक्रो गमः तान् शंकन् खेदयावलया तान् यथा संखिदति तद्वत् तथा कस्माद् सुहा शत्रुघाती इंद्रः प्रवृद्धो भवत् ४ ए
कयेति अयमिंद्रः एकया एकेन प्रतिधा प्रतिधानेन साकं एकधैव त्रिंशतं अपिब त्रयपात्राणीत्यर्थः कीदृशानि सरांसि सो
मरसेन पूर्णानि काणुका कांतानि इंद्रः अपिबत् पीतवान् माध्यंदिन सवने ५ अभि गंधर्वमिति अयं इंद्रः गंधर्वं गां उदकं
धारयतीति गंधर्वः मेघः तं अभ्यातृणत् सर्वतो हिंसितवान् कुत्र अबुध्नेषु पदनिधानयोग्यस्थानरहितेषु रजःसु लोके
षु अंतरिक्षप्रदेशेषु इत्यर्थः किमर्थं ब्रह्मभ्य इत् ब्राह्मणेभ्यः एव वृधं वर्धनाय॥ ॥इति षष्ठस्य पंचमे एकोनत्रिंशो वर्गः
६ निराविध्यदिति अयमिंद्रः गिरिभ्यः मेघेभ्यः सकाशात् उदकं निर्गमयितुं निराविध्यत् संप्राहरत् तानेव मेघान् आस

६८

463
1911

मतान् धारयत् किं कुर्वन् पक्वं परिपक्वं ओदनं कुर्वन् मनुष्याणामर्थायेति न साधनेन बुंदं इषु स्वाततं सर्वतो विस्तृतं आ
दधीति शेषः ७ शतब्रध्न इति हे इंद्र तव इषुः शतब्रध्नः शताग्रः सहस्रपर्णः सहस्रासंख्याकैः पत्रैः संवृतः शीघ्रगमनाय
स च एक इत् एक एव पर च इषुं युजं सहायं च कृषकरोषि ८ तेन स्तोतृभ्य इति तेन इषुणा स्तोतृभ्यः अस्मभ्यः नृभ्यः मनु
ष्येभ्यः पुत्रेभ्यः इत्यर्थः तथा नारिभ्यः स्त्रीभ्यश्च अत्तवे अदनाय पर्याप्तं धनं आभर आहर सद्यः तदानीमेव जातः अस्मा
भिः दत्तेन सोमेन प्रहृष्टे सन् ऋभुष्ठिरः उरुप्रभृत स्थिर श्च संग्रामे सन् तथोक्तः तादृशः इंद्र त्वं आभरेति समन्वयः ९
एतान्येत्यानीति हे इंद्र तेन त्वया एतानि पुरतः सर्वैः दृश्यमानानि वर्षिष्ठानि अतिशयेन प्रवृद्धानि परीणसा परितोनी
तानि अत एव च्यौत्नानि अस्तुतुक्थानि तव बलानि भूमेः किलब धारणं अकृता कृतानि पर्वताः त्वया कृताः इत्यर्थः यानि
हृदा बुध्यावीलुस्थिराय अधारयः बुध्या कर्तव्यानि यानि अधारयः तानीमानीति १० विश्वेत्ता ते इति हे इंद्र ता तानि यानि त्व
या सृष्ट्यानि विश्वा विश्वानि सर्वाणि उदकानि सति निष्णुः व्यापनशीलः आदित्यः आभरत् आभरति लोकाय यच्छतीत्य
र्थः कीदृशः विष्णुः उरुक्रमः बहुगतिः त्वेषितः त्वया प्रेषितः शतं महिषान् शतशः ख्यातान् कोपश्रून् महिषः गवादि रप्युपल
क्षकः यजमानेभ्यः आभरत् ददातीत्यर्थः किंच क्षीरपाकं क्षीरपक्वं ओदनं एतत् चरुपुरोडाशादेरप्युपलक्षणं तद्यज
मानेभ्यः आभरत् किंच इंद्रः वराहं जनलपूर्णं मेघं हंतीति शेषः कीदृशं एमुषं उदकस्य मोषकमित्यर्थः इत्नु पूरणः ११
तुविक्षं त इति हे इंद्र ते तव धनुः तुविक्षं महाविक्षेपं सुकृतं सुमयं सुसुखं च बुंदः इषुः साधुः हिरण्ययः हिरण्मयः ते उ
भा उभौ बाहू रण्या रमणीयौ सु संस्कृता सुष्ठु अलंकृतौ ऋदूपे चित् संग्रामे अर्दनपातिनो ऋदूपाः दुरधा दुःखेन वर्धनौ॥ ॥
इति षष्ठस्य पंचमे त्रिंशो वर्गः॥ ॥पुरोळाशं न इति दशर्चं अष्टमं सूक्तं कण्वः स्तुतिः ऋषिः आद्यानवगायत्र्यः दशमी बृ
हती इंद्रो देवता १ पुरोळाशमिति हे शूर इंद्र पुरोळाशं एनं संजं अंधसः सोमं स्वीकुरु स्व गोनां गवां सहस्रशः ताशतानि

चनः अस्मभ्यं आभर २ आनो भरेति हे इंद्र न अस्मभ्यं व्यंजनं गामश्वं अभ्यंजनं तैलं चाभर मनामननीयानि हिरण्म
या हिरण्मयानि उपकरणानि सचा सह आभरति ३ उत न इति उतापि च नः अस्मभ्यं कर्णशोभना कर्णाभरणानि पुरू
णि बहूनि आभर हे धृष्णो धर्षक वसो वासयितः इंद्र त्वं हि शृण्विषे श्रूयसे किमिति उदारीय मिंद्र इति ४ नकिं वृधी
क इति हे इंद्र ते तव त्वत्तोन्यः कश्चित् वृधीकः वर्धयिता न कीं नैव तथा सुषाः स्कृधु संभक्ता संग्रामादौ त्वत्तोन्यः न उतापि च सु
दाः सुदाता न तथा हे शूर त्वत् त्वत्तोन्यः वाघतः ऋत्विक् यजमानस्य नेता नान्योस्ति त्वामृते ५ नकीमिंद्र इति अयं इंद्रः
निकर्तवे निकर्तुं न कीं नैव शक्यः तथा शक्रः शक्तो यं परिशक्रवे परिभावाय न शक्यं ते इत्यर्थः स तु विश्वं शृणोति पश्यति
च॥ ॥इति षष्ठस्य पंचमे एकत्रिंशो वर्गः॥६॥ स मन्युमिति स इंद्रः मन्युं क्रोधं केषां मर्त्यानां अरध्यः केनापि अहिंसि
तः नि चिकीर्षते न निकरोति किं मन्युं प्राप्योवनेत्या हुनिदः निंदायाः पुरा पूर्वमेव चिकीर्षते ७ क्रत्व इति तुरस्य त्वरमाणस्य
वृत्रघ्नः वृत्रं हतवतः सोमपाव्नः सोमपातुः उदरं क्रत्व इत्व कर्मणे वपूर्णं अस्ति भवति कस्य कर्मणा विधर्तः परिचरतः य
जमानस्य ८ त्वे वसूनीति हे इंद्र त्वे त्वयि वसूनि धनानि अस्मदिष्टानि संगतासंगतानि तथा हे सोम सोमवन् इंद्र त्वयि
विश्वा सर्वाणि सौभगा सौभाग्यानि संगतानि तथा सुदातु सुदानानि अपरिह्रुता अकुटिलानि अतः तानि कुर्विति भा
वः ९ त्वामिद्यवयुरिति त्वामित् त्वामेव एष ते मम कामः सकादवाः यवयुः यवेच्छुः सन् एषते तथा गव्युः सन् एषते तथा हि ६१
रण्ययुः सन् एषते अश्वयुः सन् एषते तथा कामं त्वामिच्छां कुर्विति भावः १० तवेदिंद्रेति हे मघवन् इंद्र तवेत् तवैव आ
शासा आशंसनेन त्वं अस्मदीयं क्षेत्रं यव समृद्धं करोषीति आशासने नहस्ते दात्रं चन लवनसाधनं दात्रं मया ददे स्वीक
रोमि किं मानन प्रयासिन दिनस्य वा पूर्वमिव छिन्नस्य यामं प्रत्तस्य वा यवस्य कामिनां मुष्टिना पूर्धि पूरय॥ ॥इति
षष्ठस्य पंचमे द्वात्रिंशो वर्गः॥ ॥अयं कृत्नुरिति नवर्चं नवमं सूक्तं भार्गवः कृत्नुः ऋषिः नवमी अनुष्टुप् अष्टौ गायत्र्यः

465
1915

सोमो देवता १ अयं कृत्नुरिति अयं सोमः कृत्नुः कर्ता सर्वस्य अगृभीतो अन्यैरगृहीता विश्वजित् सर्वस्य जेता उद्भित्
फलस्योद्भेदकः ऋषिः ज्ञानवान् विप्रः मेधावी एवं महानुभावः सोमः काव्येन स्तोत्रेण सुक्रतो भवतीति शेषः २ अभ्यू
र्णोतीति अयं सोमः यन्नग्नमस्ति तदभ्यूर्णोति आच्छादयति यन्नग्नमिव विफलं वर्तते तत् आच्छादयति फलेन तथा यदा
तुरं रुग्णं विश्वं तत् भिषक्ति भिषज्यति यज्ञद्वारा स्वर्गसाधनात् इं ओषधरूपेण शरीरसिद्धिसाधनं च अंधः अंधोपि
प्रख्यत् पश्यति श्रोणः श्रोणोपि पंगुरपि निर्भूत निर्गच्छति ३ त्वं सोमेति हे सोम त्वं तनूकृद्भ्यः कृशीकुर्वद्भ्यः अन्यकृ
तेभ्यः द्वेषोभ्यः शत्रुकृतेभ्यः अप्रियेभ्यः वरूथं रक्षणं उरु यंथासि बहुकृत भवसि ४ त्वं चित्ती तवेति हे ऋजीषिन् ग
तसार सोम त्वं तव चित्ती चित्त्या प्रज्ञया दक्षैः बलैश्च दिवः आदित्यस्य पृथिव्याः पृथिव्याश्च सकाशात् अघस्य चित् पापि
नः एव द्वेषः शत्रोः स्त्यं यावीः पृथक् कुरु ५ अर्थिन इति अर्थिनः धनानि कामयमानाः यंति चेत् प्रतिगत्वा चरदुषः
दातुः रातिं दानं गच्छानित गच्छति च गंतेषु मध्ये यं हे सोम त्वं अनुगृह्णासि तस्य तृष्यतः भिक्षमाणस्य कामं वनुष्युः पुनः
कामानां वर्जयति नावस्यर्यंतं पूरयंतीत्यर्थः॥ ॥इति षष्ठस्य पंचमे त्रयस्त्रिंशो वर्गः॥६॥ विदद्यदिति यत् यदा पूर्व्यं पु
राणं नष्टं स्वकीयधनं विदत् लभते तन्नष्टधनः ई एनं ऋतायुं नष्टधनलाभार्थयज्ञकामं उदीरयत् प्रेरयत् धनं साध
यतीत्यर्थः तदा ईं अतीर्णं एनं यज्ञानं भिणं आयुः जीवनं प्रतारीत् प्रकर्षेण वर्धयेत् ७ सुशेव इति हे सोमपीतः त्वं
नः अस्माकं हृदे हृदयपीताय शस्यः सुखं भव किंच नः अस्माकं सुशेवः सुसुखः मृळयाकुः सुखकर्ता अदृप्तक्रतुः आस
मापत्कर्मा पुनः पुनः यागप्रवर्तकः अवातः निश्चलश्च भवति अन्वयः ८ मा नः सोमेति हे सोमपीत त्वं नः अस्मान् मा
संवी विजः चलितान् गान् मावधीः हे राजन् सोम अस्मान् माविबिभीषथाः भीयान् माकुरु नः अस्माकं हार्दि हृदयं त्वि
षा दीप्त्या मा वधीः ९ अवयत्स्व इति स्वि सधस्थे स्वकीये सह स्थानं गृहे देवानां दुर्मतीः दुर्मतयः न प्रविशंत्विति यत् यदा

नविक्षि अहं त्वं च ईक्षसे तदहिराजन् द्विषः अस्मत् द्विषन् अपसेधहिमो ध्रुवोसोमसस्यं सेकः स्रिधः हिंसकान् अप सेधामिषीत्यर्थः॥ ॥इतिषष्ठस्यपंचमे चतुःस्त्रिंशोवर्गः॥ ॥नत्वन्यमितिदशर्चं द्वादशं सूक्तं एकद्यूर्नाभानोध सः पुत्रः ऋषिः अंत्यात्रिष्टुप् साचैंद्री शिष्टाः गायत्र्यः इंद्रदेवताकाः १ नत्वन्यमितिहे शतक्रतो इंद्र त्वत्तो न्यं मर्डि तारं सुखयितारं बलावर्धकं स्तनाकरं न करोमि तस्मात् हे इंद्र त्वं नः अस्मान् मृळय सुखय हि पूरणः २ यो नः शा श्वदिति यः अमृध्रः हिंसकः नः अस्मान् वाजसातये अन्नलाभाय पुरा पूर्वं अविथ रक्षितवान् इंद्र स त्वं नः अस्मा हे
न् शश्वत् सदा मृळय सुखय ३ किमंगेति अंगहे इंद्र त्वं रध्रचोदनः रध्रं राधकं चोदयतीति रध्रचोदनः तादृशः त्वं सुन्वानस्य सोमं सुन्वानस्य अविता इत्त् असि रक्षक एव भवसि अतो नः अस्माकं कुवित् बहु सु शाकः शक्तो भव बहुधनं कुर्वित्यर्थः किं पूरणः ४ इंद्र प्रणइतिहे इंद्र नः रथं प्राव प्ररक्ष कीदृशं रथं पश्चात् चित् संतं अस्मत् समानरथानां पश्चा त् भूतं अपि एनं रथं हे अद्रिवः वज्रवन् इंद्र मे मम पुरस्तात् वर्तमानं कृधि कुरु ५ हंतोनु किमिति हंतो हि इंद्र नु इदानीं किं त्वं तूष्णीमाससतत्त्वे किं करोमीति चित् नः रथं प्रथमं सर्वेषां मुख्यं कृधि कुरु वाजयुः अस्माकं अन्नमिच्छन् श्रवः अन्नं हविर्लक्षणं उपमं तवांतिकभूतं वर्तत इति शेषः यस्मात् एवं तस्मात् रथं अस्मदीयं प्रथमं कधीति॥ ॥इतिषष्ठस्यपंच मे पंचत्रिंशोवर्गः॥ ६॥अवानइति हे इंद्र नः वाजयुं अन्नेप्सुरथं अव रक्ष संग्रामे ते तव किमित् किमपि सर्वं कर्तव्य ज्ञानं परिपरितः सुकरं सुखेन कर्तव्यं तव कर्तुमशक्यं न किंचिदस्तिय स्मात् एवं तस्मात् सुजिग्युषः सुष्ठु जेतॄन् अस्मान् कृधि कुरु संग्रामे ७ इंद्र दृह्यस्वेति हे इंद्र त्वं दृह्य स्व दृढो भव संग्रामे त्वं पूरसि यथापुरं अविचलितं तद्वत् त्वमसि किमत्र विध ७०
त निष्कृतं निष्कृतं रितं त्वां भद्रा कल्याणी इयं धीः स्तुतिः कृत्विया वती स्वकालोपेता सती एतिगच्छति ८ मासीमवद्यइतिमा स्मात् सीं सर्वतः अवद्ये अवद्यः निंदा आभाक् आभवतु प्राप्नोतु किंचउर्वी काष्ठा बहुरलापूः तत्र हितं निहितं शत्रु संबंधि

467
19/15

धनं अस्माकं भवत्वित्यर्थः अरत्नयः अरमाणाः शत्रवः अपावृक्ताः संत्विति शेषः ९ तुरीयन्नामेति हे इंद्र त्वं यज्ञियं यज्ञ संबंधिनं तुरीयं चतुर्थं नाम पदाकरः करोषि तत् तु उश्मसि कामयामहे आदित् अनंतरमेव कामानां तरमेव पतिः पालकः नः अस्मान् ओहसे वहसि प्रापयसि नक्षत्रं नाम गुह्यं नाम प्रकाशं नाम त्रीणि नामानि सोमया सोमयाजीति तुरीयं नाम तच्च य ज्ञियं १० अवीवृधद्वइति हे देवाः अमृताः अमरणाः वः युष्मान् यः अवीवृधत् वर्धयति स्तुत्या अमंदीत् तर्पयति सोमेन एक द्यूः ऋषिः अहं उता पि च हे देवीः देवपत्न्यः याश्च यूयं स्थ युष्मान् अपि अवीवृधत् अमंदीत् च तस्मै राधः धनं प्रशस्तं प्रवृ द्धं कृणुत कुरुत उपूरणः प्रातः प्रातरेव मक्षु क्षिप्रं धियावसुः कर्मधनं इंद्रः जगम्यात् आगच्छतु॥ ॥इतिषष्ठस्यपंचमेष ट्त्रिंशोवर्गः॥ ॥इतिअष्टमेमंडले अष्टमोनुवाकः॥ ८॥ नवमेनुवाके त्रयोदश सूक्तानि तत्र आतूनइंद्रेति नवर्चं प्रथमं सूक्तं कण्वपुत्रः कुसीदी ऋषिः गायत्री छंदः इंद्रो देवता १ आतूनइंद्रइति हे इंद्र महारुत्सीमहारुत्स्वान् त्वं तु तदानीमेव नः अस्मभ्यं दातुं क्षुमंतं शब्दवंतं स्तुत्यमित्यर्थः चित्रं चायनीयं ग्राभं ग्राहकं धनं दक्षिणेन हस्तेन आसंगृभाय अभिमुख्ये न संगृहाण २ विद्माहित्वेति हे इंद्र त्वा त्वां विद्म हि जानीमः खलु कीदृशं तु विकूर्मिं बहुकर्माणं तुविदेष्णं बहुप्रदेयं तु विमघं बहुधनं तु विमात्रं बहुप्रमाणं अवोभिः रक्षणैः युक्तं ३ नहित्वेति हे शूर इंद्र ते त्वां दित्संतं दातुमिच्छंतं देवाः न हि वारयंते
न नभिवारयंतीति तथा मर्तासः मर्ताः अपि न वारयंते भीमं न गां भयजनकं वृषभं यवसे प्रवृत्तमिव यथा वारयितुं न शक्नुवंति तद्वत् ४ एतोन्विंद्रमिति हे अस्मदीयाः जनाः एत आ गच्छत नु क्षिप्रं किं कर्तुं स्तवाम इंद्रं कीदृशं तं वस्वः वसुनः धनस्य ईशानं स्वामिनं स्वराजं स्वयमेव राजमानं नः अस्मान् इंद्रेण अनुगृहीतान् राधसा धनेन अन्यो धनी न मर्धिषत् न वाधतां अघ्न्यानां अस्मत्समानानां अपि आख्यत्वाय स्तवामेत्यर्थः॥ ५॥ प्रस्तोषदिति पूर्वमंत्रे स्तवामेत्युक्तं तदेव स्तो त्रं इंद्रः प्रस्तोषत् प्रस्तुत्वा च उपगासिषत् उपमानं च करोतु तदर्थं गीयमानं साम स्तोत्रं श्रवत् शृणोतु राधसा धनेन च युं

कोस्मान् अभिनु गुराव गणात्॥ ॥इतिषष्ठस्यपंचमेसप्तत्रिंशोवर्गः॥६॥ आनोभरेतिहेइंद्र नः अस्मभ्यं आभर आह
स्व दक्षिणेन सव्येन च हस्तेन उभाभ्यां हस्ताभ्यां अभिप्रभृ आप्रयच्छेत्यर्थः नः अस्मान् वसोर्धनात् मा निर्भाक् मा निर्भा
क्षीः ७ उपक्रमस्वेतिहे इंद्र त्वं उपक्रमस्व धनं प्रति उपागच्छ प्रवृत्तो भव दातुं हे धृष्णो शत्रूणां धर्षकेंद्र धृष्टेन चेतसा यु
क्तः सन् आभर आहर स्वकस्य धनं जनानां मध्ये अदाशूष्टरस्य अत्यंतं अदातृतमस्य वेदः धनं ८ इंद्रायउनुतइतिहे इंद्र
यः वाजः अन्नं विप्रभिः मेधाविभिः सनित्वः संभजनीयः ते तव वास्ति तं वाजं अस्माभिः याचितः सन् स्तु सुष्ठु सन्तु हि दे हिनु
उपूरणो ९ सद्योजुवइतिहेइंद्र ते तव वाजाः अश्वाः अस्मभ्यं सद्योजुवः शीघ्रं गंतारः भवंतु कीदृशाः ते विश्वचंद्राः सर्व
हिरण्याः अनाः अस्मभ्यं अस्मदीयाश्च जनाः वशाः कामिनैरेकैः युक्ताः मक्षु शीघ्रं जरंते स्तुवंति॥ ॥इतिषष्ठस्यपंचमे
अष्टत्रिंशोवर्गः॥ ॥इतिऋग्भाष्ये षष्ठाष्टके पंचमोध्यायः॥ ॥७३॥ आप्रद्रवेतिनवर्चं द्वितीयं सूक्तं कराव कुसीदः ऋषिः
गायत्रीछंदः इंद्रो देवता १ आप्रद्रवेति हे वृत्रहन् अपां आवरकस्य वृत्रासुरस्य हंतः इंद्र प्रभर्मणि भरणादिप्रभुग्रहा
दि संपादनानि यस्मिन् सप्रभर्मा यज्ञः तस्मिन् मध्वः मधुकरान् सोमान् प्रतिपरावतः दूरदेशात् अपि अववितश्च सम
परत्वान देशादपि आ आभिमुख्येन प्रद्रव त्वं त्वरया आगच्छ २ तीव्राः सोमासइतिहेइंद्र तीव्राः तीव्रमदाः क्षिप्रमदाकारि
णइत्यर्थः मादयिष्णवः मादनशीलाः इमे सोमासः सोमाः स्तुताः त्वदर्थं अभिषुताः तस्मादागहि अस्मदीयं यज्ञं प्रति आगच्छ
आगत्य च तान् पिब सोमपान कारणमाह त्वं यथा दधृक् धृष्टः सन् प्रीतो प्रगल्भः सन् तान् ओचिषे समवायिसेव सेतृन्
तान् यथाकामं पिबेत्यर्थः ३ इषामंदस्वेतिहेइंद्र इषा सोमलक्षणेनान्नेन मदस्व मोदस्व उ अवधारणे आत् अनंतरम
वते तव वरायशत्रु निवारकाय मन्यवे क्रोधाय स सोमः अरं अलं पर्याप्तो भवतु क्रोधशमने समर्थो भवतु किंच ते तव
हृदे हृदये स सोमः शंसुखकरो भुवत् भवतु ४ आत्वशत्रोइतिहे अशत्रो सपत्न रहित इंद्र तु क्षिप्रं आगहि आयाहि

469
1915

अस्मद्यज्ञं प्रति आगच्छ यतः दिवः द्युलोकात् तत्रस्थैर्देवैः इत्यर्थः रोचने अग्निभिः दीप्यमाने लोके च उपमे समीपे स्तोता
रः स्तोत्रशस्त्रात्मकं शब्दं कुर्वंत्येत्रेति उपयोयः तस्मिन् अस्मदीये यज्ञे च उक्थानि त्रिवृत्पंचदशादिलक्षणादि स्तोत्राणि
प्रति निहूय सेत्वं स्तोतव्यतया नितरामाहूय सेयस्मादेवं तस्मात् आगच्छेति समन्वयः ५ तुभ्यायमितिहेइंद्र अद्रिभिः अभि
षवसाधनैः ग्रावभिः अयं सोमः तुभ्यं त्वदर्थं स्तुतः अभिषुतः ततः दशापवित्रेण पूतः गोभिः गोविकारैः क्षीरादिभिः श्रीतः
मत्स अस्माभिः संस्कृतः सोमः तव मदाय मदार्थं स्तुतेन प्रहूयते अग्नौ स्वाहा क्रियते तस्मात् आगत्य सोमं पिब॥ ॥इति
षष्ठस्य षष्ठे प्रथमो वर्गः॥६॥ इंद्रश्रुधीतिहेइंद्र मे मदीयं हवं त्वद्विषयमाह्वानं स्तु स्तुष्व श्रुधि शृणु तथा अस्मे अस्माभिः
स्तुतस्याभिषुतस्य गोमतः गव्यक्षारवतः क्षीरेण मिश्रितस्य इत्यर्थः तादृशस्य सोमस्य पीतिं पानं व्यश्व अधि विविधं प्राप्नुहि नत्सा
ननविविधात् त्रिंगच्छः ७ यंइंद्रेतिहेइंद्र ते त्वदर्थं स्तुतः अभिषुतः यः सोमः चमसेषु पात्रेषु तथा चमूषु ग्रहेषु अस्य तं सो
मं पिबन् पिबवहेइंद्र आइत्पिष सोमस्य त्वमेव ईश्वरो भवसि स्तलु यतः एवं ततः पिबेति समन्वयः ८ योअप्सितिहेइंद्र यः
ग्रहीतः सोमः चमूषु ग्रहेषु ददृशे अंतर्दृश्यते दृष्टांतः चंद्रमाः इव यथा चंद्रमा अप्सु अंतरिक्षे निर्मलतया दृश्यते तद्वत् पि
बव ९ यंतेश्येनइतिनिहेइंद्र श्येनः संसनीयः १ क्षीप क्षीरूपधारिणी गायत्री इत्यर्थः सप क्षीरजांसि अंतरिक्षादि लोक
स्थितान् सोमपालान् गंधर्वान् तिरः तिरस्कुर्वन् अस्पृतं शत्रुभिः स्पृष्टं संतं य सोमं ते त्वदर्थं पदा पद्भ्यां आ अभरत्॥ ॥
इतिषष्ठस्यषष्ठे द्वितीयो वर्गः॥ ॥देवानामितिनवर्चं तृतीयं सूक्तं कण्वः कुसीदी ऋषिः गायत्रीछंदः विश्वेदेवाः देवताः १
देवानामितिहे देवाः देवानां इत् युष्माकमेव महत् आ वृत्तं अवः पालनं य तत् विद्यते तत् वृष्णां कामानां वर्षितॄणां युष्माकं स्व
स्तं तू रक्षणं यजमानाः वयं आवृणीमहे सम्यगीतात् संभजामहे किमर्थं अस्मभ्यम् तये पालनाय २ तेनः संत्वितितें देवाः
वरुणः मित्रः अर्यमा अर्यमः सदा सर्वदा सर्वेषु नः अस्माकं युजः सहायाः संतु भवंतु यज्ञ परिसमापना तेषु सहाय्यं कुर्वंतु इ

त्यर्थः तत्तः प्रचेतसः प्रकृष्टज्ञानाः स्वधासः अस्मान् धनादिदानेन वर्धयितारश्च संतु भवतु ३ अतिनइति हे ऋतस्य स
त्यस्य रथ्यः नेतारो हे देवाः यूयं विष्पिता विततानि पुरूणि बहूनि शत्रुबलानि नः अस्मान् अतिपर्षथ अतिगमयत
पारं नयत दृष्टांतः नौभिर्यान यथा नाविकः अपः उदकानि नौभिः जनान् तीरं प्रापयति तद्वत् ४ वामंनइति हे अर्यमन्
देव वामं वननीयं संभजनीयं धनं नः अस्माकं अस्तु भवतु हे वरुण त्वां स्यं त्वां सनीयं वामं धनं अस्माकमस्तु कुतः स्थिरस्मा
त्कारणात् वयं वामं धनं युष्मान् आवृणीमहे याचामहे तस्मात् नो ऽस्त्विसाध्यास्ते ५ वामस्यहीति हे प्रचेत सः प्रकृष्ट
ज्ञानाः रिशादसः रिशतां शत्रूणां असितारः प्रक्षेप्तारो देवाः यूयं वामस्य धनस्य ईशानासः हि ईशाना एव भवथ तस्मात्
युष्मान् याचामहे इत्यर्थः ततो हे आदित्याः अदितेः पुत्राः देवाः इं एनं याचमानं मां तद्धनं न प्राप्नोतु यत् धनं अघस्य पाप
स्य संबंधि विद्यते॥ ॥इति षष्ठस्य षष्ठे तृतीयो वर्गः॥ ६॥ वयमिद्वइति हे सुदानवः शोभनदानाः हे देवाः क्षियंतः गृहेषु
अग्निहोत्रार्थं निवसंतः अध्वन् अध्वनि समिदाहरणार्थं यांतः गच्छंतो ऽपि वयं वः इत् युष्मान् एव वृधायहविर्भिः वर्ध
नाय आहूमहे आह्वयामः ७ अधिनइंद्रेति हे इंद्र हे विष्णो हे मरुतः अश्विना ०भौ देवाः सजात्यानां समानानां जातोभवाः
सजात्याः भ्रातृमित्रादयः तेषां एषां मध्येन अस्मान् अधिइतु यूयं स्व स्वतया अधिगच्छत ८ प्रभ्रातृत्वमिति हे सुदान
वः शोभनदानाः आदित्याः अथ अध अस्मत् प्रत्यागमनानंतरं समान्या सामान्येन पूर्वं सर्वेषां देवानां साहत्येन तता द्वि
ता द्विप्रकारेण वः मातुः अदितेः गर्भे संजातं यत् युष्माकं भ्रातृत्वं विद्यते तत् इदानीं वयं प्रभराहि उच्चारयामः ९ यूयं हि
ष्ठेति अर्धर्चः पूर्वः सिद्धः हे सुदानवः शोभनदानाः देवाः इंद्रज्येष्ठाः इंद्रो मुख्यो येषां ते तथोक्ताः सर्वे देवाः अभिद्यवः अ
भिगतदीप्तयः यूयं स्थ अस्मद्यज्ञे भवथ हि खलु अध पित् अथानंतरं इमे वः युष्मान् अहं स्तोमि उत अपि च चक्रे पुनः
पुनः स्तोमि इत्यर्थः॥ ॥इति षष्ठस्य षष्ठे चतुर्थो वर्गः॥ ॥प्रेष्ठंवइति नवर्चं चतुर्थं सूक्तं कवेः पुत्र उशना ऋषिः गायत्री

७२

471
1915

छंदः अग्निर्देवता १ प्रेष्ठं वइति हे यजमानाः प्रेष्ठं युष्माकं धनदानेन प्रियतमं अतिथिं अतिथिवत् पूज्यं मित्रमिव स
खायमिव प्रियं स्तोतुः प्रीणनकरं रथं न रथमिव वेद्यं वेदः धनं धने हितं तथा रथी रथेन धनं लभते तद्वत् स्तोतारः अनेन
धनं लभंते तादृशं धनलाभकरणं अग्निं वः युष्मत्कर्मसिध्यर्थं स्तौषकः उशनाः स्तोमि २ कविमिवेति अध अपि च देवा
सो देवाः इंद्रादयः यमग्निं मर्त्येषु मनुष्येषु द्विता द्विधान्यादधुः गार्हपत्याहवनीयात्मकत्वेन द्विधा निहितवंतः दृष्टांतः कवि
मिव प्रचेतसं प्रकृष्टज्ञानं क्रांतकर्माणं पुरुषं यथा द्विधा कार्यद्वयो नियोजयति तद्वत् ३ त्वंपविष्ठेति हे यविष्ठ युवतम इं
द्र त्वं दाशुषः हविर्दत्तवतः नॄन् यजमानान् पाहि धनादिदानेन रक्ष किं च गिरः त्वद्विषयाः स्तुतीः शृणुधि शृणु उत अपि च
त्मना आत्मनैव स्वयमेव तोकं अस्मदीयं तनयं पुत्रं रक्ष पालय ४ कयातेइति हे अंगिरः अंगिरसां वरिष्ठ उर्जो नपात् अ
न्नस्य पुत्र देव द्योतमानाग्ने वराय सर्वैः वरणीयाय मन्यवे त्वा अग्नेः अतिमन्यमानाय ते तुभ्यं कया कीदृश्या वाचा उपस्तुति
उप स्तोत्रं अरं भरं यं त्वं महान् खलु अहं अल्पः तदर्थं स्तुतिं कुर्यामिति ऋषिः अग्निं प्रतिवदति ५ दाशेमकस्येति ऋ
षिः अग्निं प्रति ब्रूते हे सहसो यहो बलस्य पुत्र अग्ने कस्य कीदृशस्य यज्ञस्य यज्ञवतः यजमानस्य मनसा युक्ताः संतः हवी
षि तुभ्यं वयं दाशेम प्रयच्छेम किं च तुभ्यं इदं नमः नमस्कारं कत् कदा वोचे अहं वदामि उ इति प्रश्नः॥ ॥इति षष्ठस्य षष्ठे पंच
मो वर्गः॥ ६॥ अधात्वंहीति हे अग्ने अध अनंतरं त्वं हि इत्थमेव अस्मभ्यं करः कुरु हे दीत्यर्थः किं नः अस्मदीयाः गिरः त्वद्विषयाः
विश्वाः सर्वाः स्तुतीः एवं कुरु यासु स्तुतीः सुक्षितीः पुत्रपौत्रादियुक्ताः तथा वाजद्रविणसः अन्नयुक्ताः धनयुक्ताः च कुरु अस्माभिः स्तु
तः सन् पुत्रान्न धनादीनि देहीत्यर्थः ७ कस्यनूनमिति हे दंपते यदा गार्हपत्ये वर्तसे तदा जाया यत्न स्वरूपाणि तस्मात् दं
पति शब्देनाग्निरभिधीयते तथा विधहे अग्ने नूनं इदानीं कस्य कीदृशस्य यजनस्य परिणसः बहु निधयः कर्माणि जिन्वसि
प्रीणयसि यस्य तेन तव संबंधिन्यः गिरः स्तुतयः गोसातौ गोसातौ गवां लाभे भवंति खलु तस्मात् त्वं कुत्र तिष्ठसि अस्माकं इदा

मा·प·
७२

नीगंवेशाप्रवर्तते ८ तंमर्जयंतेति स्कऋतुंशोभनप्रज्ञंआजिषु संग्रामेषुपुरोयावानंशत्रुहननार्थपुरतोगंतारंवाजिनं
बलवंतंतादृशमग्निंयजमानाःस्वेषुआलयेषुक्षयेषुगृहेषु मर्जयंतनिर्मथितंअग्निंअलंकुर्वंतिपरिचरंतीतियावत्
९ क्षेतिक्षेमेभिरितिहेअग्नेयःमनुष्यःसाधुभिःक्षेमेभिःपालनैःसहक्षेति स्वगृहे निवसतितथायंजनंनकिःनकेच
नघ्नंतिनहिंसंतिहंतिशत्रून्स्वयमेवसमनुष्यःतवस्तोतारवलु ततःसःस्तोतासुवीरःशोभनपुत्रादियुक्तःसन्एधते
आलयेगृहेधनादिभिःवर्धते॥ ॥इतिषष्ठषष्ठेषष्ठोवर्गः॥ ॥आमेहवमितिनवर्चंपंचमंसूक्तंकृष्णोनामांगिरसःऋ
षिःगायत्रीछंदःअश्विनौदेवते १ आमेहवमिति हेनासत्या सत्यवंतौअश्विना॰नौयुवंयुवांमेमदीयंहवंआह्वानंश्रुत्वा
मध्वःमदकरस्य सोमस्यपीतयेपानायतदर्थंआगच्छतं २ इमंमेस्तोममिति हेअश्विना॰नौमेमदीयंइमंस्तोमंस्तोत्रंकिंच
मेमदीयंइमंइदंहवंआह्वानंश्रृणुतंमध्व॰ ३ अयंवांकृष्णइति हेवाजिनीवसूअन्नयुक्तधनौअश्विना॰नौअयंकृ
ष्णःऋषिःवांयुवांहवनेस्तुतिभिःआह्वयतिकिमर्थंमध्वः ४ श्रृणुतंजरितुरितिहेनरानेतारौअश्विनौजरितुःस्तोतुःस्तुवतः
स्तोत्रंकुर्वतःकृष्णस्यएतन्नामकस्यऋषेःसंबंधिहवंयुष्मद्विषयंआह्वानंश्रृणुतंमध्वः॰ ५ छर्दिर्यंतमितिहेनराअश्विनौवि
प्रायमेधाविनेस्तुवतेतवस्तोत्रंकुर्वतेकृष्णायऋषयेअदाभ्यंपरैःअहिंस्यंछर्दिःगृहंयंतंप्रयच्छतंमध्व॰॥ ॥इतिषष्ठस्य
षष्ठेसप्तमोवर्गः॥ ६ ॥गच्छतंदाशुषइति हेअश्विना॰नौइत्थाइत्थंअनेनप्रकारेणस्तुवतःयुवयोःस्तोत्रंकुर्वतःदाशु
षःहवींषिदत्तवतोयजमानस्यगृहंप्रतिगच्छतंमध्व॰ युंजाथामितिहेवृषण्वसूवर्षणधनौअश्विनौयुवांवीत्वंगंवाद्रुग
दृढांगोपेतेस्वरथेरासभंएतन्नामकंअश्वंयुंजाथांस्कयोजयंथाकिमर्थंमध्व॰८ त्रिवंधुरेणेतिहेअश्विना॰नौत्रिवंधुरेण
त्रिफलकासंबद्धेनत्रिवृतात्रिकोणेनरथेनअस्मद्यज्ञंप्रतिआगतंआगच्छतं॰९ नूमेगिरइतिहेनासत्याअसत्यरहितौ
अश्विना॰नौमेमदीयाःगिरःस्तुतिलक्षणावाचःप्रतियुवंयुवांतुक्षिप्रंप्रावतंप्रकर्षेणगच्छतंमध्वः॰॥ ॥इतिषष्ठस्यषष्ठेः ७२

473
1915

ष्टमोवर्गः उभाहिदस्रेतिपंचर्चंषष्ठंसूक्तंविश्वकोनामकृष्णपुत्रःकृष्णएववाऋषिःजगतीछंदःअश्विनौदेवते १
उभाहिदस्रेति हेदस्रौदर्शनीयौभिषजादेवानांवैद्यौमयोभुवासुखस्यभावयितारौउभापरस्परंद्वित्वसंख्यापूरकौउभा
उभौद्वौयुवांदक्षस्यएतन्नामकस्यप्रजापतेःवचसःस्तुतेःसंबंधिनौबभूवथुःहिप्रसिद्धौपुरायुवांशक्तेणस्ताविद्यायाःखलु
तानादृशौवांयुवांविश्वकःएतन्नामकःऋषिःतनूकृथे तनोतिकुलमितितनूःपुत्रःतस्यविष्णोःनिमित्तंहवतेस्तुतिभिः
आह्वयतितस्मात्नःअस्माकंसख्यानिपथ्यथ्यतयाआत्तातिसखित्वानिमाविपौष्टंमापृथक्कुरुतंकिंचयुवांमुमोचतं
अस्मान्आगंतुंरथेस्थित्वाअश्वप्ररोगेनमुंचतंअत्रविष्णुनामानंपुत्रमुद्दिश्यतस्यपिताविश्वकःयुवांआह्वयतीतिआ
त्मानमाह २ कथानूनमितिहेअश्विनौविमनाःएतन्नामकःऋषिःनूनंपुराकथाकथंवायुवांउपस्तवत्कथंउपास्तोत्ते
नस्तुतोयुवंयुवांस्मःइष्टयेवस्ववसीयःप्रशस्तधनमभिलषितस्यइष्टयेअभिगमनायधियंबुद्धिंविमनाःविमनेसेददथुःअ
थायांखलुनावांतादृशौयुवांविश्वकः॰ ३ युवंहिष्मेति हेपुरुभुजापुरुभुजौपुरूणांबहूनांधनादिदानेनभोजयितारौअश्वि
नौयुवंहिष्मयुवामेवइमंएधतुइमंधनादिवृद्धिंविष्णांवेएतन्नामकेममपुत्रेददथुःदत्तंकिमर्थंवस्यइष्टयेवसीयसःप्रशस्त
धनस्यइष्टयेइच्छांपूरयितुंतावां॰ ४ उतत्यंवीरमितिहेअश्विनौउतापिचवीरंकर्मणिसमर्थंधनसाधनानांसंभक्तारंऋजी
षिणंउपार्जितःअभिषुतसोमःतद्वतंदूरएवसंतंभवंतंविनष्टमिवस्थितंविष्ण्वाप्यंअवसेअस्माकंरक्षणायहवामहेआह्वया
मःपुत्रोहिपितरंरक्षतेकिंचयस्यपुत्रस्यस्तुमतिःशोभनास्तुतिःस्वादिष्ठास्वादुतमाअतिशयेनदेवानांस्वादुकारिणीत्स्यर्थःदृ
ष्टांतःपितुर्यथापितुःविश्वकस्यस्तुतिर्यथादेवानांप्रीतिकरीतद्वत्तस्मात्तंआह्वयामइतिशेषःमानोविपौष्टंसख्यास्तमोच
तं ५ ऋतेनदेवइति हेअश्विनौदेवःद्योतमानःसविताएतन्नामकःदेवःऋतेनसत्येनशमायतेसायंकालेस्वकिरणसमूहं
शमयतितनोनंतरंस्वचसविताऋतस्यसत्यस्यशृंगंअग्रंउर्वियाउरुविस्तीर्णंयथाभवतितथाप्रातःकालेविपप्रथेविशेषेण

प्रथयति सर्वतो विस्तारयति किंच घृतं अन्यतः घृतनामि क्षरतः संयुयुत्सोः शत्रोः मध्ये वित्तं महदपि बलं कृतं सत्यं स साहस्व
यमेवाभिभवति मानी॰॥ ॥इति षष्ठस्य षष्ठे नवमो वर्गः॥ ॥द्युम्नी वामिति षड्चं सप्तमं सूक्तं वसिष्ठपुत्रः द्युम्नीक ऋषिः
आंगिरसः प्रियमेधो वा अत्र पक्षे वा शब्दात् यदा उ भावपि तस्यां तौ तदा प्रकृत आंगिरस कृष्ण एव ऋषिः अयुजो बृहत्यः युजः
सतोबृहत्यः अश्विनौ देवते १ द्युम्नी वामिति हे अश्विना॰ नौ वां युवयोः स्तोमः द्युम्नी अन्नवान् युष्मत्कृतो कृतार्थानाम्भावमेव
सतो बृहत्यः अश्विनौ देवते ... तस्मात् युवां अस्मदीयं य
ति किं तु पुनर्वर्धनि दृष्टान्तः कि विर्नयथा कूपः सेक उदकसेचनवृष्टौ भवं स्तानाम्त्योदकः भवति तस्मात् युवां अस्मदीयं य
ज्ञं प्रति आगतं स्तोत्राणि श्रोतुं आगच्छतं हे नरा नरौ अश्विनौ सायं स्तोतादिविधौ नमाने अस्मिन् यज्ञे सुतस्याभिषुतस्य मध्वः
मदकरस्य सोमस्य प्रियः भवति तत् नः तेन सुतं सोमं पातं पिबतं दृष्टान्तः गौरा इव यथा गौरो मृगो इरिणे तृणकादिके उदकं पि
बतः तद्वत् २ पिबतं घर्ममिति हे अश्विना॰ नौ मधुमन्तं मदवन्तं घर्मं पात्रेषु रक्षन्तं सोमं पिबतं हे नरा नेतारौ आ अश्विनौ बर्हिः
बर्हिषि यज्ञे आसीदतं उपविशतं किंच मनुषो मनुष्यस्य दुरोणे गृहे गते अस्मिन् देवयजने मंदसाना सोमपानेन मोदमानौ
नौ तो पृ वक्ति लक्षणा युवां वेदसा पुरोडाशादि लक्षणेन हविषा सह वयः सोमलक्षणमन्नं आ निपातं अगस्ति पिबतं ३ आ वां वि
श्वाभिरिति हे अश्विनौ प्रियमेधाः यज्ञा प्रियतमाः यजमानाः विश्वाभिः ऊतिभिः सर्वैर्याचनैः सहिताः अहूषत अभि
लषितदानाय वा आह्वयंति तौ नो युवां वृक्तबर्हिषः आस्तरणार्थं छिन्नबर्हिषः यष्टुः संबंधि जुष्टं सर्वैः देवैः सेवितं यज्ञं यजना
यं हविः दिविष्टिषु वर्तिः गृहं प्रति वर्तते तदुपाया तं हविः स्वीकरणार्थं आगच्छतं ४ पिबतं सोममिति हे अश्विना॰ नौ मधुमन्तं
रसवन्तं सोमं युवां पिबतं ततो बर्हिः बर्हिषि यज्ञे सुतमत्र आसनं सीदतं पश्चात् वावृधानौ सोमपानेन वृद्धौ तौ नो युवां दिवः द्यु
लोकात् स्तुतिं अस्माभिः क्रियमाणां शोभनां स्तुतिं प्रतिगंतं उपागच्छतं दृष्टान्तः गौरा इव यथा गौरमृगौ अस्मादृशातद्
रिणं तृणकादिकं प्रति आगच्छतः तद्वत् ५ आ नूनमिति हे अश्विना॰ नौ युवां पृषितप्सुभिः पृषद् इति रूपनाम पृषितैः स्तैरनसव

नपूरणपुष्टिस्निग्धरूपैः दीप्तैः रूपैः इत्यर्थः तादृशैः शीघ्रगामिभिः अश्वैः सह नूनं इदानीं आ यातं अस्मदीयं यज्ञं प्रति अगच्छतं हे द
स्रा दर्शनीयौ हिरण्यवर्तिनी हिरण्मयरथौ शुभस्पती उदकस्य पालयितारौ ऋतावृधा सत्यस्य वर्धयितारौ अश्विनौ युवां शीघ्र
मागत्य सोमं पातं पिबतं ६ वयं हि वामिति हे अश्विना॰ नौ विपन्यवः स्तोतारः विप्रासः मेधाविनो वयं वाजसातये अन्नलाभा
य वां हि युवामेव हवामहे स्तुतिभिः आह्वयामः ततो वलावलानं कुशलगमनं कुशलगमनशीलो पुरुदंससा बहुकर्माणौ ता
तौ युवां धिया अस्मदीयया स्तुत्या आहुतौ ऋष्टौ क्षिप्रं अस्मभ्यं धनादिनानाय आगतं आगच्छतं॥ ॥इति षष्ठस्य षष्ठे दशमो व
र्गः॥ ॥तं वो दस्ममिति षड्चं अष्टमं सूक्तं गोतमः नोधा ऋषिः प्रगाथः इंद्रो देवता १ तं वो दस्ममिति हे ऋत्विग्यजमानाः वः
युष्मदर्थं दस्मं दर्शनीयं ऋतीषहं ऋतयः शत्रवः तेषामभिभवितारं मदे हर्षे वसोः वासयितुः तादृशस्यांधसः सोमलक्षणस्यान्न
स्य पानेन मंदानं मंदमानं मोदमानं तं इंद्रं गीर्भिः स्तुतिलक्षणाभिः वाग्भिः अभिनवामहे अभिष्टुमः कुत्र स्व स्वसरेषु स्वसराणि
अहानि इति यास्कः दृष्टान्तः वत्सं न यथा धेनवः नवस्रुतिकाः गावः स्वसरेषु गोष्ठेषु वत्समभिलक्ष्य शब्दयंति तद्वत् २ द्युक्षं सु
दानुमिति द्युक्षं दीप्तानां निवासस्थानं सुदानुं शोभनदानं तविषीभिः बलैः आवृतं आच्छादितं आवरणे दृष्टान्तः गिरिं न शिलोच्च
यमिव स्थितं पुनः कीदृशं पुरुभोजसं सोमादिहविःप्रदानेन बहुभिः यजमानैः भोजयितव्यं क्षुमंतं शब्दवंतं शतिनं सहस्रि
णं शतसहस्रसंख्याकधनयुक्तं गोमंतं गवादियुक्तं इंद्रं वाजं अन्नं मक्षु शीघ्रं ईमहे याचामहे ३ न त्वा बृहंत इति हे इंद्र बृ
हंतः बलेन महांतः अत एव वीळवः सर्वतो दृढा अपि अद्रयः पर्वताः त्वां न वरंते बलेन निवारयंति स्तुवते त्वद्विषयं स्तोत्रं
कुर्वते मावते मत्सदृशाय स्तोत्रे यद् वसु यद्धनं दित्सति त्वं दातुमिच्छसि तत् वदेयं तत्धनं न किः न कश्चित् आमिनाति आमि
मुंस्य नहिनस्ति ४ योद्धासीति हे इंद्र क्रत्वा वृत्रहननादि कर्मणा शवसा आत्मीयेन बलेन योद्धा शत्रूणां संप्रहारकोऽसि उ
नापि च सदृशस्य नास्य कीयेन कर्मणा मज्मना बलेन विश्वा जाता सर्वाणि भूतजातानि अभिभवसि एतादृशं त्वां अर्कं अर्चनीयः

475
1913

अयं मंत्रः उ तयि रक्षणाय ववर्तयति आत्माभिमुखं करोति। स्यर्थः यं त्वां गोतमाः गोतमपुत्राः नोधः प्रभृतयः अजीजनन्
स्वयज्ञे प्रादुरभिरयन् तं त्वां अयं मंत्रः आवर्तयति ५ प्र हि रिरिक्षइति हे इंद्र दिवः द्युलोकस्य परि अंतेभ्यः ओजसा हि स्व
बलेनैव प्र रिरिक्षे प्रकर्षेण अतिरिक्तो भवसि किंच हे इंद्र पार्थिवं पृथिव्यां भवं रजः लोकं मह्ना स्वशरीरेण न परिविव्यावि
न व्याप्नोति एवंभूतः सन् अस्माकं स्वधा अन्नं अनुवक्षि अनुवोढुमिच्छ ६ न किः परिष्टिरिति हे मघवन् धनवन् इं
द्र ते तव मघस्य मंहनीयस्य धनस्य परिष्टिः परिबाधकः नकिः न कश्चिदस्ति यत् यदा दाशुषे हविर्दत्तवते यजमानाय द
दाश्यसि धनं प्रयच्छसि तदा तस्य निरोधको नास्ति स्यर्थः तथा सति वाजिताध नानां स्तोतृभ्यः प्रेरयिता अतएव मंहिष्ठः दातृ
तमः सत्वं अस्माकं संबंधि उक्थस्य स्तोत्रं वाजसातये अन्नलाभाय तदर्थं क्रियमाणानि बोधि बुध्यस्व स्तोत्रेण स्तुतः सन्
अस्मभ्यं अन्नादिकं प्रयच्छेदिति शेषः॥ ॥इति षष्ठस्य षष्ठे एकादशो वर्गः॥ ॥बृहदिंद्राये ति सप्तर्चं नवमं सूक्तं नमेधपुरु
मेधौ ऋषी नौ आंगिरसौ आदितः द्वौ प्रगाथौ पंचमी षष्ठी अनुष्टुभौ सप्तमी बृहती इंद्रो देवता। १ बृहदिंद्रायेति हे मरुतः मित
भाषिणः स्तोतारः वृत्रहंतमं अतिशयेन पापनाशनं बृहत्साम इंद्राय इंद्रार्थं गायत अस्मदीय यज्ञे गानं कुरुत ऋताव्धः ऋत
स्य वर्धकाः विश्वेदेवाः देवं देवनशीलं जागृविं सर्वेषां जागरणशीलं ज्योतिः सूर्यं येन साम्ना अजनयन् उत्पादयन् देवा यद्
द्रायं नित्साम गायतेति २ अपाधमदिति अशस्तिहा स्तोत्रशंसनरहितानां हंता इंद्रः अभिशस्तीः अभितो हिंसायेषां ते
तादृशान् अपाधमत् अपागमयत् अथ शत्रुहननानंतरं इंद्रः द्युम्नी सर्वत्र द्योतमानयशोयुक्तः आ अभरत् सर्वतः प्र
सिद्धो भवत् प्रत्यक्षेहे बृहद्भानो बृहणशालि ते अस्का मरुद्गणमरुतां सप्तगणाः यस्य तादृशे इंद्रे देवाः सर्वे सख्याय आत्म
नः सखिभावाय ते त्वां यमिरे नियच्छंति ३ प्र व इंद्रायेति हे मरुतः मितराविणः स्तोतारः वयूयं बृहते महते इंद्राय ब्रह्मसा
मलक्षणं स्तोत्रं प्रार्चत प्रोच्चारयत ततो वृत्रहा वृत्रस्य हंता शतक्रतुः बहुकर्मा इंद्रः शतपर्वणा शतसंख्याकधारेण वज्रेण

477
1915

आर्पुधनवृत्रं अपामावरकं असुरं हनति युष्माभिः अभिष्टुतः सन् हंतु ४ अभि प्र भरेति हे धृषत् मनः शत्रूणां ध
र्षणशीलमनस्क इंद्र ते चित् तवैव बृहत् महत् श्रवः अन्नं असत् अस्ति तदन्नं धृषता धृष्टेन मनसा युक्तः सन् अस्मभ्यं अ
भिप्रभर आभिमुख्येन प्रकर्षेण देहि हे इंद्र मातरः अस्माकं उत्पादनहेतुत्वात् मातृभूताः आपः जवसा वेगेन व्यर्षंतु वि
विधं भूमिं प्रतिगच्छंतिक यं वृत्रं अपां आवरितारं शत्रुं मेघं हनः जहितेन मेघभेदनेन उदकानि विगच्छंतु पुनः रपि स्वः
सर्वभूतजातं जय ५ यज्जायथाइति हे अपूर्व्य सर्वेभ्यो व्यतिरिक्तेन पूर्व्येण वर्जित मघवन् धनवन् इंद्र वृत्रहत्याय वृत्रा
सुरहननाय पत् यदा त्वं जायथाः उत्पन्नः असि तत् तदानीमेव पृथिवीं प्रथमानां अप्रथयः प्रसिद्धां दृढां अकरोः उतापि
च तत् तदानीमेव द्यां द्युलोकं अंतरिक्षं अस्तभ्नाः निरुद्धामकार्षीः ६ तत्ते यज्ञ इति हे इंद्र यत् यदा त्वं अजायथाः तत्
तदानीं तत्वदर्थं यज्ञः अग्निष्टोमादिः अजायत सोमपानार्थं अभूत् उतापि च तत् तदानीं हस्कृतिः हर्षस्य सूचकः अर्चनी
यः मंत्रोपि अजायत किंच तदा यत् जातं भूतजातं यत् च जन्तं जनितव्यं विश्वमस्ति तत् सर्वं अभिभूरसि त्वं महिम्ना अभि
भूतवानसि ७ आमासु पक्वमिति हे इंद्र आमासु अपक्वासु पक्वं ऐरयः प्रेरयः अश्वं किंच दिवि द्युलोके सूर्यं आरोहयः अं
गिरसां गाः दर्शनाय हे स्तोतारः ऋक्वभिः ऋग्भिः शोभनाभिः स्तुतिभिः इंद्रं प्रवर्धयत सर्पः हृष्टांतः धर्मन्वयथा घर्मदीपनशी
लं प्र वर्ग्यं साम साम भिः यथा तपतं तपति तद्वत् ततो गिर्वणसे गीर्भिः वननीयाय इंद्राय जुष्टं प्रीतिकरं बृहत् साम गायत
॥ ॥इति षष्ठस्य षष्ठे द्वादशो वर्गः॥ ॥आनो विश्वास्विति षड्चं दशमं सूक्तं नृमेधपुरुमेधौ ऋषी विषमसंख्याकाः बृह
त्यः इंद्रो देवता १ आनो विश्वास्विति विश्वासु सर्वासु समत्सु अस्कृ युद्धेषु हव्यः सर्वैः देवैः आत्मरक्षणार्थं आह्वातव्यः
एतादृशः इंद्रः नः अस्माकं ब्रह्माणि स्तोत्राणि उपाभूषतु उदकं अनुभावयतु नथास वनानि प्रातः सवादीनि त्रीणि भूषतु कीं
दृशः इंद्रः वृत्रहा वृत्रहा सुरस्य हंता परम ज्याः युद्धेषु शत्रुहननाय परमा अविनश्वरा ज्या मौर्वी यस्य स तथोक्तः ऋचा

भा.ष.
७६.

षमः स्तुतिभिः अभिमुखीकरणीयः एतादृक् इंद्रः स्तोत्राणि भूषति ति २ त्वं दाता ति हे इंद्र प्रथमः सर्वेषां मुख्यस्त्वं राधसां ध
नानां दाता ऽसि तथा ईशान कृत् तवस्तोतॄन् ऐश्वर्ययुक्तान् कुर्वन् त्वं सत्यः सत्यकर्मासि यस्मादेवं तस्मात् वयं तुविद्यु
म्नस्य बहुधनवतः शवसः बलस्य पुत्रस्य अत एव महः महतस्तव युज्यायोग्यानि धनानि आवृणीमहे संभजामहे ३
ब्रह्मा त इंद्रेति हे गिर्वणः गीर्भिः वननीयेंद्र अनतिद्भुता सर्वान् अतिक्रम्य न भवंति यथार्थभूतान् इत्यर्थः तादृशानि
यानि ब्रह्माणि स्तोत्राणि त्वदर्थं अस्माभिः क्रियंते हे हर्यश्व हरितअश्ववन् इंद्र यो जनायो जनानि तव सप्रस्यथो
जनशीलानि तानि इमा इमानि स्तोत्राणि जुषस्व सेवस्व किंचहे इंद्र त्वदर्थं यानि स्तोत्राणि अमन्महि वयं उच्चाराम ता
नि सर्वाणि सेवस्व ४ त्वं हि सत्य इति हे मघवन् धनवन् इंद्र सत्यः सत्यकर्मा त्वं मेव अनानतः केषामपि प्रह्वः सन् भूरि भू
रिणि वृत्राण्यक्षांसि न्यंजसे न्यक्करोषि हि अवधारणे हे शविष्ठ बलेन प्रवृद्ध तमवज्रहस्त इंद्र सः तादृशस्त्वं दाशुषे तुभ्यं
हविर्दत्तवते यजमानाय रयिं धनादिकं अर्वाचं आभिमुखं यथा गच्छति तथा त्वं आकृधि समं तात् कुरु ५ त्वमिंद्र यशा इति
हे शवसस्पते बलस्य पालयितरिंद्र ऋजीषी उपार्जितः अभिषुतः सोमः तद्वन् त्वं यशाः यशस्वी असि कथं अप्रतीनि वलिभिः
रप्रतिगतानि अत एवानुत्ता अन्यैर्नोनुमात्राण्यानि वृत्राणि रक्षांसि त्वमेकः इत् असहायः एव चर्षणीधृता अस्करादिहन
नद्वारेण मनुष्याणां धारकेण वज्रेण हंसि संप्रहरसि ६ तमु त्वेति हि असुर बलवन् इंद्र यः रक्तगुणास्तितं प्रचेतसं प्रकृ
ष्टज्ञानं त्वा उ इत्यवधारणे पित्र्यं वसोपिकं त्वामिव राधः धर्मादिसाधनं धनं नूनमीदानीमीमहे वयं याचामहे तत्र दृष्टांतः
भागमिव यथा कश्चित् पितृभागं प्रतं धनं याचति तद्वत् इंद्रः यजमानेभ्यः स्तोतृभ्यश्च प्रयच्छसि वत्स्माद्भाग प्रतं धनं यथा
रोवयं याचामहे महीव कृत्तिर्यद्वा ज्ञानेन वलिकृतिः महती कृत्तिरिव तवशरणा गृहं धुलिके वर्तते किं च ते तव स्तम्भ हस्तानि स्कन्धा
नि स्करवाणि नः अस्मान् प्राश्नवत् प्रकर्षेण अश्नुवंतु व्याप्नुवंतु ॥ ॥इति षष्ठस्य पंचत्रयोदशो वर्गः॥ ॥कन्या वारिति सप्त ७६.

479
1915

र्चमेकादशं सूक्तं अत्रेः पुत्री अपाला ख्या त्वग्दोषपरिहाराय अनेन सूक्तेन इंद्रं स्तुतवती अतः सैव ऋषिः प्रथमा द्वितीया पंक्तिः
शिष्टा अनुष्टुभः इंद्रो देवता १ कन्या वारिति वाः उदकं प्रति अवायती ग्राहार्थं अभ्यवगच्छंती कन्या अपाला नाम स्त्री स्रुतौ सोममा
र्गे सोमम पि अविदत् अलभत सोमं अस्तं गृहं प्रति भरंती आहरंती सा सोमं अत्र वीत्रु हे सोमलतां इंद्राय सुनवै मम दं
तैरेव अभिषुणवै पुनर्दृ सोमलतां शक्राय समर्थयिंद्राय सुनवै इदानीमिवाभिषवं करवै सोमभक्षणकाले दंतध्वनिं ग्रा
वध्वनि मितिमत्वा इंद्रः तामगमत् २ असौ य इति सा वाक् मंत्र वीतरु इंद्र वीरकः वीरः समर्थः त्वं यः असौ त्वं विचाकशत्
अत्यर्थं दीयमानः सन् गृहं गृहं यजमानगृहं प्रति सोमपानाय त्वं एषि गच्छसि अत स्त्वं अत्रापि तं प्रसक्तं मम दंतैरभिषु
तं इमं सोमं पिब कीदृशं धानावंतं भ्रष्टयवं करंभिणं सक्तुमंतं अपूपवंतं पुरोडाशादि सहितं उक्थिनं स्तोत्रादिकं एतादृशं सो
मं अत्रैव पिबति सा सोमेन सह धानादीन् अविदयत् स्तोत्रं च काषीइत्यर्थः ३ आचन त्वेति पुनरपि सा तमना हत्याह
हे इंद्र चन निपातसमुदायः अवधारणअर्थः त्वां आचिकित्साम् शातुमिच्छाम एव अधिचन त्वानेमसि गृह भागतं त्वां
इंद्रइति जानीम एव इतिवा अपलानु मिंद्र मुक्ता स्वास्य स्थितं सोमं प्रत्याह हे इंदो क्षरणशील सोम अस्मे आगताये द्रायतद
र्थं पूर्वं शनैरिव मंदं मंदमेव ततः शनैरिव क्षिप्रमेव त्वं परिस्रवमदाय दृब्धाभिः अभिषूयमाणः सन् परितः क्षर इति ४ कु
विच्छकदिति सोइंद्रः कुवित् बहुवारं नः अस्मान् संपीतवानिंद्रो स्मान्वकरोति त्याह सः कृत् शक्तान्समर्थान् करोतु किंच
कुवित् बहुत्वा स्मभ्यं करत् करोतु किंच वस्यसः प्रशस्ताः करत् करोतु इदानीं आत्रेयी अहमेवं करिष्या मीति वदति पूर्वंकु
वित् बहुपतिद्विषः त्वद्दिपात पतिभिः भर्तृभिः बहुवारं द्विष्टाः अपयतीः पतिभ्यः सकाशात् गच्छंत्यो वयं केश्चिदपि अनूय
मानाः सत्यः संप्रति इंद्रेण सह संगमामहे संगच्छामहे सर्वत्र पूजार्थ बहुवचनं संगमशब्दे नेंद्रो ऽपालां चकमत् निति ५
इमानि त्रीणीति इंद्रेण किं कामयसे तद्दास्यामीति उक्ता सा वरमनया प्रार्थयते हे इंद्र इमानि त्रीणि विष्टपानि स्थानानि संति

भा॰५॰ ७८
तानित्राणि – विरोहय उत्सादय – कानि त – स्यममपितुः शिरसवर्जितं शिरः खलतिमित्यर्थः तत्रापगमयरोमवंतं कुर्वित्यर्थः
उर्वरां तत्स्य ऊषरं क्षेत्रं सर्वसस्याढ्यं कुरु आत् अनंतरं मेम – उपोदरे उदरसमीपेयदिदं स्थानं गुत्स्य मित्यर्थः तत्र त्वग्दोषे
सति असंजातरोमकं तद् पित्वग्दोषपरि – णरोमयुक्तं कुरु एतानित्राणिस्थानानि ६ असौ चयेति नः अस्माकं पितुः अ
सौ च या उर्वरा यदिदं ऊषरं क्षेत्रमस्ति आत् अनंतरं ममइमां तन्वं इदं त्वग्दोषदुष्टं गुत्स्य स्थानं अथो अपि च ततस्य तातस्य
यच्छिरो रोमावर्जितमस्ति सर्वाः सर्वाणि ता तानित्राणिस्थानानि रोमशानि रोमशानि कृधि कुरु ७ खेरथस्येति हे शतक्रतो ब
हुप्रज्ञ इंद्र रथस्य स्वकीयस्य खे छिद्रे तर छिद्रे तथा अनसः शकटस्य खे अल्पे छिद्रे युगस्य खे च अस्यतर सूक्ष्मे छिद्रे रथशा
कटयुगानां छिद्रेषु त्वग्दोषपरिहारायत्रिः त्रिवारं पूत्वा शोधयित्वा तन्नोपलां एतन्नामिकां अत्रिसुतामपालां आदिनीं सूर्यत्व
चं सूर्यसमानत्वचं अकृणोः अकरोः॥ ॥इति षष्ठस्य षष्ठे चतुर्दशो वर्गः॥ ॥पांतमा वइति त्रयस्त्रिंशदृचं द्वादशं सूक्तं आं
गिरसः श्रुतकक्षः ऋषिः आद्या अनुष्टुप् शिष्टा गायत्र्यः इंद्रो देवता १ पांतमावइतिहे ऋत्विजः वः युष्मदीयं अंधसः सोमल
क्षणमन्नं आपांतं आभिमुख्येन पिब – एतादृशमिंद्रं प्रगायत प्रकर्षेण अभिष्टुत कीदृशं विश्वसहं सर्वेषां शत्रूणामभि
भवितारं अत एव शतक्रतुं बहुविधप्रज्ञानं चर्षणीनां मनुष्याणां मंहिष्ठं धनस्य दातृतमं इंद्रं गायतेति समन्वयः २ पुरुहू
तमितिहे ऋत्विग्यजमानाः पुरुहूतं बहुभिराहूतं पुरुष्टुतं बहुभिः स्तुतं अत एव गाथान्यं गातव्यं सनश्रुतं सनातनतया प्रसि
द्धं एवंविधं देवं इंद्रं यूयं अवीतन आप्यात ३ इंद्र इन्नइतिइंद्र इत्पूर्वोक्तिलक्षणं इंद्र एव नः अस्मभ्यं महानां महतां वाजानां
अन्नानां यंता प्रभवतु कीदृशः नृतुः सर्वस्य नर्तयिता अत एव महान् स इंद्रः अभितु अभिगतं जानुकं अस्मभ्यं आयमत् द
दातु ४ अपादु शिप्रीतिशीप्रोर्ष्णीष्णस्तुः स इंद्र एव प्रहोषिणः प्रकर्षेण देवान् हविर्भिः जुहुतः सुदक्षस्य एतन्नामकस्य
ऋषिसंबंधियवाशिरः यवैः सहपक्वं इंद्रः इंद्रोः सवनैः पात्रेषु क्षरंतं अंधसः सोमलक्षणं अन्नं अपात् अपिबत् उ अवधार ७८

481
1916

णे ५ तम्वभिप्रेतिहे ऋत्विजः तमु तमेवेंद्रं अभि आभिमुख्येन प्रार्चत प्रकर्षेण स्तुत किमर्थं सोमस्य पीतये सोमपानाय त
दित्व त सोमपानमेव अस्य इंद्रस्य वर्धनं हि वर्धकं भवति खलु तस्मात् सोमपानं अरुषयि प्रार्चत॥ ॥इति षष्ठस्य षष्ठे पंच
दशो वर्गः॥ ६॥ अस्य पीत्वेतिदेवः द्योतमानः इंद्रः अस्यास्माभिः दीयमानस्य सोमस्य पानं आत्तेन ओजसा बलेन विश्वा भुवना
नि सर्वाणि भुवनानि भूतजातानि अभिभुवति ७ त्यमु व इतिहे स्तोतारः सत्रासहं बहूनामभिभवितारं वः युष्मदीयेषु विश्वा
सु गीर्षु सर्वेषु स्तोत्रेषु आयतं विस्तृतं सर्वत्रेंद्र एव स्तूयते तस्मात् तेषु विततं स्तुतं तमेवेंद्रं उ तये अस्मद्रक्षणाय आ च्यावयसि
त्वदीयैः स्तोत्रैः यज्ञं प्रति आभिमुख्येनागमय ८ युध्मं सत्वानमिति युध्मं शत्रूणां संप्रहारकं सत्वानं अत एव अनर्वाणं अन्यैः अनभि
गतं तस्मात् अनपच्युतं संग्रामेषु शत्रुभिः अहिंसितं सोमपां सोमस्य पातारं अस्य सोमस्य मदे सति अवार्यक्रतुं भटैः अन
वारणीयकर्माणं नरं सर्वस्य नेतारं एतादृक् गुणोपेतं इंद्रं आगमयेति पूर्वेण सह संबंधः ९ शिक्षान इति हे ऋषीषम सर्वैर्गं
तव्य इंद्र विद्वान् सर्वविषयज्ञानवान् त्वं शत्रुभ्यः आहृतेभ्यः धनानि नः अस्मभ्यं आ पुरु बहुवारं शिक्ष प्रयच्छ किं च पार्ये श
त्रुभिर्वधनीये अस्मान् अवरक्ष शत्रून् हत्वा तद्धनेन अस्मान् पालयेत्यर्थः १० अतश्चिदिति हे इंद्र अतश्चित् अस्मात् द्युलो
कादेव शतवाजया शतसंख्याकबलयुक्तेनान्नेन तथा सहस्रवाजया सहस्रसंख्यान्नबलयुक्तेन अन्नरसेन युक्तः सन् नः अस्मा
न् उपायाहि आभिमुख्येनागच्छ॥ ॥इति षष्ठस्य षष्ठे षोडशो वर्गः॥ ११॥ आयामेति हे शतक्रत समर्थेंद्र धीवतः कर्मवतः वयं धि
यः बुद्धयः पार्यकर्माणि अयाम गच्छाम ततः गोदरेहे गवां पर्वतानां दारयितः वज्रिवः वज्रवन् इंद्र दृष्टस्तु संग्रामेषु अर्वद्भिः सर्व
तोगंतृभिः त्वया दत्तैरश्वैः जयेम वयं शत्रून् जयेम १२ वयमुत्वेति हे शतक्रतो बहुप्रज्ञानेंद्र त्वा उत्वामेव उक्थेषु स्तोत्रशस्त्रा
दिकेषु वर्षयंतः याम सि आरमयामः शब्दयामः दृष्टांतः गावो न यथा गोपालो यवसेषु तृणविषयेषु गावः गाः पश्यन् आ समंतात्
रमयति तद्वत् १३ विश्वाहीति हे शतक्रतो बहुप्रज्ञेंद्र मर्त्यत्वना मर्त्यत्वानि विश्वाहि विश्वान्येव अनुकामाः कान् अभिलषान् अ
नुगतानि कामिपतानीत्यर्थः मनुष्याश्च तानिकामयंत इत्यर्थः नयाम तिहे वज्रिन् वज्रवन् इंद्र वयमपि आशसः आशंसनावि

घनादिकामान् अगन्म अवगच्छामः १४ त्वेकपुत्रेतिहे वासवस्फत्रवलस्यपुत्रेंद्र काम कातय कामपराः मनुष्याः त्वेलपिअ
वृत्रहन् स्व स्वकामाभिपूरणार्थस्फत्क्षुवततियतः एवं ततः हे इंद्र त्वां कश्चिदपिदेवः नातिरिच्यते बलेन अतिरिक्तः समर्थोना
स्ति १५ सनोवृषन्नितिहे वृषन् कामानां वर्षितः इंद्रः सपूर्वोक्तलक्षणस्त्वंसनिष्ठयादातृतमया धारयासपत्नानां भयकारि
ण्याअनएवद्र विताद्रावयित्र्याशत्रूणांपुरंध्याबहूनांधारयित्र्याधियाताद्वानकर्मणानः अस्मान् समविड्ढि समंतात्प
लय॥ ॥इतिषष्ठस्यपष्ठसप्तदशोवर्गः॥१६॥ यस्तेनूनमितिअत्रसोमइत्यर्थ्यतेहे शतक्रतोइंद्रद्युम्नितमः यशस्वितमः
पः मदः सोमः नूनंपुरातेत्वदर्थं अस्माभिः अभिषुतो स्तितेनास्माभिः प्रदीयमानसोमेननूनं इदानीमदेतस्मानेनमदेत
व संजातेसति अस्मान् अपिमदेः धनादिदानेनत्वंमादय १७ यस्तेचित्रश्रवस्तमेतिहे इंद्र चित्रश्रवस्तमः अतिशयेननाना
विधकीर्तितः यः मदः सोमः तेत्वदर्थं अस्माभिः अभिषुतः यः सोमः वृत्रहंतमः अतिशयेनपापानां हंता किंचयः सोमः ओजो
दाततमः अतिशयेनबलस्यदातातेनास्माभिर्दीयमानेनसोमेनत्वंमदेरितिपूर्वेणसंबंधः १८ विद्माहियस्तेअद्रिवइतिहे अद्रि
वः वज्रवन् सत्य यथार्थकर्मन् सोमपाः सोमस्यपातः दस्मदर्शनीयइंद्रः विश्वासकृष्टिषु सर्वेषु सोमस्यदातृषुयजमानेषुत्वा
दत्तः त्वया दत्तः तेत्वदीयोयोरयिः अस्तितंविद्महियष्ठारोवयमपीजानीमएव १९ इंद्रायमद्वनइतिमद्वनेमदनशीलायेंद्रा
यतदर्थंसुतं अभिषुतं सोमंनः अस्मदीयाः गिरः स्तुतिलक्षणावाचः परिष्ठामंतु परितसोमं स्तुवंतु ततः कारवः स्तुतिकारि
णः स्तोतारश्च अर्कं सर्वैरर्चनीयं सोमं अर्चंतु पूजयंतु २० यस्मिन्विश्वाइतियस्मिन् इंद्रे विश्वाः सर्वाः श्रियः कांतयः अधि
अधिकंभवंति किंचसप्तसप्तसंख्याकाः ससदः सम्यक् यज्ञेषु कर्मकरणार्थंसीदंतीतिसंसदः होत्रकाः यस्मिन् रणंतिसो
मपदानार्थंरमंतेतंपूर्वोक्तलक्षणमिंद्रं सुते सोमे अभिषुतेसतिहवामहे वयं सोमपानाय आह्वयामः॥ ॥इतिषष्ठस्यष
ष्ठअष्टादशोवर्गः॥२१॥ त्रिकद्रुकेष्वितिहे देवासः इंद्रादयः त्रिकद्रुकेषु आभिप्लविकेषु अहःसु ज्योतिः गौः आयुः इतित्रि
कद्रुकाः तेषु चेतनं ज्ञानस्य साधनं यज्ञं अतन्वत अतन्वत स्वैः स्वैः कर्मभिः पालनैश्च विस्तारयंतः तमितु तमेव अस्मदीयंयज्ञं

७८

483/1915

अस्माकं गिरः स्तुतिलक्षणावाचः वर्धंतु वर्धयंतु २२ आत्वाविशंत्वितिहे इंद्र इंदवः स्रवंतः अस्माभिः दीयमानाः सोमाः त्वा
त्वां आविशंतु सर्वतः प्रविशंतु दृष्टांतः समुद्रमिवसिंधवः नद्यो यथा समुद्रं सर्वतः प्रविशंति तद्वत् यतः एवंतस्मात् हे इंद्र त्वां
कश्चिदपिदेवः बलेन नातिरिच्यते नातिरिक्तोऽस्ति २३ विव्यक्थमहिनेतिहे वृषन् कामानां वर्षितः जागृवे जागरणशीलेंद्र
त्वं सोमस्य भक्षं पानं महिना स्वमहिम्ना विव्यक्थ सर्वतो व्याप्तवानसिहे इंद्र यः सोमः ते जठरेषु उदरे प्रविशति तस्यपानं व्याप्त रेपु
वानसीतिशेषः २४ अरं त इंद्रेतिहे वृत्रहन् वृत्राख्यस्यहंतः इंद्रः सोमः अस्माभिर्दीयमानः ते तव कुक्षये अरं अलं पर्याप्तो भ
वतु किंच इंदवः सोमाः तव धामभ्यः नानाविधेभ्यः शरीरेभ्यः अरं अलं पर्याप्ताः भवंतु २५ अरमश्वायेति अयं श्रुतकक्षः
ऋषिः अश्वाय इंद्रेण दीयमानाय अश्वाय एतदर्थं अरं अलं गायति इंद्रविषयं स्तोत्रं करोति तथा गवे अरं गायति इंद्रस्य इंद्र
कर्तृकाय धाम्नगृहाय तदर्थं अरं पर्याप्तं स्तोति २६ अरं हि ष्मेतिहे इंद्र सुतेषु अभिषुतेषु नः अस्मदीयेषु सोमेषु हि ष्म त्वमेव तेषां
पाने अरं अलं पर्याप्तः भूषसि भवसि हे शक्र इंद्र दावने धनादिकस्य दात्रे ते तुभ्यं अस्माभिः दीयमानाः सोमाः अरं पर्याप्ताः भवंतु
॥इतिषष्ठस्यषष्ठएकोनविंशोवर्गः॥ ॥२७॥ पराकात्तादितिहे अद्रिवः वज्रवन् इंद्र नः अस्मदीयाः गिरः इतो निर्गताः स्तुतयः प
राकात्तात् चित् अतिदूरादपितां नक्षंत व्याप्नुवंतु स्तोतारो वयं तेत्वदीयं धनं अरं पर्याप्तं गमाम त्वत्तः गच्छामः २८ एवा ह्यसीतिहे
इंद्र त्वं वीरयुः वीरान् युद्धकर्मणि समर्थान् मह्यं कामयमानः एवा असि भवसि हि खलु अत एव त्वं शूरः सामर्थ्यवान् भवसि उतापि
स्थिरः संग्रामे धैर्यवान् भवसि एवं सति तव मनः आराध्यं स्तुतिभिः आराधनीयं यतः अनेन मनसा त्वं शत्रुवधं संग्रामे द्योतादिकं
करोषीति तव मनः एव सर्वैः स्तुत्यमित्यर्थः २९ एवा रातिरितिहे तु विमघवहुधनवन् इंद्र विश्वेभिः विश्वैः धातृभिः कर्मधारकैः
सर्वैः यजमानैः तव रातिः गवाद्यस्य धनादिदानं धायि चित् ते धार्यत एव अध अथ हे इंद्र एवंविधः त्वं मे अथ युष्ममापि सखा धनादिदा
ह. नेन कर्मसहायोभव ३० मा पुत्र स्त्रवेतिवाजानां पते अन्नानां पते इंद्र तंद्रयुः अन्नयुक्तः ब्रह्मेव ब्राह्मण एव त्वं मा पुभुवः सुष्टु
माभवसर्वदा अस्मत्कर्मवितानेवत्ताशासनं स्तुतस्याभिषुतस्य गोमतः गव्येन क्षीरेण मिश्रणवतः सोमस्य पानेन मत्स्व

भा॰ष॰ ७९

माद्य त्वष्टोभव २१ मा न इंद्रेति हे इंद्र आद्रिशः आदेष्टारः समंतात् आपुधानि अतिविसृजंतः सूरः सर्वत्र सरणशीलाः या
क्षसा अंकुपुरा त्रिपुदिवा पिनः अस्माकं मा अभि आयमन् आभिमुख्येन आनियंतारो भवंतु युध्यागताश्चेत् तदा तान् रक्षकु
लं तान् यायु आत्त सहाय नवयं वर्तेम हिंसां कुर्मः २२ त्वयेदिंद्रेति हे इंद्र त्वया त्वया वयुजा सहायेन स्पृधः स्पर्धमानान् शत्रू
न् वयं प्रतिब्रवीमहि निराकुर्म महि हे इंद्र त्वं अस्माकं भव सि वयं तव स्मसि भवामः २३ त्वामिद्धीति हे इंद्र कर्मेपि द्रव परिहा
रादने तरं त्वायवः त्वा धनादि दानार्थं कामायमानाः अत एव अनुतो ऽनुवतः अनुक्रमेण पुनः पुनः स्तुतिं कुर्वंति तस्मात् तव सखा
यः कारवः स्तोतारः त्वामित् त्वामेव च सन्ना स्तुतिभिः परिचरंतु हि खलु॥ ॥इति षष्ठस्य षष्ठे विंशो वर्गः॥ उद्घेदिति चतु
स्त्रिंशदृचं त्रयोदशं सूक्तं स्क कश्चः ऋषिः गायत्री छंदः इंद्रो देवता अंत्यातु इंद्रक्रतुदेवताका १ उद्घेदिति हे सूर्य उद्घा दृशस्क
भानुषु इंद्रोपि सूर्यात्मिना पठितः तस्मात् सूर्यात्मकं इंद्र भ्रातम् अद्य सर्वदा दयसि न विख्यातधनं अत एव वृषभं धनेस्य वर्षितारं
नर्यापसं नरहितं अस्तारं दानत्रौं उदेषि इत् तत् यच्च सूर्यात्मनात्मभेव उदेतो सिध प्रसिद्धो २ नवयो नवतिमिति यः इंद्रः न
व वनति एकोनत्रात संख्याकाः शंबरस्य पुरः पुरो बाको अ सा स्ववाहु बलेनेव विभेद दिवोदासाय भिनत्ति स्म स वत्र हा
वृत्रासुरस्य हंता इंद्र अहिः च नंकेना पि अहंतव्यं मेघं अवधीत् सः इंद्रो ऽस्माकं धनं ददातु लक्षतरेण संबंधः ३ स न इंद्र
इति सः पूर्वोक्तलक्षणः शिवः कल्याणतमः सखा अस्माकं मित्रभूतः इंद्रः अश्ववत् अश्वयुक्तं गोमत् पश्वादिसहितं
यवमत् धान्ययुक्तं धनं नः अस्मभ्यं दोहते दोग्धु ददातु दृष्टांतः उरुधारेव प्रभूत पयोधाराः गाः यथा वत्सस्य पयो दो ग्धि त ७९
था पर्याप्तं धनं अस्माकं दोग्धु ४ यदद्येति हे वृत्रहन् मेघस्य हंतः सूर्य सूर्यात्मकेंद्र अद्य अस्मिन् दिने यत्र कत्वयत्किं चि
त् पदार्थजातं अभि अभिलक्ष्य उदगाः ऊर्ध्वंगतः प्रादुर्भूतो सि तत् सर्वं स्थावर जंगमात्मकं जगत् तत्
ते तव वशे भवतिउदितिसूर्ये तद्र्थ माकुर्मकं कुर्वंति जुह्वति च ५ यद्वा प्रवृद्ध निवा अपि चेदहे प्रवृद्ध सबलेन प्रवर्द्धमान
सत्यंते सत्यंपतेरिति न म्रियइति यत् यदि मन्यसे बुध्यसे उतोपि तत् तत् नम्रियइति मननं स सत्यमित् यथार्थमेव॥

हे ॥इति षष्ठस्य षष्ठे एकविंशो वर्गः॥ ६॥ ये सोमास इति हे इंद्र ये सोमासः सोमाः परावतिविप्रकृष्टे दूर देशे ये सोमाः अर्वावति अं
तिकतमे देशे च स्थिरं ये सोमाः ऋत्विग्भिः अभिषूयंते तान् सर्वान् सोमान् गच्छसि तत्सानार्थं युगपदेभोपि अनेनेंद्र स्य सर्वग
तत्वं सूचितं ७ तमिंद्रमिति तं पूर्वोक्तलक्षणं इंद्रं वाजयामसि वाजयामः सोमेन बलवंतं कुर्मः इत्यर्थः किमर्थं महे महते
वृत्राय वृत्रासुरं हंतवे हंतुं स वृषा धनानां सेक्तः सः इंद्रो वृषभः कामानां सेचकः दातुभुवत् ८ इंद्रः सदामनेदूति स इंद्रः दाम
ने स्तोतृभ्यः धनादि दानार्थं चक्रतः प्रजापतिना सृष्टः किं च ओजिष्ठः ओजस्वितमः स एवेंद्रः मदे सोमे प्रजापतिना सृष्टिकाले
हितः सोमपानार्थं च निहितः इत्यर्थः ग्म्मीयुद्यास्त्री अत एव श्लोकी श्लोकः स्तुतिः तद्वान् सइंद्रः सोम्यः सोमार्हो भवसि ९
गिरावज्र इति गिरा स्तुतिलक्षणया वाचा स्तोतृभिः संशितः उत्सादितः तीक्ष्णीकृतः तत्र दृष्टांतः वज्रोन वज्रो यथा तीक्ष्णी
क्रियते तद्वत् अत एव च सबलः बलसहितः तस्मात् अनपच्युतः परैरप्रच्युतः ऋष्वः महान् अस्तृतः युद्धे शत्रुभिः अहिं
सितः इंद्रः ववक्षे स्तोतृभ्यो धनादिकं वोढुमिच्छति १० दुर्गेचिदिति हे गिर्वणः गीर्भिः वननीयं द्रगणानः स्तोतृभिः स्तूयमान अ
नः अस्माकं दुर्गे चित् दुर्गमे पि मार्गे सुगम् सुगमं पंथानं कृधि कुरु हे मघवन् इंद्र त्वं च यदि वशः सोमपानार्थं तस्मदा हन् धनवन्
नः अस्मान् कामं यथाः तदा पंथानं शीघ्र गमनं कुरुष्व॥ ॥इति षष्ठस्य षष्ठे द्वाविंशो वर्गः॥ ११॥ यस्य ते नुचिदिति हे इंद्र य
स्य ते तव आदिशां बलं नुचित् इदानीं पुरा च न मिनंति केचिदपि न हिंसंति किं च स्वराज्यं तव स्वभूतं राज्यं न हिंसंति न दैव
त्वदर्थ्यादेवो पि च तथा अध्रिगुः अध्रितगमनः संग्रामित्वरमाणः वीरोपि जनः प्रादुर्भूतो मनुष्यः अपि एतेन मिनंती त्यर्थः १२
अधातइति हे स्तु शिप्र स्तुहनोः इंद्र अध अपि च देवी स्वतेजसा दीप्यमाने उभे रोदसी द्यावापृथिव्यौ अप्रतिष्कुतं शत्रुभिः अप्र
तिरोधनीयं शुष्मं परबलशोषकं ते तव बलं सपर्यतः पूजयतः त्वदधीने एव भवतः १३ त्वमेतदिति हे इंद्र कृष्णासु कृष्णवर्णा
सु गोषु तथा रोहिणीषु रोहितवर्णासु परुष्णीषु च गोषु रुशत् दीप्यमानं श्वेतरूपं परिदृश्यमानं पयः क्षीरं त्वं अधारयः धारयसि
तस्मात् तव हूतं पूजयत इति समन्वयः १४ वि यदहेरिति अध अपि च अहेः अहंतव्यस्य वृत्रासुरस्य त्विषः तेजो रूपात् उत्स्नुसात्

भीताः विश्वेदेवासः देवाःपत्पदाव्यक्रमुः विविधंपादविहरणं अकुर्वन् स्वस्थानंपरित्यज्यान्यदेशंगच्छन् इत्यर्थः तदानींमृग
स्यमृगरूपिणाः वृत्रासुरस्यसंबंधि अमः बलं तान्सर्वान्देवान्विदत् अविंदत् प्राप्नोत् इत्यर्थः तस्यासुरस्यनिवारको हंता
इंद्रोऽभुवदितिउत्तरेणसबंधः १५ आदुमइति आत् उ देवानां भीत्यासर्वतोगमनानंतरमेवमेस्तोत् स्कृत्यलक्षणेन संबंधेन
ममसंबंधी अयमिंद्रः निवरः वृत्रासुरस्यनिवारयिता हंता अभवत् अभवत् ततो वृत्रहा वृत्रस्यहंताइंद्रः पौंस्यं पुंसः कर्मपौंस्यं
अदिष्टतस्यराज्यदिशाति निदधाति तदा अस्य स्ववचोकरोतीत्यर्थः ततः प्रभृति इंद्रः अजातशत्रुः अस्त्रत्तः संग्रामेपरैः अहिं
सितश्च अभवत्॥ ॥इतिषष्ठस्यषष्ठेत्रयोविंशोवर्गः॥ १६॥ श्रुतंवइतिहेऋत्विक्प्रथारः श्रुतं बलवत्तयाप्रसिद्धं अतएव
वृत्रहंतमं अतिशयेनवृत्रहंतारं शार्द्धं बलवंतं इंद्रं चर्षणीनां मनुष्याणां वः युष्माकं आशुषेत मिंद्रस्तुतिभिः प्रीणयित्वा युष्म
भ्यं प्रकर्षेण अश्वेव प्रयच्छामीत्यर्थः किमर्थं महेमहते राधसे धनाय धनं युष्मभ्यं दातुं १७ अयाधियेतिहेपुरुनामन् बहुविध
शक्रादिनामोपेत पुरुष्टुत बहुभिः अभिष्टुत इंद्र सोमे अस्मदीयेषु सोमेषु त्वं यत् त्वयदा आ अभवः तेषां पानार्थंसमंतात् अभवः
तदाव यं अपाअनयागव्यपागाः आत्मनः इच्छात्याधिवाबुध्यायुक्ताभवेम सोमंपीतवति त्वयि वयंगवादियुक्ताभवेमेत्यर्थः॥
१८ बोधिन्मनाइतिहेवृत्रहान्वृत्रहंता भूरि आस्कृतिः बहुषुदेशेषुइंद्रार्थंसोमः आस्कूयते अभिषूयतेइतिताद्दृशः बोधिन्मनाः
यस्यमनः स्तोतृणां अभिमतं बुध्यते इति सतथोक्तः इत् नः अस्माकं बोधिन्मनाएवास्तु सर्वदाऽस्मदभीप्सितानिजानातु
वित्यर्थः ततःशाक्रः इंद्रः आशिषं अस्मदीयां स्तुतिं शृणोतु १९ कयात्वमितिहेवृषन् कामानांवर्षितः इंद्र कया केन ऊत्या अ
भिगमनेनत्वंनः अस्मान् अभिअभितः प्रमंदसे प्रकर्षेण मादयसि अस्मदीयंयज्ञं प्रति सोमपानार्थं आगत्य किंच कया केना
भिगमनेन स्तोतृभ्यः अस्मभ्यं धनं अभरः आबिभर्षीतिइंद्रः स्तोता पृच्छति २० कस्यवृषेतिहेवृषा इंद्रः कस्ययजमानस्य सचास्कृ
ते ऋत्विग्भिः सहाभिषुत्तसोमे सोमपीतये सोमपानाय तदर्थं रण तदरमंत कीदृशाः नियुत्वान् नियुतः मरुतः तद्वान् वृषभः
धनानांवर्षकः वृत्रहा वृत्रस्यहंता इंद्रः अस्मत् यज्ञ एव सोमपानार्थं संक्रीडते॥ ॥इतिषष्ठस्यषष्ठेचतुर्विंशोवर्गः॥ २४॥ ८०

483
1915

अभिषुण इतिहेइंद्र त्वं मंदसानः अस्माभिः दत्तेन सोमेन मोदमानः सन् सहस्रिणं सहस्रसंख्याकं रयिं धनं नः अस्मभ्यं सुसु
अभ्याभरत्वं दाश्रुषेहविर्दत्तवते यजमानाय प्रयंताधनादेः प्रदाता ददामीति बोधिबुध्यस्व २१ पत्नीवंतइतिपत्नीवंतः सोमसं
कार्यपल्यः पाल्यपिश्य आयः वसतीवरीः एकधनाश्च तद्वंतः सुताः अस्माभिः अभिषुताः इमेगृहस्याः चमसस्थाश्च सोमाः उ
शांतः अत्मानः पानंकामयमानाः संतः यंतिइंद्रं गच्छंति किमर्थं वा तये आत्मनः पानाय किंच निपुणः चमुअंदेनेभक्षणानंत
रंपुणः प्रीणयिता अपां अग्निः अवभृथकाले अपः प्रतिगमनशीलः सोमः इंद्रः २३ इष्टाहोत्रा इतिअध्वरे अस्मदीयेयज्ञे व
धासः हविर्भिः इंद्रं वर्धयंतः इष्टाः इष्टवंतः यागंकृतवंतः सप्तसप्तसंख्याकाः होत्राः होत्रकाः अवभृथं अत्सदिवसं अच्छप्र
तिगंत सासहिताः इंद्र अस्तक्षत विसृजन् यावदवभृथं सप्तहोत्रकाः यजंतीति २४ इहत्येतिसधमाद्यासंश्रामेसहमा
द्यंता हिरण्ययकश्या हिरण्मयस्कंधगतकेशवंतौ त्यातो प्रसिद्धौ हरी एतन्नामकौ अश्वौ इह अस्मिन्यज्ञे हितंहितकरंप्रयः ह
विरूपमन्नं अभिअभिलक्ष्य वोल्हां इंद्रं वहतां प्रापयताइति २५ तुभ्यंसोमाइतिहेविभावसो विशेषेण भासमानवसुमन्
अग्ने तुभ्यं त्वदर्थं इमे सोमाः सुताः अभिषुताः तथाबर्हिः स्तीर्णं तस्मात् स्तोतृभ्यः अस्मदर्थं इंद्रं सोमपानार्थं आवह आहूय
यज्ञं प्रतिप्रापयेत्यर्थः॥ ॥इतिषष्ठस्यषष्ठेपंचविंशोवर्गः॥ ॥आतेदक्षमितिहेयष्ठः दाशुषेइंद्राय हविर्दत्तवते ते तुभ्यं रोचना
रोचनं दीप्यमानं दक्षं बलं आ आभिमुख्येन विदधत् इंद्रो विदधातु तथा रत्नारत्नानि च तुभ्यं करोतु हे स्तोतारः स्तोतृभ्यः युष्मभ्यं
च रत्नादिकं इंद्रः करोतु तस्मात् तमिंद्रं यूयमर्चत अर्चयत हविर्भिः स्तुतिभिश्च पूजयत २७ आते दधामीतिहेशतक्रतो इंद्र ते
तव इंद्रियं वीर्ययंतं सोमं विश्वाउक्थानि सर्वाणि स्तोत्राणि आदधामि संपादयामि इंद्र त्वं स्तोतृभ्यः मृळयं सुखय २८ भद्रंभद्रमि
तिहेशतक्रतो इंद्र भद्रं भद्रं कल्याणतमं धनं नः अस्मभ्यं आभर संपादय देहि तथा इषं अन्नं ऊर्जं अन्नरसं देहि नः अस्मान् यत्
यदि मृळयासि सुखयसि तर्हि तत् धनादिकं देहि २९ सनो विश्वानीतिहेशतक्रतो इंद्र सः पूर्वोक्तलक्षणः त्वं विश्वानि सर्वाणि सु
वितानि सुष्ठु मंगलानि नः अस्मभ्यं आहर हे इंद्र यय दिवः अस्मान् सुखयसि तर्हि धनादि सहितान् अभ्युदयान् देहीति ३०

भा॰ष॰
८१

त्वामिद्धि वृत्रहंतमेति हे वृत्रहंतम अतिशयेन वृत्रासुरस्य हंतः इंद्र सुतवंतः अभिषुतसोमवंतो वयं यज्ञे त्वामित् त्वामेव हवामहे
सोमपानाय आह्वयामः हे इंद्र नः अस्मान् यदि मृळयासि सुखयसि तर्हि आह्वयामः इति॥ ॥इतिषष्ठस्यषष्ठेषड्विंशोवर्गः॥
॥२७॥ उपन इति हे मदानांपते सोमानां स्वामिन् इंद्र हरिभिः अश्वैः सह नः अस्माकं यज्ञे सुतं अभिषुतं सोमं उपयाहि तसोना
धंशाघमायाहि पुनरुपं॰ इति आदरार्थः २२ हिता प इति यः वृत्रहंतमः अतिशयेन वृत्रस्य हंता शतक्रतुः नानाविधकर्मा इं
द्रः हिता हित्वा वृत्रवधादौ उग्रकर्मा जगद्रक्षणकाले शांतकर्मेति द्विःप्रकारेण विदे सर्वैर्ज्ञायते स त्वं हरिभिः सह नः सुतं सोमं
उपयाहि २३ त्वंहि वृत्रहन्निति हे वृत्रहन् वृत्रासुरस्य हंतः इंद्र हि यस्मात् त्वं एषां अस्मदीयानां सोमानां पाता पानकर्ता असि
भवसि अतस्त्वं हरिभिः सह नः सुतं सोमं पातुं उपयाहि आगच्छ २४ इंद्र इष इति इंद्रः एवास्माभिः स्तुतः इष्टः सन् ऋभुक्षणं
यागादिकर्मकरणेन महांतं रयिं दातारं ऋभुक्षं सोमपानेनामर्त्यत्वं प्राप्तं एतन्नामकं देवं नः अस्मभ्यं इषे अन्नार्थं ददातु प्रय
च्छतु तथा वाजी बलवान् इंद्रः वाजिनं बलवंतं वाजीनामानं कनीयांसं [illegible] तरं अस्माकं अन्नलाभाय ददातु॥ ॥इतिषष्ठ
स्यषष्ठेसप्तविंशोवर्गः॥ ॥इतिषष्ठमंडले नवमोऽनुवाकः॥ ९॥ दशमेऽनुवाके दशसूक्तानि तत्र गोधयतीति द्वादशर्चं प्रथमं सू
क्तं आंगिरस्य बिंदुः पूतदक्षो वा ऋषिः गायत्री छंदः मरुतो देवता १ गोधयतीति मेधानां धनवतां मरुतां माता निर्मात्री गौः पृश्नि
रूपा धयति सोमं पिबति किमिच्छंती श्रवस्युः अन्नकामयमाना कीदृशी रथानां मारुतानां वह्निः रथवतीभिः संयोजयित्री सा यु
क्ता सर्वत्र पूज्या भवति २ यस्या देवा इति यस्याः मरुतां मातुः गोरूपस्थे वर्तमानाः विश्वे सर्वे देवाः व्रता व्रतानि स्वकर्माणि धार
यंते इयं मित्रा स्माकं स्वपयो मिश्रितस्य सोमस्य दात्रीति सर्वत्र समीपे तिष्ठंतीत्यर्थः किंच सूर्यामासा सूर्याचंद्रमसौ दृशे दर्शना
य सर्वलोकप्रकाशनाय च यस्याः गोः समीपकं स्वेन वर्तमानौ भवतः सा पृश्निः गौः सोमं धयतीति पूर्वेण समन्वयः ३ तत्सु न इति
अर्यः स्तोत्रकरणार्थमितस्ततो गंतारः नः अस्मदीयाः विश्वे सर्वे काश्चन स्तोतारः तत् मरुतां बलं सदा सर्वदा आयणंति आभिमु
ख्येन स्तुतिभिः स्तुवंति किमर्थं सोमपीतये अस्माभिर्दीयमानं सोमं पातुं मरुतः देवाः अस्माभिः आह्वातव्याः खलु ततः पुरस्ता ८१

489
1915

त् तत्र मूलं स्तुवंतीत्यर्थः ४ अस्ति सोम इति अयं पुरोवर्ती सोमः सुतः मरुद्भ्यः अस्माभिरभिषुतोऽस्ति अस्य तं सोमं स्वराजः
स्वयं दीप्यमानाः मरुतः पिबंति उत अपि च अश्विना अश्विनौ च सोमं पिबतः ५ पिबंति मित्र इति मित्रः अर्यमा मा वरुणः त्रयो दे
वाः तना दशापवित्रेण पूतस्य पूतं शोधितं त्रिसधस्थस्य सह तिष्ठंति अत्र तित्रिसधस्थं स्थानं द्रोणकलश आधवनीय पूतभृदा
ख्यानि त्रीणि स्थानानि यस्य तत् तथोक्तं तस्य त्रिसधस्थं जावतः स्तुत्यं जनवतः स्तुत्यजनवंतं इमं सोमं पिबंति ६ उतो न्वस्य
ति उत अपि च इंद्रः सुतस्य अस्माभिरभिषुतस्य गोमतः गव्यैः मिश्रणवतः सोमस्य जोषं पानं प्रातः प्रातःसवने तु क्षिप्रं आ
मत्सति आभिमुख्येन स्तोति दृष्टांतः होतेव यथा होता प्रातःसवने देवान् अभिष्टौति तद्वत्॥ ॥इतिषष्ठस्यषष्ठेऽष्टाविंशो
वर्गः॥ ७॥ कदत्विषंतेति सूरयः प्राज्ञाः मरुतः आपइव उदकानीव तिरः यथा उदकानि तिर्यग्गच्छंति तद्वत् तिरश्चीनगतयः
संतः कत् कदा अतिपतंति अंतरिक्षे दीप्यंति किंच स्निधः शत्रूणां शोषकाः हंतारः ते इमे मरुतः पूतदक्षसः शुद्धबलाः संतः क
दावा अर्षंति अस्मदीयं यज्ञं प्रत्यागच्छंति॥ ८॥ कद्वो अद्येति हे मरुतः महानां महतां लनाच आत्मनैव अलंकरणे विनापि द
स्मवर्चसां दर्शनीयतेजस्कानां देवानां द्योतमानानां वः युष्माकं अवः पालनं कत् कदा अद्या वृणे संभजे ९ आ ये विश्वेति
हे मरुतः विश्वा विश्वानि पार्थिवानि पृथिव्यां भवानि भूतजातानि दिवः द्युलोकस्य रोचना रोचमानानि ज्योतींषि च आपप्रथन्
सर्वत्र विस्तारितानि अकार्षुः तादृशान् सोमपीतये सोमपानाय अहं आह्वयामि १० त्यान्नु पूतदक्षस इति हे मरुतः देवाः पूत
दक्षसः शुद्धबलान् दिवः स्वतेजसा दीप्यमानान् त्यान् प्रसिद्धान् वः युष्मान् नु क्षिप्रं हुवे आह्वयामि किमर्थं अस्य अस्मदी
यस्य सोमस्य पीतये पानाय ११ त्यान्नु ये वि रोदसी इति ये मरुतः रोदसी द्यावापृथिव्यौ वितस्तभुः स्वबलेनैव अस्य [illegible] स्तब्धे चक्रुः त्यान्
तान् सर्वान् प्रसिद्धान् नु क्षिप्रं अहं हुवे आह्वयामि अस्य॰ १२ त्यं नु मारुतमिति त्यं तं सर्वत्र विस्तृतं गिरिष्ठां गिरिषु पर्वतेषु
तिष्ठंतं वृषणं कामानां वर्षितारं मारुतं मरुत्संबंधिनं गणं हुवे बिंदुः अहं आह्वयामि किं प्रयोजनं अस्य॰ १३॥ ॥इतिषष्ठ
स्यपंचमे एकान्नत्रिंशोवर्गः॥ ॥आ तू न इंद्रेति नवर्चं द्वितीयं सूक्तं तिरश्चीनामांगिरसः ऋषिः अनुष्टुप्छंदः इंद्रो देवता १ आ

भा.५.
८२

त्वा गिर इतिः हे गिर्वणः गीर्भिः वननीयेंद्र सुतेषु सोमेषु अभिषुतेषु सत्सु गिरः अस्माकं स्तुतिलक्षणा वाचः त्वां त्वां अस्थुः आ
भिमुख्येन शीघ्रं तिष्ठंति दृष्टांतः रथीरिव यथा रथवान् रथेन गंतव्यं प्राप्यं देशं क्षिप्रं गच्छति तद्वत् अस्माभिरभिगंतव्यं त्वां
स्तुतयः अभिगच्छंति किंच हे इंद्र अस्मदीया गिरः त्वां त्वां अभि अभिलक्ष्य समनूषत सम्यक् शब्दायंते स्तुवंतीत्यर्थः दृष्टां
तः वत्सं न यथा मातरो गावः वत्सं अभिलक्ष्य हुंभारवादिशब्दं कुर्वंति तद्वत् २ आ त्वा शुक्रा इति हे गिर्वणः गीर्भिः वननीयेंद्र सु
तः वत्सं न यथा मातरो गावः वत्सं अभिलक्ष्य हुंभारवादिशब्दं कुर्वंति तद्वत् २ आ त्वा शुक्रा इति हे गिर्वणः गीर्भिः वननीयेंद्र सु
क्राः यज्ञेषु पात्रेषु दीप्यमानाः सुतासः अस्माभिरभिषुताः सोमाः त्वां त्वां आ अचुच्यवुः आगच्छंतु अस्य अस्माभिः दीप्यमानस्यां
धसः सोमस्य मदीयं भागं तु क्षिप्रं पिब हे इंद्र विश्वासु सर्वासु दिक्षु ते त्वदर्थं सोमः पुरोडाशादिहविः हितं भवति ३ पिबा
सोममिति हे इंद्र त्वं श्येनाभृतं सुलोकान् श्येनरूपया गायत्र्या आहृतं सुतं अभिषुतं सोमं मदाय हर्षाय पिब कं पूरणः हिय
स्मात्त्वं शश्वतीनां बह्वीनां विशां मरुत्समानानां सर्वेषां देवगणानां च पतिः पालयिता असि भवसि तथा आस्वत्तेज सा
दीप्यमानश्च असि अतस्त्वं पूर्वं सोमं पिबेति ४ श्रुधी हवमिति हे इंद्र यः त्वां त्वां सपर्यति हविर्भिः परिचरति ताहशस्य ति
रश्च्याः एतन्नामकस्य ऋषेः मम हवं त्वद्विषयमाह्वानं श्रुधि शृणु श्रुत्वा च हे इंद्र त्वं सुवीर्यस्य शोभनवीर्योपेतस्य गोमतः
गवादिपशुमतः रायः धनस्य दानेन पूर्धि अस्मान् पूरय त्वं महान् गुणाधिकः देवानां श्रेष्ठश्च असि भवसि खलु ५ इंद्र य
स्त इति हे इंद्र यः यजमानः नवीयसीं नवतरां पुनः पुनः क्रियमाणां मंद्रां मदकरीं गिरं स्तुतिलक्षणां वाचं ते तदर्थं अजी
जनत् अजीजनत् अकार्षीत् तस्मै स्तोत्रे त्वं प्रत्नां पुरातनीं ऋतस्य सत्यस्य संबंधिनीं पिप्युषीं प्रवृद्धां चिकित्विन्मनसं ज्ञानिनं अतीद्रियद
र्शिनं ज्ञातानि सर्वेषां हृदयानि यया तां ताहशीं धियं वृद्धीयं रक्षणार्थां तस्मै कुरु ६ ॥इति पष्ठस्य षष्ठे त्रिंशो वर्गः॥६॥ तमुष्ट
वामेति ऋषयः परस्परमाहुः तं पूर्वोक्तलक्षणं तमेवेंद्रं स्तवाम स्तुमः यं गिरः अस्माकं स्तुतयः उक्थानि शस्त्राणि च वावृधुः श्रा
वर्धयन् तेन ताव यंऽ अस्येंद्रस्य पुरूणि बहूनि पौंस्या वीर्याणि सिषासंतः संभक्तुमिच्छंतः संतः वनामहे तमिंद्रं स्तुतिभिः संभजाम
हे ७ एतो न्विंद्रमिति हे इंद्रः शत्रादिकान् अस्कराननं स्तवाम उक्षन्तः स्त्यादिदोषेण आलानं अपरिशुद्धमिति अमन्यत ततः तद्दोषप
रिहाराय ऋषीन् अवोचत् पूतं मां युष्मदीयेन साम्ना कुरुतेति ततः ऋषयः परस्परं ऊचुः नु क्षिप्रं एतो आगच्छत च आगत्य च
शुद्धेन शुद्धसार्केन साम्ना तथा शुद्धैः शुचिहेतुभिः उक्थैः शस्त्रैश्च इंद्रं शुद्धं अपापिनं करवाम स्तवाम स्तूयाम ततः साम शा
स्त्रैश्च वावृध्वांसं प्राप्तवर्धं आशीर्वान् आश्रयणवान् गव्यादिभिः तादृशाः सो
मः ममत्तु इंद्रं मादयतु ८ इंद्र शुद्ध इति हे इंद्र शुद्धः अस्मदीयैः सामभिः शस्त्रैश्च परिशुद्धस्त्वं नः अस्मान् आगहि आगच्छ
शुद्धाभिः ऊतिभिः ऊतयः मरुतः सामभिः शस्त्रैः परिपूताः तैः मरुद्भिः सह शुद्धः त्वं आगहि आगत्य च शुद्धः स्त्वं रयिं धनं अ
स्मासु निधारय नितरां स्थापय किंच शुद्धस्त्वं सोम्यः सोमार्हः भूत्वा ममद्धि हृष्टो भव ९ इंद्र शुद्ध इति हे इंद्र शुद्धः हि शु
द्ध एव त्वं रयिं धनं नः अस्मभ्यं प्रयच्छ तथा शुद्धः त्वं दाशुषे हविर्दत्तवते यजमानाय रत्नानि रमणीयानि धनादीनि वृत्रहितं
तः शुद्धः पापरहितस्त्वं वृत्राणि शत्रून् जिघ्नसे हंसि ततः शुद्धः शत्रुहननदोषपरिहाराय अस्मदीयैः सामभिः शस्त्रैः परि
शुद्धस्त्वं वाजं अन्नं अस्मभ्यं सिषाससि दातुमिच्छसि॥ ॥इति षष्ठस्य षष्ठे एकत्रिंशो वर्गः॥ ॥अस्मा इत्येकविंशत्यृचं तृ
तीयं सूक्तं द्युतानाख्यः मरुतां पुत्र ऋषिः तिरश्चीर्नामांगिरसो वा चतुर्थी विराड् शिष्टाः त्रिष्टुभः इंद्रो देवता इंद्र्या मित्रावा
मरुतामिति पादो मरुद्वत्यः १ अस्मा उषास इति इंद्र सामर्थ्यात् प्रभाता उषासः उषःकालाः अस्मै इंद्राय यामं स्वगमनं आ
तिरत् समंतात् वर्द्धयंत पूर्वं उद्यतीति तथेदानीमपि अस्मै उद्रता अभवन् तथा ऊर्म्याः स्वनिलयप्राप्तिमूताः रात्रयः नक्तं अप
रात्रिकालेषु वाचः शोभनवाचो भवंति तस्मिन् काले अध्ययनादीनि कुर्वंति तथा आपः सर्वतो व्याप्ताः मातरः जगतो निर्मा
त्र्यः सप्त सप्त संख्याकाः सिंधवः स्यंदमानाः गंगादयः अस्मै इंद्राय नद्यः स्वतरा यमनुष्याणां सुखेन तरणार्थं सुपाराः सुखेन
तं तुं योग्याः तस्थुः अतिष्ठन् अभवन् इत्यर्थः २ अतिविद्धेति विधुरेण वित् विधुरेणा सहायेनापि अस्त्रा शत्रुक्षपणशीलेनेंद्रे
ण त्रिः सप्त स्तुवः एकविंशति संख्यानि संहितानि एकत्र संधीभूतानि गिरीणां सपानां पर्वतानां यानि सानुमान्ति अ
तिविद्धा अतिविद्धानि अतीत्य ताडितानि न भुक्ताव अपातः तानि भित्वा अगमदित्यर्थः अस्येंद्रस्य तत् तानि सानुभेदनादीनि

८२

भा॰ष॰
८२

कर्माणि देवः इंद्र अति रिक्तः देवः मर्त्येभि मनुष्येभ्यो वा नन्नुतु यच्चिन्नतरेत् प्रवृद्धः वृषभः कामानां वर्षक इंद्रः यानि कर्माणि च
कार कृतवान् तानि कर्तुं कोपि न शक्नोतीत्यर्थः ३ इंद्रस्य वज्र इति इंद्रस्य वज्रः आयसः आयसनिर्मितः स च वज्रः इंद्रे
ण स्वहस्ते निमिश्लः संमिश्रः इंद्रस्य बाह्वोः ऋजयोः पुष्टं बृहत्तमं ओजः वीर्यमस्ति तथा निरेके निर्गमने यदा युद्धार्थमिंद्रो
निर्गच्छति तदानीं इंद्रस्य शीर्षन् शिरसि क्रतवः कर्माणि शिरस्त्राणनिधानादीनि भवंति तथा आसन् आस्ये च यानि क
र्माणि हस्त्यश्वसंनाहनानि भवंति किं च श्रुष्टे संग्रामाय निर्गच्छतः अनुश्रासनः इंद्रस्य शीघ्रश्रवणार्थं भृत्याः उपाके अंति
के एष तत्र कार्ये नियोक्ष्यति तत् तदंतिके आगच्छंति ४ मन्ये त्वेति हे इंद्र त्वा त्वां यज्ञियानां यज्ञार्हाणां देवानामपि यज्ञियं पुर
स्तादेव यज्ञार्हमिति मन्ये तथा त्वा त्वां अच्युतानां च्युतिरहितानामपि पर्वतानां च्युवनं च्यावयितारं वज्रेण बिभेदकमिति म
न्ये किं च हे इंद्र त्वा त्वां सत्वनां संभजमानानां भजनीयानां केतुं छित्तमिति मन्ये तथा त्वा त्वां चर्षणीनां मनुष्याणां वृषभं अभिम
तफलवर्षकमिति मन्ये ५ आ यद्वज्रमिति हे इंद्र बाह्वोर्वज्रं आयुधं कीदृशं मदच्युतं शत्रूणां मदस्य च्यावयितारं यत्तु यदा
आधत्से आदधासि किं च मर्थं अहये अहिनामानमसुरं हंतवै उ हंतुमेव किं च यदा वा इंद्रेण अहिनामके असुरे हते सति
पर्वताः जगदापूरकाः मेघाः प्रानेवंत प्रकर्षेण शब्दयन् तदा गावः तत्स्थानि उदकानि च प्रप्रकर्षेण ध्वनिं अकुर्वन् तदा
नीं अभिनक्षंतः अभितः इंद्रं स्तुतिभिः हविर्भिश्च गच्छंतः ब्राह्मणाः इंद्रं पर्यचरन् ॥ ॥इति षष्ठस्य षष्ठे द्वात्रिंशो वर्गः॥१५॥
तमु ष्टवाम् यिमपरस्परं स्तोतारः आहुः तमुतमेव वयं सह स्तोत्रकारवाम यः इंद्रः इमा इमानि भूतानि अजानत् नयामा
स अस्मादेवेंद्रात् अवराणि पश्चात्भवानि भवंति तेनेंद्रेण गीर्भिः स्तुतिभिः मित्रमैत्री दिधिषेमहि आद्ध्येमहि तथा नमोभिः अस्माभिः
क्रियमाणैः नमस्कारैः वृषभं कामानां वर्षकं इंद्रं उपो विशेम अस्मदभिमुखमेव कुर्मः ७ वृत्रस्य त्वेति इंद्र तव ये विश्वे देवाः १३
प्राक् सखायः संग्रामे सखित्वं कुर्यामेति अवदन् सर्वे देवाः वृत्रस्य दस्यो रसुरस्य श्वसथात् श्वासात् भीताः संतः ईषमाणाः
सर्वतः पलायमानाः त्वा त्वां अजहुः संग्रामे त्यक्तवंतः एवं सति हे इंद्र मरुद्भिः सरुसख्यं ते तव अस्तु अथानंतरं इमाः विश्वाय

तनाः शत्रुसेनाः जयासि स्वबलेनाभिभवसि ८ त्रिषष्टिरिति हे इंद्र त्रिषष्टिः स्वत वानः प्रघासिन सांतपनश्च गृहमेधी च
क्रीडी च साकी च उज्जेषी च धुनी च ध्वांतश्चेति नवगणाः त्रयः षष्टि संख्याकाः उस्राइव राशयः गावः इव संधी भूता त्वा त्वां वाव
धाना स्वबलेन वर्धितवंतः मरुतः यज्ञियासः यज्ञार्हाः अभवन् तं मरुत्सहायमिंद्रं त्वा त्वां वयं एमः उपगच्छामः तत स्त्वं नः अ
स्मभ्यं भागधेयं भजनीयं धनं कृधि कुरु पश्चात् वयमपि एना एतेन सोमलक्षणेन हविषा ते तुभ्यं शुष्मं बलं विधेम आविद
ध्म कुर्मइत्यर्थः ९ तिग्ममायुधमिति हे इंद्र ते तव स्वभूतं तिग्मं तीक्ष्णमायुधं धनुः तत्र मरुतां त्रयः षष्टि संख्यानां त्वत्सहा
यानां अनीकं संघं च त्वदीयं वज्रं चकः को वा भाति दधर्ष प्रतिकूलमभिभवति नास्तीत्यर्थः अत एव अनायुधासः आयुधवर्जि
ताः अदेवाः देवद्विषः ये असुराः संति हे ऋजीषिन् अपाजितो अभिषुतः सोमः ऋजीषी तद्वन् इंद्र तान् असुरान् चक्रेण च
क्ररूपेण वज्रेण अपवप अपगतान् कुरु १० मह उग्रायेति हे स्तोतः महे महते उग्राय उद्गूर्णाय तवसे प्रवृद्धाय शिवतमाय
कल्याणतमाय इंद्राय सुवृक्तिं प्रेरय किं च पथ्यः अतीद्रियार्थद्रष्टुर्मेध्या नादिकं दातुं पूर्वीः बह्वीः गिरः स्तुतीः गिर्वाहसे गीर्भिः
स्तूयमानाय इंद्राय धेहि कुरु ततः स इंद्रः तन्वे स्वशरीराय कुवित् बहु धनं अंग क्षिप्रं वेदत् ददातु॥ ॥इति षष्ठस्य षष्ठे त्रयस्त्रिं
शो वर्गः॥३३॥ उक्थवाहस इति हे स्तोतः उक्थवाहसे स्तोत्रशस्त्रादिभिः उह्यमानाय अत एव विभ्वे महते इंद्राय इंद्रार्थं मनी
षां स्तुतिं ईरय प्रेरय दृष्टांतः द्रुणा नयथा नाविकः नदीनां पारं प्रतिपथिकं द्रुणा नावा प्रापयति तद्वत् इंद्रं प्रति स्तुतिं गम
य इति किं च नि स्पृशानि तरां धनं स्पर्शगमय तन्वि आत्मनि पुत्रे वा कीदृशं श्रुतस्य प्रसिद्धस्य जुष्टतरस्य प्राणयितुरिंद्रस्य स्व
भूतं धनं धिया त्वदीयया स्तुत्या आत्मानं गमयत तत स्त्वया अभिष्टुतः इंद्रः कुवित् बहु धनं अग क्षिप्रं वेदत् ददातु १२ तद्विदी
तिहे ऋत्विक् तत् सामादि हविः विविद्धि व्यापय इंद्रार्थं कुर्वित्यर्थः ते तव स्वभूतं यद्धविः इंद्रः जुजोषत् स्वीकुर्यात् तत्कुरु हे
स्तोतः सुष्टुतिं शोभनस्तुतियुक्तं इंद्रं स्तुहि तथा नमसा स्तोत्रेण आविवासइंद्रं आभिमुख्येन परिचर हे जरितः स्तोतः उपभू
ष अलंकृतः भव मा रुवण्यः धनाभावात् माध्वनयः हे स्तोतः वाचं स्तुतिं इंद्रं श्रावय ततः त्वया स्तुतः इंद्रः तुभ्यं कुवित् बहुध

नंअंगसिप्रंवेदत्प्रयच्छतु १३ अवद्रप्सइतिइतिहासः कृष्णोनामासुरः दशसहस्रसंख्यैरसुरैःपरिवृतःसन् अंशुम
तीनामधेयायानद्यास्तीरेअतिष्ठत् तत्रतंकृष्णंउदकमध्येस्थितंइंद्रोबृहस्पतिनासहागच्छत् आगत्यतंकृष्णंतस्यानुच
रांश्चबृहस्पतिसहायोऽघानइतिद्रप्सःगच्छन्दशभिःसहस्रैःदशसहस्रसंख्याकैःअसुरैःइनःयोयुक्तःकृष्णःएतन्ना
मकोऽसुरःअंशुमतींनदींअवातिष्ठत्अवतिष्ठतेततःशच्याकर्मणाधमंतंभीतिकरशब्दंकुर्वतंतंकृष्णमसुरंइंद्रःम
रुद्भिःसहआवत्प्राभोवत्नमणाःनृषुक्तिस्वरूपेकविधमनायस्यतादृशःसन्स्नेहितीःसर्वस्यहिंसित्रीःतस्यसेनाःअ
पाधत्तहतवान् १४ द्रप्समपश्यमितिहेमरुतःद्रप्संद्रुतगामिनंकृष्णंअहंअपश्यंकुत्रविषुणेविष्वगंचनेसर्वतोविस्त
तेदेशेचरंतंपरितागच्छंतंकिंचअंशुमत्याःनद्याःउपह्वरेअत्यंतंगूढेस्थानेनभोननभसियथादित्योदीप्यतेतद्वत्तत्र
दीप्यमानंअवतस्थिवांसंउदकस्यांतरवस्थितंकृष्णंएतन्नामकंअसुरंअपश्यंतुस्मितद्दृष्टेसतिहेवृषणःकामानांसेक्ता
रोमरुतःवःयुष्मान्युद्धार्थमिष्यामिअहमिष्टाभिततोयूयंतमिमंकृष्णंआजौसंग्रामेयुध्यतसंहरत १५ अधद्रप्सइ
तिअधअथद्रप्सःद्रुतगामीकृष्णःअंशुमत्यानद्याःउपस्थेसमीपेतित्विषाणःदीप्यमानःसन्तन्वंआत्मीयंशरीरंअधा
रयत्परेरहिंस्यत्वेनबिभर्तितत्रइंद्रोगत्वाबृहस्पतिनाएतन्नामकेनदेवेनयुजासहायेनअदेवीःअद्योतमानाःअवर
तीःआगच्छंतीःविशःअसुरसेनाःअभिससाहेअघानत्तमवधीदित्यर्थः॥ ॥इतिषष्ठस्यपष्ठेचतुस्त्रिंशोवर्गः॥१६॥
त्वंहत्यदितिहेइंद्रत्वंहतंखलुत्यत्तत्कर्मकृतवान्असिकिंतत्जायमानस्त्वंप्रादुर्भवन्नेवअशत्रुभ्यःसप्तभ्यःकृष्णशं
बरादिभ्यःतदर्थंशत्रुरभवःकिंचहेइंद्रत्वंगूढेतमसागूढेसंवृतेद्यावापृथिवीद्यावापृथिव्यौसूर्यात्मनाप्रकाश्यअ
नुक्रमेणअविंदःअलभथाःतथाविभुमद्भ्यःमहत्त्वयुक्तेभ्यःभुवनेभ्यःलोकेभ्यःरणंरमणंधाःधारयसिविदधासीत्यर्थः
त्वंहत्यदितिहेइंद्रत्वंहत्यखलुत्यत्एतत्कर्मकृतवान्किंतदहेवज्रिन्इंद्रधृषितःधृष्टःसंग्रामेशत्रुहननेकुशलःसन्
अप्रतिमानंनिरूपमंअस्यसमंअन्यदीयंवीर्यंनास्तीत्यर्थःतादृशंशुष्णस्यओजोबलंवज्रेणायुधेनअघंथहतवानसि ८४

पूर्वंशुष्णस्यबलंनिवासिदानींशुष्णमपिहतवानित्याहत्वंवधत्रैःहननसाधनैःआयुधैःशुष्णस्यशुष्णंअवातिरःकुत्सा
यराजर्षयेअवाध्नुखंकृत्वाअवधीःतथाहिइंद्रत्वंशच्याःस्वकीयप्रज्ञयागाःशत्रून्हत्वातेषांगाःअविंदःअलभथाःइत्
पूरणः १८ त्वंहत्यवृषभेतित्वंहत्यंखलुत्यत्तत्कर्मकृतवानसिकिंतत्हेवृषभकामानांवर्षितःइंद्रचर्षणीनांयदृणां
मानुष्याणांभाविनानांवृत्राणांउपद्रवणांघनःहंतातादृशस्त्वंनविषःप्रवृद्धःवप्रभयवप्रविपततस्त्वंतस्तभानान्अ
सुरैःविध्यमानाःसिंधून्सप्तगंगाद्याःनदीःसरणायअसृजःपश्चात्त्वंदासपत्नीःअसुरस्वामिकाःअपःअजयःजि
तवानसितान्असुरान्जित्वाउदकानिचप्रासृजःइत्यर्थः १९ ससुक्रतुरितिसःइंद्रःसुक्रतुःशोभनप्रज्ञःभवतियः
सुतेषुअभिषुतेषुरणितानत्यार्थरमणशीलःकिंचअनुत्तमन्युःपरैरनुन्नक्रोधःतादृशःयःइंद्रःरेवान्धनवान्दृष्टां
तःअहेवयथाअहानिदिवसाःधनवंतःदिवसेषुहिधनानिप्रादुर्भवंतिनरात्रिषुतद्वत्तथायःइंद्रःएकइत्असहाय
एवनरिकर्मनिनरिमनुष्येअपांसिकर्माणिकर्ताकर्तुशीलोभवतिसपूर्वोक्तगुणोपेतइंद्रःवृत्रहावृत्रासुरस्यहंताइतितम
वेंद्रअन्यंप्रतिद्वतजन्मंप्रत्येवआहुःइंद्रसर्वमन्यंशत्रुसंघंअभिभवतीत्येवेतिवदंति २० सवृत्रहेत्यतिवृत्रहावृत्रस्य
हंतासइंद्रःचर्षणीधृत्मनुष्याणांधनादिदानेनपोषकोभवतितमिंद्रंहव्यंस्तोत्रभिराह्वातव्यंवयंसुष्टुत्याशोभनयास्तु
त्याहुवमअस्मदर्थंहृषुआह्वयामःकिमर्थंसःइंद्रःप्राविताप्रकर्षणास्माकंरक्षकोभवतिनिकिंचसएवेंद्रःश्रवस्यश्रवसःकी
र्तिकिंचमघवानिंद्रःअधिवक्ताअस्माकंधनदानेनअधिकंवक्तामितस्यवाजस्यान्नस्यदाताभवतिखलुतस्मात्एवंगुण
मिंद्रंवयंआह्वयामः २१ सवृत्रहेतिऋभुक्षाःऋभुभिःमरुद्भिःक्षिपतिविवसतीतितादृशःवृत्रहासःइंद्रःसद्यःतदानीमेवजा
तानःप्रादुर्भवन्हव्यःसर्वैःस्तोतृभिःपथ्यभिःआह्वातव्यःबभूवकिंचनर्यानिनर्याणिनरामनुष्याःतेभ्योहितानिपुरूणिब
हूनिअपांसिकर्माणिकृण्वन्कुर्वन्सखिभ्यःसखिभ्यःहव्यःआह्वातव्यःदृष्टांतःसोमेनयथापीतःसोमःपध्यःस्वर्गा
दिफलादिकुर्वन्देवैराह्वातव्योभवतितद्वत्॥ ॥इतिषष्ठस्यपष्ठेपंचत्रिंशोवर्गः॥ ॥याइंद्रेतिपंचदशर्चंचतुर्थंसूक्तंकाश्य

यः रेभः ऋषिः दशमी अति जगती एकादशीद्वादश्यौ उपरिष्टाद्बृहत्यौ अष्टकांतद्वादशाकवसौ त्रयोदशी जगती चतुर्द
शी त्रिष्टुप् पंचदशी जगती शिष्टाः बृहत्यः इंद्रो देवता १ याइंद्रेति हे इंद्र स्वर्वान् स्तस्ववान् त्वया यानि भुजो भोक्तव्यानि धना
नि असुरेभ्यः आहृतवानसि अत एव हे मघवन् धनवन्निंद्र अस्य धनस्य दानेन स्तोतारमिमं तव स्तोत्रकारिणमेव वर्द्धय
वृद्धिमंतं कुरु ये चान्ये यष्टारः ते त्वदर्थं स्तृक्तबर्हिषः स्तीर्णबर्हिषो भवति अतः तांश्च धनेन वर्धय २ यमिंद्रेति हे इंद्र त्वं यं अ
श्वं गमनसाधनान् अश्वान् गां अग्निहोत्रकर्मणि पयः प्रदानेनोपकारिकाः गाः अव्ययं व्ययरहितं भागं भजनीयं धनं
एतान् शत्रुभ्यः आहृत्य दधिषे बिभर्षि तं सर्वं सन्वंति सोमाभिषवं कुर्वंति दक्षिणावति यज्ञे लिप्यादक्षिणादिवत्स्वनन्त
दूति यजमाने यागं कुर्वाणे तस्मिन् त्वं धेहि मा पणौ श्रव्यव्यवहारात् अयष्टरि जने पणिः तस्मिन् एतत्सर्वं मा देहि ३ यइं
द्रेति हे इंद्र अदेवयुः देवान् युष्मान् अकामयमानः अव्रतः व्रतरहितः कर्मरहितो भ्रस्वापः अनुस्वापं असुस्वप्नं यथा भवति
तथा सालिस्वापिति स जनः स्वैराभिः एवैः गमनैः एव पोष्यं पोषणीयं रयिं स्वीयं धनं मुमुरत् मारयतु विनाशयतु ततस्तं
अपष्ठारं जनं संस्तुतः अंतर्हिते कर्मरहिते कस्मिन्श्चिद्देशे धेहि स्थापय ४ यच्छक्रासीतिहे शक्र इंद्र यत् यदा परावति दू
रे द्युलोके देवा असि हे वृत्रहन् वृत्रासुरस्य हंतः इंद्र यत् यदि अर्वावति अर्वाचितिं तस्मात् अधस्तात् स्थिते अंतरिक्षे भ
वसि तस्मादपि अतः भूलोकात् वा द्युगत्वं घलोकं प्रतिगच्छद्भिः केशिभिः केशवद्भिः सूर्यभिरिव अश्वैरिव स्थिताभिः गीर्भिः
स्तुतिभिः त्वा त्वां सुतावान् अभिषुतसोमवान् यजमानः अविवासति आत्माभिमुखं यज्ञं प्रति आगमयति ५ यद्वासीति हे इंद्र य
द्वा यदि वा दिवः द्युलोकस्य रोचने दीप्यमाने शालिस्थाने असि भवसि यत् यदि वा समुद्रस्य मध्ये अधि अधिगते विष्टपि वि
ष्टपे तत्संबंधिकस्मिंश्चित्स्थाने भवति हे वृत्रहंतम अतिशयेन वृत्रासुरस्य हंतः इंद्र यत् यदि पार्थिवे पृथिव्यां भवे स
दने स्थाने विषसि यदि वा अंतरिक्षे तस्मिन् लोके वर्तसे तथापि अस्मदीयं यज्ञं प्रति आगहि आगच्छ ॥ ॥इति षष्ठस्य षष्ठे
षट्त्रिंशो वर्गः ॥ ३६ ॥ स नः सोमेष्विति हे सोमपाः हे शवसः स्पते बलस्य पालयितः इंद्र सः पूर्वोक्तलक्षणः त्वं सुतेषु अस्मा ८५

497
1915

भिरभिषुतेषु सोमेषु नः अस्मान् राधसा अंनेन सूनृतावता शोभनवाक्ययुक्तेनान्नेन पुरीणसा बहुना राया धनेन नः
अस्मान् मादयस्व मादय ७ मा न इंद्रेति हे इंद्र मः अस्मान् मा परा वृणाक् मा परित्याक्षीः त्वं नः अस्माकं सोमेन सधमा
द्यः सधमादनशीलो भव किंच हे इंद्र नः अस्मान् त्वमवऊती अस्माकं रक्षिता रक्षतु त्वया त्वमित् त्वमेव नः अस्माकं आप्यं
बंधुः अत एव मा न इंद्र परा वृणक् इति गतोर्थः ८ अस्मे इंद्रेति हे इंद्र अस्मे अस्माभिः सचा सह सुते अभिषुते सोमे नि
षद अस्मदीये यज्ञे निषीद किमर्थं मधुपीतये मदकरस्य सोमस्य पानाय किंच हे मघवन् इंद्र महि महत् अवः रक्षणं जरि
स्तुति कर्त्रे कृधि कुरु अस्मे इंद्र सचा सुते इति मा स्यातः ९ न त्वा देवास इति हे अद्रिवः वज्रवन् त्वा त्वां देवासः त्वदन्ये स
र्वे देवाः नाशत बलेन न व्याप्नुवंति न मर्त्यासः मनुष्याश्च न व्याप्नुवंति एतत् विश्वा विश्वानि सर्वाणि जातानि भूतजातानि
शवबलेन च आभिभूः असि आभिभावुकः भवसि तस्मात् न त्वा देवास आशत इति गतार्थः ॥ १० ॥ विश्वाः पृतना इति वि
श्वाः सर्वाः पृतनाः सेनाः सन्नः परस्परं संगताः सत्यः अभिभूतरं शत्रूणां असर्थ अभिभवितारं नरं सर्वस्य नेतारं इंद्रं त
तक्षुः आयुधादिभिः तीक्ष्णी कुर्वंति किंच स्तोतारः राजसे आत्मनः प्रकाशनार्थं स्तूयमानं इंद्रं जजनुः जनयामासुः उतापि
च क्रत्वा च स्वीयवृत्रवधादिकर्मणा च वरिष्ठं उरुतमं आमुरिं शत्रूणां अभिमुख्येन मारयितारं उग्रं उद्गूर्णबलं अत एव ओजिष्ठं
ओजस्वितमं तवसं प्रवृद्धं तरस्विनं शत्रुवधार्थं वेगवंतम् इंद्रं धनार्थं स्तुवंति ॥ ॥ इति षष्ठस्य षष्ठे सप्तत्रिंशो वर्गः ॥ ३७ ॥ ॥
समीं रेभास इति रेभासः शब्दयितारः स्तोतारः ईं एनं इंद्रं सम स्वरन् सम्यक् अस्तुवन् किमर्थं सोमस्य पीतये सोमपानाय
किंच स्वर्पतिं स्वर्गस्य पालयितारं ईं एनमिंद्रं यत् यदा वृधे वृद्धये विप्राः वर्धनाय संस्कुर्वंति तदा धृतव्रतः धृतकर्मेंद्रः ओजसा
बलेन ऊतिभिः मरुद्भिः पालनैश्च सह संगच्छते हि ॥ १२ नेमिं नमंतीति नेमिं नेमिः अरान् यथा व्याप्नोति तद्वत् सर्वं व्या
प्नुवंतं दर्शनं नमनशीलमिंद्रं चक्षसा दर्शनमात्रेण नमंति स्तोतारः नमस्कुर्वंति ततो विप्राः मेधाविनः मेषं इंद्रो मेषो भूत्वा
मेधातिथिं स्वर्गमनयत् तस्मान् मेषेति धर्मेण भूतम् इंद्रं अभिस्वरा स्तोत्रिणः प्रणमंति अपि च हे स्तोतारः सुदीतयः अद्रुहः

भा·प·
५६

अद्रोग्धारः वः यूयं तरस्विनः कर्मसु त्वरायुक्ताः संतः इंद्रस्य कर्णे ऋक्भिः अर्चनैः मंत्रैः संस्कृतस्य गाभिष्टुत १३ तमिंद्र मि
ति तं इंद्रं जोहवीमि पुनःपुनः आह्वयामि कीदृशं मघवानं धनवंतं उग्रं उद्गूर्णबलं सत्रा सत्यं यथार्थं मेव दधानं सिबलानि दधा
नं अत एव अप्रतिष्कुतं शत्रुभिः अप्रतिरोधनीयं आह्वयामि किंच मंहिष्ठः पूज्यतमः यज्ञियः यज्ञार्हः इंद्रः गीर्भिः अस्मदीया
भिः स्तुतिभिः आववर्तत् चयंत्रेषु आभिमुख्येन वर्ततां च नतौच त्रीवज्रवान् इंद्रः नः अस्माकं राये धनाय विश्वा विश्वानि स
र्वाणि सुपथा सुमार्गाणि कृणोतु करोतु॥ १४॥ त्वं पुर इंद्रेतिहे शविष्ठ बलवत्तम शत्रुहनन समर्थ त्वं इंद्र एनाएतानि पु
रः शंबरस्य पुराणि ओजसा स्वेन तेजसा विनाशयितुं चिकित्स ज्ञातासि भवसि हे वज्रिन् वज्रवन् इंद्र विश्वानि सर्वाणि भुव
नानि भूतजातानि त्वत् त्वत्तः भीताः कंपंते तथा द्यावापृथिवी च भीषा भीत्या रेजेते कंपते १५ तन्म ऋतमिति हे शूर चित्र
चायनीय इंद्र तत् प्रसिद्धं त्वदीयं ऋतं सत्यं मे मां अवतु सर्वतो रक्षतु किंच हे वज्रिन् वज्रवन् इंद्र भूरि भूरीणि बहूनि दुरिता
दुरितानि पापानि अतिपर्षि अतीत्य पारयसि दृष्टांतः अपो न यथा नाविक उदकानि मनुष्यान् पारयति तद्वत् अस्मात् पापा
नि पारय कदा अन्नदीप्यमानः इंद्र विश्वरूपस्य बहुरूपस्य बहुरूपं तत् स्पृहयाय्यं सर्वैः स्पृहणीयं रायः तत् धनं नः अस्मभ्यं
आ आभिमुख्येन कदा दस्यसि कस्मिन् काले प्रयच्छसि तदा तव स्म प्रनंस संमार क्षतु॥ ॥इति षष्ठस्य षष्ठे अष्टत्रिंशो वर्गः॥
॥ ॥इति ऋग्भाष्ये षष्ठाष्टके षष्ठोध्यायः॥ ६॥ ॥इंद्राय साम गायतेति द्वादशर्चं पंचमं सूक्तं आंगिरसः नृमेधाख्यः ऋषिः सप्तमी द
शमी एकादश्यः ककुभः मध्यमपादस्य द्वादशाक्षरत्वात् शिष्टाउष्णिहः इंद्रो देवता १ इंद्राय साम गायतेति हे उद्गातारः विप्राय मे
धाविने बृहते महते धर्मकृते कर्मणः कर्त्रे विपश्चिते विदुषे वनस्यवे स्तुतिमिच्छते इंद्राय बृहत् बृहन्नामकं साम गायत पठ
त २ त्वमिंद्रेति हे इंद्र त्वं अभिभूः शत्रूणां अभिभविता असि भवसि किंच त्वं सूर्यं आदित्यं अरोचयः ते जोभिः अदीपयः किंच
विश्वकर्मा विश्वस्य कर्ता असि विश्वदेवः सर्वदेवश्च असि अतो महान् सर्वाधिकोऽसि ३ विभ्राजन्निति हे इंद्र त्वं ज्योतिषा तेज
सा दिवः आदित्यस्य रोचनं प्रकाशकं अधिकरणत्वेन स्वः स्वर्गं विभ्राजन् प्रकाशयन् अगच्छः अप्राप्नोः किंच देवाः सर्वे ते तव स

ख्यायेमिरे स्वं स्वमात्मानं नियमितवंतः ४ एंद्र न इति हे इंद्र प्रियः सत्राजित् महान् स्तोता अगोह्यः केनापि गूहितुमशक्य
गिरिर्न पर्वत इव विश्वतः सर्वतः पृथुः पृथुतमः दिवः स्वर्गस्य पतिः ईश्वरः त्वं नः अस्मान् आगधि आगच्छ ५ अभि हीति हे स
त्य सोमपाः सोमस्य पातः इंद्र यस्त्वं उभे रोदसी द्यावापृथिव्यौ अभिबभूथ सामर्थ्येन अभिभवसि स त्वं सुन्वतः सोमाभिषवं कुर्व
तो यजमानस्य वृधः वर्धकोसि दिवः स्वर्गस्याधिपतिः ईश्वरो असि हि ६ त्वं हीति हे इंद्र त्वं शाश्वतीनां बह्वीनां पु
रां शत्रुनगरीणां दर्तासि दारयिता भवसि किंच दस्योः उपक्षपयितुः अस्कुरस्य हंतासि मनोः मनुष्यस्य यागादिकं कुर्वतः वृ
धः वर्धकश्चासि दिवः स्वर्गस्याधिपतिः ईश्वरोसि हि॥ ॥इति षष्ठस्य सप्तमे प्रथमो वर्गः॥ ७ ॥अधा हीति हे गिर्वणः गीर्भिर्व
ननीय इंद्र अध अथ हि संभृताः अस्माकं महः महतः कामान् कामनीयान् स्तोमान् उपसृज्य महे उपसृजामः दृष्टांतः महे उदव यथा म
हद् उदकं नयंतः गच्छंतः उदभिः अंजलिना सिंच्यमानैः समीपस्थान् पुरुषान् क्रीडार्थं सृजंति तद्वदित्यर्थः ८ वार्ण त्वेति हे अ
द्रिवः वज्रवन् शूर इंद्र वार्णः यथा उदस्थानं यमाभिः नदीभिः वर्धति वर्धयंति तथा ब्रह्माणि स्तोत्रैः वावृध्वांसं चित् यथा नि
रुदकं देशं नदीभिः तथा न किंतु प्रवृद्धमेव त्वां दिवेदिवे अहन्यहनि वर्धयंति स्तोतारः वर्धयंति ९ युजंति हरीइति इषिरस्य
गमनशीलस्य इंद्रस्य उरुयुगं महायुगं रथे इंद्रवाहौ इंद्रस्य वाहनभूतौ वचोयुजा वचनमात्रेणैव युज्यमानौ हरी
अश्वौ गाथया स्तोत्रेण स्तोतारो युंजंति योजयंति १० त्वन्न इंद्रेति हे शतक्रतो बहुकर्मन् विचर्षणे विद्रष्टः इंद्र त्वं नः अस्मभ्यं
ओजो बलं नृम्णं धनं आभर आहर वीरं वीर्यं पितरं शत्रुनाशकं सनो अभिभवितारं वा अयाचमहे इति शेषः ११ त्वं हि नः पि
ता हे वसो वासयितः शतक्रतो इंद्र त्वं नः अस्माकं पिता पालकः बभूविथ भव त्वं माता भव मातृवत् धारकः अध अथ च
वयं ते तव सुम्नं सुखं ईयामहे १२ त्वां शुष्मिन्निति हे शुष्मिन् बलवन् पुरुहूत बहुभिराहूत शतक्रतो इंद्र वाज
यंतं बलमिच्छंतं त्वां उपब्रुवे उपस्तौमि स त्वं नः अस्मभ्यं सुवीर्यं धनं रास्व देहि॥ ॥इति षष्ठस्य सप्तमे द्वितीयो वर्गः॥ ॥
त्वामिदा ह्य इति चतुर्विंशत्यृचं षष्ठं सूक्तं नृमेधः ऋषिः आद्या बृहत्यः युजः सतोबृहत्यः इंद्रो देवता १ त्वामिदा ह्य इति हे वज्रिन् इंद्र

८५

499
1915

पंत्वां मृर्णयः हविर्भिः भरणशीलाः नरः कर्मणां नेतारः यजमानाः इंद्र अद्य त्यः श्वः अपाय्यन् सोममपाययन् स त्वं स्तोमवा
हसां स्तोत्रवाहकानां अस्माकं स्तोत्रं इंद्र हर्यश्व शृधि शृणु स्वसरं गृहं च उपागहि उपागच्छ २ मत्स्वा सुशिप्र सुशिप्र शोभन
हनो हरिवः अश्ववन् गिर्वणः गीर्भिः वननीयेंद्र त्वं तत्पिब धसः परिचारकाः आभूषंति आभवंति मत्स्व सोमेन मादयात्मानं
किं यत्तव सावनेषु ईमहे किं सुतेषु सोमेषु अभिषुतेषु सत्सु तव श्रवांसि अन्नानि उपमानि उपमानभूतानि उक्थानि प्रशस्यानि
च संत्विति ३ श्रायंत इवेति हे इंद्र अस्मदीयाः जनाः श्रायंत इव सूर्यं यथा समाश्रिता रश्मयः सूर्यं भजंते तथा इंद्रस्य विश्वेत् वि
श्वान्येव धनानि भक्षत भजत स्वकीयानि वसूनि धनानि जाते उत्पन्ने जनमाने जनिष्यमाणे ओजसा बलेन करोति अतो भा
गं न पित्र्यं भागमिव तानि धनानि प्रति दीधिम प्रतिधारयाम ४ अनर्शरातिमिति हे स्तोतारः अनर्शरातिं अपापकदानं
वसुदां धनस्य दातारमिंद्रं उपस्तुहि यतः इंद्रस्य रातयः दानानि भद्राः कल्याणानि सः इंद्रः स्वकीयं मनः दानाय अभीष्टप्रदा
नाय चोदयन् प्रेरयन् विधतः परिचरतः अस्य स्तोतुः कामं इंद्र स्तोतुः न रोषति न हिनस्ति ५ त्वमिंद्रेति हे इंद्र त्वं प्र तूर्तिषु संग्रा
मेषु विश्वाः सर्वाः स्पृधः युद्धकारिणीः शत्रुसेना अभ्यसि अभिभवसि किं च हे तूर्यः शत्रूणां बाधकेंद्र त्वं अशस्तिहा अप्रशस्तानां
अशस्तीनां हंतासि जनिता असुरेभ्यः अशस्तीनां जनयिता चासि विश्वतूः सर्वस्य शत्रुवर्गस्य हिंसिता चासि तरुष्यतः बाध
कांश्च बाधमानोसि ६ अनु ते शुष्ममिति हे इंद्र ते तव शुष्मं बलं तुरयंतं हिंसंतं शत्रून् क्षोणी द्यावापृथिव्यौ मातरा मातरौ
शिशुं न शिशुमिव अन्वीयतुः अनुगच्छतः गमनेन हृष्टातः किं च हे इंद्र यत् यस्मात् वृत्रं शत्रुं तूर्वसि अतः ते तव मन्यवे क्रोधाय वि
श्वाः सर्वाः स्पृधः संग्रामकारिण्यः सेनाः श्नथयंत श्लथा भवंति ७ इत ऊतीवइति हे अस्मदीयाः जनाः वः यूयं अजरं जरा
रहितं प्रहेतारं शत्रूणां प्रेरकं अप्रहितं केनापि अप्रेषितं आशुं शीघ्रमाममं तारं शत्रूणां जेतारं तोतारं देवानां मध्ये तारं रथी
तमं रथिनां मध्ये श्रेष्ठं अतूर्तं तोग्रिता नाम हिंसकं तुग्र्यावृधं उदकस्य वर्धयितारं इंद्रं ऊती ऊत्यै रक्षणाय इतः कुरुत ८ ८७
इष्कर्तारमिति इष्कर्तारं शत्रुणा संस्कर्तारं अनिष्कृतं स्वयमन्यैरसंस्कृतं सहस्कृतं बलेन कृतं शतमूतिं बहुरक्षणं शतक्र

501
1915

तुं बहुकर्माणं समानं बहूनां साधारणं वसवानं धनानि आच्छादयंतं वसूनां प्रेरयितारमिंद्रं अवसे
रक्षणाय वयं हवामहे ह्वयामः ॥ ॥इति षष्ठस्य सप्तमे तृतीयो वर्गः॥ ॥आयं त इति द्वादशर्चं सप्तमं सूक्तं भार्गवो नेमः ऋ
षिः अयमस्मीति द्वयोः इंद्र ऋषिः त्रिष्टुप् छंदः षष्ठी जगती सप्तम्याद्याः तिस्रः अनुष्टुभः यद्वाग्वदंतीति द्वे वाग्देवते वाग्दे
वत्ये शिष्टा ऐंद्र्यः १ अयं त एमीति हे इंद्र ते तव पुरस्तात् अग्रतः तन्वा पुत्रेण सह अयं अहं एमि शत्रून् अभिभवितुं गच्छामि
तव अग्रतो गच्छंतं मामां विश्वे देवाः त्वया सह पश्चात् अभियंति अभिगच्छंति यदा त्वं मह्यं भागं वा यन्नमाय भागं शत्रुषु स्थितं
भागं दीधरः धारयसि आदित् अनंतरमेव मया सह मच्छत्रून् जेतुं वीर्याणि पौरुषाणि कृणवः कुरु २ दधामीति हे इं
द्र ते तुभ्यं मधुनो मदकरस्य सोमस्य भक्षं अग्रे दधामि धारयामि सुतः अभिषुतः भागः भजननीयः सोमः ते तव हृदये निहितः
निहितः अस्तु भवसि अपि च त्वं मम दक्षिणतः दक्षिणपार्श्वे सखा असन् असः स्थितो भव अध अथ भूरि बहूनि वृत्राणि अस्म
दीयान् शत्रून् जंघनाव हे वृत्र वाहं च त्वं च अन्वः ३ प्र सु स्तोममिति हे जनाः वाजयंतः संग्राममिच्छंतः यूयं इंद्राय सत्यं सत्यभूतं
स्तोमं सुष्ठु प्रभरत इंद्र स्तौति एतत् यदि सत्यमस्ति भवति तर्हि नेमः उ नेम एव इंद्रः त्वः अन्यः नास्ति कश्चित् इत्याह ईं एनं इं
द्रं ददर्श आद्राक्षीत् न कोपि अपश्यत् अतः कं वयं अभिष्टवाम अभिष्टुमः तस्मादिंद्रो नाम कश्चिद्विद्यत इति वादमात्रं न तु स
त्यमित्यर्थः ४ अयमस्मीति एवं नेमस्य ऋषेर्वचनं आकर्ण्य इंद्रः तस्य समीपमागत्य आत्मानं अनेन मंत्रेण स्तौति हे जरितः
स्तोतः अयं अहं अस्मि इह तव समीपे स्थितं मामां पश्य विश्वा सर्वाणि जातानि जनितानि तानि भुवनानि मह्ना महत्त्वेन अभ्यसि
अहं अभिभवामि किं च ऋतस्य सत्यस्य प्रदिशः प्रदेष्टारः विद्वांसः स्तोत्रैः मामां वर्धयंति आपि च आदर्दिरः आदरणशीलो
हं भुवना भुवनानि शत्रुभूतानि दर्दरीमि भृशं विदारयामि ५ आ यन्मेति यत् यदा ऋतस्य यज्ञस्य यज्ञकर्मणि वेनाः का
मयमानाः हर्यतस्य कांतस्य अंतरिक्षस्य पृष्ठे आसीनं उपविष्टं एकं मामां आरुहन् तदानीं भवतां आरोहं मनः श्वित
मन एवमिमम हृदे हृदयाय प्रत्यवोचत् अब्रवीत् अशाशिषं च तदा ह्यानं शिशुमंतः पुत्रयुक्ताः सखायः प्रियाः अमी अ

विक्रमन्न मांक्रंदंती॥ति ६ विश्वे तान्इति स्वसमीपमागतमिंद्रं विश्वे सर्वे इत्यनेन अर्चनेन स्तो॥ति हे मघवन् इंद्र सवनेषु
यज्ञेषु सन्वने सोमा॥भिषवं कुर्वंति यजमानाय यानि कर्माणि च कर्य अकरोः ते तव तानि कर्माणि प्रवाच्या प्रवक्तव्यानि
विश्वे तत्अनं ता न्येव किं च त्वं परावतं परावन्नामकस्य कस्य चित् शत्रोः स्वभृतं यत् वसु धनं अस्ति तत् ऋषिबंधवे शार
शायरगानाम्नि ऋषये अपावृणोः अपहृतवान् असि पुरु संभृतं तथा बहु संभृतं वेति॥ ॥इति षष्ठस्य सप्तमे चतुर्थो वर्गः॥
॥७॥ प्रन्नूनमिति यः शत्रुः नूनं इदानीं प्रधावत प्रधावति पृथक् इरुः पृथक् न तिष्ठति वः युष्मान् न वा चरीत् न विचार य
ति चन स्वत्रू स्वशत्रोः मर्माणि मर्मस्थानेषु स सीं एनं वज्रं कुलिशं न्यपीपतत् ८ नमीवा जाइति सुपर्णः गरुत्मान् ननेनो
जवाः मनोवेगाः अयमनः गच्छन् आयसीं हिरण्मयीं पुरं नगरीं अतरत् अतारीत् ततो दिवं स्वर्गं गत्वा वज्रिणे इंद्रा
य सोमं आभरत् आहृत्य ९ समुद्रे अंतरिति यः वज्रः समुद्रे अंतः समुद्रस्य मध्ये शायति शेते पश्च उद्गात् उदकेन अभीवृतः
तस्मिं अस्मिन् आयसंयतः संग्रामस्य पुरः प्रस्रवणाः पुरस्तात् गच्छंतः आपः बलिं उपहारं भरंति धारयंति १० यद्वाग्वदं
तीति राष्ट्री राजनशीला देवानां मंद्रा मादयित्री माध्यमिका वाक् अविचेतनानि विज्ञानरहिता नि वदंती प्रज्ञापयंती न
दात् अस्याः वाग्देव्याः परमं उत्कृष्टं तां सर्वं स्वित् जगाम यत् पृथिवीं जगाम तिकर्यं प्रप्रभुवाम सा नि षसाद यज्ञे निषीदति
ततः चतस्रः दिशः प्रति ऊर्जं अन्नं पयांसि तत्कारणभूतानि उदकानि दुदुहे ११ देवीं वाचमिति यां देवीं द्योतमानां माध्य
मिकां वाचं देवा अजनयंत जनयंति तां वाचं विश्वरूपाः सर्वरूपाः व्यक्तवाचः अव्यक्तवाचश्च पशवो वदंति तत् सूर्वक
त्वात् वाक् प्रवृत्तेः सा वाग्देवी मंद्रा स्तुत्या सा अस्मभ्यं प्रदानेन नो अस्मभ्यं इषं अन्नं ऊर्जं पयः घृतादिरूपं रसं च दुहाना क्षरंती
धेनुः धेनुभूता सुष्टुता अस्माभिः सम्यक् स्तुता अस्मान् नमान् उप एतु उपगच्छतु आवर्षणाय १२ सखेविष्णाइति हे स
खे विष्णो त्वं वितरं अत्यंतं विक्रमस्व विक्रमं कुरु हे द्यौः त्वं च आयच्छ अस्य विष्कंभे विष्कंभनाय लोकं अवकाशं देहि प्रयच्छ हे
विष्णो त्वं चाहं च उभौ आवां वृत्रं मरुत् हनाव इन्ध सिंधून् वृत्रावष्टब्धा नदीः अरिणा चावनयाव तेऽमी विसृष्टाः सिंधवः इंद्र

583
1915

स्य प्रसवे यंतु प्रेरणे गच्छंतु॥ ॥इति षष्ठस्य सप्तमे पंचमो वर्गः॥ ऋधगिति षोडशर्चं अष्टमं सूक्तं भृगुगोत्रो जमदग्निः ऋषिः
चतुर्दश्याद्यास्तिस्रः त्रिष्टुभः त्रयोदश्या बृहती शिष्टाः पुरउष्णिक् हस्वः आपुजः सतो बृहस्यः तृतीयापि गायत्री स्तोत्रं राजस्कंगाय
तेति पादेन सहितानि हि विराट्स्यादि त्यदेवताकमिव वासीति हि अश्विनदेवताके आनो यज्ञं दिविस्पृशमिति हि वायुदेवत्येव
महां असि सूर्येति हि सूर्यदेवत्ये इयं यानी सेषा उषो देवत्या यद्या सूर्य प्रभा अनया स्तूयते अतः सेव देवता प्र आहुतिस्व
इत्येषा पावमान देवताका मा तां रुद्राणामिति हि गोदेवत्ये शिष्टाः पंचर्चं मैत्रावरुण्यः १ ऋधगित्थेति यः मनुष्यः नूनं क्षिप्रं
हव्यदातये हविषां प्रदात्रे यजमानाय मित्रावरुणौ अभिष्टये अभिमतसिध्यर्थं आचक्रे अभिमुखं करोति सः मर्त्यः मनुष्यः
ऋधक् सत्यं देवत्वाइत्यं देवतातये यज्ञाय शशामेहविः संस्करोति २ वर्षिष्ठक्षत्राइति वर्षिष्ठक्षत्रौ अतिशयेन वृद्धबलौ
उरुचक्षसा महादर्शनौ नरा नेतारौ कर्मणां राजाना दीप्यमानौ दीर्घश्रुत्तमा अतिशयेन विद्वांसौ तौ मित्रावरुणौ बहुता
जाविव स्वर्यस्य रश्मिभिः साकं सह दंसनादंसनानि कर्माणि अध्यर्तः प्राप्नुतः यथा बाहू सह कर्मप्राप्नुतः तथा मित्रावरु
णौ सह यज्ञं प्राप्नुतः ३ प्रयो वामिति हे मित्रावरुणौ वां युवां अजिरः गमनशीलो पियः यजमानः प्राद्रवत् अधिगच्छति संदे
वानां दूतो भवति अयः शीर्षा अलंकृत शिरस्को भवति मदेरघुः मदकरैः धनैः गता च भवति ४ न यः संपृच्छ इति यः शत्रुः संपृ
च्छ संप्रच्छे संप्रश्नाय न रमते न च उ न पुनः हवीनवि हवनाय न रमते न च संवादाय रमते तस्मात् शत्रोः सम्प्रतेः संग्रामा
तः अस्मान् अद्य उरुष्यतं हे मित्रावरुणौ युवां रक्षतं किं च तस्य शत्रोः बाहुभ्यां नः अस्मान् उरुष्यतं रक्षतं ५ प्रमित्राये
ति हे ऋतावसो यज्ञधन मित्राय सम्च च सेवार्हं वरुणाय यज्ञगृह भवं स्तोत्रं प्रगायत प्रकर्षेण गायत अर्यम्णे च प्रगायत
वरुणे छंद्यं प्राणन साधनं वचः प्रगायत मित्रादिषु राजसु स्तोत्रं प्रगायत बहुवचनं पूजार्थं॥ ॥इति षष्ठस्य सप्तमे षष्ठो
वर्गः॥ ६॥ तहिन्विरप्यिति अरुणं अरुणवर्णं जेन्यं जयसाधनं वसुवा सर्कं तिसृणां पृथिव्यादीनां एकं पुत्रं ते देवाः हिन्विरे
प्रेरयंति त्रिलोकस्य तमोनिवारणाय अर्कं चादब्धाः केनाप्यहिंसिताः अमृताः मरणरहिताः ते देवाः मर्त्यानां मनुष्याणां

रो

धामानि स्थानानि अभिवस्त्रे अभिपश्यंति ७ अभिवां वामिति हे नासत्यौ सत्यप्रणेतारौ सजोषसा संगतौ उभाउभौ
युवांभि मम जमदग्नेः उद्यता उद्यतानि निघुमत्तमानि दीप्ततमानि वचांसि स्तोत्ररूपाणि वाक्यानि कर्त्तृकर्माणि च यातं किंच ह
व्यानि हवींषि वीतं यि भक्षणाय प्रतिगच्छतं ८ रातिंयद्वामिति हे वाजिनी वसू अन्नधनौ अश्विनौ वायुवयोः संबंधिय तु अर
क्षसंरक्षोव जितं दानं अस्ति तन्नूयद्वा हवामहे या वामहे युवाभ्यां क्रियमाणां रातिं दानं हवामहे तदानीं प्राचीं प्राञ्चु स्वां ते
त्रां स्तुतिं प्रतिरं तौ वर्धयंतौ नरा नेतारौ अमदग्निनाः ऋषिणा गृणाना स्तूयमानौ वसतौ इत्थं आगच्छतं ९ आ नो यज्ञमिति
हे वायो त्वं नः अस्माकं दिविस्पृशं तं यज्ञं आयाहि किमर्थं स्तमन्नभिः स्तः स्तुतिभिः अतः पवित्रपवित्रस्य मध्ये उपरिस्थि
णान् श्रयमाणाः निमिश्रमाणः शुक्रः शुद्धः अयं सोमः ते तुभ्यं अयामि नियतं आसीदिति १० वेत्यध्वर्युरिति हे नियुत्वः नि
युत्संज्ञिकाश्ववन्वायो अध्वर्युः हविर्धानात् रजिष्ठैः ऋजुतमैः पथिभिः मार्गैः वेति वीतं यि भक्षणाय तव भक्षणानि ह
व्यानि हवींषि च प्रतिनयतीति शेषः अथ अमन्नः अस्माकं संबंधिनं उभयस्य उभयविधं सोमं पिब उभयविधत्वं दर्शय
ति शुचिं शुद्धं सोमं गवाशिरं गव्येन पयसा मिश्रितं चेति॥ इति षष्ठस्य सप्तमे सप्तमो वर्गः॥ ॥७१॥ बण्महाँ असीति
हे सूर्य त्वं महान् तेजसाधिको सि बट् सत्यं हे आदित्य अदितेः पुत्र त्वं महान् बलिनामधिको सि बट् सत्यं महः महतः स
तः अमवत्त ते महिमा महत्त्वं पनस्यते स्तोतृभिः स्तूयते हि देव द्योतनात् गुणयुक्त सूर्य त्वं महान् वीर्येणाप्यधिको सि अव
सि अद्धा सत्यमेव १२ बट् सूर्येति हे देव त्वं श्रवसा श्रवणेन महान् सर्वाधिको सि बट् सत्यं हे देव द्योतमान सूर्य त्वं देवा
नां मध्ये मन्हा महत्त्वेन महान् अधिको सि सत्यमेव असुर्यः असुराणां हंता चासि किं च त्वं देवानां पुरोहितः हितोप
देष्टा असि किं च ततू ज्योतिः तेजः विभु महान् अदाभ्यं केनापि अहिंस्यं १३ इयं या नीचीति या इयं नीची अर्वाक् सुखी अर्क्कि
णी स्तुतिमती रूपा रूपवती रोहिण्या कृता प्रकाशेन युक्ता उषाः सूर्यप्रभा वा सा अंतः मध्ये वाहुषु बाहुस्थानी
या रुदशा स्कदशा संख्यासु दिक्षु आयती आगच्छती चित्रे वचित्रा गो रिव प्रत्यदर्शि सर्वैः दृश्यत १४ प्रजा ह इति तिस्र इति याः ८१

585
1915

तिस्रः प्रजाः अत्यायमीयुः अत्यायमापन् अन्याः ताः इमाः प्रजाः अर्कं अर्चनीयं मग्निं अभितो विविश्रेत तो न पराबभूवुः
भुवनेषु अंतर्मध्ये बृहत् महत् असौ आदित्यः तस्थौ प्रकाशयन् अतिष्ठत् हरितः दिशः पवमानः वायुः आविवेश आविष्टः
१५ माता रुद्राणामिति या गौः रुद्राणां मरुतां माता जननी वसूनां दुहिता पुत्री आदित्यानां स्वसा भगिनी अमृतस्य पयसो
नाभिः संस्थानं तां अनागां अनागसं अदितिं अदीनां गां गोरूपां देवीं मावधिष्ट महिंसिष्टेति चिकितुषे चेतनावते जनाय नु इ
दानीं प्रवोचं अहं प्रवोचमिति शुश्रूषमाणेभ्यः उपदेशः १६ वचोविदमिति वचोविदं वचसो लभयित्रीं वाचं उदीरयंतीं पयः
पी लाघुत्का पश्चादुदीरयंतीं विश्वाभिः सर्वाभिः धीभिः उपतिष्ठमानां देवीं द्योतमानां देवेभ्यः देवार्थं आईयुषीं अवगच्छंतीं गां
दभ्रचेताः अल्पबुद्धिः मर्त्यो मनुष्यः परिअवृक्त परिवर्जयति॥ ॥इति षष्ठस्य सप्तमे अष्टमो वर्गः॥ ॥त्वमग्न इति द्वाविंश
त्यृचं नवमं सूक्तं भार्गवस्य प्रयोगो नाम ऋषिः बार्हस्पत्यो वा पावकः अग्निः सहसो नाम्नः पुत्रो गृहपतिर्यविष्ठो अग्नी अथवा
तयोरन्यतरः गायत्री छंदः अग्निर्देवता १ त्वमग्न इति हे देव अग्ने कविः क्रांतकर्मा गृहपतिः युवा नित्यतरुण स्त्वं दाशुषे हविषा
प्रदात्रे यजमानाय बृहत् इयमहत् रयिं धनं दधासि प्रयच्छसि अस्यर्थः २ स न इळानयेति हे विभानो विशिष्टदीप्ते अग्ने स त्वं चिकित्वान् ज्ञा
तासन् नः अस्माकं दुवस्वता परिचरणशीला इळा अन्नया स्तवत्या वाचा सह देवान् आवह ३ त्वया हि ते ति हे यविष्ठ युवतमाग्ने
चादिदिष्ठ न अति शायिन धुनानां प्रेरयित्रा त्वया युजा सहायेन वयं भार्गवादयो वाजसातये अन्नलाभाय अभिष्मः श
त्रून् अभिभवेम ४ और्वभृगुवदिति समुद्रवाससं समुद्रमध्ये वर्तिनं वाडवं शुचिं शुद्धं अग्निं और्वभृगुवत् यथा और्वभृगुः
अप्नवानवत् यथा अप्नवानः तथा आहुवे आकृपाम्यहं ५ हुवे वातस्वनमिति वातस्वनं वातसदृश ध्वनिकं विक्रांतकर्माणं
पर्जन्यक्रंदं पर्जन्यसदृशाक्रंदनं सहः सहस्विनं कविं वह्निं हुवे ह्वयामि कीदृशं समुद्रवाससं॥ ॥इति षष्ठस्य सप्तमे नव
र्गः॥९॥ आ सवमिति सवितुः देवस्य सवं यथा प्रभवं भगस्येव भगाख्यस्य देवस्य भोगमिव समुद्रवाससमग्निं आहुवे
आह्वयामि ७ अग्निं व इति अध्वराणां अहिंस्यानां बलिनां नप्त्रं बंधु सहस्वतितेजसा बलवंतं तं वर्धंतं ज्वालाभिः वर्धमानं पु

रुतमं अतिशयेन बहुमग्निं अत्विजः वः यूयं अच्छ अभिगच्छत ८ अयंयथेति अयमग्निः नः अस्मान् तष्टा विकर्तव्यानि
रूपेव त्वष्टा रूपाणि वर्धकः इव यथा येन प्रकारेण आभुषात् आ भवति यथा एनमग्निं अतिगच्छेतेत्यर्थः किं च वयं अस्याग्नेः कृ
त्वा प्रशस्तिभिः युक्ताः यशस्वतः यशस्वंतो भवामेति शेषः ९ अयंविश्वेति मनुष्याणां विश्वाः सर्वाः श्रियः संपदः देवेषु देवा
नां मध्ये यः अयमग्निः अभिमर्तिअभिगच्छतिसः अग्निः नः अस्मान् अपि सजेः अग्नेः उप आगमत् उपागच्छतु १० विश्वे
षामिति विश्वेषां सर्वेषां होतॄणां मध्ये यशस्तमं यष्टृतमं यज्ञेषु पूर्व्यं मुख्यं अग्निं इह अस्मदीये यज्ञे हे स्तोतः स्तुहि॥ ॥
॥ इति षष्ठस्य सप्तमे दशमो वर्गः॥ ११॥ शीरं पावकशोचिषमिति ज्येष्ठः देवानां मुख्यः दीर्घश्रुत्तमः अतिशयेन विद्वान् यः अग्निः
दमेषु यज्ञेषु आदीदाय आदीप्यते तं शीरं अनुशायिनं पावकशोचिषं पावकदीप्तिं स्तुहि इत्यर्थः १२ तमर्वंतमिति
हे विप्र मेधाविन् स्तोतः अर्वंतं अनश्वमिव सानसिं संभजनीयं शुष्मिणं बलिनं मित्रं न सखायमिव यातयज्जनं त्वा तु हन
नं तं अग्निं गृणीहि स्तुहि १३ उपत्वेति हे अग्ने हविष्कृतः यजमानार्थं गिरः स्तुतयः जामयः स्वसारः इव दिहिताः तव गुणा
न् आ दिशंत्यः ता ताः उपातिष्ठंत वायोः अंतिके समीपे तां समेधयंत्यः अस्थिरन् आतिष्ठंश्च १४ यस्यत्रिधेति यस्याग्नेः त्रिधा
तु अवृतं अनावृतं च असंदिनं आबद्धं स्तरणकाले हि बर्हिः बद्धं भवति बर्हिः तस्मै आसनार्थं तथा ततित स्मिन् अग्नावापश्च
तं आपापि निदधा निदधानिदधाति अंतरिक्षं माध्यमिकं पदं निदधातीत्यर्थः पदं देवस्येति मीढुषः कामानां सेक्तः देवस्या
ग्नेः पदं स्थानं अनाधृष्टाभिः शत्रुभिः अनाधृष्टाभिः ऊतिभिः रक्षणैः भजनीयं भवतीत्यर्थः तत्प्रेवास्यउपदृक् उपद्रष्टिरपि स्
र्य इव यथा सूर्यः तद्वत् भद्रा मनुष्यैः भजनीया भवति॥ ॥ इति षष्ठस्य सप्तमे एकादशो वर्गः॥ १६॥ अग्ने घृतस्येति हे ९०
स्य दिव अग्ने घृतस्य दीप्तिसाधनं आज्यस्य धीतिभिः दीप्तिभिः निधानैः तेपानः तपन् शोचिषा ज्वालया देवान् प्रसाधय इतिआ
वरूपयन् च १७ तं त्वाजनंतेति हे अंगिरः अग्नेः कविं क्रांतकर्माणं अमर्त्यं मरणरहितं हव्यवाहं हविषां वोढारं तं प्रसि
द्धं त्वां देवाः सः मनः इव अजनंत जनयंति १८ प्रचेतसमिति हे कवे क्रांतकर्मन् अग्ने प्रचेतसं प्रकृष्टबुद्धिं वरेण्यं दूतं

507
1915

देवानां हव्यवाहं हविषां वोढारं त्वां निषेदिरे देवाः निषादंति १९ नहिमेइति हे अग्ने मे मम भार्गवस्य ऋषेः अघ्न्यागोः नत्य
स्ति नवियंते पयः पयसा आज्येन च ताय नेयकिं च स्वधितिः नहि वनन्वति काष्ठानि लवितिः काष्ठं त्वां समिधाय अथ एता
दृक् अग्निः होत्रार्थं गाइधनं पयः कृत्वा साधनानिचरत सर्वं ते तुभ्यं अहं भरामि २० यदग्नेइति हे यविष्ठ युवतमाग्ने तेतु
भ्यं यत् यदा कानि चित् यानि कान्यपि दारूणि काष्ठानि आदध्मसि आधारयामसि तदा तानि काष्ठानि जुषस्व सेवस्व २१ यद
त्युपजिह्विकेति हे अग्ने यत् काष्ठादिकं वम्नः वरस्करकमिति वम्नः उपजिह्विका वम्नविशेषः सापि अतिसर्पति अतिगच्छति
तत्सर्वं ते तव घृतं घृतसदृशं अस्तु यथा घृतं तव प्रियकरं भवति तथा प्रियकरं भवत्वित्यर्थः २२ अग्निमिंधानमितिम
र्तः मनुष्यः अग्निमिंधानः काष्ठैः प्रज्वलयन् मनसे च श्रद्धानो धियं कर्म सचेत कालि भजेत विवस्वभिः ऋत्विग्भिश्चाग्नि
मेव ईधे प्रज्वलति॥ ॥ इति षष्ठस्य सप्तमे द्वादशो वर्गः॥ ॥अदर्शीति चतुर्दशर्चं दशमं सूक्तं कण्वः सोभरिः ऋषिः पंचम्या
द्यपुजः सतोबृहत्यः अष्टमी द्वादशी द्विककुभौ दशमी गायत्री चतुर्दशी अनुष्टुप् शिष्टाः बृहत्यः अग्निमरुतश्च अंत्यायाः
देवता शिष्टा अग्निदेवत्यः १ अदर्शीति यस्मिन् अग्नौ व्रतानि कर्माणि आदधुः यजमानाः अदृधन् गातुवित्तमः अति
शयेन मार्गाणां ज्ञाता सः अग्निः अदर्शि प्रादुरभूत् किं च सः आनं सम्यक् प्रादुर्भूतं अस्य आर्यस्य उत्तमवर्णस्य वर्धनं
वर्धयितारं अस्माकं गिरः स्तुतिरूपाः वाचः उपो नक्षंत उपगच्छंत्येव २ प्रदैवोदास इति दैवोदासः दिवोदासेन हूयमानो
ग्निः मातरं पृथिवीं अच्छ प्रति देवान् अस्यदि वोदासस्य यज्ञे देवानां अनु प्रतिरुर्विवर्ति न प्रविवाधतेयस्मात् एनमग्निं दि
वोदासः मज्मना बलेन अकरोवतस्मात् अयमग्निः नाकस्य स्वर्गस्य सानवि समुच्छ्रिते देशे स्वायत्तने एव तस्थौ अतिष्ठत्
३ यस्माद्रेजंतेति यस्मात् कारणात् चर्कृत्यानि कर्तव्यानि कर्माणि कृण्वतः कुर्वाणान् मनुष्यान् कृष्टयः इतरे मनुष्याः
रेजंते कंपंते तस्मात् इदानीं हे जनाः यूयं सहस्यसां गवां धनानां च सहस्रदातारं अग्निं मेधसातौ यज्ञे धीभिः कर्मभिः
त्मना आत्मना एष सपर्यत परिचरत इव पूरणः ४ प्रयंरायेति हे वसो वासकाग्ने त्वं यं तव स्तोतारं रायेधनार्थं प्र निनीषसि

भा·ध·
९१

प्रनेतु भिक्षसि यश्च मर्तः मनुष्यः ते तुभ्यं दाशात् हवींषि प्रयच्छति स मनुष्यः उक्थ्यशंसिनं स्तोत्राणां शंसितारं त्मना आत्मनैव स
हस्रपोषिणं बहुधनं वीरं पुत्रं धत्ते धारयति ५ सदृह्ळे चित् इति अर्वता अश्वेन पुरूवसो हे बहुधनाग्ने यः तुभ्यं हवींषि प्रयच्छ
ति स यजमानः दृळ्हे चित् दृढे अपि शत्रुपुरे स्थितं वाजं अन्नं अर्वता अश्वेन अभितृणत्ति हिनस्ति यथा स यजमानो क्षिति
अक्षीणं श्रवः अन्नं धत्ते धारयति तथा च सति तुभ्यं हविषां प्रदातारो वयमपि देवेत्व पिष्ठितानि विश्वा सर्वाणि वामा निवन
नीयानि धनानि सदा सर्वदा धीमहि धारयाम॥ ॥इति षष्ठस्य सप्तमे त्रयोदशो वर्गः॥१०॥ यो विश्वेति होता देवानामाह्वाता
मंद्रः मोदमानः यः अग्निः विश्वा सर्वाणि वसु वसूनि धनानि मर्तेभ्यः दायते प्रयच्छति तस्मै अग्नये मधोर्न मदरस्य सोमस्येव
प्रथमानि सुख्यानि पात्राणि स्तोमाः प्रयंति प्रगच्छंति ७ अश्वं न गीर्भिरिति हे दस्म दर्शनीय विश्पते विशां पते अग्ने यं
त्वा स्वदानवः शोभनदानाः देवयवः देवानात्मन इच्छन्तः यजमानाः रथ्यं रथस्य वोढारं अश्वं न अश्वमिव गीर्भिः स्तुतिभिः
मर्मृज्यंते परिचरंति त्वं अस्माकं यजमानानां तोके पुत्रे तनये पौत्रे च उभयस्मिन् मघोनां धनवतां राधः धनं पर्षि प्रयच्छ
८ प्र मंहिष्ठायेति पृथुपाजसे प्रभूतबलाय उप स्तोतृभ्यः स मंहिष्ठाय दातृतमाय ऋतावृते यज्ञवते बृहते महते शुक्रशोचिषे दीप्तते ज
से अग्नये प्रगायत स्तोत्रं प्रकुरुत ९ आ वंसते इति मघवा धनवान् द्युम्नी अन्नवान् समिध्यः दीप्तः आहुतः अग्निः यशः स्व
रं वीरवत् पुत्रयुक्तं अन्नं आ वंसते यजमानेभ्यः आ यच्छति अस्य अग्नेः नवीयसी नवतरा सुमतिः अनुग्रहबुद्धिः नः अस्मान् अ
च्छ अभिलक्ष्य वाजेभिः अन्नैः सह कुवित् बहुवारं आगमत् आगच्छतु १० प्रेष्ठमु इति हे आसव स्तोतः प्रियाणां प्रेष्ठं प्रियतमं
अतिथिं अभ्यागतं रथानां यमं यंतारं अग्निं अग्निमेव स्तुहि॥ ॥इति षष्ठस्य सप्तमे चतुर्दशो वर्गः॥११॥ उदिता य इति वेदि ९१
ता वेदिता यः स्तियः य आर्हः य अग्निः उदिता उदितानि उद्गतानि निदिता निदितानि श्रुता निवसवसु निधनानि तत्व ततनि आवर्त
यते धिया कर्मणा वाजं संग्रामं सिषासतः संभक्तुमिच्छतः यस्य तास्य ज्वालाः प्रवणे नीचे प्रवणाभिमुखाः समुद्रस्य तरंगाः इव
दुस्तराः न तु मशक्यास्तम् अग्निं हे स्तोतः स्तुहीत्यर्थः १२ मनो हणी तामिति वस्कः वासकः अतिथिः अतिथिवत् प्रियः पुरुप्रशस्तः

बहुभिः स्तुतः सः होता स्तुदेवानामाह्वाता स्वध्वरः स्ययज्ञश्च योग्निः स एव अग्निः नः अस्मभ्यं मा हृणीतां केनापि न रुध्यतां के
नाप्यनवरुध्यः सन् अग्निः अस्मभ्यं अभीष्टं प्रयच्छतु इत्यर्थः १३ मा ते रिषन्निति हे वसो वासक अग्ने त्वां ये मनुष्याः अच्छोक्तिभिः
अभिष्टुतिभिः केभिः कैः स्तवकरैः एवैश्चित् अभिगमनैः रथिनः स्तोतारः मो रिषन् मैव हिंसंतां रातहव्यः दत्तहविष्कः स्वध्वरः सु
यज्ञः कीरिश्चित् स्तोता अपि दूत्याय दूतकर्मलक्षणाय दूतकर्मणे त्वां ईट्टे हि स्तौति खलु १४ आग्ने याहीति हे अग्ने मरुत्सखा म
रुतां प्रियः त्वं अस्माकं यज्ञलक्षणे कर्मणि सोमपीतये सोमपानाय रुद्रेभिः रुद्रैः मरुद्भिः सह आ याहि आगच्छ सोभ
र्याः सोभरेः मम सुष्टुतिं शोभनां स्तुतिं च उपागच्छ मादयस्व स्तुतिं श्रुत्वा सोमं पीत्वा आत्मानं मोदयस्व॥ ॥इति षष्ठस्य सप्तमे पंच
दशो वर्गः॥ ॥इत्यष्टमे मंडले दशमोऽनुवाकः॥८॥ नवमे मंडले सप्तानुवाकाः तत्र प्रथमेऽनुवाके चतुर्विंशतिः सूक्तानि तत्र स्वा
दिष्ठयेति दशर्चं प्रथमं सूक्तं वैश्वामित्रो मधुच्छंदा ऋषिः गायत्री छंदः पवमानसोमो देवता १ स्वादिष्ठयेति हे सोम इंद्राय पात
वे पातुं सुतः अभिषुतः त्वं स्वादिष्ठया स्वादुतमया मदिष्ठया अतिशयेन मादयित्र्या धारया पवस्व क्षर २ रक्षोहा विश्वचर्षणिरि
ति रक्षोहा रक्षसां हंता विश्वचर्षणिः विश्वस्य द्रष्टा सोमः अयोहतं हिरण्येन हतं द्रुणा द्रोणकलशेन सधस्थं सहस्थानं योनिं अभि
षवस्थानं अभ्यासदत् अभ्यासादति ३ वरिवोधातम इति हे सोम त्वं वरिवोधातमः अतिशयेन धनानां दाता भव मंहिष्ठः दातृतम
श्च भव वृत्रहंतमः अतिशयेन शत्रूणां हंता भव किं च मघोनां धनवतां शत्रूणां राधो धनं च पर्षि अस्मभ्यं प्रयच्छ ४ अभ्यर्षेति हे सो
म महानां महतां देवानां वीतिं पानं अंधसा अन्नेन सह अभ्यर्ष अभिगच्छ उत अपि च त्वं वाजं बलं श्रवः अन्नं वा अभिगमय अस्मा
नित्यर्थः ५ त्वामच्छेति हे इंदो सोम त्वां अच्छ त्वां प्रति चराम सेवयं चरामः दिवे दिवे प्रतिदिनं अस्माकं तदित्
अर्थं तदेव तत्परिचरणमेव कार्यं नान्यत् कार्यमस्ति नः अस्माकं आशसः आशंसमानाः [illegible] एव नान्यत्र॥ ॥इति षष्ठस्य स
प्तमे षोडशो वर्गः॥१६॥ पुनाति त इति हे सोम ते तव परिस्रुतं क्षरंतं सोमरसं सूर्यस्य दुहिता श्रद्धा दे वि वारेण वालेन शाश्वतेन त
ना वि स्तृतेन पुनाति ७ तमीमण्वीरिति समर्ये समनुष्ये यज्ञे यार्ये दिवि सोत्वे हनि योषणः स्त्रियः स्वसारः स्वयं सरंत्यः दशसं

संख्याकाः अण्वीः अण्व्यः अंगुलयः तमीं तमेनं सोमं आगृभ्णंति आगृह्णंति ८ तमीं हिन्वंतीति तमीं एवं सोमं अग्रुवः अंगुल
यः हिन्वंति अभिषवदेशं प्रति प्रेरयंति प्रेरयित्वा च त्रिककुभं आसमानं हंति हंति सहशामंशुं सोमं धमंति अभिषुण्वंति तदेतत् सो
मात्मकं मधुवसू त्रिधातु त्रिस्थानं द्रोणकलशआधवनीयपूतभृत्सु इति त्रिधा वः वारणं शत्रूणां वारकं च भवति ९ अभीममघ्न्या
इत्यु उता पि च इममेनं शिशुं बालं सोमं अघ्न्याः अहंतव्याः धेनवः गावः इंद्राय पातवे पातुं अभिश्रीणंति स्वकीयेन पयसा संस्कु
र्वंति। सर्वः १० अस्येदिंद्र इति शूरः इंद्रः अस्येत् अस्य सोमस्यैव मदेषु विश्वा विश्वानि वृत्राणि शत्रून् आजिघ्नते आहंति म
घा मघानि धनानि च मंहते यजमानेभ्यः प्रयच्छति॥ ॥इति षष्ठस्य सप्तमे सप्तदशो वर्गः॥ ॥पवस्वेति दशर्चं द्वितीयं सू
क्तं कण्वः मेधातिथिः ऋषिः गायत्री छंदः पवमानसोमो देवता १ पवस्व देववीरिति हे सोम देववीः देवकामः त्वं रंह्या वेगेन
पवित्रं यथा भवति तथा अति पवस्व अति क्षर किं च हे इंद्रो वृषा सेचकस्त्वं इंद्रं आ विश प्रविश २ आ वच्यस्वेति हे इंदो सोम
महि महान् वृषा कामानां वर्षकः द्युम्नवत्तमः यशस्वितमः धर्णसिः धर्ता त्वं प्सरः पानीयं अंधः अन्नं आ वच्यस्व अस्मान्
प्रति आगमय योनिं स्वकीयं स्थानं आसदः आसीदश्च ३ अधुक्षतेति स्रुतस्याभिषुतस्य वेधसः अभिलषितस्य विधातुः
यस्य सोमस्य धाराः प्रियं प्रीतिकरं मधु अमृतं अधुक्षत दुग्ध सस्कृतुः सोमकर्मा सोमः अपो वसानो वरीः वसिष्ट आच्छाद
यति ४ महांतं त्वेति हे सोम त्वं यत् यदा यद्गोभिः गोविकारैः पयोभिः वासयिष्यसे आच्छादयिष्यसे तदा महांतं त्वा मनु
प्रति सिंधवः स्यंदमानाः मही महत्यः आपः अर्षंति गच्छंति ५ समुद्रो अप्स्विति समुद्रः द्रवंति अस्मात् रसा इति समुद्रः विष्ट
भः दिवः स्वर्गस्य धरुणः धारकश्च अस्मयुः अस्मत्कामः सोमः अप्सु उदकेषु मामृजे मम्मृज्यते पवित्रे अभिषिच्यते इत्यर्थः
॥इति षष्ठस्य सप्तमे अष्टादशो वर्गः॥ ६ ॥अचिक्रददिति वृषा कामानां वर्षकः हरिः हरितवर्णः महान् सर्वोत्तमः मित्रो न य
था सखा तद्वत् दर्शतः दर्शनीयः यः अयं सोमः अचिक्रदत् शब्दं करोति सोयं सोमः सूर्येण सह संरोचते दीप्यते दिवि प्रकाशते ७
गिरस्त इति हे इंदो तेन तव ओजसा बलेन अपस्युवः कर्मेच्छाः संबंधिन्यः ताः गिरः स्तुतयः मर्मृज्यंते शोध्यंते याभिः गीर्भिः त्वं ९२

मदाय क्षरन् शुंभसे अलंक्रियसे ८ तं त्वा मदायेति हे सोम यस्य तव प्रशस्तयः प्रशंसाः मही महत्यः घृष्वये उत्कर्षसादा
त् धर्षणशीलाय जमानाय वसुलोककृत्युत्तमस्य लोकस्य कर्तारं तं त्वा त्वां सोमं मदाय ईमहे याचामहे ९ अस्मभ्यमिंदो इति
हे इंदो सोम इंद्रयुः इंद्रकामस्त्वं मध्वः मदकरस्य सोमस्य धारया पर्जन्यः वृष्टिमानिव यथा वर्षवान् पर्जन्यो मेघः तथा अस्म
भ्यं मेधातिथिभ्यः पवस्व क्षर १० गोषा इंद्रो इति हे इंदो यज्ञस्य पूर्व्यः प्रत्नः आत्मा आत्मा भूत त्वं गोषाः अस्मभ्यं गवां दाता अ
सि भव सि नृषाः पुत्राणि दाता चासि अश्वसाः अश्वानां दाता चासि उत अपि च वाजसा अन्नानां दाता चासि॥ ॥इति षष्ठस्य स
प्तमे एकोनविंशो वर्गः॥ ॥एष देव इति दशर्चं तृतीयं सूक्तं अजीगर्तः शुनःशेपः ऋषिः गायत्री छंदः पवमानसोमो देवता १
एष देव इति देवः द्योतमानः अमर्त्यः मरणरहितः एषः सोमः द्रोणानि द्रोणकलशानि अभि अभिलक्ष्य आसदं असनार्थं
पर्णवीरिव यथा पक्षी तथा वेगेन दायति गच्छति २ एष देव इति विपा अंगुल्या कृतः अभिषुतः एषः सोमः देवः पवमानः क्षर
न् अदाभ्यः केनापि अहिंसितः अवसन् ह्वारांसि शत्रून् अतिधावति हंतुं अभिगच्छति ३ एष देव इति पवमानः क्षरन् एष सो
मः देवः विपन्युभिः स्तोतृभिः ऋतायुभिः यज्ञकामैः हरिः अश्व इव वाजाय संग्रामार्थं मृज्यते स्तुतिभिः अलंक्रियते ४ एष वि
श्वानीति पवमानः क्षरन् शूरः एषः सोमः देवः विश्वानि सर्वाणि वार्या वरणीयानि धनानि सत्वभिः पन्निव गच्छन्निव सिषा
सति अस्मदर्थं संभक्तुमिच्छति ५ एष देव इति एषः सोमः देवः पवमानः पूयमानः रथयति अस्मदीयं यागं प्रति गमनाय र
थं कामयते दशस्यति आगत्य च अभिलषितं प्रयच्छति वग्वनुं शब्दं आविष्कृणोति अभिषूयमाणः प्रकटयति॥ ॥इति ष
ष्ठस्य सप्तमे विंशो वर्गः॥ ६ ॥एष विप्रैरिति विप्रैः स्तोतृभिः अभिष्टुतः परितः स्तुतः एष सोमः देवः दाशुषे यजमानाय र
त्नानि रमणीयानि धनानि दधत् धारयन् प्रयच्छन् अपः वसानो वरीः विगाहते प्रविशति ७ एष दिवमिति धारया पवमा
नः क्षरन् एषः सोमः कनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् रजांसि लोकान् तिरः तिरस्कुर्वन् यागात् दिवं स्वर्गं विधावति ग
च्छति ८ एष देव मिति एषः पवमानः सोमः स्वध्वरः सुयज्ञः अस्तृतः केनाप्यहिंसितः अवसन् रजांसि लोकान् तिरः तिरस्कु

वंत्रिय शाला दिवं प्रति व्यासरत् विसरतिगच्छति ९ एषप्रत्नेतिह हरिः हरितवर्णः देवः द्योतमानः एषसोमः प्रत्नेनपुराणेन ज
न्मना अननेन देवेभ्यो देवार्थं सुतः अभिषुतः सन् पवित्रेस्थातुं अर्षतिगच्छति १० एषउस्यइति स्यः एषःउसोमएवपुरुव्रतो
बहुकर्मा जज्ञानः जायमानः एवइषः अन्नानि जनयन् उसादयन् सुतः अभिषुतः सन् धारयापवते क्षरति॥ ॥इतिष
ष्ठस्यसप्तमे एकविंशोवर्गः॥ ॥सनाचेति दशर्चं चतुर्थंसूक्तं आंगिरसः हिरण्यस्तूपः ऋषिः गायत्रीछंदः पावमानसोमो
देवता १ सनाचेतिहे महि श्रवः महदन्नं पवमान सोम नः अस्मभ्यं गिदेवान् सनप्रजेशि विचयागविध्वंसकारिणः राक्षसान्
जयजित्वा यानंतरं नः अस्माकं वस्यसः श्रेयः कृधिकुरु २ सनाज्योतिहि सोमत्वं ज्योतिः तेजः सन अस्मभ्यं प्रयछअपिव स्वः स्व
र्गं सन अस्मभ्यं देहि विश्वानिविश्वानि सौभगा सौभाग्यानि च सनअय॰ ३ सनादक्षमितिहे सोमत्वं दक्षं बलं सनअस्मभ्यं
देहि उताप्रिच क्रतुं प्रज्ञानं सन मृधः हिंसकान् शत्रून् सजयअहि मारय ४ पवीतारइतिहे पवीतारः सोमाभिषवकर्तारः यू
यंइंद्राय पातवे पातुं सोमं पुनीतन अय॰ ५ त्वं सूर्येइति हे सोम त्वं तव क्रत्वा तवोतिभिः त्वत्कर्तृकर्मणा त्वत्कर्तृकाभिः रक्षाभिश्च
नः अस्मान् सूर्ये आभज आपय अय॥ इतिषष्ठस्य सप्तमे द्वाविंशोवर्गः॥ ६॥ तव क्रत्वेति हे सोम तव क्रतु प्रज्ञानेन तवोतिभिः
रक्षाभिश्च ज्योक् चिरं पश्येम सूर्यं दृश्याम अय॰ ७ अभ्यर्षेतिहे स्वायुध सोम नायुधे सोमत्वं द्विबर्हं संद्वयोः द्यावापृथि
व्योः स्थानयोः परिवृढं रयिं धनं अभ्यर्ष अस्मान् अभिगमय अय॰ ८ अभ्यर्षेतिहे सोमत्वमनप्च्युतः शत्रुभिः
अनाहतः सासहिः शत्रूणां अभिभविता त्वं रयिं धनं अभ्यर्ष अस्मान् अभिगमय अय॰ ९ त्वां यज्ञैरितिहे पवमान सोम त्वां यज्ञैः
विधर्मणि आलनिधारणार्थं अवीवृधन् यजमानाः वर्धयंति अय॰ १० हे इंदो सोम त्वं चित्रं नाना विधं अश्विनं अश्ववंतं च विश्वा
युं सर्वगामिनं रयिं नः अस्मभ्यं अभर आहर अय॰॥ ॥इतिषष्ठस्य सप्तमे त्रयोविंशोवर्गः॥ ॥समिद्धइत्येकादशर्चं पंच
मं सूक्तं शौनकस्यार्षं सूक्तं कश्यपासित स्य देवलस्यार्षं अष्टम्याद्याश्च तस्रः अनुष्टुभः शिष्टा गायत्र्यः नराशंसवर्जिताः समि
द्धादयः क्रमेण प्रत्यृचं देवताः १ समिद्धइति समिद्धः सम्यक् दीप्तः विश्वतस्पतिः सर्वतः स्वामी वृषाकामानां वर्षिता पवमानः

सोमः कनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् प्रीणन् देवान् प्रीणयन् विराजतियागेषु प्रकाशते २ तनूनपादितितनूनपा
त् देवः पवमानः सोमः शृंगे उन्नत प्रदेशेशिशानः तीक्ष्णीकुर्वन् अंतरिक्षेण राजन् अर्षति द्रोणकलशं प्रतिगच्छति ३ ईळेन्य
इति ईळेन्यः स्तुत्यः पवमानः सोमः रयिः अभीष्टस्य दाता द्युमान् च सन् ओजसा बलेन विराजति प्रकाशते ४ बर्हिः प्राची
नमितिहरिः हरितवर्णः देवः द्योतमानाः सोमः पवमानः देवेषु बर्हिः प्राचीनं प्राचीनाग्रं स्तृणन् तारयन् ओजसा बलेनईयते
गच्छति ५ उदातैरितिहे हिरण्ययीः हिरण्मय्यः द्वारो देवीः द्वारो दिव्यः पवमानेन सोमेन सह सुष्टुताः स्तोतृभिः सम्यक्स्तुताः
सत्यः बृहत् बृहतीभ्यः आतैः आताभ्यः दिग्भ्यः उज्जिहते उद्गच्छंति॥ ॥षष्ठस्य सप्तमे चतुर्विंशोवर्गः॥ ६॥ सुशिल्पे इति सु
शिल्पे सुरूपे बृहती परिवृढे मही महत्यौ नसंप्रतिदर्शने दर्शनीये नक्तोषासा नक्तोषासौ पवमानः सोमः इषण्यति कामयते ७
उभा देवेति नृचक्षसा मनुष्याणां द्रष्टारौ दैव्यौ देव्यौ देवसंबंधिनौ देवादीप्तौ होतारौ उभाउभौ हुवे अह्वयामि यत्ते पवमानः सो
मः इंद्रः दीप्तः वृषाकामानां वर्षिता च भवति ८ भारतीति भारती भारत्याख्या सरस्वती सस्वत्याख्या च मही महती इळाख्या च
तिस्रः सुपेशसः सुरूपाः देवीः नः अस्माकं पवमानस्य सोमस्य संबंधिनं इमं यज्ञं प्रत्यागमन् आगच्छंत ९ त्वष्टारमितिअग्र
जां अग्रे जातं गोपां प्रजानां पालयितारं पुरोयावानं देवानां पुरस्तात् गंतारं त्वष्टारं देवं आहुवे आह्वयामि यद्धरिः हरितव
र्णः पवमानः इंदुः सोमः इंद्रः देवानामीश्वरः वृषा कामानां वर्षिता च प्रजापतिः प्रजानां पालयिता च भवतीति १० वनस्पति
मितिहे पवमान सोम हरितं हरितवर्णं हिरण्ययं कदाचित् हिरण्मयवर्णं वक्ष्माजुमानं दीप्यमानं सहस्रवल्शं सहस्रशाखं
वनस्पतिं देवं धारया धारामयेन मध्वा मधुना समंग्धि कुरु ११ विश्वेदेवा इतिहे विश्वेदेवाः वायुः बृहस्पतिश्च सूर्यश्च अग्नि
श्च इंद्रश्च सर्वे यूयं सजोषसः संगताः संतः पवमानस्य सोमस्य स्वाहाकृतिं स्वाहाकारं प्रति आगत आगच्छत॥ ॥इतिषष्ठ
स्य सप्तमे पंचविंशोवर्गः॥ ॥मंद्रयेतिनवर्चं षष्ठं सूक्तं काश्यपः असितः देवलः ऋषयः गायत्री छंदः पवमानसोमो देवता
१ मंद्रया सोमेतिहे सोम वृषाकामानां वर्षिता देवयुः देवकामः अस्मयुः अस्मत्कामश्च अभ्यः अंवः वारेषु वालेषु दशापवि

९३

भा.प. त्रे मंद्रया मदकरया धारया पवस्व क्षर २ अभि त्यमिति हे इंदो सोम त्वं इंद्रः ईश्वरः इति कल्वा त्यं तं मद्यं मदकरं मदं रसं अभिक्ष
९४ र वर्ष वाजिनः बलवंतः अर्वतः अश्वांश्च अस्मदर्थं अभिक्षरेत्यर्थः ३ अभि त्यं पूर्व्यमिति हे सोम सुवानः अभिषूयमाणस्त्वं पूर्व्यं
प्रत्नं त्यं तं प्रसिद्धं मदं मदकरं पवित्रे आ समंतात् अभ्यर्ष अभिगमय वाजं बलं अस्मान् अभ्यर्ष उत अपि च श्रवः अन्नं अभ्यर्ष ४
अनु द्रप्सास इति द्रप्सासः द्रुतगतयः पुनानाः क्षरंतः इंदवः सोमाः प्रवता प्रवणेन मार्गेण आपो न आप इव इंद्रं अन्वसरन् अनु
गच्छंति आशत व्याप्नुवंति च ५ यमत्यमिति अत्यं विंद्राप विश्रमतिक्रम्य वने अरण्ये क्रीळंतं वर्तमानं यं सोमं दश संख्याकाः
योषणः स्त्रियः अंगुलयः इत्यर्थः वाजिनं बलिनं अत्यमिव अश्वमिव मृजंति पवित्रं यंति उत्तरया संबंधः ॥ ॥इति षष्ठस्य स
प्तमे षड्विंशो वर्गः ॥ ६ ॥ तं गोभिरिति वृषणं कामानां वर्षितारं देववीतये देवानां पानाय मदाय स्तुतं अभिषुतं तं रसं संभराय सं
ग्रामाय गोभिः पयोभिः संसृज संयोजय ७ देवो देवायेति देवाय द्योतमानाय इंद्राय स्तुतः अभिषुतः देवः द्योतमानः सोमः
धारया पवते क्षरति यत् यस्मात् अस्य सोमस्य पयः पीवयत् पीतये इंद्र आप्यायितवान् तस्मात् धारया पवत इत्यर्थः
८ आत्मा यज्ञस्येति यज्ञस्य आत्मा आत्मभूतः स्तुतः अभिषुतः सोमः स्कधाणः यजमानेभ्यः कामान् प्रेरयन् रंह्यां वेगेन प
वते क्षरति प्रत्नं पुरातनं काव्यं आत्मनः कवित्वं निपाति अभिरक्षति ९ एवा पुनान इति हे मदिष्ठ अतिशयेन मदकर सोम
इंद्रयुः इंद्रकामः त्वं वातः अपि इंद्रस्य पानाय एव एवं मदं पुनानः क्षरस्व उहा उहायां यज्ञशालायां मिमीत्यर्थः गिरश्चित् शब्दान् अपि
दधिषे अभिषववेलायां उपरवेषु धारयसि करोषीत्यर्थः ॥ ॥इति षष्ठस्य सप्तमे सप्तविंशो वर्गः ॥ ॥असृग्रमिति नवर्चं सप्तमं
सूक्तं असितः देवलो ऋषिः तौ च काश्यपौ गायत्री छंदः पवमानः सोमो देवता १ असृग्रमिति सुश्रियः शोभनश्रियः अस्य इंद्रस्य यो ९४
जनं संबंधयितारं विदानाः जानंतः इंदवः सोमाः धर्मन् कर्मणि ऋतस्य यज्ञस्य पथा मार्गेण असृग्रं हविर्धाने सृज्यंते २ प्रधारा मध्व इति
हविष्षु हविषां मध्ये अग्रियः मुख्यः हविः हविरात्मकः सोमः महीः महतीः अपः वसतीवरीः विगाहते तस्य मध्वः सोमस्य अग्रियाः मुख्याः
धाराः प्रयंति इत्यर्थः ३ प्रयुज इति वृषा कामानां वर्षकः सत्यः सत्यभूतः अध्वरः हिंसावर्जितः अग्रियः मुख्यः सोमः सद्म यज्ञग

हं अभिप्रति वने उदकेषु अपः युक्ताः वाचः प्र अव चक्रदत् अतिशब्दान् करोतीत्यर्थः ४ परि यदिति कविः क्रांतकर्मा सोमः नृम्णा
नृम्णानि धनानि वसानः आच्छादयन् स्तोतॄणां काव्या काव्यानि कविकर्माणि स्तोत्राणि यत् यदा पर्यर्षति परिगच्छति तदा स्वः स्वर्गे वाजी
बलवान् इंद्रः सिषासति यागं प्रति आगंतुं स्वकीयं बलं संभक्तुं इच्छति ५ पवमान इति यत् यदा ईं एनं सोमं वेधसः कर्मणां कर्तारः मृ
ण्वंति प्रेरयंति तदा पवमानः क्षरन् एषः सोमः स्पृधः स्पर्धमानान् यागविघ्नकारिणः राक्षसान् विशः स्पर्धमानान् मनुष्यान् राजेव
या राजा तद्वत् अभि पीदति नाशयितुं अभिगच्छति ॥ ॥इति षष्ठस्य सप्तमे अष्टाविंशो वर्गः ॥ ६ ॥ अव्यो वारे परीति हरिः हरितवर्णः प्रि
यः देवानां प्रियतमः वनेषु उदकेषु संपृक्तः अव्यः अवेः वारे वालोपेते पवित्रे परिषादति किं च रेभः अभिषववेलायां उपरवेषु शब्दं कुर्वन् मतीम
सा स्कस्त्याय तुष्यते अंते ७ स वायुमिंद्रमिति यः यजमानः अस्य सोमस्य धर्मभिः कर्मभिः क्रियमाणाभिषवादिभिः रणयति स यजमा
नः वायुमिंद्रं च अश्विना अश्विनौ च मदेन साकं सह गच्छति प्राप्नोति ८ आ मित्रावरुणेति यं यजमानानां मध्ये सोमस्य ऊर्मयः तरंगाः
मित्रावरुणा मित्रावरुणौ देवौ भगं भगाख्यं देवं च आ प्रति पवंते क्षरंति ते यजमानाः अस्य सोमस्य इमं सोमं विदानाः जानंतः शाक्यभिः सुखैः
आगच्छंति इति शेषः ९ अस्मभ्यमिति हे रोदसी द्यावापृथिव्यौ युवां मध्वः देवानां मादयितुः वा अस्य सोमात्मकस्यान्नस्य सातये लाभाय
अस्मभ्यं काश्यप असितेभ्यः देवलेभ्यो वा रयिं धनं श्रवः अन्नं वृषु सति पश्चात् निधनानि संजितं संजयितं प्रयच्छतमित्यर्थः ॥ ॥
॥इति षष्ठस्य सप्तमे एकान्नत्रिंशो वर्गः ॥ ॥ एते सोमा इति नवर्चं अष्टमं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानः सोमो दे
वता १ एते सोमा इति एते अभिषुताः इमे सोमाः अस्य इंद्रस्य वीर्यं शक्तिं वर्धंतः इंद्रस्य कामं काम्यं प्रियं प्रीतिकरं रसं अभ्यक्षरन् अभि
पवंते अभिवर्षन् २ पुनानास इति ते प्रसिद्धाः सोमाः पुनानासः पुनानाः अभिषूयमाणाः चमूषदः चमसेषु सीदंतः वायुमश्विना
अश्विनौ च गच्छंतः प्राप्नुवंतः नो अस्मभ्यं सुवीर्यं धातु धारयंतु प्रयच्छंत्वित्यर्थः ३ इंद्रस्येति हे सोम पुनानः अभिषूयमाणः हार्दि अ
भिषुतस्त्वं इंद्रस्य राधसे संराधनाय ऋतस्य यज्ञस्य योनिं स्थानं आसदं यथा सदः आसीद इति तथा इंद्रं चोदय प्रेरय ४ मृजंति त्वेति हे सोम
त्वां दश दश संख्याकाः क्षिपः अंगुलयः मृजंति परिचरंति सप्त सप्तसंख्याकाः धीतयः होत्रकाश्च त्वां हिन्वंति स्वव्यापारैः प्रीणयंति वि

भा०ष०
१५ प्राः मेधाविनश्च तां अनु आमादिषुः अनुमादयंति ५ देवेभ्यस्त्वेति हे सोम मेध्यः अंवे लोमानि कं उदकं चाति अभिसृजानं त्वां देव
भ्यः देवानां मदाय मदार्थं गोभिः गोविकारैः पयोभिः संवासयामसि संवासयामः ॥ ॥ इति षष्ठस्य सप्तमे त्रिंशो वर्गः ॥ ६ ॥ पुनानः क
लशेष्विति पुनानः पूयमानः कलशेषु कुंभेषु निषिच्यमानः अरुषः आरोचमानः हरिः हरितवर्णः सोमः गव्यानि दध्यादीनि वस्त्रा
णि वासांसि च परि अव्यत पर्याच्छादयति ७ मघोन इति हे इंद्रो सोम मघोनः धनवतः नः अस्मान् प्रति पवस्व क्षर विश्वाः विश्वान्
द्विषः द्वेष्टॄन् अपजहि पापरयचस स्वायं प्रियमिंद्रं आविश आक्रम च ८ वृष्टिं दिव इति हे सोम त्वं दिवः द्युलोकात् वृष्टिं वर्षं परिस्र
व वर्षय पृथिव्याः अधि पृथिव्यां द्युम्नं अन्नं च उत्पादयेति शेषः नः अस्माकं सहः बलं च रत्न संग्रामेषु धाः धेहि ९ नृचक्षसमिति हे
दृश सोम नृचक्षसं नृणां प्रेक्षितारं स्वर्विदं सर्वज्ञं इंद्रपीतं इंद्रेण पीतं त्वां त्वां विवंतो वयं काश्यपा असिताः कश्यपपदेवलाद्या प्रजांपुत्रादिकां इ
षं अन्नं च भक्षीमहि भजेमहि ॥ ॥ इति षष्ठस्य सप्तमे एकत्रिंशो वर्गः ॥ ॥ परि प्रियेति नवर्चं नवमं सूक्तं असितः देवलो वा ऋषिः गा
यत्री छंदः पवमानसोमो देवता १ परि प्रियेति कविः मेधावी कविक्रतुः क्रांतकर्मा सोमः नः ध्योः अभिषवणफलकयोः हितः निहितः
सृवानः अभिपूयमाणः दिवः द्युलोकस्य परि प्रिया अति प्रियाणि क्षयाणि स्थानानि याति गच्छति २ प्र प्रेति हे सोम प्र प्र असंतं क्षयाय
तव निवासभूताय अद्रुहे अद्रोग्धे च पन्यसे स्तोत्रे जनाय मनुष्याय वीतिं वीतये भक्षणाय ऋष्टः पर्याप्तः त्वं च निष्ठया अन्नवत्त्मया
धारया अर्षय आगं प्रतिगच्छ ३ स सूनुरिति जातः स सन्नः शुचिः विशुद्धः महान् महत्तमः सः सोमाख्यः सूनुः पुत्रः मही महती अकृता
वृधा यज्ञस्य वर्धयित्र्यौ जातिविश्वस्य जननयित्र्यौ मातरा आत्मनो मातरौ द्यावापृथिव्यौ अरोचयत् ४ स सप्तेति याः नद्यः ये एकं मुख्यं
सोमं अक्षितं अक्षीणं वाश्रधुः वर्धयंति स सोमः धीतिभिः अंगुलिभिः हितः निहितः सन् अद्रुहः द्रोहवर्जिताः सप्त संख्याकाः नद्यः नदीः १५
अजिन्वत् प्रीणयति ५ ता अभि संतमिति हे इंद्र इंद्रतवल् दीयमानं कुमीणि ताः अंगुल्यः संतं विद्यमानं अस्तृतं अहिंसितं युवानं नित्य
तरुणं इंद्रं सोमं मदे मदंते अभिषवादि लक्षणाय कर्मणे अभ्यारिधुः ॥ ॥ इति षष्ठस्य सप्तमे द्वात्रिंशो वर्गः ॥ ६ ॥ अभि वह्निरि
ति यः वह्निः यज्ञस्य वोढा अमर्त्यः मरणमरणरहितः वा वह्निः देवानां त्वेतिः अत्यंतं वोढा च सोऽयं क्रिविः कूपरूपेण पूर्णः अवस्थितः

५।०
१०।

सप्त देवीः नदीः अतर्पयत् तर्पयति ७ अवा कल्येष्विति हे पुसः पुमन् सोम कल्येषु कल्यनयिषु अह्नः सृतः अस्मान् अवरक्ष
अपि च हे पुनान हे पवमान सोम त्वं याश्या योधनी यानि तमांसि रक्षांसि यानि तानि जंघनः नाशय ८ नूनव्यस इति हे सोम नव्य
से नव्यायनवीयसे सूक्ताय अस्माकं सूक्ताय पथो मार्गान् नु क्षिप्रं साधय अभिगच्छ अपि च प्रत्नावत् तथा पूर्वैः रुचः स्वदीप्तिः
रोचय प्रकाशय ९ पवमानेति हे पवमान सोम यः त्वं वाग्वत् पुत्रवत् महि महत् श्रवः अन्नं गां वाश्वं च रासि अस्मभ्यं प्रयच्छ सि
स त्वं मे धांसन् अस्मभ्यं प्रयच्छ अपि च स्तः यदस्माद्भिलषितं तत् सर्वं सिनं देहि ॥ ॥ इति षष्ठस्य सप्तमे त्रयस्त्रिंशो वर्गः ॥ ॥ प्रस्वा
नास इति नवर्चं दशमं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ प्र स्वानास इति प्रस्वानासः अभिषव
वेलायां उपरवेषु शब्दं कुर्वंतः सोमासः सोमाः रथाः इव यथा शब्दं कुर्वंतः रथाः अर्वंतो न यथा शब्दं कुर्वंतोऽश्वाः तथा श्रवस्यवः
श्रवस्याः अन्नमिच्छंतः रायिय जमानानां धनाय अक्रसुः आगच्छत २ हिन्वानास इति सोमाः रथाः इव यथा रथास्तथा हिन्वाना
सः हिन्वानाः यागं देशं प्रतिगच्छंतः भरासः भराः कारिणामिव यथा भारवाहिनां बाहोः धार्यंते तथा गभस्त्योः ऋत्विजां बाह्वोः दधन्वि
रे धार्यंते ३ राजानो इति सोमासः सोमाः प्रशस्तिभिः शस्ताभिः स्तुतिरूपाभिः वाग्भिः राजानो न यथा राजानः सप्तधातृभिः सप्त
होत्रादिभिः यज्ञो न यथा च यज्ञः तथा गोभिः गोविकारैः पयोभिः अंजते अज्यंते संस्क्रियंते इत्यर्थः ४ परि स्वानास इति स्वाना
सः सुवानाः अभिषूयमाणाः इंदवः सोमाः वर्हणा महत्या गिरा स्तुतिरूपया वाचा सृताः अभिषुताः संतः मदाय मद्यार्थं धारया पर्य
र्षति परितो गच्छंति ५ आपानास इति विवस्वतः इंद्रस्य आपानासः आपानभूताः उषसः भगं जनंतः अनयंतः सूराः सरंतः
सोमाः अर्णं वितन्वंति अभिषववेलायां उपरवेषु शब्दं कुर्वंति ॥ ॥ इति षष्ठस्य सप्तमे चतुस्त्रिंशो वर्गः ॥ ६ ॥ अप द्वारेति मतीनां
स्तुतीनां कारवः कर्तारः ऋत्विजः प्रत्नाः पुराणाः वृष्णः सेचकस्य हरसः आहर्तारः अश्वस्य आयवः मनुष्या द्वाराय ज्ञस्य द्वाराणि अपऋ
ण्वंति ७ समीचीनास इति समीचीनासः समीचीनाः आभय जामि सदृशाः एकस्य सोमस्य पदं स्थानं पिप्रतः पूरयंतः सप्त होता
रः सप्त होतृकाः आसंत यज्ञ उपविशंति ८ नाभा नाभिमिति नाभिं यज्ञस्य नाभिभूतं सोमं नः अस्माकं नाभा नाभौ अहमादधे

वामीर्यः पीतसोमानां अस्माकं चक्षुश्चित् चक्षुरपि सूर्ये सूर्येण सचा संगतं भवति किं च कवेः क्रांतकर्मणः सोमस्य अपत्यं अंशुं आदुहे
आपूरयामि ९ अभि प्रियेति सूरः सूरवीर्यः इंद्रः चक्षसा चक्षसा दिवः दिविस्थस्य स्वर्गस्य प्रिया प्रियं पदं अध्वर्युभिः गुहा गुहायां
हृदये हितं पीतं सोमं अभिपश्यति॥ ॥इति षष्ठस्य सप्तमे पंचत्रिंशो वर्गः॥ ॥उपास्मा इति नवर्चं एकादशं सूक्तं असितः
देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ उपास्मै इति हे नरः नेतारः ऋत्विजः यष्टुं सर्वदेवान् इंद्रादीन् अभि इयक्ष
ते आभिमुख्येन यष्टुमिच्छते पवमानाय क्षरते अस्मै अभिषूयमाणाय इंद्रदेवे सोमाय उप गायत उपगानं कुरुत २ अभि ते इ
ति हे सोम ते तव देवं देवनशीलं देवयुं देवयुं कामं संक्षारं देवाय देवनशीलाय इंद्राय मधुना पयः गव्येन पयसा अथर्वाण ऋ
षयः अभ्याशिश्रयुः संस्कुर्वंति ३ स नः पवस्वेति हे राजन् दीप्यमान सोम सः प्रसिद्धः त्वं नः अस्माकं गवे शं सुखं पवस्व क्षर
जनाय पुत्राद्ये च शं पवस्व अर्वाय अश्वाय च शं पवस्व ओषधीभ्यश्च शं पवस्व ४ बभ्रव इति हे सोतारः बभ्रवे बभ्रुवर्णाय स्वतवसे
स्वबलाय अरुणाय कस्याचित् अरुणवर्णाय दिविस्पृशे दिवं स्पृशते सोमाय प्रक्षिप्तं गाथं स्तुतिरूपां वाचं अर्च अर्चत उच्चारयते
त्यर्थः ५ हस्तच्युतेभिरिति हे ऋत्विजः हस्तच्युतेभिः हस्तच्युतैः अद्रिभिः अभिषवग्रावभिः सुतं अभिषुतं सोमं पुनीतन पवित्रे
पावयत अपि च मधौ मदकरे सोमे मधु गव्यं पयः आधावत प्रक्षिपत॥ ॥इति षष्ठस्य सप्तमे षट्त्रिंशो वर्गः॥ ६॥ नमसेदि
ति हे ऋत्विजः नमसेत् नमस्कारेण च उपसीदत सोमं उपगच्छत दध्ना एव अभि श्रीणीत अभिश्रीणीत च इंद्रे इंद्रे सोमं दधात
न दधत च ७ अमित्रहेति हे सोम अमित्रहा शत्रूणां हंता विचर्षणिः विद्रष्टा देवेभ्यः अनुकामः कृत् अभीष्टस्य कर्ता त्वं गवे अस्मा
कं गवे शं सुखं पवस्व क्षर ८ इंद्रायसोमेति हे सोम मनश्चित् मनसा ज्ञाता मनसस्पतिः ईश्वरः त्वं इंद्राय इंद्रस्य पातवे पानाय
मदाय च परि षिच्यसे परितः पवित्रेषु सिच्यसे ९ पवमानेति हे इंद्रो क्लिद्यमान पवमान सोम त्वं सुवीर्यं शोभनवीर्ययुक्तं रयिं
नः अस्माकं संबंधिना इंद्रेण युजा सहायेन नः अस्मभ्यं रिरीहि देहि॥ ॥इति षष्ठस्य सप्तमे सप्तत्रिंशो वर्गः॥ ॥सोमा अ
सृग्रमिति नवर्चं द्वादशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ सोमा असृग्रमिति सुताः अभिषु ९६

ताः मधुमत्तमाः अतिशयेन मधुमंतः इंदवः सोमाः ऋतस्य यज्ञस्य सदने सदने गृहे इंद्राय इंद्रार्थं असृग्रं सृज्यंते २ अभि वि
प्रा इति विप्राः मेधाविनः सोमस्य पीतये पानाय इंद्रं मातरः जनयित्र्यः गावो वत्सं यथा वत्सं प्रति तद्वत् अभ्यनूषत अभि
शब्दयंति ३ मदच्युदिति मदच्युत् मदकरस्य रसस्य च्यावयिता सोमः सादने स्थाने क्षेति निवसति सिंधोः नद्याः ऊर्मा ऊर्मेः
तरंगः वसतीवरीषु इत्यर्थः विपश्चित् विद्वान् सोमः गौरी अधि गौर्यां माध्यमिकायां वाचि श्रितः श्रिश्रयति ४ दिवो नाभेति वि
चक्षणः चक्षुः प्रज्ञः कविः क्रांतकर्मा विचक्षणः विद्रष्टा सुः सोमः दिवः अंतरिक्षस्य नाभा नाभौ नाभिभूते अव्यः अवेः वारे वाले
महीयते पूज्यते ५ यः सोम इति यः सोमः कलशेषु अंतः मधु आ आस्ते पवित्रे पवित्रस्य अंतर्मध्ये आहितः निहितः तं स्वा
शयतं सोमं इंदुः सोमो देवः परिषस्वजे प्रविशति॥ ॥इति षष्ठस्य सप्तमे अष्टात्रिंशो वर्गः॥ ६॥ प्र वाचमिति इंदुः सोमः
मधुश्चुतं मधुना व्यापकं कलशं मेधा जिन्वन् प्रीणयन् समुद्रस्य अंतरिक्षस्य अधि विष्टपि विष्टब्धे स्थाने वाचं प्रेष्यति प्रेरय
ति पवित्रे पूयमानः शब्दं करोतीत्यर्थः ७ नित्यस्तोत्र इति नित्यस्तोत्रः संततस्तोत्रः सबर्दुघः अमृतस्य दोग्धा वनस्पतिः व
नानां पालयिता सोमः मानुषा मानुषाणि युगा युगानि अहीनैकाहानि हिन्वानः प्रीणयन् धीनां कर्मणां अंतर्मध्ये
निवसतीत्यर्थः ८ अभि प्रियेति कविः क्रांतकर्मा सोमः दिवः अंतरिक्षात् हिन्वानः प्रेर्यमाणः विप्रस्य मेधाविनः सोमस्य धार
या प्रिया प्रियाणि पदानि स्थानानि अभ्यर्षति अभिगच्छति ९ आ पवमानेति हे पवमान इंदो सोम त्वं सहस्रवर्चसं बहुदीप्तिं स्वा
कं वंदी भन भवन रयिं धनं अस्मासु आधारय प्रक्षिपेत्यर्थः॥ ॥इति षष्ठस्य सप्तमे एकोनचत्वारिंशो वर्गः॥ ॥इति ऋक्
भाष्ये षष्ठाष्टके सप्तमोध्यायः॥ ६॥ सोमः पुनान इति नवर्चं त्रयोदशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमान
सोमो देवता १ सोमः पुनान इति अयं पुनानः पावकः सोमः अर्षति गच्छति कीदृशः सहस्रधारः अपरिमितधारः अत्यविः अवि
लोमानि ष्यादिनं दशापवित्रं अदति अभ्यगच्छतीति अत्यविः किमर्थं वायोः इंद्रस्य च पानायेति शेषः किं प्रति निष्कृतं संस्कृतं पात्रं
प्रति २ पवमानमिति हे अवस्यवः रक्षणकामाः उद्गात्रादयः यूयं पवमानं शोधकं विप्रं विशेषेण देवानां प्रीणयितारं देववीतये

भा·ष·
८७

देवपानाय स्कंधाणं सत्यमाणं अभिसृगाय तत अभिमुख्येन स्तुत ३ पवंते क्षरंति सोमाः किमर्थं वाजसातये अन्नस्य लाभाय कि
दृशाः सहस्रपाजसः बहुबलाः पात्रणाय बलप्रदाः इत्यर्थः गृणानाः स्तूयमानाः पुनः किमर्थं देववीतये यज्ञार्थं ४ उत नइति उत अपि
च नः अस्माकं वाजसातये अन्नलाभाय रू इंदवः सोमाः बृहतीः इषमहतीर सधाराः द्युमत्तदीप्तिमत् सुवीर्यं शोभन सामर्थ्यं च
पवस्व क्षर शोभन समर्थ्यपिताः धाराः पवस्वेत्यर्थः ५ तेनः सहस्रिणमिति इंदवः सोमाः नः अस्माकं सहस्रिणं सहस्रसंख्योप
तं रयिं धनं स्तवीर्यं च पवंतां कादशाः स्तिस्तवानाः स्तूयमानाः दिवासः द्योतनादिगुणयुक्ताः ।। ।।इतिषष्ठस्याष्टमे प्रथमोवर्गः।। ।।
।।६।। अत्याहियानाइति वाजसातये संग्रामाय हियानाः प्रेर्यमाणाः अत्यान् अश्वाइवतेयथाप्रेरकैः प्रेर्यमाणाः संग्रामाय
शीघ्रं धावंति तद्वत् हरिताभिः प्रेरकैः प्रेर्यमाणाः आशवः शीघ्रगामिनः सोमाः वाजसातये अन्नलाभाय व्यसृग्रं व्यतिसृज्यंते
किं प्रति अव्यं अविमयं वारं वालं दशायपवित्रं प्रतीत्यर्थः ७ वाश्रा अर्षंतीति वाश्राः शब्दयंतः सोमाः अभ्यर्षंति अभिगच्छंति
पात्रं प्रति दृष्टांतः धेनवो वत्संनः यथा शब्दं कुर्वाण्यः गावः वत्सं प्रति आगच्छंति तद्वत् इंदवः ते एवं सोमाः गभस्त्योः बाह्वोः दध
न्विरे ध्रियंते च ८ जुष्ट इंद्रायेति इंद्राय जुष्टः प्रियः मत्सरः मदकरः सोमः मंदते हे पवमान त्वं कनिक्रदत् शब्दयन् विश्वाः द्वि
षः सर्वान्शत्रून् अपजहि ९ अपघ्नंतइति हे पवमानाः अराव्णः अदातॄन् अयजमानान् अपघ्नंतः हिंसंतः यूयं स्वर्दृशः
सर्वस्य द्रष्टारः ऋतस्य योनौ यज्ञस्य स्थाने सीदत ।। ।।इतिषष्ठस्य द्वितीयोवर्गः।। ।।परिप्रेत्यष्टर्चं चतुर्दशं सूक्तं असितः
देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ परिप्रेति परिप्रासिष्यदत् परिस्यंदते कविः मेधावी सोमः सिंधोरूर्मौ
तरंगवसतीवर्युदक्करसे अधिश्रितः आश्रितः पुरुस्पृहं बहुभिः स्पृहणीयं कारं शब्दं बिभ्रत् धारयन् परिस्यंदत इति संबंधः ८७
२ गिरायदीति सबंधवः समानबंधनाः पंच व्राताः पंचजनाः मनुष्याः यजमानाः अपस्यवः कर्मेच्छवः यदि यदा ईं एनं धर्ण
सिं धारकं सोमं गिरा स्तुत्या परिष्कृण्वंति अलंकुर्वंति अस्मात्तरत्रान्वयः ३ आदस्येति आत् परिष्करणानंतरमेव शुष्मिणः
बलवतः अस्य सोमस्य रसे विश्वे देवाः अमत्सत माद्यंति यदि यदा गोभिः गोविकारैः क्षीरादिभिः वसायते आच्छाद्यते ४ निरिणा

नइति अयं सोमः निरिणानः दशापवित्रात् अधोगच्छन् विधावति विविधं धावति यदा तन्वा तनुं दशापवित्रवस्त्रं तत्संबध्य निशर्या
णि द्वाराणि जहत् अधः सरति अत्र अस्मिन् यद्युजा सखिभूतेन इंद्रेण सस्पंजिघ्रते संगतो भवति होमद्वारेण इंद्रेण संगतो भव
तीत्यर्थः ५ नप्तीभिरिति यः सोमः विवस्वतः परिचरणवतो यजमानस्य नप्तीभिः पौत्रस्थानीयाभिः तस्य दुहितुः पुत्रः अंगुलयः पौ
त्रस्थानीयाः इति अभिप्रायः मामृजे मृज्यते शुभ्रो नदा प्राण्वो युवाइव स्व परिचारकैः मृज्यते तद्वत् स एव युवा मिश्रणशीलः सो
मः निर्णिजं स्वकीयं रूपं गाः नकृण्वानः गोविकारस्त्वकुर्वाणो भवतीति शेषः।। ।।इतिषष्ठस्याष्टमे तृतीयोवर्गः।। ।।६।। अतिश्रिती
ति अण्वा अंगुल्या अभिषूयमाणः सोमः गृभ्याग्भ्यानि श्रितिसंश्रयणार्थं तिरश्चता तिरश्चीनं अतिजिगाति अंशुमतिक्रम्य गच्छ
ति तथा अंगुल्या अभिषूयमाणः पवमानः शब्दं इयर्ति प्रेरयति विदे ज्ञानं तयजमानाय ७ अभि क्षिपइति क्षिपः अंगुलयः मर्जयंतीः अभि
मृशंत्यः इषस्पतिं अन्नानां स्वामिनं सोमं अभिसमस्वरत अभिसंगच्छंते संगच्छंत वाजिनः बलवतः सोमस्य पृष्ठाः पृष्ठानि गृभ्णत गृ
ह्णंति अभितिष्ठं वाजुलयः ८ परिदिव्यानीति हे सोम दिव्यानि पार्थिवा पार्थिवानि च विश्वानि सर्वाणि वसू निधनानि परिमर्म शत्रूप
रिगृह्णन् अस्मयुः अस्मान् कामयमानः याहि आगच्छ एवं अभिषुण्वन्तः रसं संबोध्यते ।। ।।इतिषष्ठस्याष्टमे चतुर्थोवर्गः।। ।।
एष धियेति अष्टर्चं पंचदशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ एष धियेति एष सोमः शूरः अण्व्या
अंगुल्या अभिषुतः धिया कर्मणा याति गच्छति कं देशं इंद्रस्य निष्कृतं स्थानं दिवं प्रति रथेभिः रथैः आशुभिः गच्छन् गच्छति २ एष
पुरूवीति एषः सोमः पुरु बहुलं धिया यते कर्मेच्छति कं से कृतं महत् देवतातये यज्ञाय यत्र यस्मिन् यज्ञे अमृतासः देवाः आसते
वसंति तदर्थं ३ एष हितइति एषः सोमः हितः निहितः हविर्धाने विनीयते तस्मात् स्थानात् आहवनीयं प्रति अंतः तयोर्मध्ये देश
शुभ्रावता आप्याववता पथा मार्गेण यदा यदा युंजंति प्रयच्छंति देवास्य भर्णयः भरणशीलाः अध्वर्य्वादयः तदा विनीयत इति सम
न्वयः ४ एषशृंगाणीति एषः सोमः शृंगाणि शृंगवत् उन्नतान् अंशून् अभिषवकाले दोधुवत् धुनोति यूथ्यः यूथपतिः वृषा वृष
भायथा शिशानः तीक्ष्णशृंगः धुनोति तद्वत् कीदृशः ओजसा बलेन नृम्णानि धनानि दधानः अस्मदर्थं धारयन् ५ एष रुक्मिभिरिति
एष सोमः रुक्मिभिः अध्वर्य्वादिभिः सह ईयते गच्छति कीदृशः वाजी वेगवान् शुभ्रेभिः दीप्तैः अंशुभिः विशिष्टः सिंधूनां स्पंदमानानां

भा.प. रसानांपतिर्भवन्यंईयतइति ६ एषवस्त्राणीति एषःसोमःवस्त्राणि आच्छादकानिपिब्दनापिब्दनानिपीडितानिरक्षांसिपरुषा
९८ पि. पर्वणाजत्नि अतिक्रम्ययईवान्गच्छन्शादिषुश्रातानीयिपुरक्षःस्कअवगूहति ७ एतंमृजंतीतिआयर्वःमनुष्याःऋत्विजाःएतं
सोमंमर्म्योमाजंनीयंमृज्यंतिनिष्पाडयंतीत्यर्थःकुत्रउपद्रोणिषुद्रोणकलशेषुकीदृशंमहीःइषःमरुत्सन्नानिप्रचक्राणंकुर्वाणंप्र
महतरसस्राविणमित्यर्थः ८ एतमुत्यमितित्यंतं एतमुत्तमेवसोमंदशक्षिपःदशांगुलयःमृजंतिपरिष्वरंतिसात्तधातयःसप्त
ऋत्विजश्चऋत्विजोअंगुलिभिःमृजंतीत्यर्थःकीदृशमिनंस्वायुधंशोभनायुधंमदिंतमंमादयितृतमंरक्षोहन्सामर्थ्यप्रदर्शना
यस्वायुधशब्दश्रवणं॥ ॥इतिषष्ठस्याष्टमेपंचमोवर्गः॥ ॥प्रतेसोतारइत्यष्टर्चंषोडशंसूक्तमसितःदेवलोऋषिःगायत्रीछं
दःपवमानसोमोदेवता १ प्रतेसोतारइतिहेसोमतेतवरसंसोतारःसोमाभिषवकर्तारःओण्योःद्यावापृथिव्योःरसंउकमिव
प्रस्नावयंतीतिशेषःकिमर्थंधर्षयेधर्षणशीलायमदायइंद्रस्यमदायअभिषवजनितःसोमःस्वर्गःस्पष्टःएतशान्अश्वइवत
त्किगच्छतिपाजंप्रति २ क्रत्वादक्षस्येतिवयंअभिपोतारःदक्षस्यबलस्यरथ्यंनेतारंआपःउदकानिवसानंआच्छादयंतंअंध
साम्रयणनान्नेनसहितंगोषांगवांक्षीरादीनाइत्यर्थःएवंउक्तलक्षणंसोमंक्रत्वाकर्मणाअन्विषुअंगुलीषुस्वम्रिमसंयोज
यामः ३ अनप्तमप्स्विति अनप्तंशत्रुभिःअनाप्तंअप्सुअंतरिक्षास्कवर्तमानमितिशेषःदुष्टरंअन्यैःअनभिभाव्यइंद्रं
सोमंपवित्रेदशापवित्रेआसृजप्रक्षिपहेअध्वर्योमदेवोम्यतइंद्रापइंद्रस्यपानवपातुंपुनीहि ४ प्रपुनानस्येतिचेतसाभ्
त्यापुनानस्यपूयमानस्यअंशोमहतःसोमःपवित्रेदशापवित्रेप्रअर्षतिगच्छतिअथपश्चात्क्रत्वाकर्मणासधस्थंसहस्थानं
द्रोणकलशेआसदत्आसीदति ५ प्रत्वानमोभिरितिहेइंद्रत्वांनमोभिःस्तोत्रैःसहइंदवःसोमाःप्रास्कन्नप्राभुवंतिकि ९८
मर्थंमदेमहतेमरायसंग्रामायकीदृशाःकारिणःबलकरणशीलाः ६ पुनानइत्यव्येअविमयेरूपेरूप्यमाणेवस्त्रिपुना
नःपूयमानःविश्वाःसर्वाःश्रियःशोभाअभ्यर्षन्अभिगच्छन्गोषुनिमित्तास्कम्भ्रेरोन्म्भ्रेरइवसूयथासंयामितिष्ठतितदूतः
असोतिष्ठतिपात्रे ७ दिवोनसानिति दिवोनअंतरिक्षादिवसानुसमुच्छ्रितमुदकंतद्यथाअधोनिपतितद्वत्वेधसःविधा
तुःबलस्यकर्तुःस्कतस्याभिषुतस्यसोमस्यपिप्युषीआप्यायनीधारासाअनायासेनेवपवित्रेदशापवित्रेअर्षतिगच्छति ८

त्वंसोमेतिहेसोमत्वंविपश्चितंस्तोतारंआयुपुमनुष्येषुमध्येरक्षसितनावस्त्रिणपुनानःअव्योवारंअवेर्वालंविधावसिविविधं
गच्छसि॥ ॥इतिषष्ठस्याष्टमेषष्ठोवर्गः॥ ॥प्रनिम्नेनेवेति अष्टर्चंसप्तमंसूक्तंअसितःदेवलोवाऋषिःगायत्रीछंदःपवमान
सोमोदेवता १ प्रनिम्नेनेवेतिनिम्नेनप्रवणेनदेशेनसिंधवःनद्यइवतथावृत्राणिघ्नान्तःघ्नंतःभूर्णयःक्षिप्रगमनाःआशा
वःव्याप्ताःसोमाःप्रासंयप्रगच्छंतिद्रोणकलशंप्रति २ अभिसुवानासइतिसुवानासःसूयमानाःइंदवःद्रवरूपाःसोमासःसो
माःइंद्रंप्रीणयितुंअभ्यक्षरन्किमिवरष्टयःपृथिवीमिव ३ अत्यूर्मिरितिअत्यूर्मिःअतिप्रवृद्धःमत्सरःमादनशीलःमदः
मदात्मकःसोमःपवित्रेअर्षतिगच्छतिकिंकुर्वन्रक्षांसिविघ्नन्घातयन्देवयुःदेवान्कामयमानाःअर्षतीतिसंबंधः ४
आकलशेष्वितिअयंसोमःकलशेषुआधावतितदर्थंपवित्रेपरिषिच्यतेअध्वर्युभिःउक्थैःस्तोत्रैःयज्ञेषुनिमित्तेषुवर्द्धतेप्रवृ
द्धोभवति ५ अतित्रीसोमेतिहेसोमत्वंत्रीरोचनानित्रीन्लोकान्अतिअतिक्रम्यरोहन्उपरिस्थंदिवंद्युलोकंभ्राजसेप्रका
शयसितथाइष्यन्गच्छन्सूर्येनसूर्यंचचोदयःचोदयसिप्रेरयसिनश्यार्थे ६ अभिविप्राइतिअभ्यनूषतअभिष्टुवंतिवि
प्राःस्तोतारःयज्ञस्यमूर्धंचमूर्धनिशिरोवत्उन्नमेअभिपवद्दिवसेइत्यर्थःकीदृशाःतेकारवःकर्तारःचक्षसिसोमेप्रियंदधानाः
अभ्यनूषतेतिसंबंधः ७ तमुत्वेतिहेसोमतमुतंमेवत्वांवाजिनंअन्नवंतंनरःनेतारःविप्राःमेधाविनअध्वर्य्यदियःधीभिः
कर्मभिःमृजंतिशोधयंतिदेवतातयेयज्ञार्थंकिमिच्छवःअवस्यवःअन्नमिच्छवः ८ मधोर्धारामितिहेसोमत्वंमधोःमधुरर
सस्यधारांअनुक्षरप्रवहन्तीव्रःतीव्ररसःसन्सधस्थंसहस्थानंअभिपवस्थानंपवित्रंवाआसदःचारुचरणशीलःसन्
ऋताययज्ञार्थंपीतयेपानायदेवानां॥ ॥इतिषष्ठस्याष्टमेसप्तमोवर्गः॥ ॥परिस्कवानइतिसदार्वंजस्ष्टादशर्चंसूक्तंअसि
तःदेवलोवाऋषिःगायत्रीछंदःपवमानसोमोदेवता १ परिस्कवानइतिअयंसोमःपवित्रेपर्यक्षाःपरिक्षरतिसुवानःसूयमा
नःगिरिष्ठाःगिरिस्थायीसोत्वंमदेषुमादकेषुस्तोत्रेषुसर्वधासर्वधातासर्वदातावासिभवसि २ त्वंविप्रइतिहेसोमत्वंविप्रः
विविधंप्रीणयिताकविःमेधावीअतस्त्वंअंधसःअन्नात्प्रजातंमधुमधुरंरसंप्रयच्छंतीतिशेषः ३ तवविश्वइतिहेसोमत
वपीतिंपीवाविश्वेदेवासःसर्वेदेवाःसजोषसःसमनप्रीतयःसंतःआशतप्राप्नुवन् ० ४ अपोविश्वानीतियःसोमःविश्वानि

तियः सोमः विश्वानि वार्यवरणीयानि वसूनि धनानि स्तोतुः हस्तयोः आदधत्करोति प्रयच्छतीत्यर्थः ५ यइमइतियःसो
मः इमे महीमहत्यौ रोदसी द्यावापृथिव्यौ संदोहते उभयोः सारं परिगृह्णातीत्यर्थः मातरेव यथा द्वे मातरौ एको वत्सः दोह
ति ६ परियइतियः सोमः उभे रोदसी द्यावापृथिव्यौ सद्यः तदानीमेव वाजेभिः अन्नैः पर्यर्षति परिगच्छति आद्रुत्या अन्नवतौ
करोतीत्यर्थः ७ सशुष्मीति उक्तरीत्या महान्स सोमः शुष्मी बलवान्पुनानः पूयमानः सन् आ अचिक्रदत् शब्दं करो
ति कलशेषु ॥ ॥इति षष्ठस्याष्टमे ष्टमो वर्गः॥ ॥यत्सोमेति सप्तर्चमेकोनविंशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः
पवमानसोमो देवता १ यत्सोमेति हे सोम यत् चित्रं चायनीयं उक्थ्यं स्तुत्यं दिव्यं दिवि भवं पार्थिवं पृथिवीसंबंधं च वसु ध
नमस्ति तत् नः अस्मभ्यं पुनानः पूयमानः सन् आ भर आहर २ युवंहीति हे सोम त्वं इंद्रश्च युवं हि युवं खलु स्वर्पती सर्वस्य
स्वामिनौ स्थः भवथः तथा गोपती गवां पालकौ ईशाना ईश्वरौ संतौ धियः अस्मदीयानि कर्माणि पिप्यतं प्यापयतं ३ वृषा
पुनान इति वृषा कामानां वर्षकः सोमः आयुषु मनुष्येषु अध्वर्य्वादिषु पुनानः पूयमानः सन् स्तनयन् शब्दं कुर्वन् अधि
बर्हिषि आस्तीर्णे दर्भे हरिः हरितवर्णः सन् योनिं स्वकीयं स्थानं आसदत् आसीदति ४ अवावशंतेति धीतयः धीयमा
नाः सोमा स्वेन वत्सेन वत्सेन पायमानाः मातरः निर्मात्र्यः वसतीवर्यः अधिरेससि स्वकीये सारे वृषभस्य वर्षकस्य सूनोः
अभिषूयमाणस्य वत्सस्य सोमस्य सोमं अवावशंत अमीमिलितवंतः ५ कुविदिति वृषण्यंतीभ्यः वृषणं सोमं आ इच्छंती
भ्यः वसतीवरीभ्यः पुनानः मिश्र्यमाणः गर्भं स्वगर्भस्थानीयं रसं कुविद् प्रभूतं करोति याः शुक्रं दीप्तं पयः दुहते स्वयं त्वा
य सोमायताभ्यः गर्भं आदधत् ६ उप शिक्षेति हे पवमान सोम उप शिक्ष त्वं समीपे कुरु कान् अपतस्थुषः अपक्रम्य स्थिता ९९
न् अस्मदभिमतः इत्यर्थः शत्रुषु अस्मद्द्वेषिषु भियं भयं आधेहि कुरु अस्माकं तेषां शत्रूणां रयिं धनं विदाः विंदसि
७ निशत्रोरिति हे अभिषूयमाण सोम त्वं शत्रोः वृष्ण्यं वर्षकं बलं नि तिर नाशय तथा शत्रोः शुष्मं शोषकं तेजः नि तिर त
थैव वयः अन्नं च नि तिर कीदृशस्य शत्रोः दूरे वा सतः अस्मत्तो दूरे वर्तमानस्य अंति वा सतः अंतिके वर्तमानस्य वा ॥
॥इति षष्ठस्याष्टमे नवमो वर्गः॥ ॥प्र कविरिति सप्तर्चं विंशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमान सोमो

देवता १ प्र कविरिति कविः मेधावी सोमः देववीतये देवानां पानाय अव्यः अवेः वारेभिः वारैः बालैः दशापवित्रेण प्रार्षति प्रकर्षेण
गच्छति साह्वान् शत्रूणां सोढा सोमः विश्वाः स्पृधः सर्वान् संग्रामान् अभि भवतीति शेषः २ सहि ष्मेति स हि ष्म स खलु पवमा
नः सोमः जरितृभ्यः स्तोतृभ्यः गोमत् बहुभिः गोभिर्युक्तं सहस्रिणं सहस्रसंख्याकं वाजं अन्नं आ अभि मुखं इंद्रं व्याप्य आ प्र
यच्छतीत्यर्थः ३ परि विश्वानीति हे सोम त्वं चेतसा स्वीयेन अस्मदनुकूलेन चित्तेन विश्वानि सर्वाणि धनानि परि मृशसे इत्यर्थः
मती सा अस्मत्स्तुत्या पवसे क्षरसि स त्वं हे सोम नः अस्मभ्यं श्रवः अन्नं विदः देहि ४ अभ्यर्षेति हे सोम बृहद्यशाः महती
कीर्तिः अभ्यर्ष अभिगमय मघवद्भ्यः अस्मभ्यं ध्रुवं रयिं धनं चाभ्यर्ष किं च इषमन्नं स्तोतृभ्यः अस्मभ्यं आ भर आहर ५ त्वं
राजेति हे सोम सुव्रतः सुकर्मा पुनानः त्वं राजेव गिरः अस्मदीयाः स्तुतीः आविवेशिथ आविवेशासि हे वह्ने वोढः अद्भुत सो
म ६ स वह्निरिति स सोमः वह्निर्वोढा यः अप्सु अंतरिक्षे वर्तमानः दुष्टरः दुःखेनान्यैः तरणीयः मृज्यमानः शोध्यमानः
गभस्त्योः हस्तयोः एवंभूतः सन् चमूषु पात्रेषु सीदति ७ क्रीळुरिति हे सोम क्रीळुः क्रीडनशीलस्त्वं मखयुः दानेच्छुः सो
म त्वा न दानमिव पवित्रं गच्छसि किं कुर्वन् स्तोत्रे स्तुतिकर्त्रे सुवीर्यं शोभनवीर्यं दधत् प्रयच्छन् ॥ ॥इति षष्ठस्याष्टमे दशमो व
र्गः॥ ॥एते धावंतीति सप्तर्चमेकविंशं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ एते धावंतीति
एते सोमाः इंद्राय धावंति गच्छंति कीदृशाः इंदवः क्लेदयितारः वृषयः वर्षणशीलाः मत्सरासः मादयितारः स्वर्विदः स्वर्लो
कस्य लंभयितारः प्रवृण्वंत इति प्रवृण्वंतः सुवानं प्रकर्षेण संभजंतः तथा अभियुजः अभियोजयितारः सुष्वय सुष्टु
अभिषवकर्त्रे वरिवोविदः धनस्य लंभयितारः स्वयं स्तोत्रे वयस्कृतः अन्नस्य कर्तारः एते धावंतीति संबंधः २ वृथाक्री
ळंत इति वृथा अनायासेन क्रीळंतः इंदवः सोमाः एकं मित्र एकमेव सधस्थं सहस्थानं अभि अक्षरन्निति शेषः सिंधोः ऊर्मी
वसतीवरीषु व्यक्षरन् ४ एते विश्वानीति एते सोमाः पवमानासः पवमानाः विश्वानि वार्याणि वार्याणि वरणीयानि धनानि
आशानत्याभुवन् रथे हिताः स्थापिताः सप्तयः न अश्वा इव ते यथा रथं अभिमतं देशं प्रापयंति तद्वत् धनं अस्माकं प्राय

स्वत्रित्यर्थः ५ आ स्मिन् पिशंगमिंदव इति हे इंदवः सोमाः अस्मिन् यजमाने पिशंगं बहुरूपं मणियुक्ता हिरण्यादि भेदेन नाना
रूपं धनं कामयंतं बहुविधं कामं आदिशो अस्मभ्यं अदिशता आप अदधात आयछत यः यजमानः अस्मभ्यं अरावा आदातृत्वा द्व
रहितः संपन्नः सन् प्रयछति तथा आयछत ६ ऋभुर्न ऊरुभासमानः रथस्यामीइव स यथा रथ्यं रथस्य नेतारः नवं स्तुत्यं
कुशलं सारथिनं अथ आधत्त तद्वत् अस्मद् यस्मिन् आदिशो स्वामिनि केतं प्रज्ञानं दधात तस्थापयत हे सोमाः यः अस्मभ्यं
प्रयछति तस्मिन्नित्यर्थः हे सोमाः अर्णसा उदकेन स्तुकाः दीप्ताः संतः पवध्वं रक्षध्वं ७ एत उत्ये इति त्ये ते एत उ एते एव सो
माः अवीशान् कामयंते पज्रस्वा जिनः बलवंतः सोमः काष्ठां अकृत निवासस्थानं अकुर्वन् द्रोणकलशात् उद्धृत ग्रहानित्यर्थः
सतः यजमानस्य मतिं बुद्धिं प्रासाविषुः प्रेरयन्॥ ॥इति षष्ठस्याष्टमे एकादशो वर्गः॥ ॥ एते सोमास इति सप्तर्चं द्वावि
शं सूक्तं असितः देवलो वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ एते सोमास इति एते पूयमानाः सोमासः सोमाः सृ
ष्टाः अध्वर्युणा आशवः दशापवित्रात् अधोगमनेन शीघ्राः स्नं हिषत प्रहिषंते शीघ्रगमने दृष्टांतद्वयं आजौ सृष्टाः शीघ्राः
रथा इव तथा उक्तलक्षणसर्गाः वाजिनः इव सृष्टाः अश्वा इव २ एते वाता इवेति एते सोमाः उरवः महांतः वाता इव वायव इ
व तथा पर्जन्यस्य वृष्टयः इव वर्षा यथा किंच अग्नेः भ्रमाः भ्रमणाः ज्वाला संचारा इव तथा अनायासेन व्याप्नुरित्युत्तरत्र सं
बधनीयं ३ एते पूता इति एते सोमासः सोमाः पूताः शुद्धाः विपश्चितः प्राज्ञाः दध्याशिरः दध्याश्रयणाः वियाप्रज्ञानेन धियः
अस्मदीयानि कर्माणि व्यानशुः व्याप्नुवंति ४ एते मृष्टा इति एते सोमाः मृष्टाः दशापवित्रेण शोधिताः अमर्त्याः अमरणधर्मी
णः ससवांसः हविर्धानात् सरंतः पथः मार्गान् रजः लोकांश्च इयक्षंतः गंतुमिछंतः न शश्रमुः न श्राम्यंति ५ एते पृष्ठानी १००
ति एते सोमाः सं दसोः द्यावापृथिव्योः पृष्ठानि विप्रयंतः विविधं गछंतः व्यानशुः व्याप्नुवंति उतापि च इदं उत्तमं रजः द्युलो
कं व्यानशुः आहुतिद्वारेणेति भावः सेदसो इत्यत्र अंतरिक्षाः भिप्रेतः ६ तंतुं तन्वानमिति तंतुं यज्ञं तन्वानं उत्तमं उत्कृष्टं सो
मं अन्वाशत प्रवतः नद्यः उताणि च इदं कर्म अनेन सोमेन उत्तमाप्यं उत्तमीकृतं ७ त्वं सोमेति हे सोम त्वं पणिभ्यः असुरेभ्यः

सकाशात् गव्यानि गोर्हितानि वसूनि धनानि आ आहत्स धारयः धारयसि तथा तंतुं यज्ञं प्रतितंतं विस्तृतं यथा भवति तथा
अविक्रदः शब्दमकार्षीः॥ ॥इति षष्ठस्याष्टमे द्वादशो वर्गः॥ ॥सोमा असृग्रमिति सप्तर्चं त्रयोविंशं सूक्तं असितः देवलो
वा ऋषिः गायत्री छंदः पवमानसोमो देवता १ सोमा असृग्रमिति आशवः शीघ्राः सोमाः असृग्रं सृज्यंते मधोः मधुरस्य म
दस्य मदकरस्य धारया असृग्रमिति संबंधः किं प्रति अभि लक्षीकृत्य विश्वानि सर्वाणि काव्या काव्यानि स्तोत्राणि प्रति स्तोत्र
समयद इत्यर्थः २ अनु प्रत्नास इति प्रत्नासः पुराणाः आयवः शीघ्रगमनाः अश्वाः नवीयः नवतरं पदं अनु अक्रमुः अनुक्रमं
ते एतः सोमेः रुचदीप्ता सूर्यं जनंतं कुर्वंतीत्यर्थः ३ आ पवमानेति हे पवमान सोम त्वं नः अस्मभ्यं अर्यः अरेः अदातुः अप्रय
छतः गयं गृहं गृहोपलक्षितं धनं आ भर आहर तथा अस्मभ्यं प्रजावतीः इषः अन्नानि स्कृधि कुरु ४ अभि सोमास इति आय
वः गंतारः सोमासः सोमाः मद्यं मदकरं अभि पवंते क्षरंति तथा मधुश्चुतं मधुस्राविणं कोशं साधारणं कोशशब्देन मिश्रितो
र सो लक्ष्यते तं अभिपवंत इति शेषः किमर्थं मिदं मदाय हर्षाय ५ सोमो अर्षतीति सोमो अर्षति गछति कीदृशः सः धर्ण
सिः धारकः जगतां तथा इंद्रियं इंद्रियवर्धकं रसं दधानः धारयन् स्ववीरः स्ववीर्यः अभिशस्तिपाः अभितो हिंसा तस्या र
क्षसः सोमपानं ब्रह्महत्यादि निंदा अनुमा स्थितिप्रसिद्धं ६ इंद्राय सोमेति हे सोम सधमाद्यः यज्ञार्हः त्वं इंद्राय देवेभ्यश्च पव
से क्षरसि हे नाहृशा इंदो सोम अस्मभ्यं वाजं अन्नं सिषाससि दातुमिछसि ७ अस्य पीत्वेति मदानां मदकराणां मध्ये अति
शयेन मदकरं अस्य अंशुं सोमं पीत्वा वृत्राणि शत्रून् अप्रतिगतः सन् इंद्रः जघान हतवान् नु क्षिप्रं जघनच्च हंतु वेदा नी
मिति॥ ॥इति षष्ठस्याष्टमे त्रयोदशो वर्गः॥ ॥ प्र सोमास इति सप्तर्चं चतुर्विंशं सूक्तं असितः देवलो वा ऋषिः गायत्री छं
दः पवमानसोमो देवता १ प्र सोमास इति सोमासः सोमाः पवमानासः पूयमानाः इंदवः दीप्ताः प्राधन्विषुः प्रगछंति किंच श्री
णानाः गोभिः श्रयमाणाः अप्सु अवसन्त अवरीषु चमूजं ते नमृज्यंते २ अभि गाव इति गावः गमनशीलाः इंदवः सोमाः अभ्यध
न्विषुः अभिगछंति दशापवित्रं किमिव प्रवता प्रवणवता देशेन यतीः गछंत्यः आपो न आप इव पश्चात् पुनानः इंद्रं प्रीणयि

तुं आशात आशुवन् ३ प्रपवमानेति हे पवमान सोम इंद्राय इंद्रस्य पातवे पानाय प्रधन्वसि प्रगच्छसि आहवनीयं प्रतिहवि
र्द्धानात् नृभिः नेतृभिः ऋत्विग्भिः यतः विनीतः विनीयसि हविर्द्धानात् ४ त्वं सोमेति हे सोम त्वं नृमादनः नृणां मादयिता चर्षणी
सहः चर्षणयः मनुष्याः शत्रवः तेषां समभिभविता इंद्राय पवस्व क्षरस्व त्वं सत्निः शुष्मः अनुमाद्यः स्तुत्यः सः पवस्वेति सम
न्वयः ५ इंदो यदिति हे इंदो त्वं यत् यदा अद्रिभिः ग्रावभिः सुतः अभिषुतः पवित्रं दशापवित्रं परिधावसि परिगच्छसि तदा
इंद्रस्य धाम्ने स्थानाय धारकाय अरं पर्याप्तो भवसि ६ पवस्व वृत्रहंतमेति हे वृत्रहंतम शत्रूणां अतिशयेन हंतः इंदो त्वं पव
स्व क्षर कीदृशः त्वं उक्थेभिः शस्त्रैः अनुमाद्यः स्तुत्यः शुचिः शुभ्रः पावकः शोधकः अद्भुतः महान् एवं महानुभावः पवस्व
७ शुचिः पावक इति सुतस्य अभिषुतस्य मधुनः मदकरस्य वल्यात्मकः सोमः रसरूपः शुचिः स्वयं शुद्धः पावकः शोधकः
चोच्यते तथा दिव्यावीः देवानां तर्पयिता अघशंसहा अघं पापं शंसंतीति अघशंसाः अस्कराः तेषां हंतेति वोच्यते ॥ ॥
॥ इति षष्ठस्याष्टमे चतुर्दशो वर्गः ॥ ॥ इति नवमे मंडले प्रथमोनुवाकः ॥ ७ ॥ द्वितीयेनुवाके षड्विंशत् सूक्तानि तत्र प
वस्वेति षळृचं प्रथमं सूक्तं दृळ्हच्युतः आगस्त्यपुत्र ऋषिः गायत्री छंदः पवमानसोमो देवता १ पवस्वेति हे हरे हरितवर्ण सो
म दक्षसाधनः बलस्य साधकः मदः मदकरस्त्वं पवस्व क्षर देवेभ्यः इंद्रादिभ्यः पीतये पानाय तथा मरुद्भ्यः वायवे च पात
ये पवस्व २ पवमानेति हे पवमान सोम धिया कर्मणा हितः धृतः सन् कनिक्रदत् शब्दं कुर्वन् योनिं स्थानं त्वां अभि विश
तिशोषः धर्मणा वायुं वायुसंबंधिनं पात्रमित्यर्थः तदा विशापविश ३ सं देवैरिति अयं सोमः संशोभते देवैः सह योनौ स्था ३०१
ने स्वीये अधिष्ठितः वृषा कामानां वर्षकः कविः क्रांतप्रज्ञः प्रियः प्रियभूतः सर्वेषां वृत्रहा वृत्रस्य हंता देववीतमः अतिश
येन देवान् कामयमानः एवं महानुभावः सोमः संशोभते ४ विश्वा रूपाणीति विश्वा सर्वाणि रूपाणि आविशन् पु
नानः पूयमानः हर्यतः कमनीयः इंदुः यातिगच्छति सोमः यत्र अमृतासः देवाः असंति तिष्ठंति तं देशं याति ५ अरुषो
जनयन्निति अरुषः अरोचमानः सोमः गिरः शब्दान् जनयन् पवते क्षरति किं कुर्वन् आयुषक् आनुषक् इंद्रं गच्छन् व्या

प्नुवन् कविः क्रतुः क्रांतप्रज्ञः ६ आ पवस्वेति हे मदिंतम मादयितृतम कवे क्रांतप्रज्ञ सोम त्वं पवित्रं अति क्रम्य धारया आ
पवस्व किमर्थं अर्कस्य अर्चनीयस्य इंद्रस्य योनिं स्थानं आसदं प्राप्तुं ॥ ॥ इति षष्ठस्याष्टमे पंचदशो वर्गः ॥ ॥ तमम्रक्षंतेति
षळृचं द्वितीयं सूक्तं दृळ्हच्युतपुत्रः इध्मवाहः ऋषिः गायत्री छंदः पवमानसोमो देवता १ तममृक्षंतेति तं वाजिनं अ
श्वव्यात्मिमित्यर्थः अदितेः पृथिव्याः उपस्थे अधि उत्संगे अमृक्षंत शोधितवंतः के विप्रासः अध्वर्यादयः केन साधनेन अ
ण्व्या अंगुल्या धिया प्रज्ञया अमृक्षंत २ तं गाव इति तं सोमं गावः गव्यः सृतयः अभ्यनूषत अस्तुवन् कीदृशं तं सहस्र
धारं बहुधारं अक्षितं अक्षीणं इंदुं दीप्तं दिवः द्युलोकस्य आधर्तारं सर्वतो धारकं ३ तं वेधामिति वेधां विधातारं पवमानं
तं मेधया प्रज्ञया अत्यन् प्राहिण्वंति किं प्रति अधि दिवि द्युलोकं प्रति पुनः कीदृशं धर्णसिं सर्वस्य धारकं भूरिधायसं बहूनां
कर्तारं ४ तमह्वन्निति तं सोमं विवस्वतः परिचरतः ऋत्विजः भुरिजोः बाह्वोः धिया अंगुल्या अत्यन् प्राहिण्वन् कीदृशं तं
संवसानं वसंतं पात्रे वाचः स्तुतेः पतिं स्वामिनं अदाभ्यं अदंभनीयं ५ तं सानाविति तं सोमं हरितवर्णं सानौ अधिसमुच्छ्रि
ते देशे जामयः अंगुलयः हिन्वंति प्रेरयंति अधिषुण्वंति अद्रिभिः ग्रावभिः कीदृशं हर्यतं कमनीयं भूरिचक्षसं बहुद्रष्टारं
६ तं त्वा हिन्वंतीति हे पवमान पूयमान इंदो दीप्त सोम तं उक्तगुण विशिष्टं त्वां हिन्वंति प्रेरयंति कस्मै इंद्राय वेधसः विधा
तारः ऋत्विजः कीदृशं त्वां गिरा वृधं स्तुत्या वर्धमानं मत्सरं मदकरं ॥ ॥ इति षष्ठस्याष्टमे षोडशो वर्गः ॥ ॥ एष कविरिति षळृ
चं तृतीयं सूक्तं नृमेधानामा आंगिरसः ऋषिः गायत्री छंदः पावमानसोमो देवता १ एष कविरिति एषः सोमः कविः मेधावी अ
भिष्टुतः अभितः स्तुतः पवित्रे अधि दशापवित्रे मतीत्य तोत्रति गच्छति किं कुर्वन् पुनानः पूयमानः स्त्रिधः शत्रून् अपघ्नन्
अपगमयन् २ एष इंद्रायेति एषः सोमः स्वर्जित् स्वर्गस्य जेता सोमः इंद्राय वायवे च पवित्रे परिषिच्यते कीदृशः दक्षसाधनः
बलकारी ३ एष नृभिरिति एष सोमः नृभिः ऋत्विग्भिः विनीयते विविधं नीयते कीदृशः दिवः द्युलोकस्य मूर्धा शिरोवत् प्रधान
भूतः वृषा अभिमतवर्षकः सुतः अभिषुतः कुत्र नीयते वननेषु वननीयेषु पात्रेषु विश्ववित् सर्वज्ञः एषः इति समन्वयः ४ एष

S29
1915

भा·ष·
९०२

गव्युरिति एषः सोमः पवमानः पूयमानः अचिक्रदत् शब्दं करोति कथंभूतः सन् गव्युः अस्माकं गाः इच्छन् हिरण्ययुः धन
मिच्छन् इंदुः दीप्तः सन् सत्राजित् महता असकारदः जेता अस्तृतः अन्यैरहिंस्यश्च सन् ५ एष सूर्येणेति एषः पवमानः पूय
मानः सोमः सूर्येण देवेन अधिष्ठितः लोके अंतरिक्षे पवित्रे हास्ते परि स्यंदते मत्सरः मदकरः मदः सोमः अध्वर्युणा पा
त्रे परिष्यंदते सूर्येण कथमिति चेत् सूर्यरश्मिभिः एव सोमस्याप्यायनात् सूर्येणेत्युक्तं ६ एष शुष्मीति एषः शुष्मी बलवा
[redacted]
आ इंद्रं च अभिगच्छतीति शेषः॥ ॥इति षष्ठस्याष्टमे सप्तदशो वर्गः॥ ॥एष वाजीति षळृचं चतुर्थं सूक्तं प्रियमेधा ऋषिः गा
यत्री छंदः पवमानसोमो देवता १ एष वाजीति एषः सोमः वाजी गमनशीलः हितः नृभिः अध्वर्य्वादिभिः पात्रे निहितः विश्व
वित् सर्वज्ञः मनसः स्तोत्रस्य पतिः स्वामी तादृशः सोऽव्यावारं अवेः वालं दशापवित्रं विधावति विविधं गच्छति २ एष पवि
त्र इति एषः सोमः देवेभ्यः देवार्थं सुतः अभिषुतः सन् पवित्रं अक्षरत् स्रवति विश्वा सर्वाणि धामानि देवशरीराणि अ
ग्नन् प्रविशन्निति अर्थः ३ एष देव इति एषः सोमः देवः शुभायते शोभते कुत्र योनौ स्वस्थाने कीदृशः अमर्त्यः अमरण
धर्मा वृत्रहा वृत्रहंता देववीतमः विशेषेण देवानां कामयिता ४ एष वृषेति एष वृषा वर्षिता कनिक्रदत् शब्दं कुर्वन् द
शभिः जामिभिः अंगुलिभिः यतो धृतः द्रोणानि द्रुममयानि पात्राणि अभिधावति अभिगच्छति ५ एष सूर्यमिति एषः सोमः
सूर्यं अरोचयत् रोचयत् पवमानः पूयमानः विश्वचर्षणिः सर्वस्य द्रष्टा विश्ववित् सर्ववित् विश्वा सर्वाणि धामानि तेजः
स्थानानि रोचयति ६ एष शुष्मीति एषः सोमः शुष्मी बलवान् अदाभ्यः अदंभनीयः पुनानः अर्षति गच्छति देववीः देवाना
मविता अघशंसहा अघान्ये शंसंतीति अघशंसाः तेषां हंता॥ ॥इति षष्ठस्याष्टमेऽष्टादशो वर्गः॥ प्रास्येति षळृचं पंचमं
सूक्तं मेधातिथिः ऋषिः गायत्री छंदः पवमानसोमो देवता १ प्रास्य धारा इति अस्य सोमस्य वृष्णो वर्षकस्य सुतस्याभिषुतस्य देवा
नच्छ प्रत्यक्षतः प्रगावितुमिच्छन् ओजसा स्वबलेन धाराः प्राक्षरन् प्रकर्षेण क्षरंति २ सप्तिमिति सप्तिं सर्पणस्वभावं ९०२

सोमं मृजंति शोधयंति किरणंतः स्तुवंतः वेधसः विधातारः कारवः कर्मकर्तारः अध्वर्य्वादयः गिरा स्तुत्या धनेन कीदृशं सप्तिं
ज्योतिः दीप्यमानं सोमं जज्ञानं जातं प्रवृद्धमित्यर्थः उक्थ्यं स्तुत्यं ३ सुषहा सोमेति हे सोम प्रपवस्व सोम प्रकृत धारं पुनानाय पूय
मानस्य तव ता नितांतं सुषहा शोभनानि पस्यानि देवेंतस्मात् समुद्रं मधुद्रसद्राद्रोणकलशं उक्थ्यं स्तुत्यं तव धर्म विधारयिषु
रयर सेन ५ रक्षा सुण इति हे सोम नः अस्मान् स्तुतः रक्ष पालय कस्मात् अररुषः अदातुः स्वनात् शब्दात् निदः निंदारूपात्
किं भक्तस्य अदानशीलस्य न समस्य सर्वस्य कस्य चित् कस्यापि यत्र मनुष्यस्य हे य स्मिन् रक्षणे सति वयं युक्ता भवेम ६ एंदो पा
र्थिवमिति हे इंद्रो सोम त्वं धारया आपवस्व सर्वतः रक्षपार्थिवं दिव्यं रयिं धनं द्युमंतं दीप्तं शुष्मं बलं च आहर अस्मभ्यं॥ ॥
इति षष्ठस्याष्टमे एकोनविंशो वर्गः॥ ॥प्रधारा इति षळृचं षष्ठं सूक्तं बिंदुरांगिरसः ऋषिः गायत्री छंदः पवमानसोमो देवता
१ प्रधारा इति शुष्मिणः बलवतः अस्य सोमस्य धाराः पवित्रे दशापवित्रे दशापवित्रे व याः प्रयलेन अक्षरन् स्रवंति तदानीं पुना
नः पूयमानः सोमः वाचं स्तुतिं प्रेष्यति प्रेरयति २ इंदुर्हियान इति अयमिंदुः दीप्तः सोमः हियानः प्रेर्यमाणः केसोतृभिः ऋत्वि
ग्भिः पश्चात् दशापवित्रे मृज्यमानः शोध्यमानः कनिक्रदत् शब्दं कुर्वन् इंद्रियं इंद्रियं इंद्रस्य संबंधिनं वग्नुं शब्दं इयर्ति प्रेर्यति
यद्गृणस्व ३ आ नः शुष्ममिति हे सोम त्वं धारया आपवस्व किं शुष्मं बलं कीदृशं नृषाह्यं नृणां अस्मद्विरोधिनां अभिभावुकं वी
रवंतं पुत्रपौत्रं पुरुस्पृहं बहुभिः स्पृहणीयं आपवस्व एतस्य लाभाय पवस्वेत्यर्थः ४ प्र सोम इति अयं पवमानः सोमः धारया अ
ति अतिक्रम्य दशापवित्रं प्रासिष्यदत् प्रस्यंदते किमर्थं द्रोणानि द्रोणकलशादीनि अभिआसदं आसादनाय ५ अप्सु त्वेति हे इं
दो सोम अप्सु वसतीवरीषु मधुमत्तमं अतिशयेन मधुमंतं हरिं हरितवर्णं त्वां अद्रिभिः अभिषवग्रावभिः हिन्वंति प्रेरयंति कि
मर्थं इंद्राय इंद्रस्य पीतये पानाय ६ सुनोतेति हे ऋत्विजः यूयं मधुमत्तमं मधुररसोपेतं सोमं इंद्राय वज्रिणे वज्रयुक्ताय सुनो
त सत्वतः पुनः कीदृशं चारुं रमणीयं मत्सरं मदकरं शर्धाय अस्माकं बलाय इंद्रस्य पानाय च॥ ॥इति षष्ठस्याष्टमे विंशो वर्गः॥
प्र सोमास इति षळृचं सप्तमं सूक्तं राहूगणो गोतम ऋषिः गायत्री छंदः पवमानसोमो देवता १ प्र सोमास इति आशवः प्रगच्छंति

भा॰प॰
३०२ कलशां प्रतिके सोमासः सोमाः कीदृशाः स्वाध्यः स्वाना पवमानासः पूयमानाः तवचितनं प्रज्ञापनं रयिं धनं कृण्वंति कुर्वंति अस्मा
कं २ दिवस्पृथिव्या इति हे इंद्रो वाजानां अन्नानां पतिः स्वामि त्वं दिवः द्युलोकस्य पृथिव्याः भूलोकस्य द्युम्नवर्धनः द्योतमानस्य हिरण्या
दिलक्षणधनस्य वर्धयिता भव अस्माकं लोक इयेपत द्युम्नम स्ति तस्य अधिभव वर्धयिता भव ३ तुभ्यं वाता इति हे सोम तुभ्यं त्व
दर्थं वाताः वायवः अभिप्रियः अभितर्पयितारः भवंति तथा सिंधवः स्यंदमानाः नद्यः तुभ्यं अर्षंति गच्छंति ते उभये अभितवम
हः महत्वं वर्धंति वर्धयंति ४ आप्यायस्वेति हे सोम त्वं अद्भिः अप्यायस्व प्रवृद्धो भव ते त्वां विश्वतः वृष्ण्यं वर्षयोग्यं बलं समेतु सं
गच्छतां संगथे संग्रामे वाजस्यान्नस्य प्रापको भव ५ तुभ्यं गाव इति हे बभ्रो बभ्रुवर्ण सोम तुभ्यं त्वदर्थं गावो घृतं पयश्च अक्षितं अ
क्षीणं दुदुह्रे दुहंति वर्षिष्ठे प्रवृद्धे अधिसानवि समुच्छ्रिते प्रदेशे स्थिताय तुभ्यं ६ स्वायुधस्येति हे भुवनस्य पते भूतजातस्य
स्वामिन् पालक इंदो सोम वयं अनुष्ठातारः स्वायुधस्य तेतव सतः सखित्वं सुम्नसि कामयामहे॥ ॥इति षष्ठस्याष्टमे एकविं
शो वर्गः॥ प्र सोमास इति षळृचं अष्टमं सूक्तं अत्रेयस्यावा ऋषिः गायत्री छंदः पवमानसोमो देवता १ प्र सोमास इति सोमासः
सोमाः मदच्युतः मदस्राविणः सुताः अभिषुताः संतः विदथे यज्ञे मघोनः हविष्मतः मम श्रवसे अन्नाय प्र आक्रमुः प्रगच्छंति २
आदीं त्रितस्येति आत् अपि च ईं एनं हरिं हरितवर्णं सोमं त्रितस्य ऋषेः योषणः अंगुलयः अद्रिभिः ग्रावभिः हिन्वंति प्रेरयंति
किमर्थं इंदुं दीप्तं सोमं इंद्राय इंद्रस्य पीतये पानाय ३ आदीं हंस इति आत् अपि च ईं अयं सोमः हंसः यथा गणं जनसंघं स्वगच्छ
ति विशेषेण प्रविशाति तद्वत् विश्वस्य सर्वस्य स्तोतृजनस्य मतिं स्तुतिं अवीवशत् वशं नयति स च सोमः अत्यो न अश्व इव गोभिः
गव्यैः अज्यते सिच्यते ४ उभे सोमेति हे सोम उभे द्यावापृथिव्यौ अवचाकशत् प्रपश्यन् इति कर्मेदं पश्यन् मृगो न मृग इव तक्वो गव्यैः प ३०२
य अद्रिभिः मिश्रितः सन् अर्षसि गच्छसि किं कुर्वन् ऋतस्य यज्ञस्य योनिं स्थाने आसीदन् आश्रयन् गच्छसि यज्ञसाधनाय ग
च्छती स्यर्थः ५ अभि गाव इति हे सोम त्वां गावः शब्दाः अभ्यनूषत अभिष्टुवंति योषा प्रियं जारमिव सा यथा तं स्तौति तद्वत् सो
मः आजिं गंतव्यं हितं मित्रमिव तं यथान्यः अगन् स्वहिताय गच्छति तद्वत् पात्रं गच्छति ६ अस्मे धेहीति हे सोम अस्मे अस्मभ्यं

द्युमत् दीप्तिमत् यशाः कीर्तिं सनिं संभजनं मेधां प्रज्ञानं च उत अपि च श्रवः अन्नं धेहि देहि कीदृशो यः अस्मभ्यं मघवद्भ्यश्च ह
विर्लक्षणान्न कथ्यश्च मत्यं स्तुतिकेश्व॥ ॥इति षष्ठस्याष्टमे द्वाविंशो वर्गः॥ ॥प्र सोमास इति षळृचं नवमं सूक्तं त्रितः ऋषिः
गायत्री छंदः पवमानसोमो देवता १ प्र सोमास इति विपश्चितः मेधाविनः सोमासः सोमाः प्रनयंति प्रगच्छंति पात्राणि प्रति
किं च अपां ऊर्मयः यथा संनतं उद्द्रवंति तद्वत् वनानि महिषा प्रवृद्धा मृगा इव २ अभि द्रोणानीति अभिक्षरंतीति शेषः द्रोणानि
द्रोणकलशान्त प्रतिकेव भ्रवः बभ्रुवर्णाः सोमाः शुक्राः दीप्ताः केन प्रकारेण ऋतस्य अमृतस्य धारया धाराकारेण किं च वाज
मन्नं गोमंतं बुहुगोयुक्तं तं अक्षरन् क्षरंति ३ सुता इंद्रायेति सुताः अभिषुताः सोमाः इंद्राय इंद्रार्थं वायवे वरुणाय मरुद्भ्य
श्च विष्णवे च एषां अर्थं अर्षंति गच्छंति ४ तिस्रो वाच इति तिस्रो वाचः ऋगादिभेदेन स्तुतिः त्रिविधा उदीरते प्रोह्मयंति ऋत्वि
जः धेनवः आश्रिरेण प्राणयिष्यः गावः मिमंति शब्दयंति दोहार्थं हरितवर्णश्च सोमः कनिक्रदत् शब्दं कुर्वन् एति गच्छति क
लशं ५ अभि ब्रह्मीरिति ब्रह्मीः ब्राह्मणप्रेरिताः बृह्वीः महत्यः ऋतस्य यज्ञस्य मातरः निर्मात्र्यः स्तुतयः अभ्यनूषत स्तुवंति
किं दिवः द्युदेवतायाः शिशुं शिशुस्थानीयं सोमं तमेव मर्मृज्यंते मृज्यंति ६ राय इति रायः धनस्य संबंधिनः चतुरः समुद्रा
न् धनपूर्णा इत्यर्थः तादृशान् समुद्रान् अस्मभ्यं अर्षय हे सोम विश्वतः सर्वतः आपवस्व तथा सहस्रिणः अपरिमितान् का
मान् आपवस्व॥ ॥इति षष्ठस्याष्टमे त्रयो विंशो वर्गः॥ ॥प्र सुवान इति षळृचं दशमं सूक्तं त्रितः ऋषिः गायत्री छंदः पवमान
सोमो देवता १ प्र सुवान इति इंदुः सोमः सुवानः सूयमानः हिन्वानः अध्वर्युणा प्रेर्यमाणः धारया तना पवित्रं परि अर्षति गच्छति
प्रक्षः हृक्षादव्यान्यपि रक्षांसि पुराणि ओजसा बलेन विरुजन् विश्लेषयति २ स सुत इंद्रायेति अयं सुतः अभिषुतः सोमः इंद्राय
वायवे वरुणाय मरुद्भ्यो विष्णवे च अर्षति गच्छति ३ वृषाणमिति वृषाणं सस्से क्षारयतं नियतं सोमं वृषभिः रसस्य वर्ष
कैः अद्रिभिः सुन्वंति अक्षमना कर्मणा दुहंति अध्वर्यवः पयः सोमरसं सोमं पयो दुहंतीति हि कर्मकौ यमः ४ भुवन्त्रित
स्यति त्रितस्याप्यां पुत्रस्य ऋषेः यो यं मत्सरः मदकरः सोमः मर्ज्यः मृज्यमानः शुद्धो भवति तस्य या गायतिथा इंद्राय इंद्रपानाय मर्ज्यो

भा.प.
३०२

स्रवन् रूपैः रूपकैश्च दशाबादिभिः हरिः हरितवर्णः सोमः समज्यते ५ अभीमृतस्येति ईं एनं सोमं ऋतस्य विष्टपं यज्ञस्य
श्रयं तादृशं पृश्निमातरः मरुतः अभिदुहन्ते किं प्रियतमं इंद्रादीनां हविः होमसाधनं चारु मनोहरं मरुत्प्रेरित स्तुत्या सोमः
वर्धद्यामवर्धयत् ६ समेनमह्रुता इति समर्षंति संगच्छंते एनं सोमं अह्रुताः अकुटिलाः गिरः अस्मदीयाः स्कृतयः सस्कृतः स
रत्यः ताश्चधेनवः प्राणयित्र्यः स्कृती वाश्रः शब्दयन् अवावशात कामयते सोमः ॥ ॥ इति षष्ठस्याष्टमे चतुर्विंशो वर्गः ॥ ॥
आ न इति षळृचं एकादशं सूक्तं आंगिरसः प्रभुवसुः ऋषिः गायत्री छंदः पवमानसोमो देवता १ आ नः पवस्वेति हे पवमा
न सोम त्वं धारया नः अस्माकं आपवस्व सर्वतः रक्षकं रयिं धनं पृथुं विस्तीर्णं यया धारया ज्योतिः द्योतमानं यज्ञं विदासि लं
भयसि नः अस्माकं २ इंदो समुद्रमिति हे इंदो सोम समुद्रमीरवय उदकं प्रेरक विश्वमेजय विश्वस्य सर्वस्य अस्मत्शत्रोः कं
पयितः सोम त्वं ओजसा त्वदीयेन बलेन नः अस्मभ्यं रायः धनस्य धर्त्ता धारकः पवस्व भव स्वर्थः ३ त्वया वीरेणेति हे वीरव
वीरवन् सोम वीरेण त्वया साधनेन न एतन्यतः संग्राममिच्छतः शत्रून् अभिष्याम अभिभवेम अतो नः अस्माकं वार्यं वरणीयं
धनं अभिक्षर अभिगमय स्वर्थः ४ प्रवाजमिति सोमः वाजमन्नं प्रइष्यति प्रेरयति यजमानेभ्यः किं कुर्वन् सिषासन् यजमाना
न् संभक्तुं इच्छन् इंदुः वाजसाः अन्नस्य दाता ऋषिः सर्वस्य द्रष्टा ब्रता कर्माणि आयुधा युधानि च विद्वान् आ नः ५
तं गीर्भिरिति तं सोमं गीर्भिः स्तुतिभिः सोमा तिरामः किंच वाचमीरवयं वाचः प्रेरयितारं पुनानं पूयमानं तं सोमं वासया
म निवासयामः श्रयणद्रव्ये कीदृश सोमं जनस्य गोपतिं गवां पालकं ६ विश्वो यस्येति विश्वः सर्वो जनः मनुष्यः यजमानः
यस्य सोमस्य व्रते कर्मणि दाधार धारयति मन इति शेषः कीदृशस्य यस्य धर्मणः पते पालकस्य पुनानस्य पूयमानस्य
प्रभूवसोः प्रभूतधनस्य ॥ इति षष्ठस्याष्टमे पंचविंशो वर्गः ॥ असृजीति षळृचं द्वादशं सूक्तं आंगिरसः प्रभूवसुः ऋषिः गाय ३०३४
त्री छंदः पवमानसोमो देवता १ असृजीति रथ्यः यथा रथसंबंधी अश्वः स यथा विसृज्यते तद्वत् चम्वोः अभिषवणफलकयोः
सुतः अभिषुतः सोमः असर्जि सृष्टो भूत् पवित्रे तथा भूतो वाजी वेजनवान् सोमाः व्योश्च काष्मन् काष्ठा देवानां कर्ष

णवति यस्याध्येयं संग्रामेन्यक्रमीत् निरतं कामयति २ स वह्निरिति हे सोम स वह्निः वाहकः जागृविः जागरूकः देववीः देव
कामः त्वं मधुश्चुतं मधुश्रावि कोशं दशापवित्रमतिक्रम्य अभिपवस्व द्रोणकलशं प्रति क्षर ३ स नो ज्योतींषीति हे पूर्व्य पुरा
ण पवमान सोम सः त्वं नः अस्माकं ज्योतींषि दिव्यानि स्थानानि विरोचय प्रकाशय किंच क्रत्वे कर्मणे यागाय दक्षाय बलाय
नः अस्मान् दद्रिनुमेरय ४ शुंभमान इति ऋतायुभिः यज्ञकामैः कृविभिः शुंभमानः अलंक्रीयमाणः तेषामेव गभस्त्योः ह
स्तयोः मृज्यमान सोम अव्यये अविमयवारे वाले दशापवित्रे पवते पूयते ५ स विश्वेति सः अभिषूयमाणः सोमः दाशुषे
हविर्दात्रे विश्वा सर्वाणि वसु वसूनि धनानि पवतां प्रयच्छतु दिव्यानि दिविभवानि पार्थिवा पृथिवीसंबंधीनि आ अंत
रिक्ष्या अंतरिक्षे भवानि च पवतां ६ आ दिव इति हे सोम त्वं स्तोतॄणां अश्वयुः अश्वमिच्छन् गव्ययुः गा इच्छन् वी
रयुः पुत्रानिच्छन् दिवः स्वर्गादिलोकं आरोहसि आरोहति द्वारा देशवशस्यत अन्नस्य पालक ॥ इति षष्ठस्याष्टमे
षड्विंशो वर्गः ॥ स सुत इति षळृचं त्रयोदशं सूक्तं राहूगण ऋषिः गायत्री छंदः पवमानसोमो देवता १ स सुत
इति सः सोमः पीतये इंद्रादिपानाय सुतः अभिषुतः वृषा वर्षणः सन् पवित्रे अर्षति किं कुर्वन् रक्षांसि विघ्नन्
देवयुः देवकामः सन् इति अन्वयः २ स पवित्र इति सः सोमः विचक्षणः सर्वस्य द्रष्टा हरिः हरितवर्णः सोमः धर्णसिः सर्व
स्य धारकः पवित्रे अर्षति गच्छति पश्चात् कनिक्रदत् शब्दं कुर्वन् योनिं स्थानं द्रोणकलशं अभिगच्छति ३ स वाजीति
स वाजी वेगवान् अश्वस्थानीयः दिवः स्वर्गस्य रोचनाः रोचकः पवमानः पूयमानः विधावति कीदृशः रक्षोहा रक्षो ह
ता अव्यय वारं दशापवित्रं अतीत्य च धावति ४ स त्रितस्येति सः सोमः त्रितस्य मदर्षेः यत् अधि सानवि समुच्छ्रिते
यज्ञे पवमानः पूयमानः जामिभिः प्रवृद्धः स्वते गोभिः सदसदितः सन् सूर्यं अरोचयत् प्रकाशितवान् ५ स वृत्रह इ
ति सः सोमः वृत्रहा पापवर्षकः सुतः अभिषुतः वरिवोवित् यस्य धनस्य लंभकः अदाभ्यः अदातृभ्यः अन्येरदं
भनीयः वाजमिव संग्राममश्व इव अमरत् गच्छति ६ स देव इति सः सोमः देवः इंदुः क्लिद्यमानः कविना क्रांतप्रज्ञेना

भा॰ प॰ अध्वर्युणा इषितः प्रेरितः सन् द्रोणानि द्रोणकलशान् अभिधावति अभिगच्छति किमर्थं इंद्राय इंद्रार्थं मंदनाम हान् सद्गति
१०४ समन्वयः॥ ॥इति षष्ठस्याष्टमे सप्तविंशो वर्गः॥ ॥एष इति षळृचं चतुर्दशं सूक्तं राहुगणः ऋषिः गायत्री छंदः पवमानसो
मानसोमो देवता १ एष उ स्य इति स्यः सः प्रसिद्धः एषः अभिषुतः सोमः वृषा वर्षिता रथी रंहणस्वभावः अव्योरेभिः दशाप
वित्रेण अर्षति गच्छति कलशं वाजमन्नं सहस्रिणं सहस्रसंख्याकं यजमानाय प्रयच्छन् गच्छन् द्रोणकलशं तु पूरणे २ एतं त्रि
तस्य त्रित एतं इंदुं क्लिद्यमानं हरिं हरितवर्णं सोमं त्रितस्य ऋषेः योषणः अंगुलयः अद्रिभिः ग्रावभिः हिन्वंति प्रेरयंति इंद्राय इंद्र
स्य पीतये पानाय ३ एतं त्यमिति एतं त्यं तं सोमं हे अध्वर्युभिरीरितः हरणस्वभावाः अंगुलयः अपस्फवः कर्मेच्छवः सत्यः म
र्मृज्यंते शोधयंति याभिरिंद्रस्य मदाय शुंभंति दीप्यंते शोध्यंते इत्यर्थः तमेतमिति संबंधः ४ एष स्य इति स्यः सः एषः सोमः म
नुष्येषु विक्षु प्रजासु यजमानरूपासु अनुष्येरेण आसीद इति श्येनो न स्य इव योषितं गच्छन् अभिगच्छन् जारो न जार इव
स यथा संकेतितः तस्याः कामपूरणाय गच्छति तद्वदित्यर्थः ५ एष स्य इति स्यः सः एष स्य मद्यः मदनिमित्तो रसः अव
चष्टे सवनि अवपश्यति दिवः शिशुः द्युपुत्रः तत्रोत्पत्तेः पुत्रत्वम् स्यपः इंदुः दीप्तः सोमः वारं दशापवित्रं आविशन् एष इति ६
एषु स्य इति एषः स्यः सः सोमः पीतये पानाय सुतः अभिषुतः हरिः हरितवर्णः धर्णसिः धारकः प्रियं स्वमियं प्रियतं योनिं स्था
नं द्रोणकलशं क्रंदन् शब्दयन् अभ्यर्षति गच्छति॥ ॥इति षष्ठस्याष्टमे अष्टाविंशो वर्गः॥ ॥आशुरर्षेति षळृचं पंचद
शं सूक्तं आंगिरसः बृहन्मतिः ऋषिः गायत्री छंदः पवमानसोमो देवता १ आशुरर्षेति हे बृहन्मते महः मते सोम प्रियेण दे
वानां प्रियतमेन धाम्ना शरीरेण धारया आशुः शीघ्रः सन् पर्यर्ष परिगच्छ यत्र देवाः इंद्रादयः वर्तंते इति ब्रुवन् ब्रुवन् उ
त्वारयन् २ परिष्कृण्वन्निति अनिष्कृतं असंस्कृतं यजमानं परिष्कृण्वन् संस्कुर्वन् अनाय यागकर्त्रे इषः अन्नानि यातयन् निर्ग १०४८
मयन् दिवः अंतरिक्षात् वृष्टिं परिस्रव ३ सुत एतीति सुतः अभिषुतः सोमः सन् पवित्रे दशापवित्रे आ अनर्थकः ओजसा
बलेन शोधयन् एति गच्छति कीदृशः सन् विषि द्विसिंदधानः धारयन् विचक्षणः सर्वं पश्यन् विरोचयन् दीपयन् किं देवानि ति

शेषः ४ अयं स इति अयं सोमः पवित्रे आसिच्यमान इति शेषः सिंधोः जलस्याविण्याः ऊर्मा ऊर्मौ संघाते व्यक्षरत् विविधं
क्षरति यः दिवस्परि द्युलोकस्योपरि रघुयामा लघुगमनादित्य प्राप्तो सोप पिति संबंधः आपूरणः ५ आविवासन्निति सु
तः अभिषुतः सोमः परावतः दूरस्थानात् अथो अपि च अर्वावतः अंतिकस्थाच्च देवानां आविवासन् रसेन परिचरणायेत्यर्थः
इंद्राय इंद्रार्थं मधु मधुसदृशः सोमः सिच्यते ६ समीचीना इति समीचीनाः संगताः संगताः स्तोतारः अनूषत स्तुवं
ति किं च सोमं हरिं हरितवर्णं हिन्वति प्रेरयंति अद्रिभिः ग्रावभिः यस्मात् ऋतस्य यज्ञस्य योनौ स्थाने सीदन् निषण्णो
भवत् हे देवाः॥ ॥इति षष्ठस्याष्टमे एकोनत्रिंशो वर्गः॥ ॥वर्गः पुनान इति षळृचं षोडशं सूक्तं आंगिरसः बृहन्मतिः
ऋषिः गायत्री छंदः पवमानसोमो देवता १ पुनान इति पुनानः पूयमानः विचर्षणिः द्रष्टा सोमः विश्वाः सर्वान् मृधः हिं
सकान् शत्रून् अभ्यक्रमीत् आक्रांतवान् विप्रं मेधाविनं धीतिभिः कर्मभिः अभिषवादिभिः शुंभंति दीपयंति अलं
कुर्वंति २ आ योनिमिति अयं अरुणः अरुणवर्णः सोमः योनिं स्थानं द्रोणकलशं आरुहत् आरोहति ततः इंद्रं गमत् ग
च्छति हुतः सन् अयं वृषा वर्षकः फलानां सुतः अभिषुतः सन् गला ध्रुवे सदसि स्थिरे स्थाने यथा लोका स्थ्यु सीदति निवस
ति ३ नू नो रयिमिति हे सोम अभिषुत त्वं इंद्रो दीप्तः अस्मभ्यं नु क्षिप्रं महां महांतं सहस्रिणं सहस्रसंख्यातं रयिं ध
नं क्षिद्वतः आपवस्व सर्वतः परिस्रव ४ विश्वा सोमेति हे सोम पवमान पूयमान इंद्रो दीप्तः त्वं विश्वा सर्वाणि बहुविधानि
द्युम्नानि द्रविणानि आभर आहर विदाः लभय च सहस्रिणीः सहस्रसंख्याकाः इषः अन्नानि इति ५ स नः पुनान इति
हे सोम स त्वं नः अस्मभ्यं स्तोत्रे स्तोतृभ्यः पुनानः पूयमानः अभिषूयमाणः आभर आहर किं रयिं धनं कीदृशं सुवी
र्यं सुपुत्रं किं च जरितुः स्तोतुः गिरः वर्धय ६ पुनान इंद्रो इति हे इंदो सोम पुनानः पूयमानः त्वं आभर किं रयिं धनं कीदृशं
द्विबर्हसं द्यावापृथिव्याख्ययोः परिवृढं वृषन् वर्षक इंद्रो सोम नः अस्मभ्यं उक्थ्यं स्तुत्यं धनं॥ ॥इति षष्ठस्याष्टमे त्रिंशो
वर्गः॥ ॥प्र ये गाव इति षळृचं सप्तदशं सूक्तं काण्वः मेधातिथिः ऋषिः गायत्री छंदः पवमानसोमो देवता १ प्र ये गाव इति

मा·ष·
३०५

ये अभिषुताः सोमाः गावीनउदकानीवनानियथानूर्णं अधः पतंति तद्वत् भूर्णयः भरणशीलाः तेषाः दीधा अयास अयाः
गमनशीला कृष्णांत्वचं कृष्णत्वक् रक्षः तं अपघ्नंतः इंद्रगृह ताः सोमाः प्राक्रमुः तान्स्तवतेति शेषः २ स्रुवितस्येतिस
वितस्य शोभनस्य सोमस्य सेतुं राक्षसबंधनं दुराध्यं रक्षसा रुननबुद्धिं मनामहे स्तुमः कथं अत्रतं कर्मणां दस्यं दस्युं
सास्ह्यासः अभिभवंतः वयं ३ शृण्वेवृष्टेरिति शृण्वे श्रूयते किं सोमस्वनः किमिव वृष्टेः वर्षणस्य स्वनः इव त द्वत् पवमान
स्य पूयमानस्य शुष्मिणः बलवतः तस्मैव विद्युतः दीप्तयः दिवि अंतरिक्षे चरंति ४ आपवस्वेति हे इंदो सोमसूत अभि
षुत स्वं महीं इषं महदन्नं आपवस्व क्षर कीदृशं गोमत् गोभिरुपेतं हिरण्यवत् हिरण्ययुक्तं अश्वावत् वाजवत् बलेश्वा
पेतं ५ सपवस्वेति हे विचर्षणे विद्रष्टः सोम त्वं पवस्व क्षर रसं तथा कृत्वा तेन रसेन महि महत् रोदसी द्यावापृथिव्यो आ
ण आपूरय उषाः पुषसः अहानि रश्मिभिः सूर्यो न सूर्य इव ६ परिण इति हे सोम नः अस्मभ्यं शर्मयंत्या सुखयंत्या धार
या विश्वतः सर्वतः परिसर परितः क्षर रसेव विष्टपं नदी प्रवणरूप मिव॥ ॥इति षष्ठस्याष्टमे एकत्रिंशो वर्गः॥ ॥जनयन्नि
ति षळृचं अष्टदशं सूक्तं कण्वस्य मेधातिथिः ऋषिः गायत्री छंदः पवमान सोमो देवता १ जनयन्निति अयं हरिः सोमः दि
वः द्युसंबंधीनि रोचनानि रोचनानि नक्षत्रग्रहमंडलानि जनयन् तथा अप्सु अंतरिक्षे सूर्यं च जनयन् तथा गाः अधो गं
त्रीः अपः वसानः भूमिं आच्छादयन् अर्पवते इत्युत्तरत्र संबंधः २ एष प्रत्नेनेति एषः सोमः देवः प्रत्नेन पुराणेन मन्मना
मननीयेन स्तोत्रेण युक्तः सुतः अभिषुतः सन् देवेभ्यः परिधरितः धारया स्वीयया पवते ३ वावृधानायेति वावृधा
नाय वर्धमानाय तूर्वये क्षिप्राय वाजसातये अन्नलाभाय पवंते पूयंते सोमाः सहस्रपाजसः अपरिमितबलाः ४ दुहा ३०६
नः प्रत्नमिति प्रत्नमिति पुराणमिव परारसं दुहानः सोमः पवित्रे परिषिच्यते किं च क्रंदन् शब्दं कुर्वन् देवान् अजीज
नत् जनयति स्व समर्पयत्र सोमाः यत्र सोमाभिषूयते तत्र देवाः नियतं प्रादुर्भवंति अतो जनयतीत्युपचर्यते अयं इ
ति ६ अयं सोमः पुनानः पूयमानः विश्वानि सर्वाणि वार्याविरणीयानि धनानि अभ्यर्षति ऋतावृधः यज्ञवर्धकान् देवा

न्यर्षति गामन्नाइति हे सोम सुत स्त्वं नः अस्मभ्यं गोमत् गोभिर्युक्तं वीरवत् पुत्रैरुपेतं अश्वावत् अश्वैर्युक्तं वाजव
त् बलेरुपेतं धनं बृहतीः इषः प्रभूतानि अन्नानि पवस्व प्रयच्छेत्यर्थः॥ ॥इति षष्ठस्याष्टमे द्वात्रिंशो वर्गः॥ ॥यो अत्यइ
वेति षळृचं एकोनविंशं सूक्तं कण्वः मेधातिथि ऋषिः गायत्री छंदः पवमान सोमो देवता १ यो अत्यइवेति यः सोमः
अत्यइव अश्वइव गोभिः वसतीवरीभिः अद्भिः मृज्यते मिश्र्यते किमर्थं मदाय देवानां कीदृशः यः हर्यतः कांतः तं सोमं
गोभिः स्तुतिभिः वासयाम सिषासयामः २ तन्नो विश्वा इति तं इंदुं सोमं नः अस्माकं विश्वाः सर्वाः अवस्युवः रक्षणमि
च्छंत्यः गिरः स्तुतयः पूर्वथा पूर्वमिव इदानीमपि स्तुवंति दीपयंति किमर्थं इंद्राय इंद्रस्य पीतये पानाय ३ पुनानो याती
ति पुनानः पूयमानः हर्यतः कमनीयः सोमः गोभिः परिष्कृतः स्तुतिभिः अलंकृतो यानि कलशं प्रति किमर्थं विप्रस्य मे
धाविनः मेध्यातिथेः मम याथार्थ्य ४ पवमानेति हे पवमान सोम इंदो अस्मभ्यं स्रुश्रियं शोभनया श्रिया युक्तं सहस्र
च बहुदीप्तिं रयिं धनं विदाः देहि इत्यर्थः ५ इंदुरत्य इतियः इंदुः वाजसातृ संग्रामसरणः अत्यो न अश्व इव पवित्रे क
निक्रंति शब्दं करोतियन्नयदा अक्षाः क्षरति देवयुः देवकामः सन् तदा अतिशब्दं करोति आपूरणः ६ पवस्वेति हे सो
म पवस्व क्षर किमर्थं वाजसातये अन्नस्य लाभाय तथा गृणतः स्तुवतः विप्रस्य मम मेध्यातिथेः वृधे वर्धनाय च हे सो
म सुवीर्यं शोभनवीर्योपेतं पुत्रं च रास्व देहि॥ ॥इति षष्ठस्याष्टमे त्रयस्त्रिंशो वर्गः॥ ॥इति ऋग्भाष्ये षष्ठाष्टके अष्टमो
ध्यायः॥ ॥८॥ ६॥ ॥६॥ ॥६॥ ॥६॥ ॥६॥ ॥६॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भा·ष·
१०५

इतिषष्ठाष्टकभाष्यसमाप्तः